वेदान्तसंवत्सरः

(प्रतिदिनम् एकः वेदान्तसन्देशः)

३८५ वेदान्तपवित्रपावनमङ्गलसन्देशरत्नसागरः

लेखकः

वेदान्तभास्करः, वेदान्तसरस्वती, वेदान्तचक्रवर्ती, वेदान्तवारिधिः

सुवर्णकर्नाटक ''राज्योत्सव प्रशस्ति'' पुरस्कृतः

विद्वान् वे॥ के. जि. सुब्रायशर्मा

लेखकानां पूज्यौ मातापितरौ
श्रीमन्तौ सीतालक्ष्मम्मागुण्डप्पशर्माणौ

मह्यमिदं पवित्रं मानवजन्म दत्वा, बाल्ये एव माम् उपनीय, सद्गुरुसेवायै प्रीत्या सद्गुरुपादारविन्दयोः मां समर्प्य, मां सद्गुरु कृपानुग्रहपात्रं कृतवतोः पूज्ययोः मन्मातापित्रोः पवित्रचरणकमलयोः इमं **''वेदान्तसंवत्सरं''** ग्रन्थं भक्त्या समर्पयति लेखकः

दिनाङ्कः ११-७-२००६ **के. जि. सुब्रायशर्मा**

e-mail: kgssharma@gmail.com

मूल्यम्: रूप्यकाणि २००/-

वेदान्तसंवत्सरः

३८५ वेदान्तपरममङ्गळदिव्यसन्देशरत्नसागरः

(प्रतिदिनम् एकः उपनिषत्सन्देशः)

लेखकः

अध्यात्मविद्याप्रवीणः, वेदविद्याभूषणम्, अद्वैतज्ञानसिन्धुः, वेदश्रीः, विद्याविधिनिधिः, वेदान्तवारिधिः, वेदान्तभास्करः, वेदान्तसरस्वती, वेदान्तकेसरी, वेदान्तसार्वभौमः वेदान्तकामधेनुः वेदान्तराजहंसः, विवेकभास्करः, शास्त्रनिधिः, अद्वैतवेदान्त केसरी, अद्वैतज्ञानतेजाः, वेदान्तसागरः, वेदान्तचिन्तामणिः, वेदान्तरत्नम्, अद्वैतसारतिलकः, वेदान्तचक्रवर्ती, वेदान्तप्रभाकरः, अद्वैतवेदान्तवारिधिः अद्वैतवेदान्तचूडामणिः, अद्वैतवेदतिलकः, अद्वैतवेदान्तविचक्षणः, वेदान्तसारतिलकः, वेदागमविद्यासागरः,

१००८ श्री सुशमीन्द्रतीर्थस्वामीजि "**राष्ट्रीय ज्ञान पुरस्कार**" तथा सुवर्णकर्नाटक "**राज्य प्रशस्ति**" २००५ पुरस्कृतः

विद्वान् वेदब्रह्मश्री के. जि. सुब्रायशर्मा, M.A.,

प्रकाशकः

श्री नित्यानन्द प्रकाशनम्

अशोकनगरम्, बेङ्गलूरु-५६० ०५०

२००६

VEDAANTA SAMVATSARA in Sanskrit
A Collection of 385 Marvellous Vedaanta Messages
(One Upanishad Message per day)
by Vidwan Ve॥ K. G. SUBRAYA SHARMA, M.A.,

Published by **Sri Nityananda Prakashana**
No. 46, 4th Cross, Ashoknagar, BSK 1st Stage,
Bangalore - 560 050. Ph: 2652 6027, 5767 0191

Pages : lxiv + 368 + ३२ = 464

© All rights Reserved by the Author

First Edition : July 2006; 3000 Copies

Price : Rs. 200/-

For Copies Please Contact :

Author : Vidwan K. G. SUBRAYA SHARMA, M.A.,
No. 135, Surveyor Street, Basavanagudi
Bangalore-560 004. **Mobile: 98862 81622**
e-mail: kgssharma@gmail.com

Publisher : Sri Nithyananda Prakashana
46, 4th Cross, Ashoknagar
BSK 1st Stage, Bangalore-560 050

Book Seller : Motilal Banarsi Dass
(In all Branches)

मौल्यम् : शतद्वयं रूप्यकाणि

Printed by :
Sri Gurudutt Printers
Bangalore - 560 026.
Phone : 2674 5230, 2674 7081

प्रकाशकस्य निवेदनम्

नवनागरिकताप्रभावेण सर्वत्रापि इदानीं धनप्रवाहः प्रवहति। सर्वत्रापि ग्रामेषु पल्लीषु नगरेषु च भोग्यवस्तूनि यथेच्छं सुलभतया लभ्यन्ते। अपि तु न कुत्रापि शान्तिर्वा सुखं वा लभ्यते। कुतः? शुद्धान्तःकरणाभावात्, परस्परप्रीतिसौहार्दाभावात्, सद्विचाराभावात्, वेदान्तचिन्तनाभावाच्च। उपनिषद्विचारचिन्तनादेव सर्वेषां सर्वत्र शान्तिः, सुखं, तृप्तिः, आनन्दः लभ्येत, नान्यथा॥

एतत् सर्वं मनसि निधाय मन्मित्रवर्याः विद्वासः वेदमूर्तयः श्रीमन्तः के. जि. सुब्रायशर्माणः "**शाङ्करसंवत्सर**" तथा "**वेदान्तसंवत्सरा**"ख्यौ द्वौ ग्रन्थौ कन्नडभाषायां रचितवन्तः। तयोः कृतिरत्नयोः जनप्रियत्वं तु अभूतपूर्वमेव, अद्भुतमेव॥

इदानीं गीर्वाणभाषायां **वेदान्तसंवत्सरं** ग्रन्थं लिखितवन्तः श्रीशर्माणः इति प्रमोदस्थानमेतत्। श्रीशर्मणां लेखनसङ्कल्पमात्रादेव सर्वं कार्यं निर्विघ्नं निर्वृत्तम्। केवलं पञ्चभिरेव मासैः एतत् ग्रन्थरत्नं रचित, मुद्रितं प्रकाशित च इत्येतत् सद्गुरुभक्ताः श्रीसुब्रायशर्माणः सत्यसन्धाः, सत्यसङ्कल्पाश्च इति द्योतयति॥

एतद्ग्रन्थमुद्रणव्ययं सन्तोषेण समर्पितवते श्रीसुब्रायशर्मसन्मित्राय सद्गुरुभक्ताय ब्रह्मजिज्ञासवे श्रीमते सुभानुसक्सेनशर्मणे, ग्रन्थरत्नं सुन्दरतया लिखितवते श्रीमते सुब्रायशर्मणे च मम कृतज्ञतासहिताः प्रणामाः समुल्लसन्ताम्। प्रत्यहं पारायणद्वारा जिज्ञासवो जनाः परमां शान्तिम् आप्नुयुः इति आशासे॥

दिनाङ्कः 11-7-2006
दूरवाणी : 080-2652 6027

बि. एन्. नटराजशर्मा
श्री नित्यानन्द प्रकाशनम्

लेखकस्य विनयोक्तिः

नमः श्रीगुरुराजाय यतिराजाय तेजसे।
सच्चिदानन्दयोगीन्द्रज्ञानिराजाय धीमते॥

मह्यम् इदं परमपवित्रं श्रेष्ठं मङ्गळं दुर्लभम् आत्मज्ञानप्राप्ति साधनभूतं च मानवजन्म अनुगृहीतवतोः मम **पूज्यमातापित्रोः** पवित्रपादारविन्देषु मम कृतज्ञताभक्तिपूर्वकाणि नमांसि भूयांसि प्रप्रथमतया समर्पयामि। प्रातःस्मरणीयानां **परमपूज्यानां श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसद्गुरूणां** परमपावन चरणकमल कणधूळिरयं लेखको जनः, (१९५९ तः १९७५) षोडश-संवत्सरपर्यन्तं सद्गुरुसेवातत्परतया कृतेन अन्वर्थतपसा सद्गुरु-कृपानुग्रहपात्रभूतः सद्गुरुप्रदर्शितवेदान्तसन्मार्गेणैव स्वीयं जीवनं यापयन् वेदान्ताध्ययनाध्यापनयोरेव जन्मसार्थक्यं कुर्वन् वर्तते॥

अनेकपूर्वजन्मसुकृतेन पुण्यराशिना अस्मिन् जन्मनि मम श्रोत्रियब्रह्मनिष्ठसद्गुरुप्राप्तिः, सद्गुरुसेवासौभाग्यम्, सद्गुरुसहवासः, अन्वर्थान्तेवासित्वम्, सद्गुरुकृपाशीर्वादः, सद्गुरुभ्य एव साक्षात् परिशुद्धवेदान्ताध्ययनम्, आङ्ग्लभाषा संस्कृतभाषाध्ययनम्, व्यवहारज्ञानम्, वेदान्तप्रवचनोपन्यासकला—इत्याद्याः सर्वा अपि सम्पदः सद्गुरुभ्यः एव प्राप्ताः सन्ति। **सद्गुरव एव मम सर्वस्वम्। सर्वं गुरुमयं जगत्, गुरुप्रसादः सकलं ददाति** इत्ययमेव मम बीजमन्त्रः। **नमो नमः सद्गुरुपादुकाभ्याम्**॥

स्वाध्ययनाय मया प्रत्यहं उपनिषद्ग्राष्याणि अधीयमानानि सन्ति। सद्गुरुप्रेरणया, सद्गुरुसङ्कल्पानुसारेण च कर्नाटकभाषायां **वेदान्तसंवत्सरः** इत्यभिधानेन एको ग्रन्थः २००४ तमे संवत्सरे

लिखितः। स च ग्रन्थः सद्गुरुकृपापात्रैः मन्मित्रवर्गैः तत्त्वजिज्ञासुभिः उदारहृदयैः अनेकैः अवलोकितः परिपोषितश्च सन् १२,६०० प्रतिभिः मुद्रापितः प्रचारितश्च इति प्रमोदस्थानमेतत्। तमिमं ग्रन्थं समवलोक्य सम्परिशील्य अनेके सरस्वतीसुपुत्राः सहृदयाः विद्वांसः प्रोत्साहरूपेण स्वाभिप्रायान् मह्यं प्रेषितवन्तः सन्ति। सहस्राधिकाः अध्येतारश्च एनं ग्रन्थं पठित्वा दूरवाणीद्वारा, पत्रद्वारा, साक्षाद् वाग्द्वारेण च स्वसन्तोषातिशयं समभिव्यक्तवन्तः। **सर्वमप्येतत् नूनं सद्गुरुसेवासत्फलमेवेत्यहं भावये**॥

संस्कृतभाषाभिज्ञानाम् अपि तु अनभिज्ञातकर्नाटकभाषाणाम् औत्तरभारतीयानां संन्यासिनां साधूनां वेदान्तचिन्तनपराणां मुमुक्षूणां तथा जिज्ञासूनामपि यथा अयं **वेदान्तसंवत्सराख्यो** ग्रन्थः पारायणाय स्वाध्यायाय चिन्तनाय मननाय च उपयोगी भवति तथा गीर्वाणभाषायामपि करणीय इति सद्गुरुप्रेरणा मम मनसि आसीत्। केचन सुहृदः 'संस्कृतभाषायामपि अयं ग्रन्थः अनूद्यते चेत् तदा संस्कृतभाषाभिज्ञानामपि प्रयोजनाय भवेत्' इति वदन्तः आसन्॥

एतस्मिन् अन्तरे मम मित्रवर्यः सुभानुसक्सेनशर्मा, सुहृद्वरिष्ठेन सद्गुरुभक्तेन सि. ए. सञ्जीवमूर्तिशर्मणा इण्टर्नेट् द्वारा मम सम्परिचायितः। श्रिमता सञ्जीवमूर्तिशर्मणा ज्ञापितमदभिप्रायः मित्रवर्यः श्रीमान् सुभानुसक्सेनशर्मा अचिरेणैव ''संस्कृतभाषायाम् **वेदान्तसंवत्सरग्रन्थः** कृपया अनूद्यताम्। सम्पूर्णो ग्रन्थमुद्रणव्ययः मया प्रीत्या सम्प्रदीयते। अनुवादकार्यं च कृपया शीघ्रमेव प्रारभ्यताम्'' इति उक्तवान्। एवं मयि जातः सद्गुरुसङ्कल्पः सञ्जीवमूर्तिद्वारा सुभानुसक्सेनशर्माणं प्रवेश्य इदानीम् एतत् **सुन्दरकृतिरत्नरूपेण संस्कृतवेदान्तसंवत्सरग्रन्थशरीरेण**

अवतीर्णोऽस्ति। **अघटितघटनापटीयसी खलु सद्गुरुकृपा नाम!** एवमस्य ग्रन्थरत्नस्य आविर्भूत्यै रचनाय मुद्रणाय प्रकटनाय च सर्वथा साहाय्यं कृतवद्भ्यां सन्मित्रपुङ्गवाभ्यां **श्री सञ्जीवमूर्ति-सुभानुसक्सेनशर्मभ्यां** सपरिवाराभ्यां सद्गुरुपरमेश्वरौ उभावपि दीर्घायुरारोग्यादिलौकिकसम्पदः ज्ञानभक्तिवैराग्याद्याध्यात्मिक-सम्पदश्च दत्वा तौ समनुगृह्णीताम् इति अहं भक्त्या प्रार्थये॥

ग्रन्थविषये स्वाभिप्रायाविष्करणद्वारा मयि वात्सल्यवृष्टिं कृतवद्भ्यः सर्वेभ्योऽपि महद्भ्यः पण्डितेभ्यः मम कृतज्ञतापूर्णाः प्रणतयः समुल्लसन्ताम्॥

इदं पुस्तकं सुन्दरतया मुद्रापितवद्भ्यां मन्मित्राभ्यां गुरुदत् प्रिण्टर्स् स्वामिभ्यां मोहनकुमारसत्यनारायणाभ्यां तथा ग्रन्थ प्रकाशकाय सद्गुरुभक्ताय प्रियमित्रवर्याय 'श्री नित्यानन्दप्रकाशन' स्वामिने बि. एन्. नटराजशर्मणे भगवान् वेदान्तनारायणः सकलाः सम्पदः ददातु इति प्रार्थये। तथा च मम कृतज्ञतापूर्वकान् धन्यवादान् एतेभ्यः सर्वेभ्योऽपि अहमत्र समर्पयामि॥

अनया कृत्या यदि किञ्चिदपि तत्त्वजिज्ञासूनां मुमुक्षूणां साधकानां प्रयोजनं भवति, तर्हि आत्मानम् अहं धन्यं मन्ये। मदीयाः सर्वेऽपि प्रयत्नाः सार्थक्यं यान्ति च इत्यहम् भावयामि॥

गुरुप्रसादः सकलं ददाति, नमो नमः सद्गुरुपादुकाभ्याम्

मङ्गळं सच्चिदानन्दयोगिराजाय वेधसे।
मङ्गळं मुक्तराजाय गुरुराजाय मङ्गळम्॥

No. 135, Surveyor Street
Basavanagudi, Bangalore-560 004
Mobile: 98862 81622
e-mail: kgssharma@gmail.com

के. जि. सुब्रायशर्मा
सद्गुरुपादरेणुः
दिनाङ्कः 11-7-2006

प्रायोजकनिवेदनम्

''अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य'' इति भगवता भाष्यकारेण ब्रह्मसूत्रभाष्ये (ब्र. सू. भा. १-१-४) उदाहृतम्। शास्त्रेषु विद्यामार्गः स्पष्टम् दर्शितः। ये के मुमुक्षवः, अहङ्कारं हित्वा, अध्यात्मयोगेन निवृत्तिमार्गम् स्वीकुर्वन्ति, तेषां कृते केवलं ''तत्त्वमसि'' श्रवणमात्रेणैव ब्रह्मविद्या तत्क्षणमेव उत्पद्यते। अन्येषां जनानां कृते मननिदिध्यासनद्वयमपि आवश्यकम्॥

''वेदान्तसंवत्सर'' पुस्तकद्वारेण, प्रतिनित्यं वेदान्तमननं निदिध्यासनं च कर्तुं वयं सर्वे इदानीं शक्नुमः। विदुषा वेदमूर्तिना के. जि. सुब्रायशर्मणा अतिसुन्दरतया अत्र ग्रन्थे वेदान्तरहस्यं प्रदर्शितम्। प्रतिदिनं एकैकं वेदान्तवाक्यं स्वीकृत्य श्री के. जि. सुब्रायशर्मा सरळसंस्कृतेन मन्त्रार्थं वर्णयति। वयं अतीव कृतज्ञाः यत् श्री के. जि. सुब्रायशर्मणा इदं महत्कार्यं कृतम् इति॥

इदं पुस्तकं केवलं संस्कृतपण्डितेभ्यो नास्ति। ये केचित् जनाः वेदान्तसारम् अवगन्तुं, संस्कृतं पठितुं च इच्छन्ति, तेषां कृते इदं **''वेदान्तसंवत्सर''** पुस्तकम् अत्यन्तम् उपयोगाय भवति। अपेक्षा अस्ति यत् सर्वे अध्यापकाः अपि एतस्य पुस्तकस्य प्रयोजनं सर्वेषां संस्कृतछात्राणां कृते कुर्वन्तु इति॥

इति वयं इदं **''वेदान्तसंवत्सर''** पुस्तकं संस्कृतभाषायां सर्वेभ्यो वेदान्तजिज्ञासुभ्यो मुमुक्षुजनेभ्यः समर्पयामः॥

ता॥ ३०-५-२००६ **सुभानुसक्सेन शर्मा**

इङ्ग्लेण्ड् e-mail : subhanu@hotmail.com

के. जि. सुब्रायशर्मणां सात्त्विकसाहसचतुष्टयम्

विद्यालङ्कारः, शास्त्रचूडामणिः, सङ्गीतकलारत्नम्, शास्त्रनिधिः
प्रोफेसर् एस्. के. रामचन्द्रराव्, बेङ्गळूरु-११
(संस्कृतानुवादः)

सात्त्विकसाहसमिदं "**वेदान्तसंवत्सराख्यं**" पुस्तकम्, अभूतपूर्वं च। परमाश्चर्यमेवैतत् यत् अद्वैतवेदान्तमधिकृत्य नूतनरीत्या रचितमिदं पुस्तकं त्रयोदशसहस्रप्रतिभिः मुद्रितमिति। सर्वाश्च प्रतयः मुद्रणात् पूर्वमेव, प्रकाशनात् पूर्वमेव वाचकैः आरक्षिताः इति तु अत्यन्तमेव आश्चर्यम्! कदा वा वेदान्ताः एतत्पूर्वम् एतावज्जनप्रिया आसन्? अस्मत्प्रियमित्रैः **के. जि. सुब्रायशर्मभिः** रचितोऽयं **वेदान्तसंवत्सराख्यो** ग्रन्थः २९-८-२००४ तमे भानुवासरे सायं गोधूळिलग्ने बेङ्गळूरु महानगर्यां बसवनगुडि विभागे **रामकृष्णमठे परमपूज्यैः श्रीश्रीहर्षानन्दपुरी स्वामिचरणैः** लोकाय समर्पितोऽभूत्॥

ब्रह्मीभूतानां "**कर्नाटक शङ्कराचार्याः**" इत्येव नाम्ना सुप्रसिद्धानां परमपूज्यानां **श्रीश्रीसच्चिदानन्देन्द्रसरस्वती स्वामिनां** तपसः फलमेव हि **अध्यात्मप्रकाशकार्यालयो** नाम? सर्वेषामपि सुविदितमेवेदं यत् शुद्धशाङ्करसिद्धान्तसमर्थनाय इमां संस्थां संस्थाप्य एतत्संस्थाद्वारा कन्नड, संस्कृत, आङ्ग्लभाषासु शताधिकान् ग्रन्थान् श्री श्री स्वामिपादाः प्रकटितवन्तः इति। "आ सुप्तेः आ मृतेः कालं नयेद् वेदान्तचिन्तया" इतीमां सूक्तिं स्वजीवने श्रीस्वामिनः पालितवन्तः॥

एतेषु महास्वामिपादेषु श्री **सुब्रायशर्माणः** आत्मनः दशमे

एव वयसि अन्तेवासित्वम् आरभ्य षोडश संवत्सरान् (१९५९-१९७५) सद्गुरुसेवां कुर्वन्त एव वेदान्तग्रन्थान् अधीतवन्तः। **सद्गुरवः सुब्रायशर्मभ्यः सकलान्यपि वेदान्तरहस्यानि प्रीत्या उपदिश्य अनुग्रहं कृतवन्तः। श्री शर्मणां स्वगुरुषु विद्यमाना श्रद्धा, निष्ठा, भक्तिश्च अन्यादृशी एव।** स्वीयैः अध्ययनश्रमप्रयत्नैः प्राप्तम् अघटितघटनापटीयसीरूपं सामर्थ्यं लोकोत्तरमिव इदानीं विराजमानमपि सद्गुरुकृपामहिमफलमेव इति श्रीशर्माणः मन्यन्ते। स्वसाहससिद्धीनां सर्वासामपि सद्गुरु-कृपाशीर्वाद एव मूलमिति दृढविश्वासित्वादेव **श्रीशर्मसु विनयशीलता सरळस्वभावता, सहृदयतादयो गुणाः सहजतया वसन्ति। सद्गुरुकारुण्यं नाम किं वा न कुर्यात्?**

शास्त्रवैदुष्यम् एकत्र, व्यक्तित्वसौन्दर्यम् अपरत्र; अपराजिता क्रियाशीलता अन्यत्र, सततम् उद्यमशीलता अपरत्र। श्रीसुब्रायशर्माणः सद्गुरुकृपानुग्रहलब्धम् **अध्यात्मप्रकाश बेङ्गळूरु शाखाकार्यालयं समुत्थापितवन्तः।** अव्याहतैः वेदान्तप्रवचनैः इमम् आश्रमम् अत्यन्तजनप्रियपात्रं कृतवन्तः। सामान्यानाम् अरोचकस्य वेदान्तस्यैव प्रचारार्थमेव संस्थापिता एषा अध्यात्म-प्रकाशकार्यालयाख्या संस्था अद्य सामान्यजनानामपि **विशेष सन्तोषपात्रमित्येतत् श्री सुब्रायशर्मणां प्रथमं साहसम्।**॥

''**शङ्करभास्कर**''नाम्ना आध्यात्मिकत्रैमासिक पत्रिका-मेकाम् अध्यात्मप्रकाशकार्यालयात् प्रारभ्य तां पत्रिकां देशविदेशेषु विश्वव्यापिनीं कृत्वा अत्यन्तजनप्रियां कृतवन्तः इति **श्री शर्मणां द्वितीयं साहसम्**। अनया ''शङ्करभास्कर'' पत्रिकया सम्पादितं यशस्तु पत्रिकोद्यमप्रपञ्चे एव अनितरसाधारणम् अभूतपूर्वं च।

श्री सुब्रायशर्मणां तपःफलमेवैतत् इति न पार्थक्येन वक्तव्यमस्ति। **'शङ्करभास्कर'** पत्रिकासंस्थापने प्रचारणे च श्रीशर्माणः एव एकाकिनः क्रियाशीलाः॥

श्री शर्मणां **तृतीयं साहसं** नाम **''शाङ्कर संवत्सराख्यो''** ग्रन्थः। श्री शङ्कराचार्याणाम् उपदेशवाक्यानि स्वीकृत्य संवत्सरे प्रतिदिनं मननानुकूलानि करोत्ययं ग्रन्थः। श्री शङ्कराचार्यसूक्ति-सङ्कलनात्मिका अपूर्वा कृतिरियम्। **शाङ्करप्रस्थानत्रयभाष्याणां** परिचयं सङ्क्षेपतः सामान्यानामपि करोत्ययं ग्रन्थः **''शाङ्कर-संवत्सरा''**ख्यः। वेदान्तानां प्रौढसन्देशान् अत्यन्त सुलभतया जनमनस्सु प्रवेशयति अयं ग्रन्थः! एतस्मिन् अपूर्वक्रमे ग्रन्थान्तरं वा प्रयत्नान्तरं वा नैवास्ति। **स्वगुरुप्रदर्शितमार्गे एव गच्छन्तः श्री सुब्रायशर्माणः जयं साधितवन्तः**॥

अनेनैव मार्गेण इदानीं रचितः **''वेदान्तसंवत्सराख्यो''** ग्रन्थः श्री शर्मणां **चतुर्थं साहसम्**। वेदान्ता नाम वेदवाङ्मयस्य अन्तिमो भागः निर्णायकश्च भागः। ता एव **उपनिषदः**। प्रस्थानत्रय कल्पनायाम् आद्या एव **उपनिषदः**। उपनिषदां मीमांसारूपाणि बादरायणीयानि **सूत्राणि** द्वितीयानि। उपनिषदां सङ्ग्रहरूपा सरळ निरूपणरूपा च **भगवद्गीता** तृतीयस्थानपात्रभूतास्ति। उपनिषद एव वेदान्तस्य आश्रयः आकरश्च। श्रीशङ्कराचार्याः दशानाम् उपनिषदां भाष्याणि रचितवन्तः। इतरास्तु चतस्रः उपनिषदः प्रमाणत्वेन स्वीयभाष्येषु उदाहृतवन्तः श्रीशङ्कराचार्याः। **श्रीसुब्रायशर्माणः एताभ्यः चतुर्दशभ्यः उपनिषद्भ्यः मननीयान् मन्त्रान् उपचित्य अत्र वेदान्तसंवत्सरे** ग्रन्थरत्ने संगृहीतवन्तः॥

सङ्कलनक्रमश्च स्वारस्यावहः। प्रत्यहं पारायणार्थम् उपनिषद् वाक्यमेकम्, आसक्तानां तु दिनपूर्णं मननार्थम्, संवत्सरे ३६६ दिनानामपि ३६६ उपनिषद्वाक्यानि अत्र ग्रन्थे संगृहीतानि सन्ति। सप्ताहे च प्रतिदिनम् एकम् उपनिषद्वाक्यम्। मूलमन्त्राश्च सरळविवरणसहिताः संगृहीताः। चान्द्रमानपञ्चाङ्गानुसारेण चैत्र-मासात् फाल्गुनमासपर्यन्तं प्रतिमासम् एकम् उपनिषद्वाक्यमपि संगृहीतमस्मिन् कृतिरत्ने। अनन्तरं च क्रिस्तशकानुसारेण, जनवरी प्रथमदिनाङ्कादारभ्य डिसेम्बर् ३१ दिनाङ्कपर्यन्तमपि प्रत्यहं एकैकम् उपनिषद्वाक्यं संगृहीतमस्ति। एवम् ३६६ + ७ + १२ आहत्य ३८५ उपनिषद्वाक्यानि अत्र संगृहीतानि सन्ति। विशिष्टः सन्देशः अत्र वाचकेभ्यः समर्प्यते॥

प्रतिपुटं च उपरिभागे "**ओं वेदान्तभास्कराय नमः**" इति वाक्यमेकं दत्तमस्ति। जपार्थं वा पारायणार्थं वा एतद्वाक्यं प्रयोक्तुं शक्यते। अनन्तरं च लेखकैरेव रचितः, अनुष्टुप्छन्दसि विद्यमानः "**इति वेदान्तभास्करः**" इति पर्यवसानरूपः श्लोकः दृश्यते। अस्मिन् श्लोके तद्दिनस्य मन्त्रसन्देशस्य तात्पर्यं सूच्यते। एवं प्रत्यहमपि "**वेदान्तभास्कर**"नामावळिः, अनुष्टुप्श्लोकः, वेदान्तमन्त्रः विवरणं च इत्येतत् सर्वमपि अत्र ग्रन्थे उपलभ्यते॥

दशनिमेषैरैव प्रतिदिनं पठितुं शक्यानि भवन्ति वाक्यानि। '**वेदान्तभास्कर**' नामावळिः श्लोकश्च कण्ठीकर्तुं शक्यते। उपनिषद्वाक्यानि पठितानि चेत् मननीयानि भवन्ति। एवंक्रमेण प्रत्यहं वाचकानां संवत्सरान्ते **चतुर्दशानामपि उपनिषदां** परिचयः सम्यगेव भवति। समग्रस्यापि उपनिषद्वाङ्मयस्य तात्पर्यं, श्रमं विना सुविज्ञातं भवति। **इदं पुस्तकमेकमेव गुरुस्थाने वर्तते।**

आस्वादिताः सन्देशाः अनुसन्धेया भवन्ति। पुनः पुनः अध्ययनेन संशयनिवारणं च भवत्येव। उपनिषद्विषये सामान्यानां जनानां विद्यमानं भयं तु एतस्य ग्रन्थस्य अध्ययनेन अपाकृतं भवति। उपनिषन्मन्त्रस्य तात्पर्यावबोधकं शिरोवाख्यं च वाचकानां प्रबोधकरमस्ति। मन्त्रसन्देशस्य सारस्तु श्री सुब्रायशर्मभिः अत्र सूपपादितोऽस्ति॥

वादविवादयोः खण्डनमण्डनयोः तर्कवितर्कयोश्च अत्र नैव अवकाशो दत्तः इत्येव अस्य पुस्तकस्य विशेषो नाम। मन्त्रार्थविवरणेन सुलभतया तात्पर्यार्थः बोध्यते। अत्र दृश्यमानो विवरणक्रमः स्वगुरुभिः दर्शितः स्वगुरुसम्मतश्च। महनीयानां स्वगुरूणां कैङ्कर्यमपि इदमेवासीत्। **स्वगुरूणाम् आशयस्तु श्रीशर्मभिः सम्यग् गृहीतोऽस्ति इति तु अनेन ग्रन्थेन स्पष्टतया ज्ञायते। ''गुरुं प्रकाशयेद् धीमान्''** इतिवचस्तु श्री सुब्रायशर्मणां विषये सार्थकमेव भवति॥

ग्रन्थरचनविषये श्री सुब्रायशर्मणां श्रद्धा, जागरूकता च दृश्यते। अन्तरङ्गस्य **शिरोनामानि**, ग्रन्थवैशिष्ट्यबोधकं **परिशिष्टम्**, चतुर्दशोपनिषदां **शान्तिमन्त्राः, शान्तिमन्त्रार्थः, अनुक्रमणिकाः**,—इति सर्वमप्येतत् सुन्दरं सार्थकं चास्ति। श्री शर्मणां श्रद्धानिष्ठादिहेतुना अत्र ग्रन्थे नैकोऽपि मुद्रणदोषो दृश्यते॥

सर्वथापि तु श्री के. जि. सुब्रायशर्मसु विद्यमाना स्वाभाविकी सरळता, मुक्तमनस्त्वम्, समर्थसद्गुरुसहवास-जनितः सद्गुरुकृपापोषितश्च संस्कारः, सततम् उद्यमशीलता— इत्यादिभिः सद्गुणैः समर्थं व्यक्तित्वं सिद्धमस्ति। स्वसद्गुरुभिः सङ्कल्पितं स्वीकृतं च कार्यं सम्यक् अनुवर्तितुं प्रवर्तितुं

श्री शर्माणः कटिबद्धाः सन्तः तात्पर्येण श्रद्धया च श्राम्यन्ति। इदानीं प्रकृतोऽयं वेदान्तसंवत्सराख्यो ग्रन्थोऽपि श्रीशर्मणां तपःश्रमफलमेव, श्रीशर्मणां सामर्थ्यस्य निदर्शनमेव॥

सामान्यानां लौकिकजनानां वेदान्तेषु आसक्तिजननं नाम, श्रद्धोत्पादनं नाम बहुदुष्करमेवेदं कार्यम्, तथापि अस्य कार्यस्य अवश्यकताम् अवगम्य श्री शर्माणः अस्मिन् विषये यशस्विनः संजाताः सन्ति। लक्ष्यसाधनं मुख्यम्, व्यक्तिविशेषस्तु निमित्तमात्रः। अपि तु तादृशव्यक्तिविशेषः सुब्रायशर्मा दैवेनैव स्वीकृतः। श्री के. जि. सुब्रायशर्मणां व्यक्तिगतं स्वारस्यं तु अत्रैव॥

श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीमहास्वामिनां साक्षात् शिष्याः श्रीसुब्रायशर्माणः। श्रीशर्मसु कापट्यरहितम् अन्तःकरणम्, अमायिकं मनः, विनयः, प्रामाणिकता, शुद्धचारित्र्यं च स्वाभाविकमस्ति। इदमेव खलु आङ्ग्लभाषायाम् character इति कथ्यते? श्रीशर्मणां साहसफलं वा स्वगुरुसङ्कल्पप्रभावो वा यत्किञ्चित् भवतु नाम। श्रीसुब्रायशर्मभिः अरब्धया ''शंकरभास्कर'' वेदान्तपत्रिकया वेदान्तस्य शुक्रदशा प्रापितास्ति। शर्मणां वदनं वेदान्तः, वचनं वेदान्तः, अनुष्ठानमपि वेदान्तः, करणमपि वेदान्तकार्यमेव। श्रीशर्मणां चारित्र्यशुद्धिः, सज्जनिकत्वं, गुरुभक्तिः, परमार्थचिन्तनं, सरळजीवनम्, उद्यमशीलता, विनयः इत्येते गुणाः शर्मणां व्यक्तित्वस्य महिमानं प्रदर्शयन्ति॥

दिनाङ्कः २९-८-२००४ **प्रोफेसर् एस्. के. रामचन्द्रराव्**

पीठिका

सच्चिदानन्दसच्छिष्यसम्प्रदायप्रबोधिना।
शर्मणा सुब्बरायेण रचितं ब्रह्मवेदिना॥

प्राक्कथनम्—बाल्यम्

अस्ति कर्णाटके मण्ड्याजिल्लायां **किक्केरीति** कश्चन ग्रामः। तत्र **सीताम्बा गुण्डप्प** इति सद्गुरुचरणसेवाधुरन्धरौ **श्रीराम**नामजपासक्तौ दम्पती आस्ताम्। तयोरयं सुपुत्रः **राजु**रिति व्यवहारनाम्ना युक्तः के. जि. सुब्रह्मण्यशर्मा 20-12-1947 तमे क्रिस्त शके अवतीर्णः। बाल्ये एव उपनीतः सुब्रह्मण्यः, यदा एकादशवर्षीयः तदा तस्य पिता गुण्डप्पमहोदयः स्वपुत्रं, **होळेनरसीपुरे अध्यात्मप्रकाशकुटीरे विराजमानाय अभिनवशङ्करूपाय श्रीश्रीसच्चिदानन्देन्द्राय परमहंस-परिव्राजकाचार्याय ब्रह्मनिष्ठाय शिष्यरूपमुपायनं** न्यवेदयत्॥

तत्रैव आश्रमे वर्धमानः श्री के. जि. सुब्रह्मण्यशर्मा 1959 क्रिस्तशाक प्रभृति 1975 पर्यन्तं षोडश वर्षाणि **श्रीसद्गुरु चरणसेवाम् अहर्निशम् अनुतिष्ठन्** ब्रह्मचर्यं शास्त्रोक्तविधिना पालयन् श्रीशङ्करभगवत्पादविरचितं **प्रस्थानत्रयभाष्यं** समग्रम् **अन्तेवासी** सन् **श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीशङ्कराचार्येभ्यः अध्यारोपापवादन्यायेन** वेदान्तान् प्रणिपातेन परिप्रश्नेन सेवया अध्यैष्ट। सद्गुरुसन्निधौ शिक्षितः, कराभ्यां तथा दण्डेन ताडितः अयं बालकः के. जि. सुब्रायशर्मा ब्रह्मचारी, लौकिकविद्यां, गणितं, आङ्ग्लभाषां, लौकिकशास्त्रीयव्यवहारकौशलं, मुद्रण-

कार्याणि, कार्यदर्शिकार्यनिर्वहणं, प्रवचनकौशल्यम् इत्यादि सकलमपि साक्षात् सद्गुरुमुखादेव समधिगतवान्॥

श्रीश्रीसच्चिदानन्देन्द्रसद्गुरुसेवया तेषां सद्गुरूणां सम्पूर्ण परमानुग्रहं संप्राप्य, **लोकोत्तरं श्रोत्रियत्वं ब्रह्मनिष्ठत्वं श्री शङ्करभगवत्पादकृपापात्रत्वं शाङ्करभाष्यपाठप्रवक्तृत्वं च,** अस्मिन् प्रपञ्चे अद्वितीयम् **अध्यारोपापवादवेदान्तन्यायरूप सत्सम्प्रदायाचार्यस्थानं** च अवाप्नोत् अयं के. जि. सुब्रह्मण्यशर्मा॥

गुरुकुलवासः सद्गुरुसेवा च

यदा गुरुकुले श्री के. जि. सुब्रह्मण्यशर्मा आसीत् तदा अहमपि सब्रह्मचारी सन् पञ्चषान् संवत्सरान् होळेनरसीपुरस्थे अध्यात्मप्रकाशकार्यालये **परमपूज्य श्रीश्रीसच्चिदानन्देन्द्र-सरस्वती सद्गुरुचरणसेवां** अनुतिष्ठन् **शाङ्करभाष्याणि** अध्येतुं च अवात्सम्॥

तदानीन्तनानि दिनानि (1960-1970) अनुस्मरन् के. जि. सुब्रायशर्मणः दैनन्दिनीं चर्यां निवेदयितुम् इच्छामि। प्रातः 4.30 वादने ब्राह्मे मुहूर्ते उत्थाय आचार्यं प्रणम्य गुरुसेवां कृत्वा हेमावतीं नदीं गच्छामः स्म। तत्र स्नात्वा सन्ध्याम् अनुष्ठाय विष्णुसहस्रनाम पठन्तः आश्रमं प्रति निवर्तामहे। 6.30 तः 7.30 वादनपर्यन्तं सद्गुरुवस्त्रादिक संक्षाल्य, स्नानगृहं, ध्यानगृहं च परिशोध्य श्री दिग्विजयरामपूजां निर्वर्त्य शाङ्करभाष्यपाठाय सज्जीभवामः स्म। 9 वादने भाष्यपाठ समाप्य कार्यालयकार्याणि कुर्वन्तो 10 वादने पण्डितेभ्यः वे॥ ब्र॥ श्री लक्ष्मीनरसिंहमूर्तिमहोदयेभ्यः सस्कृत-

काव्यनाटकं पठामः स्म। ततः 11 वादने माध्याह्निकसन्ध्यावन्दनं समाप्य सद्गुरुभ्यो भिक्षां पूर्वनियतगृहात् आनयामः स्म॥

सद्गुरुभ्यः, गुरुभिक्षां निवेद्य 1.30 वादने **गुरुपादोदकं पीत्वा** भोजनं कुर्मः स्म। मध्याह्ने लौकिकविद्यापाठः, गणितं, आङ्ग्लभाषापाठः, हळेगन्नडपाठः, Complete Works of Swami Vivekananda, Bhagavan Sri Ramana Maharshi and Swami Raamateertha, सन्ध्यामन्त्रार्थः, परमार्थचिन्तामणिपाठश्च द्विवादनात् चतुर्वादनपर्यन्तं भवति स्म। ततः श्रीगुरूणां उपन्यासश्रवणं पञ्चवादनपर्यन्तं गुरुवासरे भानुवासरे च भवति स्म। इतरेषु दिवसेषु अस्माकं मुद्रणकार्याणि, आपणकार्याणि च भवन्ति स्म। सायं सन्ध्योत्तरं प्रत्यहं 7.15 तः 7.45 पर्यन्तं श्रीरामभजनं क्रियते स्म॥

भिक्षागृहेभ्यः आनीतं क्षीरं गुरुभ्यः निवेद्य नववादने भोजनं भवति स्म। पुनः काव्यव्याकरणपाठः परक्कजे सुब्रह्मण्यभट्टैः क्रियते स्म। दशवादने सुप्तिं गच्छामः स्म॥

एवं सद्गुरुसेवापरेण सद्गुरुकृपापात्रेण के. जि. सुब्रायशर्मणा द्वादशाधिकानि वर्षाणि शाङ्करभाष्यपाठाः गुरुकुले, होळेनरसीपुरे 1959 तः 1970 पर्यन्तम्; अनन्तरं च बेङ्गळूरुशाखाकार्यालयभवने 1970 तः 1975 पर्यन्तं पञ्चवर्षाणि; एवम् आहत्य षोडश संवत्सरान् साक्षात् सद्गुरुचरणेभ्य एव संशिक्षिताः, तथैव सद्गुरूणां शक्तिपातः परिपूर्णानुग्रहश्च प्राप्तः॥

आप्तकार्यदर्शी सुब्रायशर्मा

अध्यात्मप्रकाश बेङ्गळूरु शाखा कार्यालयस्य कार्यदर्शित्वं लोकप्रियत्वं लोकोत्तरलोकानुग्रहत्वं यदा के. जि. सुब्रायशर्मा

श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसद्गुरुभिः **आप्तकार्यदर्शित्वेन** निर्वोढुं नियुक्तः (1967 तः 1975 पर्यन्तम्) ततः प्रभृति एते के. जि. सुब्रायशर्माणः गुरुसेवां अनुतिष्ठन्तः अध्यात्मप्रकाश शाखाकार्यालयस्य **कार्यदर्शित्वेन पण्डितत्वेन** च अभ्युदयाय सद्गुरुभिः नियोजिताः। तदारभ्य श्रीशर्माणः बद्धपरिकराः गुरुभक्त्या बेङ्गळूरुनगरे सर्वत्र वेदान्तान् प्रचारयितुं प्रवृत्ताः॥

यद् गुरुकुले षोडश वर्षाणि (1959-1975) सद्गुरुसेवया वेदान्ततत्त्वम् अधिगतम् तद् ततो द्विगुणानि द्वात्रिंशत् वर्षाणि (1969-2001) दिनं दिनं षट्सु स्थलेषु प्रतिस्थलं परःशतेभ्यः जनेभ्यः वेदान्तप्रवचनं शाङ्करभाष्यपाठं च उपदिशन्तो **श्री सुब्रायशर्माणः सर्वलोकप्रियाः ब्रह्मविद्याचार्याः शाङ्कर-सम्प्रदायभाष्यविवेचने अधिकृताद्वितीयप्रवक्तारश्च बभूवुः।** अत्र बेङ्गळूरु शाखा कार्यालयभवने प्रत्यहं स्वयं वेदान्तप्रवचनानि कुर्वन्तः, तथा अनैकैः पण्डितैः उपन्यासान् कारयन्तः, श्रीशङ्करसप्ताहोत्सवः, सद्गुरुजयन्तीमहोत्सवः, सद्गुरुआराधन-सप्ताहोत्सवः इत्यादीन् विशेषोत्सवान् प्रतिसंवत्सरम् आयोजयन्तः श्री सुब्रायशर्माणः **कार्यदर्शित्वेन पण्डितत्वेन च** सद्गुरुदर्शितमार्गेण सद्गुरूणाम् आज्ञया परिशुद्धवेदान्तप्रचारसेवां कुर्वन्ति इति सर्वविदितमेतत्॥

वेदान्तप्रचारकः सुब्रायशर्मा

''आर्यः सर्वसमः साधुः अदीनात्मा विचक्षणः'' इति वाल्मीकिना आदिकविना वर्णिताः श्रीरामगुणाः अस्मिन् आचार्ये श्रीसुब्रायशर्मणि प्रत्यक्षतः दृश्यन्ते। 'आ सुप्तेः आ मृतेः कालं नयेद्वेदान्तचिन्तया। दद्यान्नावसरं किञ्चित् कामादीनां मनागपि''

इत्येतस्य वचनस्य प्रत्यक्षोदाहरणभूताः श्रीसुब्रायशर्माणः। एते आचार्याः प्रत्यहं वेदान्तचिन्तनेनैव सार्थकं पूर्णं दिनं जीवनं च यापयन्ति। श्रीशङ्करभगवत्पूज्यपादाचार्याणां सेवयैव स्वजीवनं धन्यं सार्थकं च मन्यमानाः श्रीसुब्रायशर्माणः वर्तन्ते। 'साधुरेको विनिर्मितः' इतिवत् श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसद्गुरूणां हृदयान्तःप्रविष्टो गुरुकृपापात्रभूतोऽयं सुब्रायशर्मा शाङ्करवेदान्त-प्रसारकार्ये सर्वदा वर्तते इति सर्वविदितमेतत्॥

सद्गुणसागरः सुब्रायशर्मा

तेषां गुणास्तु— सत्यवादिता, सर्वजनेषु गुणग्राहित्वं, लोकसेवापरत्वं, सद्गुरुचरणभक्तिः, व्यवहारदक्षता, सर्वविध-कार्येषु अभिज्ञत्वं, निरन्तरक्रियाशीलत्वं इत्यादयः अद्यापि विराजन्ते। ते सर्वान् जनान्, जातिवर्णलिङ्गभेदं विना, प्रीत्या गौरवेण च पश्यन्तः, आतिथ्यं साहाय्यं च कुर्वन्तः सर्वलोक-प्रियास्साधवो वर्तन्ते। श्रीसुब्रायशर्मभ्यः आचार्येभ्यः शाङ्कर-भाष्यपाठं शृण्वन्तो बहवो जनाः तान् सन्निकृष्टेन दृष्ट्वा स्वस्वहृदये, स्वाचार्यमूर्तिं प्रतिष्ठाप्य श्रीशङ्कराचार्यभावनया एव तान् नित्यं आराधयन्तो धन्यं स्वात्मानं मन्यन्तेऽद्यापि॥

"**शङ्करभास्कर**" वेदान्तपत्रिका संस्थापक-सम्पादकाः एते सुब्रायशर्माणः, तां पत्रिकां पञ्चदशसहस्राधिकग्राहिकां कृत्वा, वेदान्तपत्रिकाक्षेत्रे अनुपमां पदवीं तस्यै पत्रिकायै प्रापितवन्तः॥

कार्यदर्शी पण्डितश्च सुब्रायशर्मा

व्यवहारे सर्वं कार्यं स्वयं कुर्वन्तो धनचिन्तानिःस्पृहाः गुरुसेवा यावदुच्छ्वासं कार्येति, अध्यात्मप्रकाशकार्यालयप्रचाराय, श्रीश्री

सच्चिदानन्देन्द्रसरस्वतीविरचितग्रन्थप्रचाराय, वेदान्तप्रचाराय, शाङ्करभाष्यप्रचाराय च भारते, अमेरिकादेशेषु च नित्यं प्रवसन्तो देहक्लेशम् अविगणय्य सञ्चरन्तो प्रवचनं, भाष्यपाठं, ग्रन्थरचनां, जनसम्पर्कं च कुर्वन्तः श्रीमन्तः सुब्रायशर्माणो विराजन्ते॥

गृहिणामपि तेषां गुरुसेवानिष्ठा ज्ञानमयं तपश्च अप्रचलितम् अखण्डितं नित्य प्रवहति। **शाङ्करसंवत्सरः, प्रबोधचिन्तामणिः, वेदान्तसंवत्सरः** इत्येते ग्रन्थाः शर्मभिः प्रणीताः। तेषु सोऽयं प्रकृतो **वेदान्तसंवत्सरो ग्रन्थः** संस्कृतभाषया अनूद्य मुद्राप्यमाणः सर्वलोकप्रियो भवति। अत्र चतुर्दशभ्य उपनिषद्भ्यः उद्धृतानि मन्त्रवाक्यानि प्रतिपुटं दत्तानि। तदर्थानुगुणः श्लोकोऽपि स्वयं श्री सुब्रायशर्मणा विरचितः प्रथमं निवेशितः। तत्पूर्वं 'वेदान्तभास्कराय नमः' इतिमन्त्रः सविशेषणः पुष्टितः। सोऽयं मन्त्रः विषयनिरूपणस्य सूत्रभूतः सर्वस्य। ततः सरलानुवादसहितः श्लोकः कण्ठीकर्तुं अर्हः दत्तः। ततः उपनिषद्वाक्यं सानुवादं निरूपितम्। ततः श्री सुब्रायशर्मणा सम्प्रदायानुरूपं विवरणं सर्वजनमनोहरं कृतम्। एवं प्रतिपुटं, यावन्ति संवत्सरस्य दिनानि पञ्चषष्ट्युत्तराणि त्रीणि शतानि 365 विद्यन्ते, तावन्ति Vedanta teachings उपनिषद्वाक्यानि अस्मिन् ग्रन्थे उदाहृतानि॥

प्रथमं, सप्ताहानुगुणानि सप्तवासरनामभिः सप्त उपनिषद् वाक्यानि, द्वादशमासानुगुणानि द्वादश उपनिषद्वाक्यानि च उपनिबध्य, ततः क्रैस्तशकदिनाङ्कानुगुणानि 365 वाक्यानि, फेब्रवरी मासस्य 29 तमदिनाङ्कस्यैक वाक्यम् च इति आहत्य 7+ 12 + 366 = 385 उपनिषद्वाक्यानि चतुर्दशभ्यः उपनिषद्भ्यः सङ्गृह्य अस्मिन् ग्रन्थरत्ने प्रदत्तानि सन्ति॥

सोऽयं "**वेदान्तसंवत्सरो**" ग्रन्थः वेदान्तप्रपञ्चे अनितर-साधारणां प्रीतिं कीर्तिं प्रतिष्ठां च प्राप्तः सन् मुमुक्षूणां, यतीनाम्, वानप्रस्थानाम्, गृहिणाम्, स्त्रीणाम्, विद्यार्थिनाम्, प्रवचनकाराणाम्, साधकानाम्, जिज्ञासूनाम्, संसारिणाम्, दुःखिनाम्, राजकीयपटूनाम्, उपाध्यायानाम्, विमर्शकानाम्, वृद्धानाम्, लौकिकानाम्, वैदिकानाम्, पारायणपटूनाम्, वेदान्तिनाम्, श्लोकप्रियाणाम्, सर्वविधजनानामपि परमपुरुषार्थाय भवति। उपनिषत्सु उपदिष्टं ब्रह्मात्मैकत्वं सम्यग्दर्शनं च प्राप्तुं तत्साधनानि च अनुष्ठातुम् अयं परमपवित्रतमो ग्रन्थः मार्गदर्शित्वं भजते। तदिदं प्रयोजनं मनसि निधाय ग्रन्थकर्ता सुब्रायशर्मा स्वाचार्यप्राप्तं स्वीयं च ज्ञानमयं तपः इत्थम् अवतारयामास। सोऽयं सुब्रायशर्मा सत्यसन्धः, सत्यसङ्कल्पः, सिद्धवाक्, नित्यं गुरुचरणाराधनरतः सन् यद्वदति, यत् करोति, यच्चिन्तयति तत् सर्वं तथैव सम्पत्स्यते। 'विशुद्धसत्त्वः कामयते यांश्च कामान्, तं तं लोकं जयते तांश्च कामान्' इति हि मुण्डकश्रुतिः उद्घोषयति?

अतः सर्वेऽपि श्रेयस्कामाः वयं प्रत्यहं प्रातः स्नात्वा शुद्धेन मनसा अस्मिन् ग्रन्थे दिनमेकं वाक्यं पठन्तः, अर्थं च अनुसन्दधतः पूर्णं दिनं सानन्दाः, सोत्साहाः स्वस्वकर्तव्यानि कुर्वन्तः सर्वश्रेयोभाजिनो भवेम॥

इति, विदां विधेयः सद्गुरुचरणसेवाभिलाषी

के. जि. सुब्रायशर्मप्रियसुहृत्
मत्तूरु अश्वत्थनारायणावधानी
सस्कृतग्रामः, मत्तूरु - 577 203
शिवमोग्गा जिल्ला

दिनाङ्क : 20-5-2006
दूरवाणी : 08182-237 728

Foreword

The Vedanta literature of ancient India is a storehouse of wisdom and knowledge. It has a well defined purpose to remove our innate ignorance, so that our true nature can shine forth. The most advanced seekers need simply to be reminded that they are the eternal Atman, the **Supreme Brahman**. By simply hearing this truth, their misconceptions fall away. However, for the rest of us, we need to reflect and deeply meditate on what we hear and are taught before we fully grasp its meaning.

With his unique publications in Kannada "**Shaankara Samvatsara**" and "**Vedaanta Samvatsara**", **Sri K. G. Subraya Sharma** has provided a wonderful way to allow us to undertake this necessary reflection and contemplation of the teachings of the **Vedaanta Shastra**, to allow the dawn of knowledge in us. By providing a thought for every day of the year, he has made it easy for all of us to follow and understand the ancient wisdom of **Vedaanta**.

I was fortunate enough to meet Sri K. G. Subraya Sharma through my Gurus from Mattur village. I fondly remember the many occasions we have conversed together in Sanskrit, discussing the works of Shankara. I have always been impressed with the ease with which he can explain the concepts of advaita with such simplicity and clarity. **Sri K. G. Subraya Sharma, the author, has truly been blessed with the grace of his Guru, Sri Sri Satchidanandendra Saraswati Swamiji of Revered Memory.**

It is with great pleasure that we present to the public a Sanskrit edition of "**Vedaanta Samvatsara**". In this masterpiece, Sri K. G. Subraya Sharma has provided a thought for each day of the year from the ancient 14 Upanishads, which is then explained in clear and simple Sanskrit with one stanza composed by him in the simple Sanskrit. The reader may be tempted to assume that this book of Sanskrit edition may be of benefit only to scholars, and therefore may not be of relevance to the rest of us. However, the genius of this book is that it presents the profound truths of Vedanta in such straightforward and elegant and lucid Sanskrit, that it is a great opportunity for anybody wishing to study Sanskrit to simultaneously study the language as well as the teachings of Vedanta. I wish I had such a book when I was learning Sanskrit in my youth! I would encourage all teachers of Sanskrit to seriously consider using **this excellent book as a reader for their students**.

There is a temptation to view Sanskrit as a "non-living" language. But books such as "**Vedaanta Samvatsara**" by **Vidwan K. G. Subraya Sharma**, a renowned and popular profound Sanskrit scholar and a genuine Vedantin, affirm that Sanskrit is as alive and vibrant as ever. We should continue to encourage new original works in Sanskrit for future generations. We are deeply grateful to Sri K. G. Subraya Sharma for completing this Sanskrit translation of his work "**Vedaanta Samvatsara**".

15-4-2006 **Subhanu Saxena**
Hampshire, England

॥ ओं सूर्योपासकाय वेदान्तभास्कराय नमः॥

प्राजापत्यं यमं सूर्यं भास्वन्तं **भानुवासरे**।
प्रणमेत् ज्ञानसिद्ध्यर्थं भक्त्या **वेदान्तभास्करः**॥

प्राजापत्यं यमं भास्वन्तं सूर्यं साधकः ज्ञानसिद्ध्यर्थं **भानुवासरे** भक्त्या प्रणमेत्॥

१. भानुवासरः

ज्ञानार्थं सूर्यप्रार्थना

पूषन् एकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्, समूह तेजः।

ईशावास्योपनिषत् १६

हे पूषन्, एकर्षे, यम, सूर्य, प्राजापत्य, तव रश्मीन् व्यूह; तव तेजः समूह॥

अद्य **भानुवासरः**, रविवासरः, सूर्यवासरः। अस्मिन् शुभवासरे **ग्रहराजः** भगवान् सूर्यनारायणः सर्वैः साधकैः आराध्यते। अस्मिन् प्रथमे **भानुवासरे ईशावास्योपनिषदः** पवित्रं श्रेष्ठं सन्देशं चिन्तयाम॥

सूर्योपासकैः सूर्यभगवन्तं प्रति कर्तव्यां प्रार्थनां समुपदिशति अयं मन्त्रः। यथा ''हे सूर्यभगवन्, अहं तव निजस्वरूपम् द्रष्टुम् इच्छामि, तस्मात् तव अत्युग्रान् रश्मीन् पार्श्वे विगमय''॥

अयं मन्त्रः सूर्यं भगवन्तं भिन्नैः भिन्नैः अनेकनामभिः सम्बोधयति। तद्यथा, प्रपञ्चस्य पोषणात् **पूषन्**, एक एव ऋषति गच्छति इति **एकर्षे**, समस्तानेव प्राणिनः आत्मनि उपसहरतीति **यम**, विश्वं सूते इति **सूर्य**, हिरण्यगर्भस्य प्रजापतेः पुत्रत्वात् **प्राजापत्य**। तुभ्यं नमः। कृपया तव रश्मीन् उपसहर॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनःप्रत्यगात्मविदे वेदान्तभास्कराय नमः॥

मनसः प्रत्यगात्मानं साक्षिणं **चंद्रवासरे**।
स्वरूपत्वेन जानीयात् धीरो **वेदान्तभास्करः**॥

मनसः प्रत्यगात्मानं साक्षिणम् एव धीरः स्वरूपत्वेन **चन्द्रवासरे** जानीयात्॥

२. सोमवासरः

मनस्साक्षिभूतः आत्मा

यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

केनोपनिषत् १-६

मनसा यत् न मनुते, येनैव मनः मतम् आहुः, तदेव त्वं ब्रह्म विद्धि। 'इदम्' इति यत् उपासकाः उपासते, न तत् परं ब्रह्म॥

अद्य **सोमवासरः**। सोमो नाम चन्द्रमाः। **'चन्द्रमा मनसो जातः'** इति श्रुतेः ईश्वरस्य मनसः एव चन्द्रो जातः। मनसः अधिदैवतं नाम चन्द्रनारायण एव। अतः मनःप्रधानः पवित्रो वासरः **सोमवासरः**। अद्य **केनोपनिषदः** सन्देशं पश्याम॥

मनो नाम सर्वसमर्थम् अन्तःकरणम्। मनसा हि मानवः सर्वमपि प्रपञ्चं जानीयात्। मनसः असाध्यं कार्यमेव न स्यात्। सत्यमेतत्। तथापि ईदृशं मनः प्रत्यगात्मानं विषयीकृत्य न जानीयात्। न हि मनः आत्मप्रकाशकं प्रत्यगात्मानं प्रकाशयेत्। न केवलं तावदेव, किं तर्हि प्रत्यगात्मैव इदं मनः प्रकाशयति। मनसोऽपि स्वरूपभूतः प्रत्यगात्मा। मनस्साक्षिभूतम् इममेव आत्मानं स्वरूपत्वेन अद्य **इन्दुवासरे** चिन्तयेत् साधकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रपञ्चोपशमाय वेदान्तभास्कराय नमः॥

प्रपञ्चोपशमं शान्तं मङ्गळं **भौमवासरे**।
अवस्थारहितं विद्यात् इति **वेदान्तभास्करः**॥

आत्मानं प्रपञ्चोपशमं शान्तं मङ्गळम् अवस्थारहितं **भौमवासरे** विद्यात्॥

३. मङ्गळवासरः

आत्मैव मङ्गळस्वरूपः

प्रपञ्चोपशमम् शान्तं शिवम् अद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः। माण्डूक्योपनिषत् ७

द्वैतप्रपञ्चसम्बन्धरहितं शान्तं **मङ्गळम्** *अद्वैतं चतुर्थं मन्यन्ते। स एव आत्मा, स एव विज्ञेयः॥*

अद्य **मङ्गळवासरः**। शिवं, भद्रं, कल्याणं, मङ्गळं, शुभम् इति पर्यायपदानि। परमात्मा एक एव परमार्थतः मङ्गळस्वरूपः। अयमेव शिवश्च। अस्मिन् **मङ्गळवासरे माण्डूक्योपनिषदः** सन्देशम् अनुसन्दधाम॥

''मङ्गळानां च मङ्गळम्'' इत्युक्तेः भगवान् एक एव मङ्गळस्वरूपः। मङ्गळस्वरूपस्य परमात्मनः महिमानम् अयं मन्त्रः उपदिशति। त्रिगुणात्मकेन प्रपञ्चेन सर्वथा सम्बन्धरहितः भगवान्। अस्यैव भगवतः 'परं ब्रह्म' इत्यपि नामधेयम्। जागरितावस्था, स्वप्नावस्था, सुषुप्त्यवस्था इति तिसृणामपि अवस्थानां साक्षिभूतः, अवस्थाविलक्षणः आत्मा 'चतुर्थः' इति कथ्यते। अविद्या कल्पितोपाधिकृतद्वैतप्रपञ्चसम्बन्धरहितोऽयमात्मा। शान्तः शिवश्च प्रत्यगात्मा। एनम् आत्मानम् **भौमवासरे** साधकाः चिन्तयेयुः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं बुधपुङ्गवाय वेदान्तभास्कराय नमः॥

अध्रुवाणि परित्यज्य धीरोऽयं **बुधवासरे**।
अमृतत्वपरो भूयात् बुधो **वेदान्तभास्करः**॥

अयं धीरो मुमुक्षुः अध्रुवाणि वस्तूनि परित्यज्य, बुधो भूत्वा **बुधवासरे** अमृतत्वपरो भूयात्॥

४. बुधवासरः

इमे एव बुद्धिमन्तः

अथ धीरा अमृतत्वं विदित्वा ध्रुवम् अध्रुवेषु इह न प्रार्थयन्ते।

काठकोपनिषत् २-१-२

अथ, धीराः मुमुक्षवः अमृतत्वमेव इच्छन्तः अध्रुवाणि वस्तूनि परित्यज्य, ध्रुवम् आत्मानमेव विज्ञातुम् इच्छन्ति॥

अद्य **बुधवासरः**। अस्मिन् बुधवासरे बुद्धिमन्तः साधकाः विवेकेन आत्मविचारं कुर्वन्ति। बुद्धिमन्तः उपनिषत्सु **'धीराः'** इति व्यपदिश्यन्ते। अस्मिन् **बुधवासरे काठकोपनिषदः** पवित्रं सन्देशं चिन्तयाम॥

मुमुक्षव एव परमार्थतः विवेकिनः तथा धीराः। अमृतत्वेन अर्थिन एव **बुद्धिमन्तः**। अस्मिन् विशालप्रपञ्चे, इदानीन्तन-वैज्ञानिकयुगे मानवान् मोहयन्तः सहस्राधिकाः पदार्थाः सन्ति। अस्मिन् काले तु न कस्यचिदपि भोग्यवस्तुनः न्यूनता कुत्रापि दृश्यते। अनित्येषु भोग्यपदार्थेष्वेव निमग्नाः **अधीराः** अविवेकिनः दीनाः इति कथ्यन्ते। ये तु अनित्यभोग्यवस्तुषु अननुरक्ताः सन्तः मोक्षार्थिनः आत्मज्ञानमार्गे अनुरक्ताः ते एव बुद्धिमन्तः **धीराः**। अतः सर्वैरपि मानवैः मोक्षार्थिभिः भाव्यमिति **बुधवासरे** सन्देशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गुरुसेवानिष्ठाय वेदान्तभास्कराय नमः॥

श्रोत्रियं ब्रह्मनिष्ठं श्रीसद्गुरुं **गुरुवासरे**।
उपसीदेत् मुमुक्षुर्जिज्ञासुर्**वेदान्तभास्करः**॥

मुमुक्षुः जिज्ञासुः श्रोत्रियं ब्रह्मनिष्ठं श्रीसद्गुरुं ब्रह्मात्मज्ञानप्राप्त्यै **गुरुवासरे** उपसीदेत्॥

५. गुरुवासरः

सद्गुरुसेवया एव ज्ञानप्राप्तिः

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्।
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥

मुण्डकोपनिषत् १-२-१२

सः मुमुक्षुः जिज्ञासुः तद्विज्ञानार्थं समित्पाणिः सन् श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुम् एव अभिगच्छेत्॥

अद्य **गुरुवासरः**। इन्द्रादिदेवानां बृहस्पतिरेव **गुरुः**। **'गु'** इति अज्ञानस्य, **'रु'** इति विनाशकः। अज्ञानस्य हन्ता एव **गुरुः**। अस्मिन् **गुरुवासरे मुण्डकोपनिषदः** सन्देशं पश्याम॥

सर्वोऽपि मानवः परं ब्रह्म जानीयादेव। ब्रह्मज्ञानादेव मोक्षः प्राप्यते। केवलैः कर्मोपासनादिभिः अनित्यान्येव फलानि लभ्यन्ते। अनित्यफलेभ्यः विरक्तेन साधकेन आत्मज्ञानमेव सम्पादनीयम्॥

अस्तु, ब्रह्मज्ञानप्राप्त्यै किं कर्तव्यम्? इति चेत्, श्रोत्रियं ब्रह्मनिष्ठं परमकारुणिकं सद्गुरुमेव उपगच्छेत् जिज्ञासुः। उपगम्य च सद्गुरूपदेशं श्रद्धया शृणुयात् इति **गुरुवासरस्य** सन्देशः। स्वयं सर्वशास्त्रप्रवीणोऽपि नारदो महर्षिः सनत्कुमारं सद्गुरुम् उपगम्य तस्मादेव उपदेशं श्रुत्वा सद्गुरुकृपया आत्मज्ञानी संवृत्तः खलु?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं दयामयाय वेदान्तभास्कराय नमः॥

आसुरा मानवेष्वेव सम्प्रीत्या **शुक्रवासरे**।
सर्वप्राणिदयावन्तः सदा **वेदान्तभास्करः**॥

आसुरा मानवा जनाः सदा **शुक्रवासरे** दयावन्तो भवेयुः।

६. शुक्रवासरः

मानवैः 'दयालुभिः' भाव्यम्

तेभ्यः असुरेभ्यो ह एतदक्षरमुवाच 'द' इति। दयध्वम् इति, दयां कुरुध्वम् इति होवाच प्रजापतिः॥

बृहदारण्यकोपनिषत् ५-२-३

तेभ्यः असुरेभ्यः 'द' इति एतदक्षरम् उवाच प्रजापतिः। 'दयध्वम्', 'दयां कुरुध्वम्' इति प्रजापतिः उवाच॥

अद्य **शुक्रवासरः**। अस्मिन् शुक्रवासरे शुक्रग्रहं विशेषेण आराधयन्ति भक्ताः। शुक्राचार्याः असुराणां गुरवः। 'असुषु रमन्ते इति असुराः'। क्रूरस्वभावाः परहिंसापराः निष्करुणाः स्वार्थिनः सर्वेऽपि मानवाः असुरा एव। एतेभ्यः आसुरस्वभावेभ्यः अस्मिन् **शुक्रवासरे** बृहदारण्यकोपनिषदः सन्देशं चिन्तयाम॥

प्रजापतिः आत्मनः तृतीयपर्यायपुत्रेभ्यः असुरेभ्योऽपि 'द' इत्येव उपदिष्टवान्। प्रथमपर्यायदेवेभ्यः, द्वितीयपर्यायमानवेभ्योऽपि 'द'कारमेव उपदिदेश। असुरेभ्यः उपदिष्टस्य 'द'कारस्य अर्थस्तु दयध्वम्, दयां कुरुध्वम् इति। असुराः स्वभावतः क्रूरिणः। जन्मना मानवा अपि अनेके स्वभावेन आसुरा एव भवेयुः खलु? अतः हे आसुरा मानवाः, यूयं हिंसाचारं विहाय दयापराः भवत, सर्वानपि सदा प्रीणयत इत्येव **शुक्रवासरस्य** सन्देशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कृतार्थपुङ्गवाय वेदान्तभास्कराय नमः॥

पुण्यपापविदूरः स्यात् विवेकी **स्थिरवासरे**।
ब्रह्मनिष्ठः कृतार्थश्च मुक्तो **वेदान्तभास्करः**॥

विवेकी ब्रह्मज्ञानी पुण्यपापविदूरः सन् **स्थिरवासरे** ब्रह्मनिष्ठः कृतार्थो मुक्तश्च स्यात्॥

७. शनिवासरः

ब्रह्मज्ञानी कृतार्थो भवति

एतं ह वाव न तपति, किमहं साधु नाकरवम्, किमहं पापमकरवमिति। तैत्तिरीयोपनिषत् २-९-२

''अहं साधुकर्म किं नाकरवम्?'', ''अहं पापं कर्म किमर्थम् अकरवम्?'' इत्येषा चिन्ता एतं ब्रह्मज्ञानिनं नैव तपति॥

अद्य **स्थिरवासरः**, मन्दवासरः, शनिवासरः। सप्ताहे अन्तिमो वासरः। शनिग्रहो हि मुक्तिदायको महात्मा। अस्मिन् **स्थिरवासरे** तैत्तिरीयोपनिषदः सन्देशं चिन्तयाम। भानुवासरात् अध्यात्मसाधनानि आरभ्य अद्य साधनानां फलम् आत्मज्ञानं प्राप्तुं शुभः **फलवासरः स्थिरवासरो** नाम। पुण्यपापकर्मणी अतीत्य कृतार्थः सन् स्वस्वरूपे अवस्थानमेव हि आत्मज्ञानस्य फलम्॥

ज्ञानी धीरः सन् पुण्यपापलेपरहितो भवति। अविद्या एव हि संसारगतेः पुनर्जन्मनश्च कारणम्। सर्वानर्थहेतुभूता तु अविद्या एव। ज्ञानिनो हि आत्मज्ञानबलात् अविद्या बाधिता अस्ति। तस्मात् अविद्याकामकर्माभावात् ब्रह्मज्ञानिनः पुनर्जन्माभावः। मोक्ष एव हि सकलसाधनानां फलम्। जीवन्मुक्तो **ज्ञानी कृतार्थ एव**। ब्रह्मज्ञानी नाम ब्रह्मनिष्ठ एव, ब्रह्मस्वरूप एव। कृतार्थोऽयं संवृत्तः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

स्वगुरूणाम् उत्सवमूर्तिः सुब्रायशर्मा

महामहोपाध्यायः, विद्यावाचस्पतिः, पण्डितरत्नम् विद्वान् एन्. रङ्गनाथशर्मा, बेङ्गलूरु-४०

(संस्कृतानुवादः)

वेदमूर्तयः श्रीमन्तः सुब्रायशर्माणः महतीं समाजसेवां कुर्वन्तः एव स्वजीवनं यापयन्ति। श्रीसुब्रायशर्मणां वेदान्तप्रवचनानि प्रप्रथमतया जनानां दुष्टपापप्रवृत्तिं निवारयन्ति, तथा च द्वितीयतया जनानां अध्यात्मप्रवृत्तिं वर्धयन्ति इति अहं मन्ये। श्री के. जि. सुब्रायशर्माणः स्वीयवेदान्तप्रवचनैः श्रोतृजनानां मनोभावमेव सदाचारप्रवणं सात्त्विकप्रवृत्तं च कुर्वन्तीति निस्संशयं वक्तव्यम्॥

श्रीसुब्रायशर्माणः अध्यात्मप्रकाशबेङ्गलूरुशाखाकार्यालये प्रत्यहं वेदान्तप्रवचनानि कुर्वन्तः, नगरान्तरेषु सञ्चरन्तः अनेकत्र वेदान्तोपन्यासान् कुर्वन्तः वेदान्तप्रसाराय श्राम्यन्ति इति नूनमपि प्रशंसनीयमेवैतत्। श्रीसुब्रायशर्मणाम् आध्यात्मिकगुरवः ब्रह्मीभूताः **श्रीश्री सच्चिदानन्देन्द्रसरस्वतीस्वामिचरणाः** वेदान्तप्रचाराय स्वजीवनं नीतवन्तः। **श्रीमन्तः के. जि. सुब्रायशर्माणः स्वगुरूणाम् ''उत्सवमूर्तिस्थानीयाः'' सदाचारसम्पन्नाः सन्तः स्वगुरूणाम् अवशिष्टं कार्यं पूरयन्तः सन्ति।** स्वगुरूणां मार्गदर्शने एव श्री सुब्रायशर्मणां विचारक्रमः प्रवृत्तः सन् जनानां मनसि अद्भुतं परिणामं कुर्वन् जनान् सत्पथे प्रेरयति इत्येतत् सत्यं प्रामाणिकं च वचनम्। वेदान्तोपन्यासान् कुर्वन्त एव श्री शर्माणः जनानां प्रार्थनानुसारेण कानिचन वेदान्तपुस्तकानि च रचितवन्तः। तेषु अयम् अन्यतमो ग्रन्थः **वेदान्तसंवत्सरः**। एतत्पूर्वं **शांकर संवत्सरः** इति नाम्ना रचितः एकः ग्रन्थः जिज्ञासुजनेषु लब्धाश्रयः

नित्यपारायणग्रन्थवत् अत्यन्तं जनप्रियः अस्ति॥

प्रकृतग्रन्थस्तु **'वेदान्तसंवत्सरा'**ख्यः उपनिषत्सूक्ति सङ्ग्रहात्मकः। जिज्ञासूनाम् अत्यन्तोपयोगी ग्रन्थोऽयम्। गीता-पारायणादपि महत्प्रयोजनकारी अयं ग्रन्थः इत्युक्तेऽपि नैतत् अतिशयोक्तिः। पारायणपरायणानां मनसि प्रतिदिनम् एको वेदान्तविषयः दृढतया तिष्ठति। **तत्त्वजिज्ञासूनां तु बहूपकारी अयं ग्रन्थः वेदान्तसंवत्सराख्यः**। सर्वथा परिपूर्णेऽस्मिन् ग्रन्थरत्ने न कापि न्यूनता वा दोषो वा दृश्यते इत्येतत् सत्यं वचः॥

श्रीमतां सुब्रायशर्मणां लेखनशैलीं ग्रन्थस्य उपयुक्ततां च वीक्ष्य तत्त्वजिज्ञासवो बहवो जनाः मुदिताः सन्तः ग्रन्थमुद्रणात् पूर्वमेव दशसहस्राधिकाः प्रतीः आरक्षीकृतवन्तः इति सन्तोषावहः अभूतपूर्वः अद्भुतश्च विषयः प्रकाशकवचनात् ज्ञायते। एतद्-ग्रन्थरचनवार्ताश्रवणमात्रादेव मुद्रणार्थं सार्धाष्टलक्षरूप्यकाणि जनैः प्रीत्या समर्पितानि इतिविषयस्तु श्री सुब्रायशर्मणां सुख्यातिम् जनप्रियताम् अर्हतां लेखनशैलीं ग्रन्थोपयुक्ततां च उद्घोषयति॥

तत्त्वजिज्ञासुभिः अपेक्षिताम् अवश्यकतां वीक्ष्य तदानुगुण्येन सौकर्यं कल्पयितुं सूक्ष्मेक्षिका श्रीशर्मसु अस्ति इत्यत्र अयं **वेदान्तसंवत्सर**ग्रन्थः एव प्रमाणम्। **स्वगुरुभिः अवशिष्टं कार्यं श्रीशर्माणः सम्पूर्णतया कृतवन्तः इति धैर्येण वाच्यम्**। एवमेव एतादृशं सत्कार्यं श्रीशर्मभिः सततम् सुदीर्घकालं अनुष्ठीयताम् इति, तदर्थानि च दीर्घायुरारोग्यादिसौभाग्यानि लभ्यन्ताम् इति, श्रीसद्गुरोः भगवतश्च सम्पूर्णानुग्रहः श्री के. जि. सुब्रायशर्मसु सुदीर्घकालं सततं वर्तताम् इति च अहम् आशासे॥

दिनाङ्कः २३-९-२००४ **विद्वान् एन्. रङ्गनाथशर्मा**

एतेभ्यः लेखकस्य कृतज्ञताः

पवित्रमिदं मानवजन्म दत्वा बाल्ये एव सद्गुरुदिव्यसांनिध्यं प्रेषयित्वा मां सद्गुरुकृपाभाजनं कृतवद्भ्यां मम **मातापितृभ्याम्**—

स्वपुत्रवत् मां सर्वथा परिपाल्य प्रीतिवात्सल्यवर्षेण शिष्याय मह्यं १९५९ तः १९७५ पर्यन्तं वेदवेदान्तशास्त्राणि समनुगृहीतवद्भ्यः **पूज्येभ्यः श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीमहासद्गुरुभ्यः**—

ग्रन्थलेखनावसरे मह्यं सर्वथा साहाय्यं कृतवत्यै मम धर्मकान्तायै चिरञ्जीविन्यै सौभाग्यवत्यै श्रीमत्यै **राजेश्वरीदेव्यै**—

ग्रन्थमुद्रणव्ययं सम्पूर्णतया प्रीतिपूर्वकं समर्पितवते सद्गुरुभक्ताय मित्रवर्याय श्रीमते **सुभानुसक्सेनशर्मणे**—

इंटर्नेट् द्वारा, लेखनद्वारा, दूरवाणीद्वारा, पत्रव्यवहारद्वारा स्वीयधनव्ययं कृत्वा, ग्रन्थसंशोधनद्वारा, अनेकरूपविधया सेवया, कायेन वाचा मनसा च परमोपकारं कृतवते मन्मित्रवर्याय सद्गुरुभक्तपुङ्गवाय तत्त्वजिज्ञासवे **सि. ए. सञ्जीवमूर्तिशर्मणे**—

पीठिकालेखनेन ग्रन्थमहत्त्वं वर्धितवते प्राणसमसुहृत्पुङ्गवाय सद्गुरुभक्ताय वेदमूर्तये **मत्तूरु अश्वत्थनारायणावधानिने**—

ग्रन्थसशोधन (Proof correction) द्वारा प्रीत्या महोपकारं कृतवते तत्त्वचिन्तकाय प्रियाय **एस्. आर्. अनन्तमूर्तिशर्मणे**—

सुन्दरतया प्रकाशितवते श्री नित्यानन्द प्रकाशन स्वामिने प्रियमित्राय सद्गुरुभक्ताय श्रीमते **बि. एन्. नटराजशर्मणे**—

आकर्षकतया मुद्रापितवद्भ्यां गुरुदत् प्रिण्टर्स् स्वामिभ्यां मान्याभ्यां मित्राभ्यां **मोहनकुमार सत्यनारायणाभ्यां** च एतेभ्यः सर्वेभ्योऽपि मम कृतज्ञतापूर्वकाः प्रणामाः समुल्लसन्ताम्—

के. जि. सुब्रायशर्मा

लेखकाः

विद्वांसः वेदमूर्तयः के. जि. सुब्रायशर्माणः

॥ ओं शोकमोहनिवारकाय वेदान्तभास्कराय नमः॥

आत्मज्ञानबलादेव शोकमोहविमोक्षणम्।
तस्माद् ज्ञानी भवेच्चैत्रमासे **वेदान्तभास्करः**॥

आत्मज्ञानबलादेव शोकमोहाभ्यां विमोक्षणं स्यात्, नान्यथा। तस्माद् सर्वो मानवः **चैत्रमासे** ज्ञानी भवेत्॥

१. चैत्रमासः

दुःखनिवृत्तिरेव मानवजन्मनः लक्ष्यम्

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥

ईशावास्योपनिषत् ७

यस्मिन् आत्मविदि सर्वाणि भूतानि आत्मैव भवन्ति, परिपूर्णम् आत्मतत्त्वं विजानतः, सर्वत्रापि एकत्वमेव पश्यतः तस्य आत्मविदः मोहो वा शोको वा कथं भवेत्?

अयं **चैत्रमासः**, यस्मिन् मासे श्रीमान्नारायण एव **श्रीरामचन्द्ररूपेण** अवतीर्णः। चान्द्रमानसंवत्सरस्य प्रारम्भकः पवित्रः प्रथममासोऽयं **चैत्रमासः**। जीवने सुखदुःखानि मधुरतिक्तानुभवान् च स्मारयति अयं शुभमासः **चैत्रमासः**। अस्मिन् मासे **ईशावास्योपनिषदः** पवित्रं सन्देशम् पश्याम॥

शोकमोहात्ययेनैव मानवजन्मनः साफल्यम्। मोहात् खलु शोकः सम्भवति। मोहो नाम अविद्या, शोको नाम दुःखम्। संसारबीजभूतयोः शोकमोहयोः परिहारोपायम् उपदिशति अयं मन्त्रः। शास्त्राचार्योपदेशं श्रद्धया संशृण्वतः आत्मज्ञानम् उदेति। सर्वात्मज्ञानेन शोकमोहात्ययो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विवेकबोधकाय वेदान्तभास्कराय नमः॥

तपसा ब्रह्म जानीयात् तपसा मोक्षमश्नुते।
वैशाखे तु तपस्वी स्यात् **मासे वेदान्तभास्करः**॥

वैशाखे मासे साधकः तपस्वी स्यात्। तपस्वी चेत् सः तपसा ब्रह्म जानीयात्, तपसा मोक्षम् अश्नुते॥

२. वैशाखमासः

तपसैव ज्ञानोदयः

तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मेति।

तैत्तिरीयोपनिषत् ३-२-२

तपसा ब्रह्म विज्ञातुम् इच्छस्व, तप एव ब्रह्म॥

अयं **वैशाखमासः**, यो हि विवेकेन, विचारेण साधकानां जीवनकलां दर्शयति। महात्मानः प्रचण्डाः तपस्विपुङ्गवाः—श्रीशङ्करभगवत्पादाचार्यः, बुद्धः, ब्रह्मर्षिः नारदः—इत्यादयः अस्मिन् तपःप्रधाने **वैशाखमासे** समवतीर्णाः। अस्मिन् मासे **तैत्तिरीयोपनिषदः** पवित्रं सन्देशं शृणवाम॥

आत्मज्ञानप्राप्त्यै प्रधानं साधनं नाम **तपः। तपसा एव ब्रह्म जानीयात्** इति एषा उपनिषत् उपदिशति। ''कृपया मह्यं ब्रह्मतत्त्वम् उपदिशतु भगवान्'' इति पुत्रेण भृगुणा प्रार्थितः पिता वरुणः, स्वपुत्राय ब्रह्मतत्त्वं विज्ञातुम् उपायत्वेन ''**तपसा ब्रह्म विजिज्ञासस्व**'' इति उपदिष्टवान्। **तपो** नाम इन्द्रियनिग्रहः। वेदान्तवाक्यार्थविचारोऽपि **तप** एव। सद्गुरुसेवया सद्गुरूपदेश श्रवणेन तपसा साधकः आत्मज्ञानं सम्पादयेत् इति हि **वैशाखमासस्य** सन्देशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्मविद्याबलनिष्ठाय वेदान्तभास्कराय नमः॥

दुर्बलः प्रबलो भूयाद् आत्मविद्याप्रभावतः।
ज्येष्ठमासे विवेकी तु धीरो **वेदान्तभास्करः**॥

दुर्बलो मानवः **ज्येष्ठमासे** आत्मविद्याप्रभावतः प्रबलो विवेकी धीरश्च भूयात्॥

३. ज्येष्ठमासः

दीनो 'धीरो' भवेत्

अतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।

केनोपनिषत् १-२

देहाभिमानात् अतिमुच्य धीराः विवेकिनः अमृता भवन्ति॥

अयं **ज्येष्ठमासः**। अज्ञानिनः मानवान् ज्ञानित्वेन परिवर्तयत्ययं श्रेष्ठो **ज्येष्ठमासः**। आत्मज्ञानप्रभावेण साधकान् अस्मान् **ज्येष्ठान् श्रेष्ठान्** च करोत्ययं पर्वमासो **ज्येष्ठमासः**। अस्मिन् मासे **केनोपनिषदः** सन्देशं चिन्तयाम॥

नायमात्मा तृणसदृशो मानवः यथा वयं जानीमः। न च अयमात्मा नाम जनित्वा, जीवित्वा, म्रियमाणस्वभावः। न चायमात्मा वराकः। किं तु अयमात्मा अजः अमृतः नित्यशुद्ध-नित्यबुद्धनित्यमुक्तः श्रेष्ठः प्रत्यगात्मस्वभावश्च॥

सर्वेंद्रियाणां प्रत्यगात्मतया तद्विकारसाक्षी, अविनाशी, अविकारी आत्मैवाहमस्मि इति यो जानाति सः श्रेष्ठश्च ज्येष्ठश्च भवति। इन्द्रियमनोबुद्धिविलक्षणः स्वस्वरूपस्थो हि **धीरो** नाम भवति। एवंवित् अमृतः आत्मा भवति। अविद्यारहितः सन् साधको ज्येष्ठः **श्रेष्ठश्च** भवेत् इत्येषः **ज्येष्ठमासस्य** सन्देशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्गुरुभक्तपुंगवाय वेदान्तभास्कराय नमः॥

गुरुपूजाप्रसादेन सिद्धिं प्राप्नोति साधकः।
गुरु**राषाढमासे**ऽस्मिन् पूज्यो **वेदान्तभास्करः**॥

साधकः गुरुपूजाप्रसादेन ज्ञानसिद्धिं प्राप्नोति। अतः अस्मिन् **आषाढमासे** सद्गुरुः साधकैः भक्त्या पूज्यः॥

४. आषाढमासः

गुरुपूजामहिमा !

तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः।
मुण्डकोपनिषत् ३-१-१०

तस्मात् भूतिकामः मानवः आत्मज्ञं ह्यर्चयेत्।

अयम् **आषाढमासः**। अस्मिन् पवित्रे मासे भगवान् **वेदव्यासः** अवतीर्णोऽस्ति। **आषाढमासपूर्णिमातिथिः व्यास-पूर्णिमा, गुरुपूर्णिमा** इत्येव प्रसिद्धास्ति। अस्मिन् आषाढमासे संन्यासिनः स्वगुरून् वेदव्यासमहर्षिं च पूजयन्ति। अध्यात्म-साधकानाम् परमपवित्रोऽयम् मासः **आषाढमासः**। अस्मिन् मासे **मुण्डकोपनिषदः** सन्देशं पश्याम॥

सर्वोऽपि जिज्ञासुः आत्मज्ञानिनं भक्त्या पूजयेत्। अवस्थात्रय साक्षिभूतः आत्मैव अहमस्मीति यो जानाति स एव आत्मज्ञानी। अयमेव सद्गुरुश्च। सकामाः सन्तः ये मानवाः सद्गुरूणाम् पूजां कुर्वन्ति ते प्राप्ताभ्युदया भवन्ति, ये तु निष्कामाः मुमुक्षवश्च सन्तः आत्मज्ञानिनः सद्गुरून् उपासते तेषाम् आत्मज्ञानमेव लभ्यते, लब्ध कैवल्या एव भवन्ति। सर्वथा सद्गुरुसेवया सद्गुरुकृपानुग्रहेण सर्वाणि फलानि लभ्यन्ते। अवगतो वा सद्गुरुपूजामहिमा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदान्तश्रावणपरायणाय वेदान्तभास्कराय नमः॥

श्रवणात् लभते ज्ञानं सद्गुरोः कृपया नरः।
श्रावणे श्रवणं कुर्यात् **मासे वेदान्तभास्करः**॥

नरः सद्गुरोः कृपया वेदान्तश्रवणात् आत्मज्ञानं लभते। तस्मात् **श्रावणे मासे** साधकः वेदान्तश्रवणं कुर्यात्॥

५. श्रावणमासः

श्रवणफलमिदम् !

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

श्वेताश्वतरोपनिषत् ६-२३

यथा देवे परा भक्तिरस्ति, तथैव सद्गुरौ अपि परा भक्तिः यस्य अस्ति, तादृशस्य महात्मनः जिज्ञासोः वेदान्तप्रकाशिताः सर्वेऽपि अर्थाः शुद्धान्तःकरणे प्रकाशन्ते॥

श्रावणमासोऽयम्। अस्मिन् **श्रावणमासे** सद्गुरुभ्यः वेदान्तसन्देशान् शृणुयात् साधकः। अस्मिन् **श्रावणे मासे** सद्गुरु-सेवापरो भूत्वा सद्गुरुकृपापात्रं सन् साधकः कृतार्थो भवेत्। अस्मिन् **श्रावणे मासे श्वेताश्वतरोपनिषदः** सन्देशम् अवगच्छाम॥

अध्यात्मसाधकैः सद्गुरुभक्तैर्भाव्यम्। सद्गुरवो नाम 'वदन्तो देवाः' इति पूजयेत् साधकः। पवित्रज्ञानोपदेशेन अज्ञानान्ध-कारहन्ता सद्गुरुः भगवतोऽपि ज्येष्ठः श्रेष्ठः खलु? एवंभावनया सद्गुरुसेवापरायणः सन् सद्गुरुभ्य एव वेदान्तवाक्यार्थश्रवणं कुर्यात् साधकः। एवंभूतस्य गुरुभक्तस्य जिज्ञासोः अवश्यमेव आत्म-ज्ञानोदयद्वारा मोक्षसाम्राज्यं लभ्यते। विज्ञातं वा श्रवणफलम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भद्रपदनिष्ठाय वेदान्तभास्कराय नमः॥

शरीरस्थोऽपि निर्दोषः सर्वोपाधिविवर्जितः।
आत्मा **भाद्रपदे मासे** ध्येयो **वेदान्तभास्करः**॥

सर्वोपाधिविवर्जितः आत्मा शरीरस्थोऽपि निर्दोष एव इति **भाद्रपदे मासे** आत्मा ध्येयः॥

६. भाद्रपदमासः

आत्मा सर्वथा असङ्ग एव

अशरीरं शरीरेषु अनवस्थेष्ववस्थितम्।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥

काठकोपनिषत् १-२-२२

शरीरेषु विद्यमानोऽपि अशरीर सन्तम्, नित्यविकारिषु विद्यमानोऽपि अविकारिणम् सन्तम्, महान्त विभुम् आत्मानं मत्वा धीरो जिज्ञासुः न शोचति॥

अयं **भाद्रपदमासः**। भद्रं मङ्गळम्, पदं स्थानम्। निर्दोषस्य परतत्त्वस्य रहस्यं साधकेभ्य उपदिशति अयं मासः **भाद्रपदमासः**। अस्मिन् **भाद्रपदे मासे** वरसिद्धिविनायकं सम्पूजयन्तः भक्ताः सकलाः सिद्धीः प्राप्नुवन्ति। अस्मिन् भाद्रपदे मासे **काठकोपनिषदः** सन्देशं चिन्तयाम॥

आत्मा स्थिरः (कन्नडभाषायां भद्रः) मङ्गळस्वरूपश्च। देहे एव विद्यमानोऽपि आत्मा स्वयं अविकारी स्थिरः शिव एव आस्ते। निरुपाधिकः आत्मा तु सत्यः, मङ्गळस्वरूपश्च भवति। इमम् आत्मानम् आत्मत्वेन पश्यतः दुःखं वा भयं वा शोको वा मोहो वा नैव सम्भवति। इति एषः **भाद्रपदमासस्य** सन्देशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वभूताश्रयाय वेदान्तभास्कराय नमः॥

शक्तिभूतं परात्मानं सर्वभूतसमाश्रयम्।
भजेदाश्वयुजे मासे धीरो **वेदान्तभास्करः**॥

सर्वभूताश्रयं शक्तिभूत परात्मानम् **आश्वयुजे मासे** भजेत्॥

७. आश्वयुजमासः

परमात्मैव सर्वस्य जगतो मूलशक्तिः

स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते।
एवं ह वै तत् सर्वं परे आत्मनि सम्प्रतिष्ठते॥

प्रश्नोपनिषत् ४-७

हे सोम्य, सौर्यायणीगार्ग्य, यथा पक्षिणः वासोवृक्ष सम्प्रतिष्ठन्ते, एवमेव सर्वे प्राणिनः सुषुप्तौ आत्मनि सम्प्रतिष्ठन्ते॥

अयम् **आश्वयुजमासः**। धीराः क्षत्रिया राजानः अश्वारूढाः सन्तः जगत् सर्वं जित्वा शक्तिदेवताम् अस्मिन् **मासे आश्वयुजे** पूजयन्ति। अस्मिन् मासे **प्रश्नोपनिषदः** पवित्रं सन्देशं शृणवाम॥

इदं जगत् आत्मन आगत्य, स्थित्वा, आत्मन्येव लीयते। परमात्मैव **शक्तिस्वरूपः**। ''**सर्वं शक्त्यात्मकं जगत्**'' इतिवत् ''**सर्वं ब्रह्मात्मकं जगत्** इति उपदिशति इयम् **प्रश्नोपनिषत्**॥

अत्र एको दृष्टान्तः। पक्षिणः उत्प्लुत्य, आकाशे अटित्वा, आयासपीडिताः सन्तः यथा आत्मनः वासस्थानं वृक्षनीडमेव आश्रित्य वसन्ति, एवमेव सर्वेऽपि प्राणिनः जागरिते स्वव्यापारं कृत्वा आयस्ताः सन्तः रात्रौ स्ववासस्थानभूतं परमात्मानमेव आश्रयन्ते। स परमात्मा एव शक्तिस्वरूपः। एवरूपमात्मानम् अस्मिन् **आश्वयुजमासे** चिन्तयेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'तज्जलान्'तात्पर्यविदे वेदान्तभास्कराय नमः॥

सर्वं खल्विदं ब्रह्म शिवं शान्तं निरञ्जनम्।
विवेकी **कार्तिके मासे** भजेद् **वेदान्तभास्करः**॥

इदं सर्वं जगत् शिवं शान्तं निरञ्जनं ब्रह्मैव इति विवेकी साधकः **कार्तिकमासे** भजेत्॥

८. कार्तिकमासः

इदं जगत् 'तज्जलान्' अस्ति

सर्वं खल्विदं ब्रह्म 'तज्जलान्' इति शान्त उपासीत।

छान्दोग्योपनिषत् ३-१४-१

*इदं सर्वं ब्रह्मैव खलु? यस्मात् इदं जगत् **'तज्जलान्'** अस्ति। तस्मात् शान्तः सन् साधकः एवम् उपासीत॥*

अयं **कार्तिकमासः**। शान्तरूपिणं परमशिवं ज्ञानरूपिणं सुब्रह्मण्यं च अस्मिन् **कार्तिकमासे** पवित्रे आराधयन्ति साधकाः। भागवतोत्तमं बलिचक्रवर्तिनम् अनुगृह्य भगवता श्रीकृष्णेन पवित्रीकृतोऽयं मासः। दीपावळीमहोत्सवस्य आश्रयभूतोऽयं **कार्तिकमासः**। अस्मिन् मासे **छान्दोग्योपनिषदः** सन्देशं जानीम॥

अस्य विशालस्य जगतः **'तज्जलान्'** इति नामधेयम्। 'तज्जलान्' इति तस्मात् जातं तज्जं, तस्मिन् लीयते इति तल्लं, तस्मिन्नेव अनिति इति तदनं च। **तज्जत्वात्, तल्लत्वात्, तदनत्वाच्च तज्जलान्** इति शाङ्करभाष्यम्। **'सर्वं शिवमयं जगत्'**—इति इदं सर्वं विश्वं परमात्मैव। अत्र निरुपाधिकं ब्रह्मैव हि परशिवो नाम। तस्मात् सर्वानपि दोषान् दूरीकृत्य साधकः शान्तः सन् परमेव ब्रह्म अस्मिन् **कार्तिकमासे** अनुसन्दधीत॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं राजमार्गोपदेशकाय वेदान्तभास्कराय नमः॥

आत्मज्ञानेन मुक्तिः स्यात् नान्यथा साधनान्तरैः।
मार्गशीर्षे बुधो विद्यात् **मासे वेदान्तभास्करः**॥

आत्मज्ञानेनैव मुक्तिः स्यात्, अन्यथा साधनान्तरैः न मुक्तिः इति **मार्गशीर्षे मासे** बुधो विद्यात्॥

९. मार्गशीर्षमासः

मुमुक्षूणां 'राजमार्गो'ऽयम्

अमृतत्वस्य तु न आशा अस्ति वित्तेन इति होवाच भगवान् याज्ञवल्क्यः।

बृहदारण्यकोपनिषत् २-४-२

वित्तेन अमृतत्वस्य आशा नास्ति इति याज्ञवल्क्यः होवाच।

अयं **मार्गशीर्षमासः**। अध्यात्मसाधकानां साधनमार्गे परममूर्धन्यप्रायो **मासः मार्गशीर्षः**। सुब्रह्मण्य आञ्जनेय दत्तात्रेयादयो महातपस्विनः, ब्रह्मचारिपुङ्गवाः अस्मिन् **मार्गशीर्षे मासे** अवतीर्णाः सन्ति। **'मासानां मार्गशीर्षोऽहं'** इति भगवता वासुदेवेन उपदिष्टत्वात् **''भगवद्विभूति''**मासोऽयं **मार्गशीर्षो मासः**। अस्मिन् मासे **बृहदारण्यकोपनिषदः** सन्देशं चिन्तयाम॥

आत्मनः प्रियायै धर्मपत्न्यै मैत्रेय्यै ज्ञानिपुङ्गवेन महर्षिणा याज्ञवल्क्येन उपदिष्टोऽयं मन्त्रः। अमृतत्वं, मोक्षः केवलेन ज्ञानमात्रेण लभ्यते, न तु लौकिकेन वित्तेन। लौकिकसम्पदा अस्माकं जीवनं केवलं भोगमयं भवेत्, न तु मुक्तिः लभ्यते। आत्मविद्यया एव केवलया मोक्षसाम्राज्यप्राप्तिः। वेदान्तवाक्यार्थविचारेणैव हि ज्ञानप्राप्तिः। मुमुक्षूणां **राजमार्गो**ऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं यतिमार्गोपदेशकाय वेदान्तभास्कराय नमः॥

विहाय सर्वकार्याणि गुरुसेवापरायणः।
वेदान्ती **पुष्यमासे** तु यतिर्**वेदान्तभास्करः**॥

सर्वकार्याणि विहाय गुरुसेवापरायणो भूत्वा यतिः **पुष्यमासे** वेदान्ती भवेत्॥

१०. पुष्यमासः

संन्यासिभ्यो मुक्तासमः सन्देशः

अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुद्ध्य भक्त्या स्वगुरुं प्रणम्य। कैवल्योपनिषत् १-५

अन्त्याश्रमस्थः यतिः सकलेन्द्रियाणि निरुद्ध्य स्वगुरु भक्त्या प्रणम्य वेदान्तार्थमननपरो भूयात्॥

पुष्यमासोऽयम्। अस्मिन् शून्ये मासे सामान्यतः लौकिकाः जनाः न कञ्चिदपि मङ्गळोत्सवं कुर्युः। अत एव विशेषतः सद्गुरुसेवां कर्तुं, वेदान्तवाक्यार्थचिन्तनं च कर्तुं प्रोत्साहयति अयं मासः। अस्मिन् **पुष्यमासे कैवल्योपनिषदः** मङ्गळसन्देशं पश्याम॥

परब्रह्मतत्त्वजिज्ञासवः, विविदिषवः संन्यासिनः स्वगुरून् पूजयेयुः। सद्गुरुसेवापरायणाः सन्त एव ते यतयः वेदान्तश्रवणं कुर्युः। उपनयन विवाह गृहप्रवेशादि मङ्गळोत्सवरहितेऽस्मिन् मासे यतिभिः साधकैः विशेषतः सद्गुरुसेवा कर्तव्या, वेदान्तवाक्यार्थ-विचारश्च अवश्यं कर्तव्य एव इति उपदिशत्ययं मन्त्रः। सामान्य-लौकिका अपि जनाः अस्मिन् मासे विशेषतः वेदान्तश्रवणं कुर्युः इति अयं **पुष्यमासः** उपदिशति। यतो हि वेदान्तवाक्यार्थ-विचारादेव आत्मज्ञानोदयः, न तु केवलेन कर्मोपासनादिना॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापविदूराय वेदान्तभास्कराय नमः॥

आत्मज्ञानबलादेव विध्वंसः पुण्यपापयोः।
माघे मासे भवेन्नूनं विद्याद् **वेदान्तभास्करः**॥

आत्मज्ञानबलादेव पुण्यपापयोः विध्वंसः नूनं भवेत् इति **माघमासे** विद्यात्॥

११. माघमासः

ज्ञानादेव अघनाशः

तस्य मे तत्र न लोम च मा मीयते।

कौषीतकिब्राह्मणोपनिषत् ३-१

तादृशस्य मे लोम एकमपि न मीयते॥

अयं **माघमासः**। गङ्गा यमुना कावेरी—इत्याद्यासु नदीषु स्नानानुष्ठानं कृत्वा (मा अघ) अघं पापं दूरीकुर्वन्ति साधकाः अस्मिन् मासे। ज्ञान**भास्कर**स्य आराधनमासोऽयं **माघमासः**। आत्मज्ञानबलेन पुण्यपापयोः क्षालनमासोऽयं **माघमासः**। अस्मिन् मासे **कौषीतक्युपनिषदः** सन्देशस्य मननं करवाम॥

देवेन्द्रेण प्रतर्दनाय उपदिष्टोऽयं मन्त्रः। सन्दर्भस्तु अयम्, ''अहं त्वाष्ट्रम् हतवान्, वेदान्तविमुखान् यतीन् वृकेभ्यो दत्तवान्, तथापि अनेन मम पापलेपलेशोऽपि नास्ति'' इति ज्ञानिपुङ्गवेन देवेन्द्रेण उद्घोषितम्। न हि आत्मज्ञानी पुण्यं वा पापं वा अपेक्षते। धीरोऽयम् आत्मज्ञानेन पुण्यपापे उभेऽपि तरति। जन्मान्तरहेतुभूतं पुण्यमपि बन्धकमेव भवति। आत्मज्ञानेन पुण्यपापरूपाघनाश एव (मा अघ) इतिसन्देशं सूचयति अयं धीरो **माघमासः**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जीवन्मुक्तवरिष्ठाय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानबलादेव जीवन्मुक्तो भवेन्नरः।
ब्रह्मिष्ठः **फाल्गुणे मासे** ब्रह्म **वेदान्तभास्करः**॥

अस्मिन् **फाल्गुणे मासे** नरः ब्रह्मज्ञानबलादेव जीवन्मुक्तः ब्रह्मैव च ब्रह्मिष्ठः भवेत्॥

१२. फाल्गुणमासः

आत्मज्ञानी नाम जीवन्मुक्त एव

तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते।

कैवल्योपनिषत् २-२४

तस्माद् एवम् एनमात्मानं विदित्वा कैवल्यं फलम् अश्नुते॥

फाल्गुणमासोऽयम्। 'फल्गु न', 'अल्पं न' इति अनित्यात् अल्पात् फलात् भिन्नं नित्यं शाश्वतं सत्यं फलं मोक्षं स्मारयति अयं **फाल्गुणमासः**। फल्गुफलात् साधकान् ऊर्ध्वं नयति इति **फाल्गुणमासो**ऽयम्। अयं चान्द्रमानसंवत्सरस्य अन्तिमो मासः, मानवानां परमलक्ष्यं सूचयति अयं **फाल्गुणमासः**। अस्मिन् मासे **कैवल्योपनिषदः** दिव्यं मङ्गळं तथा परमं सन्देशं पश्याम॥

अन्वर्थनाम्नी खलु एषा **कैवल्योपनिषत्**। कैवल्यं, मोक्षः, ब्राह्मीस्थितिः, ब्रह्मनिष्ठा, जीवन्मुक्तिः इति पर्यायपदानि। अयं प्रकृतो मन्त्रः **कैवल्योपनिषदः** अन्तिमो मन्त्रः। आत्मज्ञानादेव कैवल्यं लभ्यते नान्यथा। परब्रह्मस्वरूप एवाहम् इति निश्चय एव आत्मज्ञानं नाम। अद्वितीयः आत्मैवाहमिति अनुभवे जाते सः जीवन्मुक्त एव। एवम् आत्मज्ञानबलेन मानवः **ब्रह्मिष्ठः जीवन्मुक्तश्च भवेदेव। ब्रह्मवित् ब्रह्मैव भवति**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

वेदान्तसंवत्सरग्रन्थः केषामर्थाय?

त्यक्तबाह्यविषयचिन्तनानां शान्तानां **संन्यासिनाम्**—

सांसारिकभारविरक्तानां तपःपराणां **वानप्रस्थानाम्**—

सद्गुरुसेवातत्पराणां धीराणां **ब्रह्मचारिणाम्**—

सांसारिकदुःखपरिजिहीर्षूणां **गृहस्थानाम्**—

श्रोतृजनमनःप्ररोचकानां वाग्मिनां **प्रवचनकाराणाम्**—

मेधाकामानां श्लोकप्रियाणां बालानां **विद्यार्थिनाम्**—

वेदान्तसन्देशजिज्ञासूनां कुतूहलिनां **लौकिकानाम्**—

शमादिसाधनपराणां तत्त्वजिज्ञासूनां **साधकानाम्**—

प्रत्यहं स्तोत्रपारायणवत् पारायणपराणाम् **स्त्रीणाम्**—

जन्ममरणसंसारभयपरिजिहीर्षूणां **मुमुक्षूणाम्**—

वेदान्तार्थचिन्तनपराणां परमसाधूनां **वेदान्तिनाम्**—

समधीतवेदान्तानां शास्त्रज्ञानवतां **पण्डितानाम्**—

प्रत्यहं श्रद्धया भक्त्या उत्साहेन **पारायणपराणाम्**—

अयं ग्रन्थः साधकान् **सिद्धान्** करोति, दुःखिनः **सुखिनः** करोति, जिज्ञासून् **ज्ञानिनः** करोति, विद्यार्थिनः **विदुषः** करोति, आरुरुक्षून् **आरूढान्** करोति, मुमुक्षून् **मुक्तान्** करोति।

॥ 'वेदान्तसंवत्सरः' तत्त्वचिन्तकानां वेदान्तकामधेनुः ॥

॥ ओं वेदान्तभास्कराय नमः॥

चतुर्दश उपनिषदः

आत्मज्ञानोपदेशद्वारा मोक्षस्वरूपं प्रदर्शयन्त्यः, प्रमाणत्वेन सर्वैः आचार्यैः स्वीकृताः **उपनिषदः** चतुर्दश विद्यन्ते। ताश्च—

१. **ईशावास्योपनिषत्**—शुक्लयजुर्वेदीयसंहितायाः चत्वारिंशोऽध्यायः। अष्टादशमन्त्रशरीरा इयम् उपनिषत् आत्मनः स्वरूपं सुन्दरतया उपदिशति॥

२. **केनोपनिषत्**—सामवेदस्य तलवकारशाखीया। 'तलवकारोपनिषत्' इति च प्रसिद्धा एषा उपनिषत्। चतुर्षु खण्डेषु पञ्चत्रिंशत्मन्त्रैः पूर्णा इयमुपनिषत्। इन्द्रियमनोबुद्धीनाम् साक्षिभूतं प्रत्यगात्मानं प्रतिपादयति॥

३. **काठकोपनिषत्**—कृष्णयजुर्वेदीय काठकारण्यक भागान्तर्गता। नचिकेतसः प्रश्नाः ब्रह्मविद्याचार्यस्य मृत्योः प्रतिवचनानि; एवं प्रश्नोत्तररूपेण, क्रमेण वैराग्यमहिमानम् आत्मज्ञानस्य स्वरूपं च उपदिशति एषा उपनिषत्। अत्र द्वौ अध्यायौ, षट् वल्ल्यः विंशत्युत्तरशतं च मन्त्रा विद्यन्ते॥

४. **प्रश्नोपनिषत्**—अथर्वब्राह्मणोपनिषत्। 'षट्' प्रश्नानां प्रतिवचनानि वर्तन्ते इति एषा '**षट्प्रश्नोपनिषत्**' इति च प्रथितास्ति। ब्रह्मिष्ठः **पिप्पलादो** भगवान् महर्षिः अत्र सद्गुरुः। सृष्टिविचारः, प्राणोपासनं, अक्षरस्वरूपं चात्र सम्यक् निरूपितम्। अस्याम् उपनिषदि षट् प्रश्नाः (अध्यायाः), सप्तषष्टिसङ्ख्याकाः मन्त्राश्च विद्यन्ते। षोडशकलानामुत्पत्तिः कलातीतात्मनश्च स्वरूपं दर्शितमस्याम् उपनिषदि॥

५. मुण्डकोपनिषत्—आथर्वणसंहिताभागस्था एषा उपनिषत् परब्रह्मणः स्वरूपं समुपदिशति। शौनकेन जिज्ञासुना पृष्टः अङ्गिराः महर्षिः अत्र ब्रह्मविद्याचार्यः आत्मज्ञानस्य अक्षरस्वरूपस्य च महिमानं सम्यक् प्रतिपादयति। षडङ्गसहितानाम् शब्दराशिभूतानाम् ऋग्वेदादीनाम् अपराविद्यान्तर्गतत्वं दर्शयित्वा पराविद्यायाः महत्त्वं परतत्त्वस्वरूपं च अत्र प्रतिपादयति। अस्याम् उपनिषदि त्रीणि मुण्डकानि, षट् खण्डाः, पञ्चषष्टिः मन्त्राश्च विद्यन्ते॥

६. माण्डूक्योपनिषत्—अथर्ववेदीया उपनिषत्। केवलं द्वादशभिः सुन्दरैः मन्त्रैः परिपूर्णा इयम् उपनिषत् **'सर्ववेदान्तार्थसारसङ्ग्रहभूता'** इति भगवता श्रीशङ्करेण भाष्यकारेण महीकृता अस्ति। **''माण्डूक्यम् एकमेवालं मुमुक्षूणां विमुक्तये''** इति प्रसिद्धा सूक्तिः अस्याः उपनिषदः महत्त्वं सूचयति। **अयमात्मा ब्रह्म** इति सुप्रसिद्ध महावाक्यम् अत्रोपनिषदि राराजते॥

७. तैत्तिरीयोपनिषत्—कृष्णयजुर्वेदीय तैत्तिरीय आरण्यकस्य सप्तम अष्टम नवम प्रपाठात्मिका एषा उपनिषत्। शीक्षावल्ली, ब्रह्मानन्दवल्ली, भृगुवल्ली इति वल्लीत्रयात्मिका इयम् उपनिषत्। पञ्चकोशातीतस्य आत्मनः स्वरूपं समुपदिष्टमस्ति। शीक्षावल्ल्याम् एकादश अनुवाकाः, ब्रह्मानन्दवल्ल्यां नव अनुवाकाः, तथा भृगुवल्ल्यां दश अनुवाकाः सन्ति॥

८. ऐतरेयोपनिषत्—ऋग्वेदीया उपनिषत्। ऐतरेय ब्राह्मणान्तर्गता। जगतः, देवानां च उत्पत्तिः अत्र उपदिष्टास्ति। वामदेवमहर्षेः गर्भस्थस्यैव आत्मज्ञानं जातम् इति उपदिशति इयम्

उपनिषत्। प्राणसंवादद्वारा मुख्यस्य प्राणस्य महिमानं द्योतयति। अस्यामेव उपनिषदि "**प्रज्ञानं ब्रह्म**" इति महावाक्यं विराजते। अत्र त्रिषु अध्यायेषु त्रयस्त्रिंशत् मन्त्राः सन्ति॥

९. छान्दोग्योपनिषत्—सामवेदीय कौथुमशाखान्तर्गत ताण्ड्यब्राह्मणभागस्था एषा उपनिषत्। दशोपनिषत्सु बृहत्त्वदृष्ट्या इयम् उपनिषत् द्वितीयं स्थानं भजते। अष्टाध्यायात्मिका एषा उपनिषत्। पूर्वेषु पञ्चसु अध्यायेषु विशेषतः उद्गीथोपासनानि इतराणि च उपासनानि उपदिष्टानि सन्ति। लोकान्तरजन्मान्तरविषयाश्च अत्र उपदिष्टाः सन्ति॥

षष्ठसप्तमाध्याययोः विशेषतः परस्य ब्रह्मणः विचारः कृतोऽस्ति। श्वेतकेतूद्दालकयोः नारदसनत्कुमारयोः तथा इन्द्रप्रजापत्योः संवादाः मननीयाः सन्ति। भूमविद्याप्रतिपादकः सप्तमोऽध्यायः अमृतभोजनसमोऽस्ति। तपस्वी नारदमहर्षिः स्वयं देवर्षिरपि सन् सनत्कुमारात् सद्गुरोः ब्रह्मिष्ठात् आत्मज्ञानं प्राप्तवान् इति उपदिशति इयम् उपनिषत्। सुप्रसिद्धं '**तत्त्वमसि**' महावाक्यम् अत्रोपनिषदि विराजते॥

१०. बृहदारण्यकोपनिषत्—शुक्लयजुर्वेदीय शतपथ ब्राह्मणान्तर्गता एषा उपनिषत्। अन्वर्थनाम्नी इयं बृहत्काया उपनिषत्। मधुकाण्डम्, मुनिकाण्डम् तथा खिलकाण्डम् इति काण्डत्रयात्मिका एषा उपनिषत्। अत्र षट् अध्यायाः भवन्ति। कर्माणि, विधविधानि उपासनानि च अत्र उपदिष्टानि। आत्मज्ञानविचारस्तु सुदीर्घतया समुपदिष्टोऽस्ति। गार्ग्य अजातशत्रु, जनक याज्ञवल्क्य, याज्ञवल्क्य पण्डित, गार्गी याज्ञवल्क्य, मैत्रेयी याज्ञवल्क्यानां संवादाः उत्तमजिज्ञासूनां मननीयाः सन्ति।

'**अहं ब्रह्मास्मि**' इति प्रसिद्धं महावाक्यम् अत्र प्रकाशते॥

११. **श्वेताश्वतरोपनिषत्**—कृष्णयजुर्वेदान्तर्गता। अत्र षट् अध्यायाः, त्रयोदशोत्तरशतं मन्त्राः सन्ति। ओंकारोपासनम्, ध्यान-प्रकारः, प्राणायामादीनां च विचारः उपदिष्टोऽस्ति। प्रत्यगात्मनः ब्रह्मणश्च स्वरूपं निर्दिष्टमस्ति। सद्गुरुकृपया एव आत्मज्ञानोदयः इति उपदिष्टमस्ति॥

१२. **कौषीतकि उपनिषत्**—ऋग्वेद ब्राह्मणान्तर्गता। अत एव "**कौषीतकिब्राह्मणोपनिषत्**" इत्येव एषा प्रथितास्ति। अत्र अध्यायचतुष्टयमस्ति। विशेषतः तृतीये अध्याये इन्द्रप्रतर्दनसंवादे परतत्त्वस्वरूपं निर्दिष्टमस्ति। चतुर्थे अध्याये दृप्तबालाकि अजातशत्रुसवादद्वारा आत्मनः स्वरूपं समुपदिष्टमस्ति॥

१३. **जाबालोपनिषत्**—अथर्ववेदीया उपनिषत्। अत्र केवलं षडेव मन्त्राः सन्ति। अत्रियाज्ञवल्क्यसवादे प्राणोपासनक्रमः समुपदिष्टोऽस्ति। अत्र जनकयाज्ञवल्क्यसवादश्च वर्तते। संन्यासस्य महिमानं परमहंसानां लक्षणानि च उपदिशति इयम् उपनिषत्॥

१४. **कैवल्योपनिषत्**—अथर्ववेदान्तर्गता। अस्याम् उपनिषदि केवलं चतुर्विंशतिमन्त्राः सन्ति। आत्मज्ञानप्राप्ति साधनत्वेन श्रद्धाभक्तिध्यानानि अत्र समुपदिष्टानि सन्ति। सर्वभूत गुहाशयस्य परमात्मनः विज्ञानात् कैवल्यं फलम् अश्नुते इत्युक्त्वा एषा उपनिषत् उपसहृता भवति॥

अस्मिन् "**वेदान्तसंवत्सर**"ग्रन्थे एताभ्यः चतुर्दशभ्यः उपनिषद्भ्यः ३८५ भिन्नान् सुन्दरान् मन्त्रान् स्वीकृत्य प्रत्यहं एकम् मननीयं सन्देशं दर्शयति लेखकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

विषयानुक्रमणिका

पूर्वपीठिका			i to lxiv
प्रकाशकनिवेदनम्, लेखकस्य विनयोक्तिः, प्रायोजकनिवेदनम्, सुब्रायशर्मसाहसचतुष्टयम्, पीठिका, Foreword, सप्ताहसन्देशाः, उत्सवमूर्तिः, कृतज्ञता, माससन्देशाः, १४ उपनिषदः			
१. सर्वमपि विश्वं परमात्मैव	ई. १	जनवरी	१
२. न तत्र इन्द्रियाणां कृत्यमस्ति	के. १-३	जनवरी	२
३. 'कुत्सित'दानात् नरकप्राप्तिः	का. १-१-३	जनवरी	३
४. सद्गुरुसेवयैव ज्ञानोदयः!	प्र. १-१	जनवरी	४
५. गाढाविद्यायाः फलमिदम्।	मु १-२-८	जनवरी	५
६. अथर्ववेदस्य 'महावाक्य'मेतत्	मां. २	जनवरी	६
७. त्रिशङ्कोः उद्धारः	तै. १-१०	जनवरी	७
८. सर्वेऽपि प्राणिनः परं ब्रह्मैव	ऐ. ३-१-३	जनवरी	८
९. प्राणोपासनस्य महिमा !	छां. १-२-८	जनवरी	९
१०. इदं सर्वं पुरुषस्य महिमा	बृ. १-४-१	जनवरी	१०
११. ब्रह्मविद्यायाः महिमा ह्येषः!	कै. १-१	जनवरी	११
१२. वामदेवमहर्षेः धीरोद्गारः!	बृ. १-४-१०	जनवरी	१२
१३. आत्मावबोधनकौशलम्	का. २-१-३	जनवरी	१३
१४. ईदृशस्यैव स्वात्मप्राप्तिः	मुं ३-२-३	जनवरी	१४
१५. स्वाराज्यप्राप्तेः साधनमिदम्	तै. १-६	जनवरी	१५
१६. प्राणोपासकोऽपि प्राणसम एव	छा. ५-१-१	जनवरी	१६
१७. ज्ञानिनां कृत्यमिदम्	श्वे. १-१	जनवरी	१७
१८. प्राणोपासनस्य रहस्यपञ्चकम्	प्र. ३-१२	जनवरी	१८
१९. मरणात् मुक्तिः	का. १-३-१५	जनवरी	१९
२०. बलिष्ठोऽपि बलहीनोऽयम्	मुं ३-२-४	जनवरी	२०

२१. किमर्था दीर्घकालं जिजीविषा?	तै. २-७-३	जनवरी २१
२२. सर्वमेतत् चैतन्यविलास एव	ऐ. ३-१-२	जनवरी २२
२३. ब्रह्मैव जीवरूपेण अवभासते	छा. ६-३-२	जनवरी २३
२४. 'इव'कारस्य महिमा	बृ. ४-३-३१	जनवरी २४
२५. 'द'कारस्य रहस्यम्!	बृ. ५-२-२	जनवरी २५
२६. त्यागेनैव आनन्दः	ई. १	जनवरी २६
२७. अशाश्वतं हि मानवजन्म!	का. १-१-६	जनवरी २७
२८. ब्रह्मविद्यायाः त्रीणि साधनानि	कै. १-२	जनवरी २८
२९. उभौ अपि अस्मास्वेव विद्येते	बृ. १-३-१	जनवरी २९
३०. ब्रह्मचारिणा मातृभक्तेन भाव्यम्	छा. ४-४-१	जनवरी ३०
३१. 'गुरु'र्नाम 'भगवान्' एव	छां. ६-१-७	जनवरी ३१
३२. ईदृशस्यैव ज्ञानप्राप्तिः	का. १-२-२३	फेब्रुवरी १
३३. उपासनस्य त्रयो विघ्नाः	प्र. १-१६	फेब्रुवरी २
३४. ज्ञानेन चत्वारि फलानि	मुं ३-२-९	फेब्रुवरी ३
३५. अहो! सत्यव्रतस्य शक्तिः!	छा. ४-४-५	फेब्रुवरी ४
३६. 'ततत्तमं' ब्रह्म	ऐ. १-३-१३	फेब्रुवरी ५
३७. सौजन्यमूर्तिर्हि सद्गुरुर्नाम!	बृ. ३-८-८	फेब्रुवरी ६
३८. कालस्यापि कारणम् आत्मा	श्वे. १-३	फेब्रुवरी ७
३९. प्राणस्य महिमा	प्र. २-१३	फेब्रुवरी ८
४०. नेत्राभ्यां द्रष्टुम् आत्मा अशक्यः	का. २-३-९	फेब्रुवरी ९
४१. परमात्मा नाम अयमेव	ई. ४	फेब्रुवरी १०
४२. अशनाया एव हि मृत्युः	बृ. १-२-१	फेब्रुवरी ११
४३. श्रद्धयैव फलप्राप्तिः	तै. १-११	फेब्रुवरी १२
४४. इमे एव खलु परमहसाः	जा. ६-१	फेब्रुवरी १३
४५. एते 'अकृत्स्नविद' एव	बृ. १-४-७	फेब्रुवरी १४

४६. आत्मनः त्रीणि वासस्थानानि	ऐ. १-३-१२	फेब्रुवरी १५
४७. ध्यानस्य फलमिदम्	कै. १-७	फेब्रुवरी १६
४८. रहस्यमन्त्रोऽयम्	श्वे. १-४	फेब्रुवरी १७
४९. परमात्मनः लक्षणमिदम्	श्वे. ६-९	फेब्रुवरी १८
५०. दुःखस्य अवकाशः कुत्र?	ई. १	फेब्रुवरी १९
५१. उभावप्येतौ अज्ञौ एव	का. १-२-१९	फेब्रुवरी २०
५२. ब्रह्मचर्येण ज्ञानप्राप्तिः	प्र. १-२	फेब्रुवरी २१
५३. ब्रह्मवित् ब्रह्मैव भवति	मुं ३-२-९	फेब्रुवरी २२
५४. परमात्मनि तिस्रः प्रार्थनाः	बृ. १-३-२८	फेब्रुवरी २३
५५. सत्यस्य महिमा!	मु ३-१-६	फेब्रुवरी २४
५६. ज्ञानप्राप्त्यै इमानि साधनानि!	के. ४-८	फेब्रुवरी २५
५७. इयमेव हि गुरुदक्षिणा नाम!	मुं ३-२-११	फेब्रुवरी २६
५८. पञ्चकोशातीतो हि ब्रह्मज्ञानी	तै. २-८-५	फेब्रुवरी २७
५९. द्वयोरपि कियदन्तरम् !	बृ. २-४-१४	फेब्रुवरी २८
६०. ज्ञानेन अमृतत्वप्राप्तिः	ऐ. २-१-६	फेब्रुवरी २९
६१. अयमेव हि 'ब्राह्मणो' नाम	बृ. ३-८-१०	मार्च् १
६२ ईदृशस्य नष्टद्वयम्	का. १-३-७	मार्च् २
६३. अज्ञानिनः आत्महन एव !	ई. ३	मार्च् ३
६४. आत्मवीर्यस्य महिमा	के. २-४	मार्च् ४
६५. परमार्थयतयो ह्येते	मुं ३-२-६	मार्च् ५
६६. वृद्धाः प्रमाणम् अस्माकम्	तै. १-११	मार्च् ६
६७. सत्कर्माणि कर्तव्यानि	ई. २	मार्च् ७
६८. न पुण्यं न च पापं तस्य	तै. २-९-२	मार्च् ८
६९. परस्मात् ब्रह्मण एव वेदाः	बृ. २-४-१०	मार्च् ९
७०. ईदृशाना पापलेपो नास्ति	ई. २	मार्च् १०

७१. अक्षिस्थपुरुषः कः?	छा. ४-१५-१	मार्च् ११
७२. सर्वमपि विश्वम् आत्मैव	बृ. २-४-१२	मार्च् १२
७३. नूनं ज्ञानोदयस्तस्य	छा. ६-७-६	मार्च् १३
७४. अस्य तु गतिर्नास्ति	बृ. ४-४-६	मार्च् १४
७५. जगत् सर्वं ब्रह्मैव	तै. २-६-७	मार्च् १५
७६. अस्य, व्यवहारः अस्ति किम्?	बृ. २-४-१४	मार्च् १६
७७. सर्वं विश्वं प्रज्ञानेत्रमेव	ऐ. ३-१-३	मार्च् १७
७८. स्वाध्यायस्य महिमा	तै. १-९	मार्च् १८
७९. जानतः न ज्ञातम्	के. २-३	मार्च् १९
८०. दुराचारी नात्मानं जानीयात्	का. १-२-२४	मार्च् २०
८१. ईदृशाः 'बाला' एव	मुं १-२-९	मार्च् २१
८२. ब्रह्म एकम्, नामरूपाणि अनेकानि	बृ. २-५-१९	मार्च् २२
८३. गर्भस्थस्यैव ज्ञानोदयः	ऐ. २-१-५	मार्च् २३
८४. महर्षीणां विचारक्रमः	श्वे. १-२	मार्च् २४
८५. माया, मायावी, ब्रह्म	श्वे. ४-१०	मार्च् २५
८६. देवा अपि अन्धा एव	ई. ३	मार्च् २६
८७. ओङ्कारोपासनस्य फलमिदम्	मुं १-२-११	मार्च् २७
८८. पापक्षयाय ज्ञानमेव रामबाणः	के. ४-९	मार्च् २८
८९. एतेषां जन्ममरणे एव फलम्	मुं १-२-७	मार्च् २९
९०. एतत् त्रय तु कर्तव्यमेव	तै १-११	मार्च् ३०
९१. इदं त्रयमेव हि जगत् नाम?	बृ. १-६-१	मार्च् ३१
९२. जीवात्मनः प्रथमं जन्म एतत्	ऐ. २-१-१	एप्रिल् १
९३. ज्ञानिनः निजानन्दः	तै. ३-१०-८	एप्रिल् २
९४. ज्ञानार्थमेव सकलान्यपि साधनानि	का. १-२-१५	एप्रिल् ३
९५. कर्मानुगुणं जन्म	प्र. ३-७	एप्रिल् ४

९६. आचार्यानुग्रहादेव ब्रह्मविद्याप्राप्तिः	तै. १-३	एप्रिल्	५
९७. ''अहं ब्रह्मास्मि''महिमा	बृ. १-४-१०	एप्रिल्	६
९८. इदं सर्वम् आत्मैव	बृ. २-४-६	एप्रिल्	७
९९. देवा अपि संसारमग्ना एव	ऐ. १-२-१	एप्रिल्	८
१००. परमात्मा सूत्रात्मा च	ई. ४	एप्रिल्	९
१०१. ज्ञानिनः सानन्दः उद्गारः	श्वे. ३-८	एप्रिल्	१०
१०२. आत्मैव अत्यन्तं प्रियः!	बृ. १-४-८	एप्रिल्	११
१०३. सच्छिष्यस्य लक्षणमिदम्	छां. ४-४-४	एप्रिल्	१२
१०४. जगदन्तः सर्वं ब्रह्मैव	तै. २-६-६	एप्रिल्	१३
१०५. मुमुक्षोः प्रार्थना इयम्	तै. १-४	एप्रिल्	१४
१०६. अविज्ञाते महती हानिः	के. २-५	एप्रिल्	१५
१०७. अयमेव कुशलः, बुद्धिमान्	का. १-२-१	एप्रिल्	१६
१०८. भेदज्ञानमेव भयहेतुः	तै. २-७-५	एप्रिल्	१७
१०९. अत्रैव विज्ञाते साफल्यम्	का. २-३-४	एप्रिल्	१८
११०. प्रपञ्चः ईदृशं तिरस्करोति	बृ. २-४-६	एप्रिल्	१९
१११. मुक्तेः राजमार्गोऽयम्	कै. १-९	एप्रिल्	२०
११२. प्रश्नचतुष्टयस्य प्रतिवचनान्यत्र	श्वे. ३-२०	एप्रिल्	२१
११३. ज्ञानेन दुःखनाशः	बृ. ४-४-१२	एप्रिल्	२२
११४. अयमेव हि ब्रह्मिष्ठः!	बृ. ३-१-२	एप्रिल्	२३
११५. ईशध्यानेन विदेहमुक्तिः	श्वे. १-११	एप्रिल्	२४
११६. अचक्षुः द्रष्टायम्	श्वे. ३-१९	एप्रिल्	२५
११७. अयमेव निजानन्दः	बृ. ४-३-३२	एप्रिल्	२६
११८. ब्रह्मावबोधनक्रमोऽयम्	के. २-३	एप्रिल्	२७
११९. आत्मैव प्रपञ्चरूपेण भाति	ई. ५	एप्रिल्	२८
१२०. अयमेव हि परमपुरुषः	का. १-३-११	एप्रिल्	२९

१२१. द्वयोरप्यन्तरमिदम्	कै. १-१९	एप्रिल्	३०
१२२. अभेदज्ञानात् अभयप्राप्तिः	तै. २-७-४	मे	१
१२३. वायुरेव सवर्गः	छा. ४-३-१	मे	२
१२४. व्याकृताव्याकृते आत्मैव	बृ. १-४-७	मे	३
१२५. 'स्वपिति'शब्दस्य रहस्यम्	छां. ६-८-१	मे	४
१२६. सम्यग्दर्शनस्य रहस्यमिदम्	कै. १-१०	मे	५
१२७. आत्मा स्वप्नस्य राजा	बृ. ४-३-१०	मे	६
१२८. त्रयमिदं ब्रह्मणि कल्पितम्!	श्वे. १-७	मे	७
१२९. प्राणस्य महिमा ह्येषः!	कौ. ३-३	मे	८
१३०. आत्मकामोऽयम्	बृ. ४-४-६	मे	९
१३१. आत्मज्ञानस्य मर्मेदम् !	के. २-१	मे	१०
१३२. अविद्यापण्डिता इमे !	का. १-२-५	मे	११
१३३. अहो, मनसो महिमा !	प्र. ४-२	मे	१२
१३४. मनोविलास एव एषः!	बृ. १-५-३	मे	१३
१३५. प्राणस्य महिमा!	छां. ४-३-३	मे	१४
१३६. ऋग्वेदस्य 'महावाक्य'मिदम्!	ऐ. ३-१-३	मे	१५
१३७. सम्पदः सार्थक्यमिदम् !	बृ. ३-१-२	मे	१६
१३८. अज्ञानादेव भ्रमणम्!	श्वे. १-६	मे	१७
१३९. कामानुगुणं फलम् !	बृ. ४-४-५	मे	१८
१४०. मुमुक्षोः बीजमन्त्रोऽयम् !	का. १-१-२६	मे	१९
१४१. हृदयेऽन्तरात्मा	तै. १-६	मे	२०
१४२. एतैः त्रिभिः कर्मणः पुष्टिः	छा. १-१-१०	मे	२१
१४३. आत्मन्येव सर्वमपि कल्पितम्	बृ. २-५-१५	मे	२२
१४४. साक्षाद् अपरोक्षाद् ब्रह्म	बृ. ३-४-१	मे	२३
१४५. ध्यानयोगस्य महिमा	श्वे. १-३	मे	२४

१४६. आत्मज्ञानमेव हिततमम्	कौ. ३-१	मे	२५
१४७. अयोग्येभ्यो नेयं प्रदातव्या	श्वे. ६-२२	मे	२६
१४८. धनस्य दौर्भाग्यम्	का. १-१-२७	मे	२७
१४९. 'मनोब्रह्मण:' उपासनम्	छां. ३-१८-१	मे	२८
१५०. ब्रह्मण: रूपद्वयम्	बृ. २-३-१	मे	२९
१५१. 'भार्गवी वारुणी विद्या' का?	तै. ३-६-२	मे	३०
१५२. षड्ऊर्मिरहितोऽयम्	बृ. ३-५-१	मे	३१
१५३. मुमुक्षवे हितोक्ति:	श्वे. २-९	जून्	१
१५४. प्रज्ञाहीन: शव एव केवलम्	कौ. ३-७	जून्	२
१५५. ओङ्कारस्य लक्ष्यम्	मुं २-२-४	जून्	३
१५६. मनोदेवस्य राज्यभार:	प्र. ४-५	जून्	४
१५७. ज्ञानप्राप्त्यै चत्वारि साधनानि	का. १-३-१४	जून्	५
१५८. त्यागेनैव मुक्ति:	कै. १-२	जून्	६
१५९. उभावपि अन्योन्यविलक्षणौ	मुं ३-१-१	जून्	७
१६०. आत्मैव सर्वस्यापि विज्ञाता	बृ. २-४-१४	जून्	८
१६१. किंनाम 'त्रिवृत्'करणम्	छां. ६-६-५	जून्	९
१६२. एकमेव ब्रह्म त्रेधा वर्तते	श्वे. १-१२	जून्	१०
१६३. देहाभिमानरहितोऽयम्	बृ. ४-४-७	जून्	११
१६४. पुण्यपापाभ्यां सुखदु:खे	बृ. ४-४-५	जून्	१२
१६५. संन्यासस्य सुमुहूर्त:	जा. ४-१	जून्	१३
१६६. अद्यापि आत्मज्ञानं साध्यम्	बृ. १-४-१०	जून्	१४
१६७. आत्मानं वर्णयितुं न शक्यते	के. १-५	जून्	१५
१६८. परब्रह्मण: स्वरूपमिदम्	का. १-२-१४	जून्	१६
१६९. पुरुषयज्ञेन पूर्णायु:प्राप्ति:	छां. ३-१६-१	जून्	१७
१७०. देवा: अतीव स्वार्थिन:	बृ. १-४-१०	जून्	१८

१७१. ओङ्काराख्यः उडुपः	श्वे. २-८	जून् १९
१७२. ब्रह्मात्मज्ञानमार्गः सूक्ष्मः	बृ. ४-४-८	जून् २०
१७३. प्रज्ञामहिमायम्	कौ. ३-६	जून् २१
१७४. आत्मा परमशान्तस्वरूपः	श्वे. ६-१९	जून् २२
१७५. उपासनस्य फलमिदम्	बृ. ४-१-२	जून् २३
१७६. बन्धननिवृत्त्यै उपायोऽयम्	कै. १-१७	जून् २४
१७७. एतत्त्रयेण कियत् प्रामाण्यम् !	बृ. ४-१-४	जून् २५
१७८. आत्मज्ञानं नाम कोऽर्थः?	के. २-४	जून् २६
१७९. ओङ्कारस्य महत्त्वम्	का. १-२-१६	जून् २७
१८०. नचिकेताः जीवन्मुक्तोऽभवत्	का. २-३-१८	जून् २८
१८१. ईदृशाः न प्रत्यागच्छन्ति	छां. ४-१५-५	जून् २९
१८२. एते हि बलिपशव एव !	बृ. १-४-१०	जून् ३०
१८३. अत्र दृश्यमानोऽपि अयमेव	ऐ. १-३-१२	जुलै १
१८४. ब्रह्मनदीवर्णनम्	श्वे. १-५	जुलै २
१८५. 'इदम्' इति ज्ञाते न तद् 'ब्रह्म'	के. १-५	जुलै ३
१८६. धर्मस्य त्रयः स्कन्धाः	छां. २-२३-१	जुलै ४
१८७. अन्नस्य त्रीणि कार्याणि	छा. ६-५-१	जुलै ५
१८८. कारणात् भिन्नं कार्यं नास्ति	छा. ६-१-४	जुलै ६
१८९. ब्रह्मणो लक्षणमिदम्	तै. ३-१-३	जुलै ७
१९०. मनसो महिमा एषः	बृ. ३-१-९	जुलै ८
१९१. जन्मपरिहारोपायोऽयम्	श्वे १-७	जुलै ९
१९२. मुमूर्षोः अवस्था	बृ. ४-४-२	जुलै १०
१९३. साधकानां तप एव ब्रह्मास्त्रम्	श्वे. १-१६	जुलै ११
१९४. आत्माधीनम् मनः	के. १-६	जुलै १२
१९५. 'अतिथितिरस्कारेण' पुण्यहानिः	का. १-१-८	जुलै १३

१९६. इष्टापूर्तयोः फलमेतावदेव	मु १-२-१०	जुलै	१४
१९७. उभयमपि ओङ्कार एव	प्र. ५-२	जुलै	१५
१९८. चक्षुरगोचरोऽयम्	मुं ३-१-८	जुलै	१६
१९९. सर्वमपि गायत्री एव	छा. ३-१२-१	जुलै	१७
२००. अविद्याग्रन्थिनाशः	मु २-१-१०	जुलै	१८
२०१. सर्वोऽपि वाक्प्रपञ्चः ओङ्कार एव	छा. २-२३-३	जुलै	१९
२०२. आत्मज्ञानेन दुःखनिवृत्तिः	कै. २-२४	जुलै	२०
२०३. तदा आत्मैव एकः आसीत्	ऐ. १-१-१	जुलै	२१
२०४. बुद्धेः अग्राह्यं ब्रह्म	का. १-१-२१	जुलै	२२
२०५. प्रमूढा हीमे !	मुं १-२-१०	जुलै	२३
२०६. विज्ञानेन सर्वं साध्यम्	तै. २-५-१	जुलै	२४
२०७. मधुविद्यारहस्यम्	छा. ३-१-१	जुलै	२५
२०८. ज्ञानी साक्षिनिष्ठः	कै. १-१८	जुलै	२६
२०९. अयमेव धीरः	का. २-१-१	जुलै	२७
२१०. परा विद्या, अपरा विद्या च	मुं १-१-४	जुलै	२८
२११. ब्रह्मज्ञानी नाम परब्रह्मैव	कै. १-२२	जुलै	२९
२१२. अत्रैव दिव्यानन्दप्राप्तिः	तै. २-८-३	जुलै	३०
२१३. अष्टौ ग्रहाः, अष्टौ अतिग्रहाः	बृ. ३-२-१	जुलै	३१
२१४. स्वर्गलोके सुखभोगः	का. १-१-१२	आगस्ट्	१
२१५. आत्मनः 'रहस्य' नामधेयम्	बृ. २-१-२०	आगस्ट्	२
२१६. सद्गुरुकृपानुग्रहोऽयम्	मु १-२-१३	आगस्ट्	३
२१७. आत्मन एव पञ्चभूतोत्पत्तिः	तै. २-१-२	आगस्ट्	४
२१८. गायत्रीमहिमा	छा. ३-१२-५	आगस्ट्	५
२१९. 'नेति नेति' इत्येव गतिः	बृ. २-३-६	आगस्ट्	६
२२०. अभिन्ननिमित्तोपादानकारणम्	छा. ६-२-३	आगस्ट्	७

२२१. ब्रह्मैव परमं ज्ञेयम्	श्वे. १-१२	आगस्ट् ८
२२२. अतिदीर्घे जीवितेऽपि एतावदेव	का. १-१-२८	आगस्ट् ९
२२३. षोडश कला एताः	प्र. ६-४	आगस्ट् १०
२२४. अत्र न मृत्युरूपाणि सन्ति	बृ. ४-३-७	आगस्ट् ११
२२५. आत्मनो महिमा ह्येषः	मुं २-१-२	आगस्ट् १२
२२६. ज्ञानेन नामरूपध्वंसः	प्र. ६-५	आगस्ट् १३
२२७. ओङ्कारो नाम ब्रह्मैव	मा. १	आगस्ट् १४
२२८. ज्ञानेन सर्वकामावाप्तिः	तै. २-१-१	आगस्ट् १५
२२९. कामिनः कामा एव गतिः	मु ३-२-२	आगस्ट् १६
२३०. ज्ञानेन पाशविमोचनम्	श्वे. १-८	आगस्ट् १७
२३१. हिरण्यगर्भोपासनफलम्	का. १-१-१७	आगस्ट् १८
२३२. चतुर्विधाः प्राणिनः	ऐ. ३-१-३	आगस्ट् १९
२३३. 'वेदान्ते' अष्टौ ग्रहा इमे	बृ ३-२-२	आगस्ट् २०
२३४. ''ब्रह्मविद्या'' नाम कोऽर्थः?	मु १-१-१	आगस्ट् २१
२३५. शिष्यस्य प्रार्थना	तै. १-१	आगस्ट् २२
२३६. आत्मनः गुणाः इमे	छा. ३-१४-२	आगस्ट् २३
२३७. अस्माकमपि लभ्यम्	बृ. १-४-१०	आगस्ट् २४
२३८. मृत्योरपि भयमस्ति	का. २-३-३	आगस्ट् २५
२३९. ज्ञानिनः न देवा विघ्नं कुर्युः	बृ. १-४-१०	आगस्ट् २६
२४०. ईश्वर एव जगदाधारभूतः	श्वे. १-८	आगस्ट् २७
२४१. चर्चा विमोक्षायैव	बृ. ४-३-१५	आगस्ट् २८
२४२. विज्ञातिरेव ब्रह्म	बृ. ४-३-३०	आगस्ट् २९
२४३. मुमुक्षवे प्रपत्तिः अवश्यकी	श्वे. ६-१८	आगस्ट् ३०
२४४. विदिताविदितविलक्षणं ब्रह्म	के. १-४	आगस्ट् ३१
२४५. दर्शनस्य द्रष्टायम्	बृ. ३-४-२	सेप्टेम्बर् १

२४६. श्रेयसो वैभवम्	का. १-२-१	सेप्टेम्बर्	२
२४७. केवलवेदाध्ययनेन किं फलम्?	श्वे. ४-८	सेप्टेम्बर्	३
२४८. कर्मफलानि नियतानि	मुं १-२-१	सेप्टेम्बर्	४
२४९. मार्गान्तरं नास्त्येव	श्वे. ६-२०	सेप्टेम्बर्	५
२५०. आत्मानं विहाय सर्वम् आर्तमेव	बृ. ३-४-२	सेप्टेम्बर्	६
२५१. मन्दा एते	का. १-२-२	सेप्टेम्बर्	७
२५२. 'अनुदर्शन'स्य फलमिदम्	श्वे. ६-१२	सेप्टेम्बर्	८
२५३. इत्येषा अपरा विद्या	मुं १-१-५	सेप्टेम्बर्	९
२५४. एते एव यतयः	बृ. ३-५-१	सेप्टेम्बर्	१०
२५५. अनेन मायानिवृत्तिः	श्वे. १-१०	सेप्टेम्बर्	११
२५६. ज्ञानेन त्रीणि फलानि	मुं २-२-९	सेप्टेम्बर्	१२
२५७. आत्मा आनन्दरसः	तै. २-७-२	सेप्टेम्बर्	१३
२५८. पश्यत, ज्ञानस्य फलम्!	छां. ४-१-४	सेप्टेम्बर्	१४
२५९. अयं हि पतिपत्न्योः आदर्शः	बृ. २-४-४	सेप्टेम्बर्	१५
२६०. सत्कार्यवादो नाम अयमेव	छां. ६-२-२	सेप्टेम्बर्	१६
२६१. अत्रापि तत्रापि ब्रह्म एकमेव	तै. ३-१०-६	सेप्टेम्बर्	१७
२६२. आत्मैव परं ज्योतिः	बृ. ४-३-७	सेप्टेम्बर्	१८
२६३. ज्ञानेन पाशक्लेशहानिः	श्वे. १-११	सेप्टेम्बर्	१९
२६४. दीनस्य जन्मान्तरप्राप्तिः	बृ. ४-३-३५	सेप्टेम्बर्	२०
२६५. आत्मनः नैजं स्वरूपमिदम्	का. १-२-१८	सेप्टेम्बर्	२१
२६६. मुक्तिरेव ब्रह्मलोकः	बृ. ४-३-३३	सेप्टेम्बर्	२२
२६७. ध्यानेन ईश्वरदर्शनम्	श्वे. १-१४	सेप्टेम्बर्	२३
२६८. शोकरहितं स्थानमिदम्	बृ. ४-३-२२	सेप्टेम्बर्	२४
२६९. सुषुप्तौ अयं स्वस्वरूपस्थ एव	छां. ६-८-१	सेप्टेम्बर्	२५
२७०. एताः भारतीयस्त्रीरत्नानि!	बृ. २-४-३	सेप्टेम्बर्	२६

२७१.	अन्तर्यामी नाम अयमेव	बृ. ३-७-१५–	सेप्टेम्बर् २७
२७२.	ध्यानस्य फलमिदम् !	श्वे. १-१३	सेप्टेम्बर् २८
२७३.	अन्वर्था आचार्या हीमे	का. १-२-९	सेप्टेम्बर् २९
२७४.	सुषुप्तेः महिमा एषः	बृ. ४-३-२१	सेप्टेम्बर् ३०
२७५.	साक्षिणः स्वरूपमिदम् !	श्वे. ६-११	अक्टोबर् १
२७६.	यमदेवस्य जागरणघंटा	का. १-२-६	अक्टोबर् २
२७७.	ध्यानोचितो देशः	श्वे. २-१०	अक्टोबर् ३
२७८.	परस्याः विद्यायाः प्रभावोऽयम्	मुं १-१-६	अक्टोबर् ४
२७९.	''तत्त्वमसि'' महावाक्यम्!	छां. ६-८-७	अक्टोबर् ५
२८०.	अभिन्ननिमित्तोपादानकारणम्	तै. २-६-४	अक्टोबर् ६
२८१.	सुषुप्तेः महिमा !	मां. ५	अक्टोबर् ७
२८२.	नैते क्रय्या भवन्ति	छां. ४-२-३	अक्टोबर् ८
२८३.	आत्मज्ञानस्य महिमा !	बृ. २-४-५	अक्टोबर् ९
२८४.	एतत् 'त्रय'मपि ब्रह्मैव	श्वे. १-९	अक्टोबर् १०
२८५.	सर्वमपि विश्वं पूर्णं ब्रह्मैव !	बृ. ५-१-१	अक्टोबर् ११
२८६.	मातृवधादपि अस्य नैव पापलेपः	कौ. ३-१	अक्टोबर् १२
२८७.	ज्ञानोदये सति पापविमोचनम्	श्वे. २-१५	अक्टोबर् १३
२८८.	श्रुण्वन्तोऽपि एते न जानन्ति	का. १-२-७	अक्टोबर् १४
२८९.	मुमुक्षवे बीजमन्त्रोपदेशोऽयम्	मुं १-२-१२	अक्टोबर् १५
२९०.	अयं हि कृपणः!	बृ. ३-८-१०	अक्टोबर् १६
२९१.	गुरुभक्तेः परा काष्ठा !	बृ. ४-१-२६	अक्टोबर् १७
२९२.	अयमेव समर्थः सद्गुरुः	का. १-२-८	अक्टोबर् १८
२९३.	परं ब्रह्म अस्त्येव	तै. २-६-१	अक्टोबर् १९
२९४.	ज्ञानेन पाशप्रध्वंस.!	श्वे. ६-१३	अक्टोबर् २०
२९५.	इन्द्रियाणां स्वभावः	का. २-१-१	अक्टोबर् २१

२९६.	अक्षरस्य स्वरूपम्	मुं १-१-६	अक्टोबर् २२
२९७.	जगत् सर्वमपि आत्मार्थमेव	बृ. २-४-५	अक्टोबर् २३
२९८.	उभयविधकारणमपि ब्रह्मैव	मु १-१-७	अक्टोबर् २४
२९९.	ज्ञानमेव मुक्तिः	बृ. ४-२-४	अक्टोबर् २५
३००.	तपसा आत्मदर्शनम्	श्वे. १-१५	अक्टोबर् २६
३०१.	एतावन्मात्रेण न ज्ञानोदयः	का. १-२-२३	अक्टोबर् २७
३०२.	अन्तर्यामिणः पञ्च महिमानः	बृ. ३-७-३	अक्टोबर् २८
३०३.	अविधिकर्माणि भयङ्कराणि!	मुं १-२-३	अक्टोबर् २९
३०४.	देशकालातीतम् अक्षरम्!	बृ. ३-८-११	अक्टोबर् ३०
३०५.	ब्रह्मविद्यागुरुरेव पिता	प्र. ६-८	अक्टोबर् ३१
३०६.	साक्षात् मोक्षसाधनानि इमानि	बृ. २-४-५	नवेम्बर् १
३०७.	तदापि अद्यापि एकमेव ब्रह्म	छा. ६-२-१	नवेम्बर् २
३०८.	'अक्षर'स्य लक्षणम्	बृ. ३-८-८	नवेम्बर् ३
३०९.	आत्मा स्वयंज्योतिः	बृ. ४-३-९	नवेम्बर् ४
३१०.	अयमेव अन्वर्थब्राह्मणः	बृ. ३-५-१	नवेम्बर् ५
३११.	अदृढाः प्लवाः एते	मुं १-२-७	नवेम्बर् ६
३१२.	कर्मफलानि अनित्यान्येव	बृ. ३-८-१०	नवेम्बर् ७
३१३.	'अध्यात्मयोग' फलमिदम्।	का. १-२-१२	नवेम्बर् ८
३१४.	विश्वस्य ब्रह्मैव कारणम्	छां. ६-८-४	नवेम्बर् ९
३१५.	अदृष्टो द्रष्टा	बृ. ३-७-२३	नवेम्बर् १०
३१६.	शुष्कतर्कस्य नावकाशोऽत्र	का. १-२-९	नवेम्बर् ११
३१७.	जिज्ञासोः सद्गुरुरेव गतिः	मुं १-२-१२	नवेम्बर् १२
३१८.	भयहेतुरेव ब्रह्म !	तै. २-८-१	नवेम्बर् १३
३१९.	आत्मैव निजो द्रष्टा !	बृ. ३-७-२३	नवेम्बर् १४
३२०.	अयमेव 'औपनिषदः' आत्मा	बृ. ३-९-२६	नवेम्बर् १५

३२१. ईदृशो, वेदान्ताचार्यो न भवेत्	का. १-२-८	नवेम्बर् १६
३२२. त्रयस्त्रिंशद् देवताः	बृ. ३-९-२	नवेम्बर् १७
३२३. इदानीं वीतशोकोऽयम्	मुं ३-१-२	नवेम्बर् १८
३२४. स्वर्गलोकस्य सुखम् इदम्	का. १-१-१८	नवेम्बर् १९
३२५. त्रयमपि एकमेव	बृ. ३-५-१	नवेम्बर् २०
३२६. ईश्वरानुग्रहस्य फलमिदम्!	श्वे. १-६	नवेम्बर् २१
३२७. आत्मन एव प्राणस्य उत्पत्तिः	मुं २-१-३	नवेम्बर् २२
३२८. परब्रह्मणः लक्षणम्	बृ. ३-६-१	नवेम्बर् २३
३२९. अस्मास्वेव कलापुरुषोऽस्ति	प्र. ६-२	नवेम्बर् २४
३३०. ज्ञात्वा विशोको भवति !	का. २-१-४	नवेम्बर् २५
३३१. अक्षरस्य महिमा ह्येषः!	बृ. ३-८-९	नवेम्बर् २६
३३२. बाला एवैते	का. २-१-२	नवेम्बर् २७
३३३. 'अक्षर'ज्ञानात् सर्वज्ञत्वम्	प्र. ४-११	नवेम्बर् २८
३३४. ज्ञानेन पुण्यपापयोः प्रध्वंसः!	मुं ३-१-३	नवेम्बर् २९
३३५. नाम्नो महिमा त्वेषः	बृ. ३-२-१२	नवेम्बर् ३०
३३६. अयमेव, आनन्दमयः आत्मा	तै. २-५-३	डिसेम्बर् १
३३७. मुक्तिसेतुः अयम् !	मुं २-२-५	डिसेम्बर् २
३३८. अध्यात्मयोगस्य रहस्यमिदम् !	का. १-३-१३	डिसेम्बर् ३
३३९. जीवात्मनः कीदृशी दुःस्थितिः!	मुं ३-१-२	डिसेम्बर् ४
३४०. आत्मैव नूनं ज्योतिः	बृ. ४-३-६	डिसेम्बर् ५
३४१. ज्ञानप्राप्त्यै साधनानि इमानि	मु ३-१-५	डिसेम्बर् ६
३४२. भेददर्शनेन कीदृशो अनर्थः?	का. २-१-१०	डिसेम्बर् ७
३४३. आत्मा एकः नामानि अनेकानि	प्र. ४-९	डिसेम्बर् ८
३४४. एषः ब्रह्मविद्वरिष्ठः!	मुं ३-१-४	डिसेम्बर् ९
३४५. आत्मा न शुष्कबुद्धिगम्यः	मुं ३-२-३	डिसेम्बर् १०

३४६.	अन्तर्यामिणः स्वरूपम्	बृ. ३-७-४	डिसेम्बर् ११
३४७.	सूर्यादीनामपि अशक्यमेव	का. २-२-१५	डिसेम्बर् १२
३४८.	'वेदान्ते'षु 'अद्वैतम्'	बृ. ४-३-३२	डिसेम्बर् १३
३४९.	प्राणापानावपि अस्वतन्त्रावेव	का. २-२-५	डिसेम्बर् १४
३५०.	अतिदूरस्थम् अतिसमीपस्थं च	मुं ३-१-७	डिसेम्बर् १५
३५१.	उभयत्रापि आत्मा निर्भयः	बृ. ४-३-१८	डिसेम्बर् १६
३५२.	तेषामेव नित्यं सुखम्	का. २-२-१२	डिसेम्बर् १७
३५३.	प्राज्ञात्मसहवासफलम्	बृ. ४-३-२१	डिसेम्बर् १८
३५४.	स्वान्तःस्थमपि न जानीमः!	का. १-३-१२	डिसेम्बर् १९
३५५.	एते एव यतिपुङ्गवाः	मुं ३-१-५	डिसेम्बर् २०
३५६.	आत्मनः मूलस्थानमेतत्	बृ. ४-३-१९	डिसेम्बर् २१
३५७.	चतसृणां व्याहृतीनां महिमा	तै. १-५	डिसेम्बर् २२
३५८.	ध्यायतीव लेलायतीव	बृ. ४-३-७	डिसेम्बर् २३
३५९.	मृत्युदेवतायाः 'जागरण'वचनम्	का. २-२-७	डिसेम्बर् २४
३६०.	सर्ववेदान्तानां सारमन्त्रोऽयम्	मुं २-२-१२	डिसेम्बर् २५
३६१.	सुषुप्तावस्थायां द्वैताभावः	बृ. ४-३-२२	डिसेम्बर् २६
३६२.	अद्यापि 'इदं' सर्वेषां साध्यमेव	का. २-३-१८	डिसेम्बर् २७
३६३.	ससारगतितरणोपायोऽयम्	मुं ३-२-१	डिसेम्बर् २८
३६४.	तत्र न भिन्नं किञ्चन अस्ति	बृ. ४-३-२३	डिसेम्बर् २९
३६५.	नामरूपाभ्यां मुक्तिः	मु ३-२-८	डिसेम्बर् ३०
३६६.	आत्मज्ञानोदये पुनर्जन्माभावः	का. १-३-८	डिसेम्बर् ३१
	परिशिष्टम् — चतुर्दशोपनिषदां शान्तिमन्त्राः,		१ - ३२
	शान्तिमन्त्रार्थाः, विदुषामभिप्रायसारसंग्रहः		
	श्री सुब्रायशर्मभ्यः गौरवप्रशस्तयः		

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ श्रीगणेशशारदासद्गुरुदेवताभ्यो नमो नमः॥
॥ ओं सर्वात्मकाय वेदान्तभास्कराय नमः॥

ईशावास्यमिदं सर्वं नेह नानास्ति किञ्चन।
सत्यं सत्यं पुनः सत्यं प्राह **वेदान्तभास्करः**॥

इदं संपूर्णं जगत् परमेव ब्रह्म। अस्मिन् परमात्मनि भेदः अणुमात्रोऽपि नास्ति इति एतत् सत्यं, सत्यं, सत्यमेव॥

जनवरी १

१. सर्वमपि विश्वं परमात्मैव

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

ईशावास्योपनिषत् १

इदं सर्वमपि जगत् परमात्मनैव व्याप्तमस्ति इति द्रष्टव्यम्।

सर्वेषामपि शास्त्राणां सारभूताः वेदाः, ज्ञाननिधयो वेदाः। जगति विद्यमानानां सकलधर्मग्रन्थानामपि आकरभूता हि वेदाः। वेदानां सारा वेदान्ताः, वेदानां तात्पर्यमेव वेदान्ताः, वेदानां हृदयमेव हि वेदान्ताः। वेदानां परं लक्ष्यमेव वेदान्ताः। वेदान्तानामेव हि नामान्तरम् 'उपनिषदः' इति॥

प्रमाणत्वेन स्वीकृताः प्रसिद्धाः उपनिषदः चतुर्दश। तासां मध्ये प्राथम्येन प्रसिद्धा हि इयम् **'ईशावास्योपनिषत्'**। अस्या उपनिषदः आदिमो मन्त्रोऽयम्। सकलवेदोपनिषत्पुराणेतिहासानां सारभूतम् उपदेशम् अयं मन्त्रः उपदिशति। स च सन्देशः, सर्वमिदं जगत् परमेव ब्रह्म इति। एक एव महाकाशः यथा घटघटिकाद्युपाधिभेदेन भिन्न इव दृश्यते, एवमेव एकमेव परं ब्रह्म नानोपाधिसम्बन्धात् अनेकमिव अवभासते। परमार्थतः सर्वमिदं विश्वं परं ब्रह्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् इन्द्रियागोचराय वेदान्तभास्कराय नमः॥

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।
रूपशब्दादिहीनत्वात् इति **वेदान्तभास्करः**॥

परं ब्रह्म रूपशब्दादिरहितम्, तस्मात् चक्षुर्वा वागिन्द्रियं वा मनो वा ब्रह्म न•विषयीकरोति।

जनवरी २

२. न तत्र इन्द्रियाणां कृत्यमस्ति

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।

केनोपनिषत् १-३

तत्र परस्मिन् ब्रह्मणि चक्षुर्वा वाग्वा मनो वा न गच्छति।

'चक्षुषा दृष्टं सत्यम्, श्रोत्रेण श्रुतं तु मिथ्या' इति हि सामान्यतः प्रसिद्धम्। एषा सूक्तिः लोके प्रसिद्धानाम् सर्वेषां साकारपदार्थानाम् विषये सफला एव। विद्यमानाः पदार्थाः सूक्ष्मा अपि, स्थूलैरिन्द्रियैः अगृह्यमाणा अपि सूक्ष्मदर्शकपारदर्शकदूरदर्शकादिसाधनैः अवश्यमेव विषयीक्रियन्ते। सहस्राधिकप्रकाशसंवत्सरैः (Thousands of Light years) अन्तरितानि तारकाणि दूरस्थानि अपि चक्षुषा एव खलु गृह्यन्ते, चक्षुरेव हि तेषामस्तित्वे प्रमाणम्॥

सत्यमेवेदम्, अपि तु प्रत्यगात्मा नैवं चक्षुषा दृश्यते, न केनापि प्रमाणेन आत्मा विषयीक्रियेत। कस्मात्? रूपादिरहितत्वात्। रूपादियुक्तान् खलु पदार्थान् नेत्रादीनि प्रमाणानि दर्शयेयुः, न हि रूपरहितं पदार्थं नेत्रं प्रकाशयेत्। स्वस्वविषयानेव हि तानि तानि इन्द्रियाणि प्रकाशयेयुः। शब्दस्पर्शरूपरसगन्धरहितमात्मानं तु न कथञ्चिदपि प्रमाणानि गृह्युः। अनुभवमात्रैकप्रमाणगोचरोऽयमात्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्दानरहस्यविदे वेदान्तभास्कराय नमः॥

कुदानात् कुत्सितां गेही गतिं प्राप्नोति दुःखदाम्।
तस्मात् सुदानं कर्तव्यम् इति **वेदान्तभास्करः**॥

कुत्सितपदार्थदानात् दाता गृहस्थः नरकगतिं प्राप्नोति, तस्मात् विवेकिना सदा सत्पदार्थदानमेव कर्तव्यम्।

जनवरी ३

३. 'कुत्सित'पदार्थदानात् नरकलोकप्राप्तिः

अनन्दा नाम ते लोकाः, तान् स गच्छति ता ददत्।

काठकोपनिषत् १-१-३

यो मनुष्यः निरुपयोगिनीः तादृशीः गाः ददाति असौ आनन्दरहितान् नरकलोकान् गच्छति॥

काठकोपनिषदि अनुगता कथा इयम्। कथासन्दर्भस्तु एवम् अस्ति; पिता वाजश्रवसः यज्ञमेकम् अकरोत्। तत्र यज्ञे नैके ऋत्विजः वेदाध्ययनसम्पन्नाः यज्ञानुष्ठानार्थम् आकारिताः। यज्ञश्च यथाविधि समनुष्ठितः। अनुष्ठानान्ते कर्मसाफल्यार्थं तेन यजमानेन दक्षिणार्थत्वेन गावः दीयमानाः आसन्। ताश्च गावः वृद्धाः, दुर्बलाः, निरुपयोगिन्यः, इन्द्रियपाटवरहिताश्च आसन्। एता वीक्ष्य पितृभक्तः सुपुत्रः नचिकेताः पितरं प्रति एवमुक्तवान्॥

शुद्धेन मनसा दातव्यम्, शुद्धानेव पदार्थान् दद्यात्। सन्तोषेण, प्रीत्या, सुहृदा खलु दातव्यम्? देशं कालं पात्रं च दृष्ट्वा दानं कुर्यात्। तथा कृते हि दानं सफलं भवेत्। सत्पात्रेभ्यः कुत्सितपदार्थदानात् न केवलम् उत्तमफलं न लभ्यते इति, किं तु नरकलोकप्राप्तिरेव स्यात्। यादृश दानं तादृशमेव फलं भवति। तस्मात् सुदानमेव कर्तव्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्तिमहत्त्वविदे वेदान्तभास्कराय नमः॥

ज्ञानादेव हि कैवल्यं नोपासनशतैरपि।
गुरूपदेशश्रवणात् ज्ञानं **वेदान्तभास्करः**॥

आत्मज्ञानादेव मुक्तिः लभ्यते, नैव तु उपासनशतैः कैवल्यं प्राप्यते। आत्मज्ञानं च सद्गुरूपदेशश्रवणादेव जायते॥

जनवरी ४

४. सद्गुरुसेवयैव ज्ञानोदयः!

सुकेशा च भारद्वाजः, शैब्यश्च सत्यकामः, सौर्यायणी च गार्ग्यः, कौसल्यश्चाश्वलायनो, भार्गवो वैदर्भिः, कबन्धी कात्यायनः; ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः, परं ब्रह्म अन्वेषमाणाः, एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादम् उपसन्नाः॥ प्रश्नोपनिषत् १-१

*भरद्वाजस्य पुत्रः **सुकेशाः**, शिबेः पुत्रः **सत्यकामः**, सूर्यस्य पुत्रः **गार्ग्यः**, अश्वलस्य पुत्रः **कौसल्यः**, भृगोः पुत्रः **वैदर्भिः**, कात्यस्य पुत्रः **कबंधी** च—इत्येते षट् शिष्याः अपर-ब्रह्मोपासनपराः आसन्; परब्रह्मजिज्ञासवः सन्तः "अयं गुरुः अस्मभ्यं परब्रह्मतत्त्वं बोधयेत्" इति मत्वा ते षडपि उत्तमाः जिज्ञासवः समित्पाणयः भगवन्तं पिप्पलादं महर्षिं समुपपन्नाः॥*

उपासननिष्ठामात्रेण साधकाः नैव कृतकृत्या भवितुमर्हन्ति। लब्धाणिमादिसिद्धयोऽपि, तावन्मात्रेण न ते जीवन्मुक्ताः। किन्तु आत्मज्ञानादेव जीवन्मुक्तिः। सद्गुर्वनुग्रहादेव, सद्गुरुकृपयैव, सद्गुरूपदेशश्रवणादेव आत्मज्ञानोदयः। कर्मणाम् उपासनानां च फलानि सर्वाण्यपि अनित्यानि, कृतकत्वात्। मुक्तिस्तु नित्या, स्वाभाविकत्वात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अविद्यास्वरूपविदे वेदान्तभास्कराय नमः॥

कर्ममार्गरता ये ते ह्यात्मज्ञानविवर्जिताः।
जायन्ते च म्रियन्ते च सदा **वेदान्तभास्करः**॥

आत्मज्ञानरहिताः सन्तः केवलकर्ममार्गनिष्ठाः पुनः पुनः जायन्ते, पुनः पुनः म्रियन्ते च।

जनवरी ५

५. गाढाविद्यायाः फलमिदम्।

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।
जङ्घन्यमानाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः॥

मुण्डकोपनिषत् १-२-८

घनीभूतायाम् अविद्यायामन्तरे वर्तमानाः सन्तोऽपि, आत्मानं 'धीराः' 'पण्डिताः' इति च मन्यमानाः मूढा जनाः, दुःखससार-सागरे मग्नाः सन्तः, सन्तप्ताः सन्तः, पुनः पुनः ससारचक्रे गृहीताः दुःखम् अनुभवन्तो वर्तन्ते। ईदृशाः मानवाः अन्धेन नीयमानाः अन्धा इव स्वयम् अविवेकिन एव भवन्ति॥

ये केवलं श्रौत-स्मार्त-कर्मनिरताः कर्ममार्गपरायणाः कर्ममार्ग निमग्नाः तान् **'मूढाः'** इति अयं मन्त्रः निन्दति। न केवलम् एते आत्मज्ञानरहिता इति, किन्तु 'स्वयम् आत्मज्ञानिनः' इति मन्यन्ते। अन्धे तमसि, तमसः मध्ये विद्यमाना अपि इमे मूढाः आत्मानमेव धीरत्वेन, विवेकित्वेन प्राज्ञत्वेन पण्डितत्वेन च मन्यन्ते। न केवलम् एते मोक्षवञ्चिता इति, किन्तु कुटिले ससारमार्गे एव मग्नाः लग्नाश्च सर्वदा दुःखभाजो भवन्ति। इदं सर्वमपि अविद्याफलमात्रमेव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् असंसारिब्रह्मविदे वेदान्तभास्कराय नमः ॥

नामरूपात्मकं सर्वं परं ब्रह्मैव नान्यथा।
आत्मैव ब्रह्म जानीयात् सत्यं **वेदान्तभास्करः**॥

नामरूपात्मकं जगदिदं सर्वमपि परमार्थतः परमेव ब्रह्म। न तु वस्त्वन्तरम्। आत्मैव च परं ब्रह्म इति जानीयात्॥

जनवरी ६

६. अथर्ववेदस्य 'महावाक्य'मेतत्

सर्वं ह्येतद् ब्रह्म, 'अयमात्मा ब्रह्म'।

माण्डूक्योपनिषत् २

इदं सर्वं ब्रह्मैव, अयमात्मा ब्रह्म।

प्रसिद्धेषु चतुर्षु महावाक्येषु '**अयमात्मा ब्रह्म**' इतीदं महावाक्यम् अन्यतमम्। जीवब्रह्मणोः अभेदोपदेशकानां वाक्यानां **महावाक्यमिति** प्रसिद्धिः। प्रतिवेदम् एकैकं महावाक्यं प्रसिद्धम्। एवं च चतुर्णां वेदानां चत्वारि महावाक्यानि प्रथितानि सन्ति। **ऋग्वेदीय ऐतरेयोपनिषदः**—'प्रज्ञानं ब्रह्म'; **यजुर्वेदीय-बृहदारण्यकोपनिषदः**—'अहं ब्रह्मास्मि'; **सामवेदीय-छान्दोग्योपनिषदः**—'तत्त्वमसि'; **अथर्ववेदीयमाण्डूक्योप-निषदः**—'अयमात्मा ब्रह्म' इति चत्वारि महावाक्यानि॥

प्रकृतं तु 'अयमात्मा ब्रह्म' इति महावाक्यम्। अस्मिन् देहे कर्तृत्वेन भोक्तृत्वेन च दृश्यमानः अयं प्रसिद्धः जीवः निरुपाधिकदृष्ट्या ब्रह्मैव। अविद्यया एव हि जीवत्वम् नाम। जीवत्वे विद्यया बाधिते सति ब्रह्मस्वरूपमेव अवशिष्यते। अविद्याकल्पितं जीवत्वम् अनूद्य, अनन्तरं ब्रह्मत्वं प्रतिपाद्य, जीवत्वबाधनमेव महावाक्यानां फलम्॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओम् आर्षज्ञानवते वेदान्तभास्कराय नमः॥

अहमेव परं ब्रह्म मत्तः सर्वं प्रवर्तते।
त्रिशङ्कोर्ब्रह्मनिष्ठस्य वचो **वेदान्तभास्करः**॥

अहमेव परं ब्रह्म, मत्त एव जगति सर्वं प्रवर्तते—इत्येवं हि ब्रह्मिष्ठस्य त्रिशङ्कोः धीरगर्जनम्॥

जनवरी ७

७. त्रिशङ्कोः उद्गारः

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्॥

तैत्तिरीयोपनिषत् १-१०

अहमेव अस्य ससारवृक्षस्य प्रेरयिता, मम यशः पर्वतवत् उन्नतम्, अहम् ऊर्ध्वपवित्रः सन् सूर्य इव अमृतः। अहं ब्रह्मवर्चसा युक्तः। अहमेव द्रविणम् अस्मि, अहं मेधावी। अहं नाशरहितः आत्मा अस्मि—इत्येषः त्रिशङ्कोः उद्गारः॥

त्रिशङ्कुर्नाम ज्ञानी एषः। तस्य स्वानुभववचः इदम्। अस्य संसारवृक्षस्य कारणभूतं ब्रह्म अहमेवास्मि इति अयं त्रिशङ्कुः उच्चैः उद्घोषयति। ब्रह्मवदेव ज्ञानी स्वयमपि जगतः कारणभूतः। ज्ञानी सूर्यवत् वर्चस्वी, ब्रह्मवित् सर्वज्ञश्च भवति। ब्रह्मज्ञानमेव हि ब्रह्मविदः सम्पत्। ज्ञानेन मोक्ष एव लभ्यते। अहम् अमृतः अव्ययश्च इति ज्ञानी आत्मानं जानाति। ज्ञानिपुङ्गवस्य त्रिशङ्कोः धीरवचनमिदम्। ईदृशः अनुभवोदयः सर्वेषामपि ब्रह्मज्ञानिनां स्वाभाविकः। अहं ब्रह्मास्मि इति यः जानाति सः ज्ञानी ब्रह्मवदेव सर्वात्मा च भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वप्राणिस्वरूपाय वेदान्तभास्कराय नमः॥

एकमेव परं ब्रह्म ब्रह्मादित्याद्युपाधितः।
पञ्चभूतादिरूपेण भाति **वेदान्तभास्करः**॥

अद्वितीयं परमेव ब्रह्म हिरण्यगर्भआदित्यादिरूपेण पञ्चभूतरूपेण च अवभासते।

जनवरी ८

८. सर्वेऽपि प्राणिनः परं ब्रह्मैव

एष ब्रह्म, एष इन्द्रः, एष प्रजापतिः, एते सर्वे देवाः, इमानि पञ्च महाभूतानि। पृथिवी वायुः आकाश आपो ज्योतींषि इत्येतानि इमानि च क्षुद्रमिश्राणीव॥

ऐतरेयोपनिषत् ३-१-३

अयमात्मैव अपरं ब्रह्म, अयमेव च इन्द्रः, अयं प्रजापतिः, अयमेव सर्वे देवाः। अयमात्मैव भूमिः वायुः आकाशः आपः अग्निश्च इति पञ्चभूतानि। अयमात्मैव क्षुद्रमिश्रप्राणिनश्च॥

प्रज्ञानस्वरूपोऽयमात्मैव सकलप्राणिरूपेण अवभासते। उपाधिष्वेव नीचोच्चभावः, न तु चिन्मात्रस्वरूपे आत्मनि कश्चिदपि भेदः सम्भवति। आत्मा एक एव, नामरूपाणि तु भिन्नभिन्नानि॥

अस्मिन् विशाले विश्वे प्रप्रथमजो नाम हिरण्यगर्भः, अस्यैव 'ब्रह्मा' इति नामान्तरम्। अयमेव 'अपरं ब्रह्म' इति व्यपदिश्यते। अयमेव वैश्वानरः, विराट्पुरुषश्च। अयमेव सर्वेषां प्राणिनां मूलकारणम्। अयं परमार्थतः परमेव ब्रह्म। इन्द्रः, प्रजापतिः, देवाः, मानवाः, राक्षसाः, पशवः, पक्षिणश्च—इत्येते परमार्थतः परब्रह्म-स्वरूपा एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणतत्त्वविदे वेदान्तभास्कराय नमः॥

प्राणोपासननिष्ठानां सर्वथा विजयो भवेत्।
नास्ति तेषां भयं केभ्यो नूनं **वेदान्तभास्करः**॥

प्राणोपासननिष्ठानां सर्वत्रापि विजयः, तेषां न केभ्योऽपि भयं भवति॥

जनवरी ९

९. प्राणोपासनस्य महिमा !

यथा अश्मानम् आखणम् ऋत्वा विध्वंसते, एवं हैव स विध्वंसते य एवंविदि पापं कामयते, यश्च एनमभिदासति, स एषः अश्माखणः॥

छान्दोग्योपनिषत् १-२-८

यथा यः कश्चित् कठिनं अश्मानम् कराभ्यां खण्डयितुं प्रवृत्तः स्वयमेव विध्वसते, एवमेव प्राणोपासकस्य उपद्रवकर्ता मूर्खः स्वयमेव विनश्यति; यस्मात् अयं प्राणोपासकः कठिनाश्मवत् वर्तते॥

देवतोपासकाः स्वेष्टदेवतोपासनेन तादृशदेवतानुग्रहपात्राणि भवन्ति। एतेषाम् उपासकानां निग्रहानुग्रहसामर्थ्यं विद्यते। दिव्यशक्तिमन्तश्च एते ध्यायिनः॥

लौकिकसम्पदा आढ्याः श्रीमन्तः, अधिकारिणः, राज-महाराजादयः स्वीयसम्पदा सामान्यान् जनान् स्वाधीनान् कुर्युः, न तु देवोपासकान् वा प्राणोपासकान् वा एते आढ्याः स्वीयसम्पदा चालयेयुः। यतः लौकिकसम्पदोऽपि उपासनशक्तिः गरीयसी। उपासनेन हि सर्वा सम्पत् लभ्येत, न तु मुक्तिर्लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रजापतितत्त्वविदे वेदान्तभास्कराय नमः॥

सृष्टेः पूर्वं जगत् सर्वं विराडेव चराचरम्।
पुरुषस्तु स एवाद्य जीवो **वेदान्तभास्करः**॥

चराचरात्मकं जगत् सृष्टेः पूर्वं विराट्पुरुष एव आसीत्। स एव इदानीं जीवरूपेण भाति॥

जनवरी १०

१०. इदं सर्वं पुरुषस्य महिमा

आत्मा वा इदमेक एवाग्र आसीत् पुरुषविधः।

बृहदारण्यकोपनिषत् १-४-१

इदं सर्वं पुरा पुरुषविधः आत्मा एव एकः आसीत्।

अत्र आत्मा नाम प्रजापतिः ब्रह्मा। अयमेव पुरुषविधः। इदानीं नामरूपाभ्यां भिन्नभिन्नतया दृश्यमानम् इदं विश्वं सृष्टेः पूर्वं किमासीत्? इति चेत्, आत्मैव आसीत्। अत्र आत्मा नाम विराट् पुरुष एव। अयमेव हिरण्यगर्भः इति च कथ्यते॥

पुरुषविधत्वं नाम शिरःपाणिपादम् नेत्रम् श्रोत्रम् इत्याद्येव। सूक्ष्मरूपेण अयमात्मा पुरुषविधः आसीत्। अस्मादेव च इदानीं सर्वे पुरुषाः जाताः। अयं विराट्पुरुषः आत्मानमेव अवलोक्य सर्वान् जीवान् आत्मानन्यान् वीक्ष्य ''अहमेव सर्वं जगत् अस्मि'' इति यस्मात् ज्ञातवान्, तस्मात् 'अहंनामा' इत्यभवत्॥

सृष्टेः पूर्वं परमार्थतः आत्मा एक एव आसीत्, स एव आत्मा प्रजापतिरूपेणापि अवभासते इति। अत्र मन्त्रे आत्मा इति प्रजापतिरपि भवति। अयमेव अव्याकृतात्मा इति च भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मविद्यानिष्ठाय वेदान्तभास्कराय नमः॥

ब्रह्मविद्या रहस्या च निगूढा पापनाशिनी।
तया च लभते मोक्षं धीरो **वेदान्तभास्करः**॥

ब्रह्मविद्या हि रहस्या निगूढा सकलपापनाशिनी च वर्तते। अनया ब्रह्मविद्यया एव हि मानवः मोक्षं प्राप्नोति॥

जनवरी ११

११. ब्रह्मविद्यायाः महिमा ह्येषः!

अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां
सदा सद्भिः सेव्यमानां निगूढाम्।
यथाऽचिरात् सर्वपापं व्यपोह्य
परात्परं पुरुषं याति विद्वान्॥

कैवल्योपनिषत् १-१

आश्वलायनमहर्षिः ब्रह्माणम् उपगम्य एव प्रार्थयते ''भो भगवन्, सत्पुरुषैः सदा संसेव्यां रहस्याम् अत्यन्तश्रेष्ठां परब्रह्मविद्यां मह्यं कृपया अनुगृहाण। यतः ब्रह्मविद्यया मानवः, सर्वाणि पापानि दूरीकृत्य सद्य एव परात्पर परमात्मानम् विन्दते''॥

न हि ब्रह्मविद्या नाम सामान्या केवलम् अर्थकरी विद्या, किं तु एषा अत्यन्तश्रेष्ठा विद्या। सत्पुरुषैः सदा मननीया हि विद्या ब्रह्मविद्या। वेदवेदांतशास्त्रसारभूता हि ब्रह्मविद्या!!

एवंलक्षणया विद्यया कीदृशं हि फलं भवति अस्माकम्? इति चेत्। पुण्यपापविनाशः, तदनन्तरं च परमपुरुषार्थप्राप्तिः। ब्रह्मात्मज्ञानाद्धि मानवस्य पुण्यपापदाहः। ततः पश्चात् सः मुमुक्षुः ब्रह्मैव प्राप्नोति। अयमेव हि ब्रह्मविद्यायाः महिमा नाम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं लब्धसर्वात्मभावाय वेदान्तभास्कराय नमः॥

आत्मज्ञानबलादेव सर्वात्मत्वमवाप्तवान्।
वामदेवमहर्षिस्तु धीरो **वेदान्तभास्करः**॥

धीरो वामदेवमहर्षिः आत्मज्ञानबलात् सर्वात्मत्वमेव प्राप्तवान्।

जनवरी १२

१२. वामदेवमहर्षेः धीरोद्गारः!

तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे "अहं मनुरभवं सूर्यश्च" इति।

बृहदारण्यकोपनिषत् १-४-१०

तम् एतम् आत्मानं विदित्वा वामदेवमहर्षिः "अहमेव मनुरस्मि अहमेव च सूर्यः" इति स्वानुभवेन प्रतिपन्नवान्॥

लब्दात्मज्ञानेन वामदेवमहर्षिणा उद्घोषितोऽयं मन्त्रः "अहं मनुरभवं सूर्यश्च" इति। अस्यैव **सर्वात्मभावः** इति नाम॥

वामदेवो नाम कश्चित् महर्षिः; सः 'अहं ब्रह्मास्मि' इति विज्ञातवान्। ब्रह्मैवाहम्, अहमेव ब्रह्म; नेदं शरीरमहमस्मि, न च परिच्छिन्नः सामान्यः ऋषिरस्मि अहम्; किं तु परिपूर्णं निरवयवं सर्वात्मकं सर्वव्यापि ब्रह्मैवाहम् इति वामदेवः स्वानुभवेन अवबुद्धवान्। एतदेव हि ब्रह्मात्मज्ञानं नाम॥

ईदृशब्रह्मात्मज्ञानफलमेव हि सर्वात्मभावः। अहमेव मनुः, अहमेव सूर्यचन्द्रनक्षत्राणि; साध्यात्मिकं साधिभौतिकं साधिदैविकं च विश्वं सर्वमपि अहमेव इति वामदेवमहर्षिः स्वानुभवेन ज्ञातवान्। वामदेवमहर्षेः धीरोद्गारोऽयम्!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्मदर्शनरहस्यविदे वेदान्तभास्कराय नमः ॥

येन चिन्मात्ररूपेण शब्दादीन् वेत्ति मानवः।
आत्मानं तं विजानीयात् इति **वेदान्तभास्करः**॥

येन चिन्मात्रस्वरूपेण साक्षिणा शब्दादीन् विषयान् मानवः जानाति तमेव आत्मानं विजानीयात्।

जनवरी १३

१३. आत्मावबोधनकौशलम्

येन रूपं रसं गंधं शब्दान् स्पर्शांश्च मैथुनान्।
एतेनैव विजानाति किमत्र परिशिष्यते॥

काठकोपनिषत् २-१-३

येन चैतन्येन नरः रूपं रस गंध शब्दान् स्पर्शान् मैथुनानि च जानाति, स आत्मैव 'अहम्' इति विजानीयात्॥

आत्मावबोधनकला हि अस्मिन् मन्त्रे उपदिश्यते। तद्यथा, प्रत्यहं सर्वः पुरुषः शब्दस्पर्शरूपरसगन्धादीन् विषयान् अनुभवतीति हि सुप्रसिद्धम्। अयमनुभवः किंनिमित्तकः? कथम् उत्पद्यते? यतो हि, देहः अचेतनः, इन्द्रियाणि जडानि, बुद्धिश्च अचिदात्मिका एव। तर्हि बाह्यान् रूपादीन् विषयान्, आन्तराणि सुखदुःखादीनि च को जानाति? इति चेत्, स एव आत्मा, प्रत्यगात्मा चायम्॥

न हि देहादिसङ्घातः शब्दस्पर्शरूपरसगन्धादीन् जानीयात्, अचेतनत्वात्। सङ्घातविलक्षणेनैव आत्मना हि शब्दादयः ज्ञायन्ते। आत्मचैतन्यागोचरः पदार्थो नाम न कश्चिदस्ति। चिन्मात्रस्वरूपोऽयमात्मा स्वयमेव इति जानीयात्। एषा एव आत्मावबोधनकला नाम। एतत्कलाभिज्ञ एव हि आत्मज्ञानी इति कथ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वस्वरूपनिष्ठाय वेदान्तभास्कराय नमः॥

श्रद्धावान् आत्मकामश्च तत्परश्च जितेन्द्रियः।
जिज्ञासुर्लभते ब्रह्म परं **वेदान्तभास्करः**॥

योऽसौ जिज्ञासुः श्रद्धावान्, आत्मकामः, तत्परः, जितेन्द्रियश्च, स एव परं ब्रह्म प्रतिपद्यते।

जनवरी १४

१४. ईदृशस्यैव स्वात्मप्राप्तिः

यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनुं स्वाम्।

मुण्डकोपनिषत् ३-२-३

योऽयं जिज्ञासुः आत्मानमेव वरयते, तस्यैव आत्मप्राप्तिर्भवति। तादृशस्यैव जिज्ञासोः अयमात्मा आत्मनः नैजं परिपूर्णम् अजम् अमृतं स्वरूपं दर्शयति॥

आत्मज्ञानस्य प्राप्तिः केषाम्? आत्मजिज्ञासूनाम्। ये जनाः येन फलेन अर्थिनः तेषामेव तदेव फलं लभ्यते हि। गृहार्थिनां गृहप्राप्तिः, यशोऽर्थिनां यशःप्राप्तिः, धनार्थिनां धनप्राप्तिः; स्वर्गार्थी स्वर्गं लभते। एवमेव आत्मकामश्चेत् आत्मानमेव लभते॥

आत्मार्थित्वं नाम किम्? आत्मनः नैजस्वरूपस्य अवबोधनेच्छा। यथा उपनिषत्सु उपदिष्टम्, तथैव आत्मा अजम् अजरम् अमृतं ब्रह्माहमस्मि इति कथञ्चिदपि मया ज्ञातव्य एव इति तीव्रेच्छा यस्य जाता स एव जिज्ञासुः। स एव च मुमुक्षुः। तस्य सद्गुरूपदेशश्रवणेन आत्मावबोधः स्वयमेव उदेति। 'अहमेव ब्रह्मास्मि' इति निश्चयानुभवः सहजतया सुलभेन जायत एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वाराज्याभिषिक्ताय वेदान्तभास्कराय नमः॥

व्याहृत्युपासनात् धीरः स्वाराज्यं फलमश्नुते।
वाक्पतिश्च मनस्वी च भवेद्वेदान्तभास्करः॥

व्याहृत्युपासको हि धीरः वाक्पतिः मनस्वी च भूत्वा स्वाराज्यफलमेव लभते॥

जनवरी १५

१५. स्वाराज्यप्राप्तेः साधनमिदम्

आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः॥ तैत्तिरीयोपनिषत् १-६

व्याहृत्युपासकः स्वाराज्यं प्राप्नोति, मनसाम् अधिपतिर्भवति। वागिन्द्रियस्य नेत्रेन्द्रियस्य च अधिपतिर्भवति। श्रोत्रेन्द्रियाणा विज्ञानस्य च अयम् अधिपतिर्भवति॥

योऽयम् उपासकः भूः, भुवः, सुवः, महः इत्येताः चतस्रः व्याहृतीः भूर्लोकः, अन्तरिक्षलोकः, स्वर्गलोकः, आदित्यः इति एवंरूपेण उपास्ते तस्य स्वाराज्यफलमेव लभ्यते। **महः** इति व्याहृतिम् ब्रह्मत्वेन उपासीत॥

एवमुपासकस्य स्वाराज्यं लभ्यते। एतासां व्याहृतीनाम् आत्मा भूत्वा उपासकः विराट्पुरुषवत् स्वयमपि स्वराट् भवति। अयमुपासकः आत्मार्थं सर्वानपि कामान् लभेत, तथैव परेभ्योऽपि तदीयानि फलानि प्रापयेत्॥

मनसः, वचसः, नेत्राणाम्, श्रोत्राणाम् विज्ञानस्य च अयम् अधिपतिर्भवति। सिद्धसङ्कल्पो ह्ययम्। स्वाधीनकृताष्टमहासिद्धिः अयं धीरः। अनेन व्याहृत्युपासनेन स्वाराज्यफलमेव प्राप्नोति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ज्येष्ठश्रेष्ठविदे वेदान्तभास्कराय नमः॥

प्राणोपासननिष्ठोऽयं प्राणसाम्यगुणान्वितः।
ज्येष्ठो भवति श्रेष्ठश्च पूज्यो **वेदान्तभास्करः**॥

प्राणोपासननिष्ठः प्राणवदेव ज्येष्ठः श्रेष्ठः पूज्यश्च भवति।

जनवरी १६

१६. प्राणोपासकोऽपि प्राणसम एव

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति। प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च॥

छान्दोग्योपनिषत् ५-१-१

यो हि ज्येष्ठं श्रेष्ठं च प्राणम् उपास्ते, सः ज्येष्ठः श्रेष्ठश्च भवति। प्राणो हि ज्येष्ठश्च श्रेष्ठश्च!

शरीरम्, इन्द्रियाणि, अन्तःकरणं प्राणश्च—इत्येतस्य समूहस्य **सङ्घातः** इति नामधेयम्। अस्मिन् सङ्घाते प्राणः एव मुख्यः, प्राण एव च सारम्। परस्मादात्मनः प्राथम्येन आविर्भूतोऽयं खलु प्राणः। प्रथमतः जातत्वादयं प्राणः ज्येष्ठः, एतन्निमित्तत्वात् सङ्घातस्य प्राणोऽयं श्रेष्ठश्च। प्राणादेव हि सङ्घातोऽयं जीवति, प्राणे सत्येव सङ्घातस्य अस्तित्वम्॥

एवं ज्ञात्वा यः प्राणं ज्येष्ठं श्रेष्ठम् उपास्ते, तादृशः उपासकोऽपि जनानां मध्ये स्वयमपि ज्येष्ठः श्रेष्ठो भवति। तादृशम् उपासकं जना आदरेण भक्त्या च उपासते। प्राणोपासकः सर्वथा लोके प्रतिष्ठितः प्रसिद्धो भूत्वा विराजते। प्राणवदेव प्राणोपासकोऽपि जगति पूज्यो वन्द्यो भवति इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आलोचनपराय वेदान्तभास्कराय नमः॥

जगतः कारणं ब्रह्म किं जीवाः कथमागताः।
चिन्तयन्ति मुदा ब्रह्मविदो **वेदान्तभास्करः**॥

अस्य जगतः ब्रह्म कथ कारणं भवेत्? जीवाः कथं जाताः? इति ब्रह्मज्ञानिनः सोत्साहं चर्चां कुर्वन्ति।

जनवरी १७

१७. ज्ञानिनां कृत्यमिदम्

ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाताः? जीवाम केन क्व च सम्प्रतिष्ठाः? अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्॥ श्वेताश्वतरोपनिषत् १-१

ब्रह्मविदः एव परस्परं विचारं कुर्वन्ति। तद्यथा, किम् अस्य जगतः ब्रह्म कारणम्? वयं कस्मात् जाताः? केन जीवामः? कुत्र गत्वा संविशामः? सुखदुःखानुभवः कथं भवति? अस्य जगतः व्यवस्था कथं भवति? इत्यादिक्रमेण॥

अस्माकम् भारतीयसस्कृतेः महिमानम् अयं मन्त्रः दर्शयति। पुराकाले चत्वारः पञ्च वा ऋषयः, तपस्विनः, संन्यासिनः, अथवा महात्मानः एकत्र मिलिताः सन्तः परमेव ब्रह्म अधिकृत्य परस्परम् अन्योन्यं विचारं कुर्वन्तः आसन्। न तु लौकिकविषयान् अधिकृत्य। लौकिकवस्तुविचारेण पुनः पुनः दुःखमेव प्राप्यते खलु ?

आत्मविचारेण तु आनन्दः प्राप्यते। ब्रह्म-देव-भगवत्परमात्म विचारेण हि अस्माकम् अविद्या दूरीक्रियते। ब्रह्मविचारो हि वेदान्तेषु क्रियते। जगद्ब्रह्मणोः सम्बन्धः अस्माकमपि अन्वयीभवति। परस्य ब्रह्मणो विचारेणैव कल्याणं, शान्तिः आनन्दश्च प्राप्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणोपासनमर्मविदे वेदान्तभास्कराय नमः ॥

प्राणोपासननिष्ठानां प्राणतत्त्वविदां सताम्।
सापेक्षिकं ह्यमृतत्वम् इति **वेदान्तभास्करः**॥

प्राणतत्त्वविदां प्राणोपासकानां सापेक्षिकम् अमृतत्वं लभ्यते।

जनवरी १८

१८. प्राणोपासनस्य रहस्यपञ्चकम्

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा।
अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते॥ प्रश्नोपनिषत् ३-१२

प्राणस्य उत्पत्तिः, आगमनम्, अस्तित्वम्, विभुत्वम्, पञ्च-प्रकारेण अध्यात्मं च—इति प्राणस्य रहस्यपञ्चक यः जानाति, सः अमृतत्वम् अश्नुते॥

प्राणोपासनेन सापेक्षिकम् अमृतत्वं प्राप्यते। प्राणोपासनस्य तु एतानि पञ्च रहस्यानि भवन्ति। तानि च—

१. आत्मन एव प्राणो जायते। आत्मा एव प्राणस्य मूलकारणम्। आत्मन एव जनित्वा आत्मन्येव स्थित्वा आत्मन्येव प्राणो लीयते॥

२. मनोद्वारा प्राणः इमं देहं प्रविशति, तथा सर्वमेव शरीरं व्याप्नोति॥

३. कार्यकरणसंघातमिमं संव्याप्य प्राणः अन्तः बहिश्च वर्तते॥

४. सर्वाण्यपि इन्द्रियाणि संव्याप्य प्राणः अनेकैः रूपैः अवभासते। प्राणः स्वयं विभुश्च॥

५. पायूपस्थयोः **अपानः**, नेत्रश्रोत्रमुखनासिकासु **प्राणः**, नाभिदेशे **समानः** सन् प्राणः इन्द्रियव्यापी इति जानतः प्राणोपासनेन प्राणसायुज्यमेव फलं लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओं मृत्युभयविदूराय वेदान्तभास्कराय नमः॥

शब्दरूपादिहीनं तं निर्विशेषं निरंशकम्।
आत्मानं यो विजानीयात् मुक्तो **वेदान्तभास्करः**॥

शब्दरूपादिरहितं निर्विशेषं निरवयवम् आत्मानं यः विजानीयात् सः जन्ममरणससारात् विमुच्यते।

जनवरी १९

१९. मरणात् मुक्तिः

निचाय्य तत् मृत्युमुखात् प्रमुच्यते। काठकोपनिषत् १-३-१५
निरुपाधिकं तम् आत्मानं विज्ञाय मानवः मरणग्राहात् मुच्यते।

आत्मा ज्ञातव्यः। आत्मनि ज्ञाते किं फलं भवति? इत्युक्ते मुक्तिरेव फलम्। मुक्तिर्नाम मोक्षणम्। कस्मात्? मृत्युमुखात्। मरणग्राहात् इत्यर्थः। **मरणम्**! अयं शब्द एव अस्माकं भयङ्करः। मरणं, मृत्युः, यमः—इत्यादयः शब्दाः, तद्विचारश्च—अमङ्गळः इत्येव सर्वे वदन्ति। एवं स्थिते, अमङ्गलात् मरणात् मुक्तिश्चेत् कियान् आनन्दः? कीदृशं सौभाग्यम्? कीदृशं मङ्गळम्? को वा नेच्छति मरणात् मुक्तिम् ?

ईदृशी मुक्तिः किमस्माभिः प्राप्तुं शक्यते? इति चेत् नूनं शक्यते एव। तर्हि किं कर्तव्यम् ? आत्मा ज्ञातव्यः। अस्तु, स आत्मा कथम् अस्ति? इति चेत्, इयं श्रुतिः उपदिशति। आत्मा नाम शब्दस्पर्शरूपरसगन्धरहितः। आत्मनः देहेन्द्रियमनोबुद्धि-प्राणसम्बन्धोऽपि नास्ति। आत्मा तु नित्यशुद्धनित्यबुद्धनित्यमुक्त-स्वरूपः। आत्मा हि सर्वविकाराणां साक्षिभूतः। आत्मा विकार-रहितः कूटस्थस्वरूपः। एवम् आत्मानं विजानतः किं मरणभयं सम्भवति?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मिष्ठाय बलिष्ठाय वेदान्तभास्कराय नमः॥

विद्याबलविहीनानाम् दुर्लभं ब्रह्म सत् परम्।
पुत्रपत्नीप्रमत्तानां सत्यं **वेदान्तभास्करः**॥

येषाम् आत्मविद्याबलं नास्ति, ये च पुत्रपत्नीप्रभृतिषु प्रमत्ताः, तेषां परब्रह्मतत्त्वं दुर्लभमेव।

जनवरी २०

२०. बलिष्ठोऽपि बलहीनोऽयम्

नायमात्मा बलहीनेन लभ्यो न च प्रमादात् तपसो वाप्यलिङ्गात्। मुण्डकोपनिषत् ३-२-४

बलहीनेन साधकेन नात्मा ज्ञायते; प्रमादात्, लिङ्गरहितात् तपसो वा आत्मा न लभ्यते।

बलहीनो नाम दुर्बलः। बलं, धैर्यं, शक्तिः इति पर्यायपदानि। बलं नाम नैषा शरीरस्य वा बुद्धेर्वा शक्तिः। किं तु विवेकस्य बलम्, आत्मज्ञानस्य बलम्, आत्मनिष्ठाजातम्, अनुभवस्य बलमेतत्। विवेकज्ञानबलमेव हि बलं नाम। बलान्तराणि सर्वाणि दुर्बलान्येव। एतैः दुर्बलैः नात्मा अवगन्तुं शक्यते। न च प्रमादात् आत्मा ज्ञातुं शक्यते। प्रमादो नाम लौकिकवस्तुषु विशेषानुराग-निमित्तः अध्यासातिशयः। एवं प्रमत्तस्यापि आत्मज्ञानं नोदेति॥

विवेकवैराग्यमुमुक्षुत्वादिरहितात् केवलात् शास्त्रपाण्डित्यादपि नात्मज्ञानम् उदेति। न हि आत्मानं ज्ञातुम् अतीव बुद्धिमता भाव्यम्, न च विशेषशक्तिमता भाव्यम्, न च विशेषविद्यावता भाव्यम्। ईदृशैः विशेषबुद्धिशक्तिविद्यासामर्थ्यैः लौकिकसम्पदः प्राप्येरन्, न तु मुक्तिः। अतः लौकिकदृष्ट्या धनादिसम्पन्नः बलिष्ठोऽपि अनात्मज्ञश्चेत् वेदान्तदृष्ट्या बलहीन एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वानन्दामृततृप्ताय वेदान्तभास्कराय नमः॥

यस्मात् जीवितुमिच्छन्ति प्राणिनः सर्व एव हि।
तस्मात् आनन्दरूपोऽयमात्मा **वेदान्तभास्करः**॥

सर्वेऽपि प्राणिनः दीर्घकाल जीवितुम् इच्छन्ति। किमर्थम्? इति चेत्, तेषाम् आत्मा आनन्दस्वरूपः॥

जनवरी २१

२१. किमर्था धीर्घकालं जिजीविषा?

को ह्येवान्यात् कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्॥ तैत्तिरीयोपनिषत् २-७-३

यदि अयमात्मानन्दः नाभविष्यत्, को वा प्राणी प्राणव्यापारम् कुर्यात्? को वा जीवितुम् इच्छेत्?

आत्मनः आनन्दस्वरूपत्वेन विद्यमानत्वादेव सर्वो जन्तुः प्राणनव्यापारं करोति। प्रमाणागोचरोऽपि सन् आत्मा 'नास्ति' इति वक्तुं न शक्यते। मनसोऽपि प्रत्यगात्मत्वेन सूक्ष्मत्वात् आत्मनः॥

अचेतनोऽयं देहेन्द्रियादिसङ्घातः स्वव्यापारं कुर्वन् अस्ति इत्येतदेव लिङ्गम् आत्मनः अस्तित्वे। आत्मार्थो हि सकलेन्द्रिय-व्यापारः। आत्मने हि इन्द्रियव्यापारजन्यः आनन्दः। आनन्दानु-भवार्थं हि सर्वे प्राणिनः जिजीविषन्ति? सर्वेषा सर्वविधव्यापारोऽपि आनन्दार्थ एव खलु। अस्माकं सर्वेषां सर्वेऽपि व्यवहाराः आनन्दार्था एव हि! आनन्दाभावे को वा जन्तुः बहुकालं जिजीविषेत्? आत्मा आनन्दस्वरूपः, आत्मैव ब्रह्म। ब्रह्मैव आनन्दः। एतद्रहस्यं विजानतां विवेकिनां हि ब्रह्मानन्दप्राप्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वचैतन्यरूपाय वेदान्तभास्कराय नमः॥

शुद्धमेव हि चैतन्यम् नानोपाधिप्रभेदतः।
संज्ञानाऽऽज्ञानविज्ञानं भाति **वेदान्तभास्करः**॥

परिशुद्धमेकमेव चैतन्यम् नानोपाधिभेदतः संज्ञानम्, आज्ञानम्, विज्ञानम्—इत्यादिरूपेण विभाति॥

जनवरी २२

२२. सर्वमेतत् चैतन्यविलास एव

संज्ञानम् आज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिः धृतिः मतिः मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुः असुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति॥

ऐतरेयोपनिषत् ३-१-२

संज्ञानम्, आज्ञानम्, विज्ञानम्, प्रज्ञानम्, मेधा, दृष्टिः, धृतिः, मतिः, मनीषा, जूतिः, स्मृतिः, संकल्पः, क्रतुः, असुः, कामः, वशः—इत्येतानि सर्वाणि प्रज्ञानस्यैव नामधेयानि भवन्ति॥

आत्मचैतन्यम् एकम् एव। तस्मिन् कश्चिदपि भेदो नास्ति। एका एव चित् अन्तःकरणोपाधिभेदेन भिन्नविभिन्नचैतन्यरूपेण अवभासते। तद्यथा, शुद्धचैतन्यरूपेण **संज्ञानम्**, आज्ञाचैतन्यरूपेण **आज्ञानम्**, विवेकविशेषचैतन्यरूपेण **विज्ञानम्**, प्रकृष्टप्रशान्त-चैतन्यरूपेण **प्रज्ञानम्**, स्मरणसामर्थ्यचैतन्यरूपेण **मेधा**, इन्द्रियद्वारा विषयग्रहणचैतन्यरूपेण **दृष्टिः**, अवसन्नानाम् इन्द्रियाणां धैर्येण उत्तम्भनचैतन्यरूपेण **धृतिः**, स्वतन्त्रबुद्धिचैतन्यरूपेण **मनीषा**, रोगादिपीडाचैतन्यरूपेण **जूतिः**। एवमेव एकमेव चैतन्यं स्मृति सङ्कल्प-क्रतु-प्राणन-काम-वशादि-रूपेण विराजते इति ज्ञेयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जीवात्मतत्त्वविदे वेदान्तभास्कराय नमः॥

पूर्णमेव परं ब्रह्म प्राविशत् देहमीदृशम्।
आत्मरूपेण जीवेन सृष्ट्वा **वेदान्तभास्करः**॥

पूर्णं ब्रह्मैव इद शरीर सृष्ट्वा अनन्तर स्वयमेव स्वेन जीवेनात्मना इदं शरीरं प्रविष्टवत्।

जनवरी २३

२३. ब्रह्मैव जीवरूपेण अवभासते

सेयं देवता ऐक्षत हन्ताहम् इमाः तिस्रो देवताः अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि इति।

छान्दोग्योपनिषत् ६-३-२

सा एषा परा देवता एवं चिन्तितवती ''हन्त अहम् इमाः तिस्रो देवताः भूत्वा, अनेन जीवेन आत्मना इदं शरीरं प्रविश्य, नामरूपे व्याकरवाणि''।

परस्यैव ब्रह्मणः 'परा देवता' इति नामान्तरम्। इदं विश्वं सृष्ट्वा, जीवरूपेण अनुप्रविश्य, नामरूपाकारेण अवभासमानं परब्रह्मैव, न तु अचेतनं प्रधानम्। कापिले साङ्ख्यदर्शने प्रतिपादितम् अचेतनं प्रधानं वेदान्तेषु जगत्कारणत्वेन नाभ्युपगतमस्ति। प्रत्युत, सर्वभूतानाम् आत्मभूतं चिन्मात्रस्वरूपं परमेव ब्रह्म जगत्कारणमिति वेदान्तेषु अभ्युपगम्यते॥

तेजः आपः अन्नम् इत्येतानि त्रीणि भूतानि सृष्ट्वा, तद्द्वारा इमं प्रपञ्चं सृष्ट्वा अनन्तरं तदेव परं ब्रह्म अस्मिन् जगति जीवरूपेणापि अवभासते। संसारिजीवरूपेण अवभासमानं परब्रह्मैव। जीवाः परब्रह्मस्वरूपा एव, नैव तु ब्रह्मभिन्नाः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'इव'कारतत्त्वविदे वेदान्तभास्कराय नमः॥

आत्मैवेदं जगत् सर्वम् आत्मभिन्नमिव स्थितम्।
पूर्णे भिन्नमिवेदं त्वविद्या **वेदान्तभास्करः**॥

आत्मनः भिन्नमिव अवभासमानमपि इदं जगत् सर्वं परमार्थतः आत्मैव। पूर्णे आत्मनि भेदावभासः अविद्यानिमित्तक एव॥

जनवरी २४

२४. 'इव'कारस्य महिमा

यत्र वा अन्यदिव स्यात् तत्र अन्यो अन्यत् पश्येत्।

बृहदारण्यकोपनिषत् ४-३-३१

यत्र ब्रह्मणि भिन्नमिव भवति, तत्र खलु अन्यः अन्यं पश्येत्।

आत्मनो भिन्नं द्वैतं वस्तु यदा अनुवदति श्रुतिः, तदा 'इव'कारं प्रयुनक्ति। तत्त्वतः सर्वम् आत्मैव। परमार्थदृष्ट्या सम्यक् विचारिते सति आत्मनः भिन्नतया द्वैतं नाम वस्तु नास्त्येव। आत्मैव सत् अज्ञानिनाम् अनात्मवस्तुरूपेण दृश्यते। स्वयम् एक एव विद्यमानोऽपि स्वप्ने स्वात्मभिन्नानि इव अनेकानि वस्तूनि उपलभते खलु। भिन्नानि 'इव' इति 'इव'कारप्रयोगे परमार्थतः नैव भिन्नानि वस्तूनि इत्यर्थः॥

द्वैतमिव दृश्यमानकाले प्रमातृप्रमाणप्रमेया दृश्यन्ते। प्रमाता प्रमेयं प्रमिनोति। द्वैतमिति त्रिपुटीभेदः। ज्ञानदृष्ट्या सर्वम् आत्मैव। आत्मनः अभिन्नत्वेनैव इदं विश्वम् उपनिषत्सु प्रतिपाद्यते। आत्मैव प्रपञ्चरूपेण दृश्यते इत्यर्थः। विद्यमानं वस्तु आत्मैव एक इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'द'कारोपदेशविदे वेदान्तभास्कराय नमः॥

देवमानवरक्षोभ्यः दमदानदयापरः।
जनकस्योपदेशोऽयं **'द'स्तु वेदान्तभास्करः**॥

जनकः प्रजापतिः देवेभ्यो मनुष्येभ्यो रक्षोभ्यश्च समानतया 'द' कारमेव उपदिदेश। दमं, दानं, दयां च क्रमेण तेभ्यः उपादिशत्॥

जनवरी २५

२५. 'द'कारस्य रहस्यम्!

तेभ्यो देवेभ्यः हैतदक्षरमुवाच 'द' इति, मनुष्येभ्यः हैतदक्षरमुवाच 'द' इति, असुरेभ्यः हैतदक्षरमुवाच 'द' इति।

बृहदारण्यकोपनिषत् ५-२-२

पिता प्रजापतिः तेभ्यः देवेभ्यः मानवेभ्यः असुरेभ्यश्च समानतया एकमेव 'द'कारम् उपदिष्टवान्।

प्रजापतिब्रह्मणः देवाः, मनुष्याः, असुराः इति त्रयः पुत्राः। ते पितरम् उपगम्य ''अस्मभ्यं हितोपदेशं कुरु'' इति प्रार्थितवन्तः। संवत्सरमेकं ब्रह्मचर्यव्रतम् अनुष्ठीयताम्—इति पित्रा आज्ञप्ताः ते त्रयोऽपि तथैव कृत्वा पुनः उपदेशार्थम् आगतवद्भ्यः तेभ्यः द द द इत्येव पिता उपदिदेश। किं मम उपदेशस्य अर्थः ज्ञातो वा? इति पृष्टाः ते त्रयोऽपि पुत्राः 'सत्यम्' इति प्रत्युत्तरितवन्तः॥

विषयानुभोगनिरताः देवताः **दमम्**, लोभिनः स्वार्थिनश्च मानवाः **दानम्**, क्रूरिणः हिंसाचाराश्च असुराः **दयाम्** इति प्रजापत्युपदेशस्य तात्पर्यं समधिगतवन्तः। समानेऽप्युपदेशे स्वस्वसंस्कारानुगुण्येन तात्पर्यग्रहणं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं त्यागिराजाय वेदान्तभास्कराय नमः॥

त्यागेनैव परा शान्तिः त्यागेनैव परं सुखम्।
आत्मज्ञानं महात्यागः इति **वेदान्तभास्करः**॥

त्यागेनैव परा शान्तिः, त्यागेनैव परमं सुखम्; आत्मज्ञानमेव हि वेदान्ते महात्यागः॥

जनवरी २६

२६. त्यागेनैव आनन्दः

तेन त्यक्तेन भुञ्जीथाः। ईशावास्योपनिषत् १

हे मानव, त्वं तेन त्यागेनैव भोगम् आनन्दम् अनुभव।

आनन्दं प्राप्तुं किं कुर्यात्? इति जिज्ञासायां सत्याम् ''त्यागेन आनन्दम् अनुभव'' इति ईशावास्योपनिषत् उपदिशति। न भोगेन आनन्दः, किं तु त्यागेनैव इति उपदिशति अयं मन्त्रः॥

किम्? त्यागेन आनन्दः? त्यागः! अयं शब्द एव अनेकेषां भयम् उत्पादयति। त्यागो नाम विसर्जनम्। अस्माभिः प्रयत्नपूर्वकं श्रमपूर्वकं सम्पादितस्य धनादेः वस्तुनः इतरेभ्यः दानं नाम महत् कष्टकरम्। अनेन त्यागेन आनन्दो वा? त्यागकर्तुः नष्टम्, त्याग प्राप्तुः पुनः आनन्दो भवेत्। त्यागकृतः नष्टवस्तुनः दुःखमेव भवति खलु? इति सामान्यदृष्टेः भाति॥

नैतद्युक्तम्। अत्र त्यागो नाम न केवलं दानम्। अत्र त्यागः इतरेभ्यः न वस्तुनः दानम्। किं तु आत्मज्ञानमेव त्यागः। सर्वम् आत्मैव, इति विवेके उत्पन्ने सति 'मदीयम्' इति न किञ्चित् अवशिष्यते। 'अहं' 'मम' इतिरूपायाः अविद्यायाः ज्ञानेन परिहार एव वेदान्तेषु त्यागः। ईदृशेन त्यागेन आनन्दः न लभ्यते किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सत्यवादिने वेदान्तभास्कराय नमः॥

जीवस्तु वृक्षवत् नित्यं जायते म्रियते तथा।
तस्मात् सत्यं वदेत् धीमान् इति **वेदान्तभास्करः**॥

जीवः वृक्षवत् जायते म्रियते च। नायं हि जीवः शाश्वतः, तस्मात् विवेकी सदा सत्यमेव ब्रूयात्॥

जनवरी २७

२७. अशाश्वतं हि मानवजन्म!

सस्यमिव मर्त्यः पच्यते, सस्यमिव आजायते पुनः।

काठकोपनिषत् १-१-६

मर्त्यः मानवः सस्यवत् वृक्षवत् जायते, म्रियते, पुनर्जायते च।

मानवः आत्मानं चिरञ्जीविनं मत्वा पापानि कुर्वन् स्वार्थ-साधनपरायणो वर्तते। अयं मानवः क्षुद्रस्वार्थसाधनार्थं यत्किञ्चिदपि कुर्यात्। मातरं पितरं गुरुं देवं च निन्दन् अयं मनुष्यः परमस्वार्थी इति उक्तेऽपि न असाधु वचः॥

स्वार्थित्वे किं कारणम्? अहं शाश्वतः, चिरञ्जीवी भूत्वा शताधिकान् संवत्सरान् जीवामि; मां जरा वा मरणं वा न स्पृशेत् इतिरूपा अविद्या एव अत्र हेतुः। प्रत्यहम् आत्मनः पुरतः म्रियमाणान् शताधिकान् पुरुषान् स्वयमेव पश्यन्नपि अय मानवः 'अह तु चिरञ्जीवी' इति मन्यते इति किं नैतत् भ्रान्तिज्ञानम्?

मानवस्यापि देहः अनित्य एव खलु? दिह्यते, दह्यते इति देहः। जातो हि मनुष्यः कञ्चित् काल स्थित्वा, वर्धित्वा, परिणामान् अनुभूय, क्षीणः सन् अवश्यमेव एकदा म्रियेत एव। तस्मात् विवेकिना मानवेन, लोभिना स्वार्थिना वञ्चकेन न भाव्यम् इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रद्धाभक्तिध्यानविदे वेदान्तभास्कराय नमः॥

श्रद्धा च ध्यानयोगश्च भक्तिश्च साधनं विदुः।
ब्रह्मात्मज्ञानसम्प्राप्त्यै नूनं **वेदान्तभास्करः**॥

श्रद्धा भक्तिः ध्यानयोगश्च ब्रह्मात्मज्ञानं प्रति साधनानि भवन्ति।

जनवरी २८

२८. ब्रह्मविद्यायाः त्रीणि साधनानि

श्रद्धा-भक्ति-ध्यानयोगाद् अवेहि।

कैवल्योपनिषत् १-२

तत्त्वविजिज्ञासुः साधकः श्रद्धया, भक्त्या ध्यानयोगेन च परं ब्रह्म जानीयात्।

आत्मानं सम्यक् अवगन्तुम् अत्र मन्त्रे साधकानां श्रद्धा, भक्तिः, ध्यानयोगः इति त्रीणि साधनानि उपदिष्टानि। एतेषां साधनानाम् अर्थं पश्याम॥

श्रद्धा नाम गुरुशास्त्रवाक्येषु विश्वासः। सद्गुरूणामुपदेशे जिज्ञासोः पूर्णविश्वासो भवेत्, वेदान्तशास्त्रसन्देशेषु अस्माकम् आदरः, प्रीतिः, विश्वासश्च भवेयुः॥

भक्तिर्नाम परमात्मनि सद्गुरौ च गौरवाधिक्यम्। सद्गुरौ भक्तिरहितस्य आत्मज्ञानं नैव उदेति। गुरुसेवा गुरुभक्तिश्च खलु ज्ञानप्राप्तेः प्रधानं साधनम्॥

ध्यानयोगो नाम आत्मनः अनुसन्धानमेव। चित्तशुद्ध्या हि आत्मनः ज्ञानं जायते, न तु केवलेन शुष्कपाण्डित्येन॥

एवं त्रिभिस्साधनैः साधकः परं ब्रह्म विज्ञाय कृतार्थो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवासुरविभागज्ञाय वेदान्तभास्कराय नमः॥

सद्वृत्ता एव देवाश्च विपरीतास्तथासुराः।
मानवेष्वेव विद्यन्ते नूनं **वेदान्तभास्करः**॥

मनुष्येष्वेव सद्वृत्ताः देवाः, दुर्वृत्ताः असुराः इति द्वेधा विद्यन्ते।

जनवरी २९

२९. उभौ अपि अस्मास्वेव विद्येते

द्वया ह प्राजापत्याः देवाश्च असुराश्च। ततः कानीयसा एव देवाः, ज्यायसाः असुराः॥

बृहदारण्यकोपनिषत् १-३-१

प्रजापतिपुत्राः देवाः असुराः इति द्विधा भवन्ति। तेषा देवाः न्यूनाः, असुराः अधिका भवन्ति॥

प्रजापतिर्नाम प्रजानां पतिः। अयमेव ब्रह्मा, विराट्पुरुषश्च। एष एव हि सर्वेषां प्राणिनां मूलभूतः प्रप्रथमः पुरुषः। अस्य हि पुत्राः (प्रजापतेः अपत्यानि पुमांसः) प्राजापत्याः इति उच्यन्ते॥

इमे प्राजापत्याः देवाः असुराः इति द्विधा विभज्यन्ते। शास्त्रात् लब्धविवेकज्ञानाः देवाः, दीव्यन्ति इति देवाः, इन्द्रियाणि प्रकाशयन्ति इति देवाः; धर्म-ज्ञान-ऐश्वर्यादिभिः विराजमानाः देवाः। असुरास्तु असुषु रमन्ते इति। इन्द्रियभोगनिरताः असुराः। दृष्ट फलभोगनिमग्नाः असुराः। ईदृशाः असुरा एव बहुसङ्ख्याकाः। देवास्तु अल्पीयास एव। मानवेषु अस्मास्वेव ईदृशाः देवाः असुराश्च विद्यन्ते। मनुष्येष्वेव राजसाः केचित् असुरस्वभावाः, सात्त्विकाः केचित् देवस्वभावाश्च भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मातृभक्तपुङ्गवाय वेदान्तभास्कराय नमः॥

ब्रह्मचारी सदा शिष्यः सत्यसन्धो दृढव्रतः।
पितृभक्तो भजेत् विद्यां परां **वेदान्तभास्करः**॥

शिष्यो ब्रह्मचारी सत्यसन्धो दृढव्रतः मातापितृभक्तश्चेत् तादृशः साधकः अवश्य ब्रह्मज्ञानं लभते।

जनवरी ३०

३०. ब्रह्मचारिणा मातृभक्तेन भाव्यम्

सत्यकामो ह जाबालो जबालां मातरम् आमन्त्रयाञ्चक्रे, ब्रह्मचर्यं, भवति, विवत्स्यामि किङ्गोत्रो नु अहमस्मि? इति।

छान्दोग्योपनिषत् ४-४-१

सत्यकामजाबालः स्वमातरमागत्य, ''मातः अहं गुरुकुलवासी सन् ब्रह्मचर्यव्रतम् अनुष्ठातुम् इच्छामि। मम गोत्रं किमिति कृपया ब्रूहि'' इति मातरं पृष्टवान्।

सत्यकामजाबालस्य गुरुभक्तेः सत्यव्रतस्य कथा इयम्। सत्यकामो नाम कश्चित् बालकः, तस्य माता जबाला इति। यस्मादयं जबालायाः पुत्रः तस्मात् जाबाल इत्येव प्रसिद्धः। **सत्यकामजाबाल**नाम्ना प्रसिद्धोऽयं बालकः। पुराकालीनस्य आर्षसंप्रदायस्य गुरुकुलवासस्य कथेयम्। सत्यकामजाबालः स्वमातरम् एवं वदति—

''मातः, गुरुकुले अहं ब्रह्मचर्यव्रतम् अनुष्ठातुम् इच्छामि। तत्र गुरुकुले वसन् गुरुसेवां कुर्वाणः वेदाध्ययनं कर्तुमिच्छामि। तस्मात् मम गोत्रं सूत्रं च मे ब्रूहि। मम पितृहीनत्वात् त्वमेव मह्यं मम पितुः नामधेयं गोत्रादि कृपया ब्रूहि'' इति। अनेन सत्यकाम-जाबालस्य मातृभक्तिः ज्ञायते। अयं भारतीयसंप्रदायस्य महिमा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्गुरुभक्तिरहस्यविदे वेदान्तभास्कराय नमः॥

सद्गुरौ परमा भक्तिः यस्य देवे यथा तथा।
आत्मज्ञानं मुमुक्षुर्हि भजेद्वेदान्तभास्करः॥

देवे यादृशी भक्तिः तादृशी एव दृढा भक्तिः गुरौ यस्य भवति तादृशः मुमुक्षुः ज्ञान लभते।

जनवरी ३१

३१. 'गुरु'र्नाम 'भगवान्' एव

भगवांस्त्वेव मे तद् ब्रवीतु।

छांदोग्योपनिषत् ६-१-७

भगवान् भवानेव तं विचारम् मह्यम् आवेदयतु।

पुत्रेण श्वेतकेतुना पितरम् उद्दालकं प्रति उक्तमिदं वचनम्। ''गुरोः सकाशात् आत्मविषयकः विचारः त्वया श्रुतः किम्?'' इति पित्रा पृष्टः श्वेतकेतुः इदं वचः जनकं प्रति वदति॥

ब्रह्मनिष्ठो हि सद्गुरुः। गुरुर्नाम जनको वा पुत्रो वा भवेत्। तम् उपगम्य तस्मादेव आत्मतत्त्वम् अवगन्तव्यम्। अत्र हि मन्त्रे गुरवे 'भगवान्' इति विशेषणं दत्तमस्ति। उपनिषत्सु हि ब्रह्मविद्याचार्याय सद्गुरवे 'भगवान्' इति विशेषणं सामान्यतो दीयते॥

भगवान् नाम पूज्यः इत्यर्थः। गुरौ हि भगवद्दृष्टिः कर्तव्या। गुरवो हि अस्मदादिवदेव देहवन्त इव दृश्यमाना अपि न ते सामान्य मनुष्यवत् मन्तव्याः। गुरुषु भक्तिपूर्विका पूज्यभावना विद्यते चेत् तदा तेषाम् उपदेशः फलकारी भवेत्। तस्मादेव सद्गुरवः 'भगवः', 'भगवन्' इति विशेषणैः शास्त्रेषु सम्बोध्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रद्धातात्पर्यमहत्त्वविदे वेदान्तभास्कराय नमः।

श्रद्धावान् तत्परश्चैव ब्रह्मजिज्ञासुरेव च।
परं ब्रह्म विजानाति धीरो **वेदान्तभास्करः**॥

श्रद्धावान् तत्परश्च चेत् तादृशो धीरः ब्रह्मजिज्ञासुः साधकः परं ब्रह्म सम्यक् विजानाति।

फेब्रुवरी १

३२. ईदृशस्यैव ज्ञानप्राप्तिः

यमेवैष वृणुते तेन लभ्यः। काठकोपनिषत् १-२-२३

आत्मानमेव यः वरयति तेनैव आत्मा प्राप्यते।

आत्मानं प्राप्तुं किं कर्तव्यम्? जपो वा कर्तव्यः? पूजा वा कर्तव्या? वेदाध्ययनं वा कर्तव्यम्? तीर्थक्षेत्राटनं वा? इति चेत्, आत्मार्थित्वे सति आत्मा प्राप्यते। आत्मैव मया ज्ञातव्यः, आत्मा मया ज्ञातव्य एव, आत्मना एव अर्थी अहम्, आत्मानं विहाय न केनापि पदार्थेन अर्थी अहम्—इति तीव्रा अर्थिता विद्यते चेत् तादृशः साधकः अवश्यम् आत्मानं प्राप्नोत्येव॥

आत्मा हि नाम स्वरूपम्। स्वरूपभूतस्य हि आत्मनः बहिरन्वेषणं नाम अविवेकिता खलु? न हि नित्यप्राप्तस्य आत्मनः नूतनतया प्राप्तिरस्ति। आत्मनिमित्ता एव हि देहादीनाम् अस्तिता! आत्मतः एव शरीरम्, आत्मतः एव इन्द्रियाणि, आत्मत एव प्राणः, आत्मतः एव मनः, आत्मत एव प्रपञ्चोऽयम्। सर्वेषां हि स्वरूपभूतोऽयमात्मा। अस्यैव हि आत्मनः वेदान्तेषु 'ब्रह्म' इत्यपि नाम भवति। अस्य आत्मनः प्राप्तिर्नाम अस्य ज्ञानमेव। इदं रहस्यं यः विजानाति तस्य आत्मा प्राप्त एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जिह्मादिदोषविदूराय वेदान्तभास्कराय नमः॥

न येषु जिह्मं माया वा विद्यते साधकेषु वै।
नूनं तेषां ब्रह्मलोकः इति **वेदान्तभास्करः**॥

येषु कुटिलता माया वञ्चन वा नास्ति, तेषामेव ब्रह्मलोकप्राप्तिः।

फेब्रुवरी २

३३. उपासनस्य त्रयो विघ्नाः

तेषामसौ विरजो ब्रह्मलोको न येषु जिह्मम् अनृतं न माया चेति। प्रश्नोपनिषत् १-१६

येषु उपासकेषु कुटिलता, अनृतम्, अनार्जवं च इति त्रयो दोषाः न विद्यन्ते, तेषामेव रजोवर्जितब्रह्मलोकप्राप्तिर्भवति॥

उपासकानां मरणानन्तरम् उपास्यदेवतालोकप्राप्तिर्भवति। अनन्तरं च तद्देवतासायुज्यमेव ते प्राप्नुवन्ति। हिरण्यगर्भोपासकानां मरणानन्तरं ब्रह्मलोकप्राप्तिर्भवति॥

तपः, इन्द्रियनिग्रहः, उपासननिष्ठा च इति गुणत्रयम् उपासकानां प्रधानम्। उपासने क्रियमाणेऽपि अफलदायित्वे त्रयो दोषाः। ते तु जिह्मम्, अनृतम्, माया च इति। एते दोषाः त्याज्याः॥

जिह्मं नाम कुटिलता, वक्रस्वभावः, व्यङ्ग्यस्वभावः।

अनृतं नाम मृषावचनम्, विनोदार्थं वा स्वार्थसम्पादनाय वा स्वप्रतिष्ठाप्रदर्शनार्थं वा मृषावचनम्।

माया नाम मिथ्याचारः। मनसि अन्यथा बहिरेवान्यथा। अनार्जवम् इति च एषा एव। ईदृशैः त्रिभिर्दोषैः वर्जितानामेव ब्रह्मलोकप्राप्तिर्भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शोकसागरोत्तीर्णाय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानी तरेत् शोकं पापसागरमेव च।
अविद्यासागरं ब्रह्मप्राप्तो **वेदान्तभास्करः**॥

अविद्यासागरं शोकसागरं पापसागरं च अतीत्य ब्रह्मवित् ब्रह्मैव प्राप्नोति।

फेब्रुवरी ३

३४. ज्ञानेन चत्वारि फलानि

तरति शोकं, तरति पाप्मानम्, गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति। मुण्डकोपनिषत् ३-२-९

ब्रह्मज्ञानी शोकसागरं तरति, पापसागरं तरति, हृदयग्रन्थिभ्यः मुक्तो भवति, अमृतश्च भवति।

फलयुगोऽयम्, प्रयोजनयुगोऽयम्। सर्वत्रापि साधनमार्गे प्रथमः प्रश्नो नाम 'किं प्रयोजनम्' इत्येव। एवमेव आत्मज्ञानमार्गेऽपि ''आत्मनि विज्ञाते किं फलं भवति?'' इति साधकाः पृच्छन्ति। बाढम्, आत्मज्ञानेन इमानि चत्वारि फलानि भवन्ति॥

१. आत्मज्ञानेन शोकसागरं तरति। ज्ञानेन सर्वे शोकाः नश्यन्ति।

२. पापसागरं तरति। पुण्यपापानि सागरवदेव दुस्तराणि वर्तन्ते। पुनर्जन्मनः हेतुभूतानां पुण्यपापकर्मणां विनाशो भवति॥

३. गुहाग्रन्थिविमोक्षः। गुहाग्रन्थयो नाम अविद्याकामवासनाः। आत्मविद्यया हि अविद्याकामवासनाग्रन्थीनां विनाशः॥

४. अमृतो भवति। आत्मविद्योदये सति सद्य एव अमृतो भवति, जीवन्मुक्तो भवति। न आत्मवित् पुनर्जायते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सत्यव्रतनिष्ठाय वेदान्तभास्कराय नमः॥

सत्यव्रतः सत्यनिष्ठः गुरुसेवापरायणः।
गुरुकृपापात्रभूतः भवेद्वेदान्तभास्करः॥

सत्यव्रतः सत्यनिष्ठः गुरुसेवातत्परश्च जिज्ञासुसाधकः सद्गुरु-कृपापात्रं भवति।

फेब्रुवरी ४

३५. अहो! सत्यव्रतस्य शक्तिः!

तं होवाच नैतत् अब्राह्मणो विवक्तुम् अर्हति, समिधम् सोम्य आहर, उप त्वा नेष्ये, न सत्यादगाः।

छान्दोग्योपनिषत् ४-४-५

तं सत्यकामजाबालं प्रति हारिद्रुमतगौतमो नाम आचार्यः एवम् उवाच ''अब्राह्मणः नैवं वदेत्, अतः सोम्य, समिधम् आहर, अहमेव ते उपनयनसंस्कारं करोमि। यतः त्वं सत्यात् न अगाः''।

ब्राह्मणो हि स्वप्नेऽपि न अनृतं वदेत्। ब्राह्मणः सदा सत्यमेव वदति। सत्यवदनो हि ब्राह्मणो भवितुम् अर्हति। ब्राह्मणस्य लक्षणं ह्येतत्। न हि सत्यनिष्ठायाः परं तपः अस्ति। सत्यनिष्ठया आत्मज्ञानं प्राप्यते॥

हारिद्रुमतगौतमस्य आचार्यस्य सत्यकामजाबालसत्यव्रतत्वं वीक्ष्य अतीव आनन्दः सञ्जातः। अविज्ञातगोत्रस्यापि शिष्यस्य स्वयमेव आचार्यः जनकस्थाने स्थित्वा उपनयनसंस्कारं कर्तुम् उद्यतः। अत्र मुख्यं कारणं तु बालकस्य सत्यव्रतत्वम्, न कदापि अयम् अनृतम् अवदत् इति। सत्यनिष्ठे साधके गुर्वनुग्रहः वर्तते इत्यत्र सशयः अस्ति वा? नैव। अहो, सत्यव्रतस्य महिमा!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'तततम'ब्रह्मविदे वेदान्तभास्कराय नमः॥

ब्रह्म **'ततमं'** ज्ञेयं पुरुषाख्यं सदाशिवम्।
अन्तर्बहिश्च व्यापित्वात् इति **वेदान्तभास्करः**॥

मङ्गळात्मकं पुरुषं परब्रह्म **तततमम्** इति विजानीयात्। यतो हि तत् अन्तः बहिश्च व्यापकमस्ति।

फेब्रुवरी ५

३६. 'ततमं' ब्रह्म

सः एतमेव पुरुषं ब्रह्म ततमम् अपश्यत् इदमदर्शमिति।

ऐतरेयोपनिषत् १-३-१३

सः एतमेव पुरुषं ''ब्रह्म तततमम्, अहो, अहम् अपश्यम्'' इति ज्ञातवान्।

सः परमात्मा इदं शरीरं प्रविश्य जीवरूपेण अवभासते। अयं इमं पुरुषमेव ब्रह्म ज्ञातवान्। स एव परिपूर्णः परमेश्वरः अनेन परिच्छिन्नेन जीवरूपेण अवभासते इत्यर्थः॥

अस्मिन् मन्त्रे परस्य ब्रह्मणः 'ततमम्' इति विशेषणं दत्तमस्ति। 'तततमम्' (व्यापकम्) इति वक्तव्ये सति 'ततमम्' इति अत्र उपदिष्टमस्ति। ततमम् इति तततमम् इत्यर्थः। एकः तकारः लुप्तो वेदितव्यः। परमात्मा हि सम्पूर्णमेव विश्वं व्याप्य स्वयं परिपूर्णो विराजते। परमात्मना अव्याप्तः पदार्थो नाम नास्ति इत्यर्थः। नीचोपाधेः उच्चतमोपाधिपर्यन्तं समानतया परिपूर्णो हि आत्मा। परमात्मा आकाशवत् व्यापकः। सर्वम् आप्नोति इत्यात्मा। अतः आत्मा तततमः। ब्रह्मैव हि आत्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विनीतपुङ्गवाय वेदान्तभास्कराय नमः॥

ब्रह्मनिष्ठो विनीतश्च शमसत्यादिसंयुतः।
शिष्यानुग्रहकर्ता च गुरुर्वेदान्तभास्करः॥

गुरुर्नाम स्वयं ब्रह्मनिष्ठः, विनीतः शमसत्यादिगुणनिष्ठः शिष्यानुग्रहकारकश्च।

फेब्रुवरी ६

३७. सौजन्यमूर्तिर्हि सद्गुरुर्नाम!

स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति।

बृहदारण्यकोपनिषत् ३-८-८

हे गार्गि, ब्राह्मणाः इदमेव 'अक्षरम्' प्राहुः इति होवाच भगवान् याज्ञवल्क्यः।

जनकमहाराजेन आयोजितायां विद्वत्सभायां वाचक्नवी गार्गी याज्ञवल्क्यम् एवं पृष्टवती ''भो याज्ञवल्क्य, कस्मिन्नु खलु इदम् अव्याकृताकाशम् ओतं च प्रोतं च?''। तया एवं पृष्टः याज्ञवल्क्यः 'अक्षरे' इत्युक्त्वा ''हे गार्गि, ब्राह्मणाः इदम् 'अक्षरं' वदन्ति'' इति उक्तवान्॥

याज्ञवल्क्यो हि कर्मकाण्डज्ञानकाण्डरहस्यवित्, आत्मज्ञानी आत्मनिष्ठः महात्मा च आसीत्। सः एवं वदति॥

अक्षरे इदम् अव्याकृताकाशम् ओतं प्रोतं च वर्तते। न क्षरतीति अक्षरम्, नाशरहितं तत्त्वम्। परं ब्रह्म उपनिषत्सु 'अक्षर'नाम्ना प्रतिपादितमस्ति। 'एवं हि ब्राह्मणाः अभिवदन्ति' इत्युक्तत्वात् याज्ञवल्क्यस्य विनयः, प्राचीनाचार्यपरम्परायां गौरवम्, सौजन्यं च ज्ञायते। आचार्यपरम्परायां परस्य ब्रह्मणः **अक्षरम्** इति नाम प्रसिद्धमित्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कालकारणविदे वेदान्तभास्कराय नमः॥

स एव कारणं चास्य कालादेः जगतः परः।
तमेव **ब्रह्म** जानीयात् इति **वेदान्तभास्करः**॥

कालदेशादिरूपस्य जगतः कारणभूतं परमात्मानमेव परं ब्रह्म जानीयात्।

फेब्रुवरी ७

३८. कालस्यापि कारणम् आत्मा

यः कारणानि निखिलानि तानि कालात्मयुक्तानि अधितिष्ठत्येकः। श्वेताश्वतरोपनिषत् १-३

योऽसौ परमात्मा कालात्मपर्यन्तस्य सकलस्यापि वस्तुनः ईशिता स एव अस्य जगतः कारणभूतः।

परमात्मैव जगतः कारणम्, परमात्मैव अस्य नियन्ता, अयं परमात्मैव सर्वतन्त्रस्वतन्त्रः, स एव सर्वान् ईष्टे, स एव एकः अस्य विश्वस्य प्रभुः। परमेव ब्रह्म अस्य जगतः उपादानं निमित्तं च कारणं भवति॥

कालः, देशः, स्वभावः, कर्माणि, नियमः, प्रकृतिः, जीवाः, सूर्यः, चन्द्रः, नक्षत्राणि, देवाश्च इति एतेषां सर्वेषामपि वस्तूनाम् एक एव परमात्मा नियामकः, नियन्ता। परब्रह्मणः सान्निध्येनैव इदं विश्वं सुव्यवस्थितं वर्तते। इदं रहस्यं तु ध्यानयोगादेव ज्ञायेतं। देशकालौ अपि अस्मिन् एव विश्वे अन्तर्भवतः। ईदृशस्य विश्वस्य कारणं परब्रह्मैव। समस्तस्यापि विश्वस्य कारणं परमेश्वरः। अयमेव हि भगवान्। वयमपि ध्यानयोगबलेन भगवन्तम् आराध्य भगवतः अनुग्रहेण भगवन्तम् अधिगम्य कृतार्था भवेम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणतत्त्वविदे वेदान्तभास्कराय नमः॥

प्राणस्येदं वशे सर्वं चेतनाचेतनं जगत्।
ब्रह्मतन्त्रात्मको ह्येषः इति **वेदान्तभास्करः**॥

चेतनाचेतनात्मकमिदं जगत् प्राणस्य वशे वर्तते। अयं प्राणस्तु परब्रह्माधीनः।

फेब्रुवरी ८

३९. प्राणस्य महिमा

प्राणस्येदं वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम्।

प्रश्नोपनिषत् २-१३

इद सर्वं जगत् प्राणस्य वशे एव वर्तते। स्वर्गस्थ सर्वमपि प्राणस्य एव वशे भवति॥

इदं कृत्स्नं विश्वं प्राणादेव जनित्वा, प्राणे एव स्थित्वा, प्राणे एव लीयते। अस्यैव प्राणस्य हिरण्यगर्भः, विराट्पुरुषः, सूत्रात्मा इति च नामान्तराणि॥

इदं विश्वम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं च इति त्रेधा विभज्यते। आध्यात्मिकप्रपञ्चो नाम शरीरम्, इन्द्रियाणि, मनः, बुद्धिः, अहंकारः, प्राणश्च। अस्यैव हि कार्य-करणसङ्घातः इति नाम। इदं सर्वं प्राणादेव जातं सत् प्राणेनैव जीवति। सकलानि करणानि प्राणेनैव आत्मवन्ति भवन्ति॥

आधिभौतिकप्रपञ्चो नाम पृथिव्यादयः आकाशान्ताः शब्दादिविषयाश्च। सर्वस्यास्य आश्रयभूतो **वायुः**। आधिदैविक-प्रपञ्चे ग्रहनक्षत्रदेवताः पितरश्च अन्तर्गच्छन्ति। **हिरण्यगर्भो** हि सर्वस्यास्य आधारभूतः। अस्य उपासनात् ब्रह्मलोकप्राप्तिरेव फलम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्मदर्शनमर्मविदे वेदान्तभास्कराय नमः॥

चक्षुषा द्रष्टुमात्मानं नैव शक्नोति साधकः।
सर्वथा रूपहीनत्वात् इति **वेदान्तभास्करः**॥

न कोऽपि मनुष्यः आत्मानं नेत्राभ्यां द्रष्टुं शक्नोति, यतः रूपरहितः अयम् आत्मा॥

फेब्रुवरी ९

४०. नेत्राभ्यां द्रष्टुम् आत्मा अशक्यः

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।

काठकोपनिषत् २-३-९

नास्य आत्मनः रूपं सन्दर्शनयोग्यम्, अत एव न कश्चिदपि इमम् आत्मानं नेत्राभ्यां पश्येत्।

अग्निः, आदित्यः, इन्द्रः, सोमः, रामः, कृष्णः, सरस्वती, लक्ष्मीः, गायत्री—इत्याद्याः देवताः उपासन्ते उपासकाः, पश्यन्ति च। ताभिः देवताभिः सह ते सम्भाषन्ते च। नैतत् सर्वथा असाध्यम्, यतः एतेषां देवानां भिन्नाः नामरूपगुणकर्मशक्तयो भवन्ति॥

परब्रह्म तु नैवम्। नामरूपातीतं खलु परं ब्रह्म। न नेत्रगोचरं, न च श्रोतृविषयं ब्रह्म। परमात्मा हि इन्द्रियाणाम् अविषयः। नेत्रस्य नेत्रभूतम् आत्मानं नेत्रैः द्रष्टुं शक्यते किम्? नैव॥

'अहं ब्रह्म दृष्टवानस्मि, तुभ्यमपि दर्शयामि' इति यः कश्चित् वदति चेत् नैतत् साधु वचः। यद् दृष्टं न तद् ब्रह्म, यद् दर्श्यते तच्च न ब्रह्म, सर्वसाक्षिभूतं चिन्मात्रस्वरूपमेव ब्रह्म, तदेव अहमिति जानीयात्, एतदेव हि वेदान्तेषु ''आत्मा ज्ञातव्यः, आत्मा द्रष्टव्यः'' इति उपदिश्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनस्साक्षिणे वेदान्तभास्कराय नमः॥

अविकारि परं ब्रह्म सर्वव्यापकमेव च।
मनसः साक्षिरूपं च वेद **वेदान्तभास्करः**॥

पर ब्रह्म विकाररहितं सर्वव्यापकं तत्त्वम्। मनस्साक्षिभूतं च॥

फेब्रुवरी १०

४१. परमात्मा नाम अयमेव

अनेजदेकं मनसो जवीयः।

ईशावास्योपनिषत् ४

परमात्मा अविक्रियः एकः सन् मनोवेगादपि अतिवेगवान्।

परब्रह्मणः इन्द्रादिदेवतानां च लक्षणे भेदोऽस्ति। इन्द्रादिदेवतानां स्वीयानि विलक्षणानि शरीराणि, अवयवाः, देशकालौ, गुणधर्माः, नामरूपादीनि च विद्यन्ते। नेन्द्रः चन्द्रः, न च चन्द्रो देवेन्द्रः। एता देवताः परस्परं भिन्नलक्षणाः। औपनिषदः पुरुषः परमात्मा तु नैवम्॥

तर्हि परमात्मनः स्वरूपं नाम कथम् अस्ति? अयं कूटस्थः, अविक्रियः; परमात्मनो विकारो नाम नास्त्येव। अस्यैव परं ब्रह्म इत्यपि नामधेयम्। देशकालवस्तुभिः असम्बद्धस्य परमात्मनः विकारसम्बन्धो नैव वर्तते। सकलप्राणिनां समानस्वरूप एव परमात्मा। अस्मिन् परस्मिन् ब्रह्मणि तारतम्यभेदोऽपि नास्ति॥

तर्हि, ईदृशस्य परमात्मनः दर्शनं तु कथम्? इति चेत्, अस्मास्वेव अन्तः द्रष्टव्योऽयमात्मा। अस्मत्करणानाम् साक्षि-स्वरूपोऽयं परमात्मा, अयमेव प्रत्यगात्मा च भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अशनायाविवर्जिताय वेदान्तभास्कराय नमः॥

सृष्टेः पूर्वं नैव किञ्चित् विना मृत्युं चराचरम्।
अशनायां परित्यज्य नैव **वेदान्तभास्करः**॥

सृष्टेः पूर्वं मृत्युं विना न किञ्चित् चरं वा अचरं वा वस्तु आसीत्। अत्र मृत्युर्नाम अशनाया एव॥

फेब्रुवरी ११

४२. अशनाया एव हि मृत्युः

नैवेह किञ्चनाग्र आसीत्, मृत्युनैवेदमावृतम् आसीत् अशनायया, अशनाया हि मृत्युः॥

बृहदारण्यकोपनिषत् १-२-१

सृष्टेः पूर्वम् इह न किञ्चित् आसीत्। इदं सर्वं तदा अशनायारूपेण मृत्युना आवृतमासीत्। अशनाया हि मृत्युः॥

इदानीं नामरूपाभ्यां व्याकृततया दृश्यमानमिदं जगत् व्याकृतप्रपञ्चः इत्यभिधीयते। इदं व्याकृतं जगत् इदानीम् इव पूर्वमपि न व्याकृतमेव आसीत्। तर्हि शून्यम् आसीद्वा? इति चेत्, न। किं तु सृष्टेः पूर्वम् इदं जगत् मृत्युना आवृतमासीत्॥

मृत्युर्नाम अशनाया! अत्तुम् इच्छा अशनाया, खादितुम् इच्छा। इयम् अशनाया एव मृत्युः। जिघत्सुम् अशनाया हन्तीव। तस्मात् अशनायां हि मृत्युम् वदति अयं मन्त्रः। हिरण्यगर्भमेव अथवा अव्याकृतात्मानमेव अत्र मृत्युशब्देन अभिदधाति मन्त्रः॥

परमात्मापि अत्र अव्याकृतशब्देन उच्येत। स एव हि हिरण्यगर्भात्मना मृत्युरूपेण च अवभासते। सर्वथा अयं प्रपञ्चः पुरा परमात्मैव आसीत्। तस्मादेव परमात्मनः अयं प्रपञ्चो जातः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रद्धारहस्यविदे वेदान्तभास्कराय नमः॥

यज्ञदानतपस्स्वेव श्रद्धा सर्वत्र साधनम्।
श्रद्धया फलमाप्नोति कर्ता **वेदान्तभास्करः**॥

यज्ञे दाने तपसि च सर्वत्रापि श्रद्धा एव प्रधानम्। श्रद्धया एव हि फलं प्राप्नोति कर्ता॥

फेब्रुवरी १२

४३. श्रद्धयैव फलप्राप्तिः

श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्॥

तैत्तिरीयोपनिषत् १-११

श्रद्धया देयम्, अश्रद्धया न देयम्; सम्पदानुगुण्येन देयम्, ह्रिया देयम्, भयेन देयम्। ज्ञात्वा एव देयम्॥

वेदेषु यज्ञदानतपांसि विहितानि सन्ति। गृहस्थैः अवश्यम् एतानि अनुष्ठेयान्येव। प्रकृतमन्त्रे दानस्य विचारः क्रियते। श्रद्धया दानं कर्तव्यम्। गुरुशास्त्रवाक्येषु विश्वासः श्रद्धा। शास्त्रीयेषु कर्मसु श्रद्धा एव प्रधानम्। अतः श्रद्धयैव हि शास्त्रीयाणि कर्माणि कर्तव्यानि॥

दानम् अश्रद्धया कृतं चेत् भस्मनि हुतं हविरिव व्यर्थं भवति। अतः अश्रद्धया दान न कर्तव्यम्। सम्पदम् अनुसृत्य देयम्। श्रीमता अधिकमेव देयम्। दरिद्रेण तु स्वसामर्थ्यानुगुण्येन दातव्यम्। सङ्कोचस्वभावेन भयभक्त्या देयम्। दानेन सर्वपापक्षयः, दानेन सर्वकामावाप्तिः। अश्रद्धया हुतं दत्तं तपस्तप्तं चेत् सर्वं तत् निष्फलमेव भवति। अतः श्रद्धयैव दानं कर्तव्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमहंसवरिष्ठाय वेदान्तभास्कराय नमः॥

'अहं ब्रह्मास्मि'निष्ठाश्च परब्रह्मपरायणाः।
'परहंसा' इति प्रोक्ताः मुक्ता **वेदान्तभास्करः**॥

ये 'अहं ब्रह्मास्मि'निष्ठाः परब्रह्मपरायणाः जीवन्मुक्ताश्च ते एव **परमहंसाः** इति प्रोक्ताः॥

फेब्रुवरी १३

४४. इमे एव खलु परमहंसाः

परमहंसा नाम संवर्तक आरुणि श्वेतकेतु दुर्वास ऋभु निदाघ जडभरत दत्तात्रेय रैवतक प्रभृतयः।

जाबालोपनिषत् ६-१

संवर्तक, आरुणि, श्वेतकेतु, दुर्वास, ऋभु, निदाघ, जडभरत, दत्तात्रेय, रैवतकादयः परमहंसाः।

कुटीचकाः, बहूदकाः, हंसाः, परमहंसाश्च इति चतुर्धा विभज्यन्ते संन्यासिनः। चत्वारोऽप्येते संन्यासिन एव। कुटीचकाः, बहूदकाः, हंसाश्च इति एते त्रयः संन्यासिनः साधनपरायणाः वेदान्तचिन्तननिष्ठाश्च भवन्ति। परमहंसाः पुनः ब्रह्मज्ञानिपुङ्गवाः। एते गुणातीताः विद्वत्संन्यासिनः, एते एव ब्रह्मनिष्ठाश्च॥

तत्त्वमसि, अहं ब्रह्मास्मि इत्यादिमहावाक्यानाम् अर्थम् स्वानुभवे दृष्टवन्तः एते धीराः। इमे परमहंसाः कृतकृत्याः ब्रह्मनिष्ठाश्च। एतेषु केषाञ्चित् नामानि अत्र स्मर्यन्ते। संवर्तकः, आरुणिः, श्वेतकेतुः, दुर्वासाः, ऋभुः, निदाघः, जडभरतः, दत्तात्रेयः, रैवतकः इत्यादयः परमहंसपुङ्गवत्वेन सुप्रसिद्धाः। एते हि अवधूतपुङ्गवाश्च भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कृत्स्नब्रह्मविदे वेदान्तभास्कराय नमः॥

द्रष्टारं दृष्टिसंयुक्तं ये पश्यन्ति निरामयम्।
परिपूर्णं न जानन्ति मन्दा **वेदान्तभास्करः**॥

ये तु दोषरहित परिपूर्णम् आत्मानम् सम्यक् अविज्ञाय नेत्रोपाधिक द्रष्टारमेव आत्मत्वेन जानन्ति ते मूढाः॥

फेब्रुवरी १४

४५. एते 'अकृत्स्नविद' एव

तं न पश्यन्ति, अकृत्स्नो हि सः; प्राणन्नेव प्राणो नाम भवति, वदन् वाक्, पश्यन् चक्षुः, शृण्वन् श्रोत्रं, मन्वानो मनः, तान्यस्य एतानि कर्मनामानि भवन्ति।

बृहदारण्यकोपनिषत् १-४-७

ते परिपूर्णम् आत्मानं न पश्यन्ति। तैः दृश्यमानोऽयमात्मा अपरिपूर्ण एव। यदा प्राणिति तदा प्राणो भवति। यदा वदति तदा वाक् भवति। यदा पश्यति तदा चक्षुर्भवति। यदा शृणोति तदा श्रोत्र भवति। यदा मनुते तदा मनो भवति। एवम् एतानि नामानि तत्तत्क्रियाजातानि कर्मनामानि भवन्ति॥

आत्मनः विद्यमानं नैजं स्वरूपम् अन्यत्, अज्ञानिभिः ज्ञायमान स्वरूपमेव अन्यत्। तद्यथा, आत्मा परिपूर्णः, अज्ञानिनस्तु तम् आत्मान प्राणः इति वा, वाक् इति वा, चक्षुः, श्रोत्रम्, मनः इति वा पश्यन्ति। इमानि सर्वाण्यपि नामानि तत्तत्क्रियाजातान्येव न तु आत्मनः स्वरूपम्। ये तु आत्मनः इयदेव आत्मस्वरूपम् इति मन्यन्ते, ते अकृत्स्नविदः एव। न ते पूर्णज्ञानिनः। एतानि सर्वाणि औपाधिकनामानि अविद्याकल्पितान्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आवसथत्रयतत्त्वविदे वेदान्तभास्कराय नमः॥

जाग्रत्स्वप्नसुषुप्ताख्याः तिस्रोऽवस्थाः परात्मनि।
सर्वाः स्वप्नसमा एव ब्रूते **वेदान्तभास्करः**॥

आत्मनि जाग्रत् स्वप्नः सुषुप्तिः इति तिस्रः अवस्थाः दृश्यन्ते। एताः तिस्रोऽपि अवस्थाः परमार्थतः स्वप्न एव॥

फेब्रुवरी १५

४६. आत्मनः त्रीणि वासस्थानानि

तस्य त्रय आवसथाः। त्रयः स्वप्नाः। ऐतरेयोपनिषत् १-३-१२

आत्मनः त्रीणि वासस्थानानि, त्रयः स्वप्नाः।

आत्मनः त्रयः वासालयाः। परिपूर्णस्य आत्मनः परमार्थतः नैकमपि वासगृहम् विद्यते। आकाशस्य वासस्थानमिति वर्तते किम्? देशकालवस्तुभिः परिच्छिन्नानां पदार्थानां हि वासस्थानं सम्भवति। तर्हि आत्मनः त्रीणि वासस्थानानि इत्युक्ते कोऽर्थः। अत्र आत्मा नाम देहाभिमानी जीवः। अस्य जीवस्य जाग्रदाद्याः तिस्रः अवस्थाः वासस्थानानि इव भवन्ति॥

आत्मनः तानि त्रीणि वासस्थानानि कानि? इति चेत्, जाग्रदवस्थायाम् आत्मनः दक्षिणं चक्षुरेव वासस्थानम् , स्वप्ने मनः वासस्थानम्, सुषुप्तौ तु हृदयम्। सर्वोऽपि जागरितव्यवहारः इन्द्रियाधीन एव, इन्द्रियाभावे व्यवहाराभावात्। स्वप्ने सर्वे व्यवहाराः मनोऽधीनाः। स्वप्ने जागरितशरीरं वा इन्द्रियाणि वा न विद्यन्ते। तथापि मनस्येव सर्वे व्यवहाराः भवन्ति। निद्रावस्थायां तु हृदयाकाशे आत्मनः सुप्तत्वात् तदेव हृदयं वासस्थानम्। परमार्थ-दृष्ट्या एताः तिस्रोऽप्यवस्थाः स्वप्न एव, अविद्याकृतत्वात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमार्थध्यानविदे वेदान्तभास्कराय नमः॥

ध्यानेन लभते ब्रह्म मुक्तिर्ध्यानेन नान्यथा।
आत्मज्ञानं परं ध्यानं नूनं **वेदान्तभास्करः**॥

मुमुक्षुः ध्यानेन ब्रह्म लभते। ध्यानेन मुक्तिर्लभ्यते। आत्मज्ञानमेव हि तात्त्विकं परं ध्यानम्॥

फेब्रुवरी १६

४७. ध्यानस्य फलमिदम्

ध्यात्वा मुनिर्गच्छति भूतयोनिम् समस्तसाक्षिं तमसः परस्तात्।

कैवल्योपनिषत् १-७

भूतकारणं विश्वसाक्षिणम् आत्मानं ध्यात्वा, विजानन् मुनिः, अविद्यातमसः परस्तात् मोक्षम् आप्नोति॥

आत्मानं ध्यात्वा मुक्तिर्लभ्यते इति उपदिशति अयं मन्त्रः। अत्र ध्यानं नाम ज्ञानमेव। आत्मनः निजस्वरूपानुसन्धानमेव अत्र ध्यानशब्दार्थः। चित्तशुद्धिम् लब्ध्वा साधकः सद्गुरूणां मार्गदर्शनानुसारेण आत्मनः स्वरूपम् चिन्तयेत्॥

कोऽसावात्मा? न हि आत्मा नाम स्वस्मात् भिन्नः कश्चित् देवताविशेषः। न च एकः पुरुषः। किं तु आत्मा नाम भूतयोनिः। भूतानां योनिभूतं परमात्मानमेव अत्र साधकः चिन्तयेत्। अयमेव आत्मा समस्तस्यापि विश्वस्य साक्षिभूतः। स्वस्मिन्नेव स्थित्वा यः सकलानपि व्यापारान् निर्विकारतया अवभासयति, स एव अहमिति यदा ज्ञायते तदेव ध्यानम्। तस्य फलमेव मुक्तिः। अयमात्मा तमसः परस्तात्। अविद्यातमः आत्मनि नास्ति। आत्मा चिन्मात्रस्वरूपः अहम् इति विजानीयात्। ध्यानफलमेतत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'नेमि'रहस्यविदे वेदान्तभास्कराय नमः॥

एकनेमि परं ब्रह्म जगदाधारमव्ययम्।
ब्रह्माभिन्नं जगत् सर्वं सत्यं **वेदान्तभास्करः**॥

अस्य समस्तस्यापि जगतः नेमिरिव आधारभूतं नाशरहितं ब्रह्मैव सत्यं, इदं जगत् सर्वं परमेव ब्रह्म॥

फेब्रुवरी १७

४८. रहस्यमन्त्रोऽयम्

तमेकनेमिं त्रिवृतं षोडशान्तं
शतार्धारं विंशतिप्रत्यराभिः।
अष्टकैः षड्भिर्विश्वरूपैकपाशं
त्रिमार्गभेदं द्विनिमित्तैकमोहम्॥ श्वेताश्वतरोपनिषत् १-४

एकनेमिं त्रिवृतं षोडशान्तं, पञ्चाशदरं विंशतिप्रत्यरं षड्भिः अष्टकैः युक्तं विश्वरूपैकपाशं त्रिमार्गं द्वयोर्निमित्तम् एकमोहम् परमात्मानम् चिन्तयेत्॥

समस्तस्याप्यस्य जगतः ब्रह्मैकमेव कारणम्। इदं जगत् सत्त्वरजस्तमोगुणैः अन्वितम्। पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च इति षोडशवस्तुभिः संयुक्तम्। पञ्च विपर्ययाः, अष्टाविंशतिः अशक्तयः, नव तुष्टयः, अष्टौ सिद्धयः— एवं पञ्चाशत्गुणैः सम्पूर्णम्। दश इन्द्रियाणि, दश विषयाश्च। प्रकृतिः, धातुः, ऐश्वर्यं, भावः, देवः, षट् गुणाष्टकम्, अस्मिन् जगति सन्ति। धर्मः, अधर्मः, अज्ञानमिति त्रयो मार्गाः सन्ति। पुण्यपापकर्मणोः निमित्तं चेदं जगत्। इदृशस्य जगतः परं ब्रह्मैव कारणम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परतत्त्वस्वरूपविदे वेदान्तभास्कराय नमः॥

यस्मादन्यत् परं नास्ति पतिरन्यो न विद्यते।
स एव परमात्मायं ज्ञेयो **वेदान्तभास्करः**॥

यस्मात् परं वस्तु नास्ति, यस्य अन्यः पतिरपि नास्ति, तमेव परमात्मानं विद्यात्॥

फेब्रुवरी १८

४९. परमात्मनः लक्षणमिदम्

न तस्य कश्चित् पतिरस्ति लोके, न चेशिता, नैव च तस्य लिङ्गम्। श्वेताश्वतरोपनिषत् ६-९

तस्य परमात्मनः अन्यः पतिः नास्ति, तस्य अन्यः शासिता नास्ति, तस्य लिङ्गानि न सन्ति॥

तस्य परमात्मनः अन्यः पतिः नास्ति, स एव सर्वस्यापि पतिः, स एव ईशः, स एव सर्वस्यापि प्रभुः। तस्मात् अन्यः ईशिता नास्ति, यस्य वशे परमात्मा वर्तेत। परमार्थतः अस्य विश्वस्य स एव एकः प्रभुः। नैवम्, किन्तु स एव एकः परमार्थः॥

इन्द्रचन्द्रादयो देवाधिदेवाः अपि अस्य आत्मनः अधीनभूता एव जीवन्ति। आत्मा तु न कस्यापि देवस्य अधीनभूतः। न चास्य आत्मनः बाह्यानि लक्षणानि विद्यन्ते। आत्मनः पाणिपादाः, इन्द्रियमनांसि, पत्नीपुत्राः, शस्त्रास्त्राणि, वाहनानि च न विद्यन्ते। अयमेव आत्मा अस्माकं निजस्वरूपम्। अयमेव हि परमात्मा नाम। वेदान्तेषु प्रतिपादितश्च अयमेव। ब्रह्मविष्णुमहेशाः त्रिमूर्तयः सोपाधिकाः देवाः। एतेषामपि प्रभुः परमात्मा एव वेदान्तेषु प्रतिपादितं परं ब्रह्म। एतस्यैव हि ज्ञानेन मुक्तिः लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं धनाकाङ्क्षारहिताय वेदान्तभास्कराय नमः॥

सर्वं ब्रह्मण एवेदं सर्वं ब्रह्ममयं जगत्।
जहि शत्रुं धनाकाङ्क्षाम् मिथ्यां **वेदान्तभास्करः**॥

परमात्मन एवेदं सर्वम्। ब्रह्मस्वरूपमेवेदं सर्वम्। तस्मात् हे मानव, अनृतविषयां धनाशां त्वं त्यज॥

फेब्रुवरी १९

५०. दुःखस्य अवकाशः कुत्र?

मा गृधः कस्यस्विद्धनम्।

ईशावास्योपनिषत् १

परकीयां सम्पदं मा गृधः।

मानवस्य सर्वेषां सद्गुणानां सम्पूर्णतया नाशकारी प्रधानो दुर्गुणो नाम लोभः, योऽयं मानवेषु वसति। अनेन लोभाख्येन एकेन अल्पेन दुर्गुणेन दोषेण मानवः दानवः संवृत्तोऽस्ति॥

किं नाम लोभः? अन्येषां धनं प्रति इच्छा। धनवत्त्वेऽपि अतृप्तता, समृद्धधनित्वेऽपि सत्पात्रे विनियोगाकरणम्, सम्पत्-भूयिष्ठत्वेऽपि पुनः पुनः धनलिप्सा, अत्याशा—इत्येतत् सर्वमपि लोभस्य रूपान्तरम्। न हि तावता सुलभेन साधकानां लोभस्य जयः सम्भवति। प्रयत्ने कृते न शक्यते इत्यपि न॥

'अन्यस्य धनं मा गृधः' इति श्रुतिमाता अस्मान् उपदिशति। अस्मदसम्बद्धम् अनस्मदीयं परकीयं यत्किञ्चित् वस्तु भवतु, तत् लोष्टसमम् इति जानीयात्। तृप्त्या आनन्दः अनुभोक्तव्यः इति अयं मन्त्रः बोधयति। परमार्थतस्तु अस्मासु विद्यमानमपि अस्मदीयं धनं कस्य ? भगवत एव। एवंव्यवहारं कुर्वतः दुःखं नैव विद्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रत्यगात्मस्वरूपविदे वेदान्तभास्कराय नमः॥

कर्तृत्वेन विजानाति कर्मत्वेन च बालिशः।
आत्मानं नैव जानाति सम्यग् **वेदान्तभास्करः**॥

क्रियायाः कर्तृत्वेन वा कर्मत्वेन वा आत्मानं यो जानाति बालिशः एव सः। यतः सः आत्मानं न सम्यग् जानाति॥

फेब्रुवरी २०

५१. उभावप्येतौ अज्ञौ एव

उभौ तौ न विजानीतो नायं हन्ति न हन्यते।

काठकोपनिषत् १-२-१९

यौ आत्मानं कर्तृत्वेन कर्मत्वेन वा जानीतः तावुभावपि आत्मानं सम्यक् न विदतुः। यस्मात् आत्मा न हन्ति, न च हन्यते॥

सर्वस्या अपि क्रियायाः एकेन कर्त्रा भाव्यम्, अपरेण कर्मणा च भाव्यम्। यथा, दर्शनक्रियायाः एकः द्रष्टा भवेत्, तथा एकं कर्म च भवेत्। 'रामो दशरथं पश्यति' इत्यत्र दर्शनक्रियायाः रामः कर्ता, दशरथः कर्म च भवति। एवमेव हननक्रियायाः एकेन कर्त्रा भाव्यम्, स एव हि 'हन्ता' इत्युच्यते; अन्येन च कर्मणा भाव्यम्, स एव हि 'हन्तव्यः' इत्युच्यते॥

लोको हि 'अहं हन्मि' इति, 'अहं हन्ये' इति च आत्मानं मन्यते। 'सः मां हन्ति', 'अहं तेन हतो भवामि' इति सर्वोऽपि जनः जानाति। एषा हि अविद्या एव। यतो हि आत्मा हन्ता न भवति, न च हन्तव्यो भवति। हन्ता देहः हन्तव्यश्च देह एव खलु। तस्मात् आत्मानं क्रियाकर्तृत्वेन वा क्रियाकर्मत्वेन वा यौ जानीतः तौ उभौ अपि अज्ञौ एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं तपोमग्नाय वेदान्तभास्कराय नमः॥

तपसा ब्रह्मचर्येण श्रद्धया गुरुसेवया।
लभते ब्रह्मविज्ञानं धीरो **वेदान्तभास्करः**॥

धीरः ब्रह्मतत्त्वजिज्ञासुः साधकः तपसा ब्रह्मचर्येण श्रद्धया सद्गुरुसेवया च आत्मज्ञान प्राप्नोति॥

फेब्रुवरी २१

५२. ब्रह्मचर्येण ज्ञानप्राप्तिः

तान् ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ।

प्रश्नोपनिषत् १-२

ब्रह्मविद्याचार्यः पिप्पलादमहर्षिः तान् सुकेशाभारद्वाजादीन् जिज्ञासून् प्रति ''यूयं तपसा ब्रह्मचर्येण श्रद्धया च पुनः संवत्सरम् एकम् अस्मासु सवसत'' इत्युक्तवान्।

ब्रह्मविद्यां सम्पादयितुम् आत्मनः सकाशम् आगतेभ्यः सर्वेभ्यः शिष्येभ्यः अविचार्य उपदेशं न कुर्यादाचार्यः। प्रप्रथमतः ते शिष्याः सम्यक् परीक्ष्याः, अनन्तरमेव तेभ्यः शिष्येभ्यः ब्रह्मतत्त्वम् उपदिशेत् आचार्यः। यतो हि जिज्ञासूनां चित्तशुद्ध्यभावे उपदिष्टापि ब्रह्मविद्या न अनुभवम् आरोहति॥

ब्रह्मविद्यापेक्षिणः साधकाः तपः ब्रह्मचर्यं च अनुतिष्ठेयुः। **तपो** नाम इन्द्रियनिग्रहः। सत्यवचनम्, अहिंसा, जपादयश्च। **ब्रह्मचर्यं** हि प्रधानं साधनम्। सद्गुरुसेवापरायणः सन् सद्गुरुसेवया सद्गुरून् **सन्तोष्य** अनन्तरं तेभ्यः ब्रह्मविद्योपदेशश्रवणं कुर्यात् साधकः। सद्गुरुभक्त्या तपसा च विना न ब्रह्मज्ञानं लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परब्रह्मस्वरूपाय वेदान्तभास्कराय नमः॥

यः कश्चित् ब्रह्म जानीयात् आत्मत्वेन परं पुमान्।
ब्रह्मैव स भवत्येव नूनं **वेदान्तभास्करः**॥

यः परं ब्रह्म आत्मत्वेन जानाति सः परमेव ब्रह्म भवति।

फेब्रुवरी २२

५३. ब्रह्मवित् ब्रह्मैव भवति

स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति।

मुण्डकोपनिषत् ३-२-९

यो वा को वा भवतु, तद् ब्रह्म आत्मत्वेन जानाति चेत्, सः ब्रह्मैव भवति॥

इमं सन्देशं धैर्येण अत्यन्तसुन्दरतया, साक्षात् सरळतया च मुण्डकोपनिषत् उपदिशति। कथमिति? ब्रह्मविदः ब्रह्मप्राप्तिरेव फलम् इति, अस्यैव मोक्षः इत्यपि नाम। सकलवेदान्तानां सकलशास्त्राणां च इदमेव तात्पर्यम्॥

अनात्मवस्तुविदः तत्तद्वस्तुत्वरूपं फलं न हि भवति। यस्मात् तस्य नामैव अनात्मवस्तु इति। न हि तानि अनात्मवस्तूनि अस्माकं स्वरूपं भवेत्। परं ब्रह्म तु ब्रह्मविदः स्वरूपमेव। अतः ब्रह्मवित् ब्रह्मैव भवति॥

परं ब्रह्म अहमेवेति ज्ञानमेव हि आत्मज्ञानं नाम। सर्वेणापि सुसम्पाद्यमिदम् आत्मज्ञानम्। आत्मज्ञानं तथा मोक्षः। उभयमपि सर्वप्राणिनाम् आजन्मसिद्धा सम्पत्। येन केनापि मधुरे भक्ष्ये भक्षिते सति यथा माधुर्यम्, अग्निं स्पृष्टवतां सर्वेषां यथा दाहः तथैव ब्रह्मणि विज्ञाते सति ते सर्वेऽपि मुक्ता भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ज्ञानमहत्त्वविदे वेदान्तभास्कराय नमः॥

ज्ञानादेव परा शान्तिः निवृत्तिस्तमसस्तथा।
सत्यप्राप्तिः सुखप्राप्तिः इति **वेदान्तभास्करः**॥

आत्मज्ञानादेव परा शान्तिः, अज्ञानस्य निवृत्तिः, सत्यप्राप्तिः, अमृतत्वप्राप्तिश्च भवति॥

फेब्रुवरी २३

५४. परमात्मनि तिस्रः प्रार्थनाः

असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय। बृहदारण्यकोपनिषत् १-३-२८

भोः परमात्मन्, असतः सकाशात् मां सत्यं गमय, तमसः मां प्रकाशं गमय, मृत्योः सकाशात् माम् अमृतं गमय।

पवित्रो ह्ययं मन्त्रः। सार्वत्रिको मन्त्रोऽयम्। विश्वशान्ति-मन्त्रोऽयम्। सार्वजनीनशान्तिमन्त्रोऽयम्। सर्वैरपि मानवैः विश्व-शान्त्यै पठनीयोऽयं मन्त्रः। ईश्वरे प्रार्थनीयोऽयं मन्त्रः॥

भोः परमात्मन्, अस्मान् असत्यात् सत्यं प्रति गमय। इदं सर्वं हि जगत् मिथ्यारूपमेव। परमात्मा एक एव हि सत्यम्। अस्मान् अस्मात् आभासरूपात् जगतः सत्यं परमात्मानं प्रति गमय इत्यर्थः। सर्वोऽप्ययं प्रापञ्चिको व्यवहारः अन्धकारमयः। अहङ्कार-ममकारैः पूर्णोऽयं व्यवहारः सर्वोऽपि अन्धकार एव। अस्मात् अस्मान् परमार्थस्वरूपं प्रकाशं प्रति नय इत्यर्थः। तथा सर्वमिदं शरीरं मृत्युरेव, अस्मात् शरीरबन्धनात् अस्मान् अमृतत्वं प्रति गमय इत्यर्थः। एताः तिस्रः मुमुक्षुभिः भगवति क्रियमाणाः प्रार्थनाः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सत्यवचननिष्ठाय वेदान्तभास्कराय नमः॥

सत्यमेव हि वक्तव्यं सत्यान्नास्ति परं तपः।
सत्याच्च लभ्यते ज्ञानं सत्यं **वेदान्तभास्करः**॥

सत्यमेव वदेत्, सत्यात् परं तपो नास्ति, सत्यात् आत्मज्ञान ब्रह्म च प्राप्नोति मानवः।

फेब्रुवरी २४

५५. सत्यस्य महिमा!

सत्यमेव जयते नानृतम्
सत्येन पन्था विततो देवयानः।
येनाक्रमन्ति ऋषयो ह्याप्तकामाः
यत्र तत् सत्यस्य परमं निधानम्॥

मुण्डकोपनिषत् ३-१-६

सत्यमेव जयति, न तु अनृतम्। सत्येनैव देवयानमार्गः विततः। आप्तकामाः ऋषयः अनेनैव सत्यमार्गेण अमृतत्वं गच्छन्ति। अस्मिन्नेव सत्यमार्गे परमार्थतत्त्वं निहितमस्ति॥

उपनिषत्सु सत्यस्य महत्त्वं बहुधा स्तूयते। सत्यमेव तपः, सत्यमेव ऋषिमुनीनां सम्पत्, संन्यासिनां धनं नाम सत्यमेव। अध्यात्मसाधकानां तु सत्यात् परं साधन नास्त्येव॥

अस्यां मुण्डकोपनिषदि परं ब्रह्मापि सत्यशब्देनैव व्यपदिश्यते। सत्यतत्त्वस्य अवबोधे सत्यवचनमेव साधनमपि भवति। सत्यस्यैव जयः, सत्येनैव प्रेयः, सत्येनैव श्रेयः, सत्येनैव च मुक्तिः। आप्तकामानां ज्ञानिपुङ्गवानां महर्षीणां सम्पन्नाम सत्यमेव। सत्यवतामेव हि आत्मज्ञानं मुक्तिश्च लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुहितबोधकाय वेदान्तभास्कराय नमः॥

आत्मज्ञानस्य सम्प्राप्त्यै तपः कर्मादि साधनम्।
मुमुक्षुणा सुसम्पाद्यम् इति **वेदान्तभास्करः**॥

आत्मज्ञानं प्राप्तुं तपः नित्यकर्मानुष्ठानानि च साधनानि भवन्ति। अतः मुमुक्षुणा इमानि अनुष्ठेयानि।

फेब्रुवरी २५

५६. ज्ञानप्राप्त्यै इमानि साधनानि!

तस्यै तपो दमः कर्मेति प्रतिष्ठा। वेदाः सर्वाङ्गानि सत्यम् आयतनम्॥ केनोपनिषत् ४-८

तां परब्रह्मविद्यां प्राप्तुं तपः, दमः, कर्माणि, वेदाध्ययनं, षडङ्गानि, सत्यवचनं च साधनानि भवन्ति॥

ब्रह्मविद्ययैव कृतकृत्यता, ब्रह्मविद्ययैव मोक्षप्राप्तिः, ब्रह्मविद्या सर्वविद्याप्रतिष्ठा, ब्रह्मविद्या सर्वैः मानवैः सम्पाद्या एव इत्यादिरूपेण हि उपनिषत्सु ब्रह्मविद्या संस्तूयते॥

तपसा खलु एषा ब्रह्मविद्या सुसम्पाद्या भवति। **तपो** नाम देवद्विजगुरुपूजनम्; शौचम्, आर्जवं च तपः। **दमो** नाम बाह्य-विषयेभ्यः इन्द्रियाणाम् उपशमः। भगवदर्पणबुद्ध्या चित्तशुद्ध्यर्थं क्रियमाणमेव **कर्म**। अधिकारिभिः द्विजैः क्रियमाणं **वेदाध्ययन**-मपि आत्मज्ञानप्राप्त्यै साधनं भवति। शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पश्च इति षडङ्गानामपि अध्ययनं कर्तव्यमेव। सर्वैरपि मुमुक्षुभिः साधकैः आत्मज्ञानार्थम् अनुष्ठेयं सुलभतमं साधनं नाम **सत्यवचनम्**। उपरि उक्तानि सर्वाणि साधनानि ब्रह्मविद्याप्राप्त्यर्थानि भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमर्षये वेदान्तभास्कराय नमः॥

ब्रह्मविद्यासम्प्रदायकर्तृभ्यो गौरवात् सदा।
भूयो नमांसि भूयांसि भूयो **वेदान्तभास्करः**॥

ब्रह्मविद्यासम्प्रदायप्रवर्तकेभ्यः आचार्येभ्यः भक्तिगौरवपुरस्सरं पुनः पुनः नमस्काराः कर्तव्याः तत्त्वजिज्ञासुसाधकैः।

फेब्रुवरी २६

५७. इयमेव हि गुरुदक्षिणा नाम!

नमः परमऋषिभ्यो नमः परमऋषिभ्यः।

मुण्डकोपनिषत् ३-२-११

परममहर्षिभ्यः पुनः पुनः नमांसि भूयांसि।

अस्माकम् भारतीय सनातन हिंदू संस्कृतौ **नमस्कारस्य** विशेषमहत्त्वमस्ति। नमस्कारो नाम भक्तिपूर्विका कृतज्ञता। गौरवपूर्विका प्रीतिपूर्विका गुरुदक्षिणा हि **नमस्कारः**। इतरेभ्यः उपकारे स्वीकृते कृतज्ञतापूर्वकं क्रियमाणः प्रत्युपकारो हि नमस्कारः। नमस्कारो न चमत्कारपुरस्सरः, किं तु श्रद्धागौरव-भक्तिकृतज्ञतासहितो भवेत्॥

लौकिकविद्याविषये एव एवं स्थिते, किमु वक्तव्यं ब्रह्मविद्याचार्याणां महर्षीणां विषये? भक्तिपूर्वकं नमस्कारार्हा इमे। ब्रह्मविद्यासम्प्रदायप्रवर्तकाः एते सर्वे ब्रह्मर्षय एव, महर्षय एव। कृतार्थैः शिष्यैः सद्गुरुभ्यः देया गुरुदक्षिणा नाम भक्तिपूर्वकः नमस्कार एव। ये गुरवः अस्मान् अस्मात् जन्ममरणरूपात् संसार-सागरात् आत्मविद्योपदेशेन तारितवन्तः तेभ्यः ब्रह्मविद्याचार्येभ्यः भूयो भूयो साष्टाङ्गनमांसि भूयांसि भवन्तु॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पञ्चकोशातीताय वेदान्तभास्कराय नमः॥

पञ्चापि कोशान् सङ्क्रम्य अविद्याकल्पितान् परान्।
स्वात्मारामो भवत्येव ज्ञानी **वेदान्तभास्करः**॥

अविद्याकल्पितान् पञ्चापि अनात्मभूतान् कोशान् अतीत्य आत्मज्ञानी स्वात्मारामो भवति।

फेब्रुवरी २७

५८. पञ्चकोशातीतो हि ब्रह्मज्ञानी

स य एवंवित्। अस्मात् लोकात् प्रेत्य। एतमन्नमयमात्मान-मुपसङ्क्रामति। एतं प्राणमयम् आत्मानमुपसङ्क्रामति। एतं मनोमयम् आत्मानमुपसङ्क्रामति। एतं विज्ञानमयमात्मानम् उपसङ्क्रामति। एतम् आनन्दमयमात्मानम् उपसङ्क्रामति॥

तैत्तिरीयोपनिषत् २-८-५

आत्मवित् ज्ञानी अस्मात् लोकात् प्रेत्य अन्नमयम् आत्मानम् उपसङ्क्रामति, अनन्तरं प्राणमयं, मनोमयं, विज्ञानमयम् आनन्दमय च आत्मानम् उपसङ्क्रामति।

'ब्रह्मवित् मोक्षम् आप्नोति' इति हि तैत्तिरीयोपनिषत् प्रारम्भे उपदिशति। यः ब्रह्म आत्मत्वेन जानीयात् सः ब्रह्मैव विन्दते इति प्रारभ्य अत्र उपनिषदि अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयश्च इति अनात्मभूताः पञ्चकोशाः उपदिष्टाः। पञ्चाप्येतान् कोशान् आत्मज्ञानी अतीत्य पञ्चकोशास्पदे पञ्चकोशविलक्षणे आत्मस्वरूपे तिष्ठति। यतः एते कोशा अनात्मभूताः। आत्मज्ञान-बलेन पञ्चकोशातीतः आत्मवित् ब्रह्मण्येव अवतिष्ठते। अयं हि जीवन्मुक्तः, कृतकृत्योऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं "द्वैतमिव" तत्त्वविदे वेदान्तभास्कराय नमः॥

आत्मानात्माविवेकात्तु द्वैतं यस्य हि विद्यते।
सत्यं पश्यति वै विश्वं मूढो **वेदान्तभास्करः**॥

यो हि मूढः आत्मानात्मविवेकाभावात् द्वैतमिदं सत्यमिव पश्यति, स विश्वमिदं सत्यमेव पश्यति।

फेब्रुवरी २८

५९. द्वयोरपि कियदन्तरम्!

यत्र हि द्वैतमिव भवति तदितरः इतरं पश्यति।

बृहदारण्यकोपनिषत् २-४-१४

यदा अज्ञः द्वैतमिव पश्यति, तदा सः आत्मनः भिन्नं सत्य वस्तु पश्यति।

द्विधा इतं द्वैतम्। प्रमातृप्रमाणप्रमेयरूपेण दृश्यमानत्वमेव हि द्वैतं नाम। द्वैतस्यैव हि "त्रिपुटिज्ञानम्" इति नामान्तरम्। इदं त्रिपुटिज्ञानं तु अज्ञानविलासमात्रमेव, न तु पारमार्थिकम्। आत्मज्ञानरहितानाम् अविवेकिनाम् इदं त्रिपुटिज्ञानमेव समग्ज्ञान-मिव अवभासते॥

त्रिपुटिज्ञानमेव सत्यत्वेन स्वीकृत्य अज्ञः नेत्रेण प्रमाणेन रूपं प्रमेय द्रष्टा सन्, प्रमाता सन् पश्यति। अज्ञदृष्ट्या द्रष्टृदृश्यदर्शनानि आत्मनः भिन्नानि सत्यान्येव भवन्ति। तथा तस्य प्रमाणानि प्रमेयानि प्रमातारश्च सत्या इव अवभासन्ते। द्वैतवस्त्वनुवादसमयेऽपि श्रुतिः 'इव'शब्दप्रयोगं करोति इति न विस्मर्तव्यम्। आत्मज्ञानोदय-समकालमेव सर्वोऽप्ययं भेदः बाधितो भवति, आत्मैव सम्पद्यते। ज्ञानाज्ञानयोः भेदः ज्ञातो वा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वात्मविद्याफलविदे वेदान्तभास्कराय नमः॥

स्वात्मवित् वामदेवोऽयं कामकर्मादिवर्जितः।
सर्वात्मा ह्यमृतो मुक्तः नित्यं **वेदान्तभास्करः**॥

आत्मतत्त्वं विज्ञाय वामदेवः कामकर्मरहितः सर्वात्मा अमृतः मुक्तश्च अभवत्।

फेब्रुवरी २९

६०. ज्ञानेन अमृतत्वप्राप्तिः

स एवं विद्वान् अस्मात् शरीरभेदात् ऊर्ध्वः उत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान् कामान् आप्त्वा अमृतः समभवत् समभवत्॥ ऐतरेयोपनिषत् २-१-६

स वामदेवमहर्षिः एवं ज्ञात्वा शरीराभिमानात् ऊर्ध्वम् उत्क्रम्य तत्र स्वर्गलोके सर्वान् कामान् लब्ध्वा अमृतः समभवत्।

वेदेषु उपनिषत्सु हि वामदेवमहर्षेः परामर्शः तत्र तत्र दृश्यते। सः मातृगर्भस्थः सन् एव सर्वात्मभावरूपम् आत्मज्ञानं लब्ध्वा कृतार्थः समभवत्॥

आत्मज्ञानस्य फलं नाम अमृतत्वप्राप्तिः। आत्मज्ञानेन सर्वकामावाप्तिरूपं फलं भवति, आत्मकामः आप्तकामः अकामो भवति। आत्मज्ञानेन अमृतो भवति, मुक्तो भवति, आप्तसर्वकामश्च भवति। आत्मज्ञानेन सर्वात्मभावः प्राप्यते। 'आत्मैव सर्वम्' इति निश्चिते ज्ञाने उदिते सति पुनः प्राप्यतया कामाः अवशिष्यन्ते किम्? नैव। तस्मात् वामदेववत् इदानीमपि आत्मज्ञानात् अमृतत्वं प्राप्य वयमपि कृतार्था भवेम। आत्मज्ञानेन ब्रह्मानन्दं लब्ध्वा सर्वेऽपि वयम् मुक्ता भवेम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'ब्राह्मण्य'रहस्यविदे वेदान्तभास्कराय नमः॥

अक्षरं परमं ब्रह्म यो विदित्वा नरः सुधीः।
ब्राह्मणः प्रैति धीरोऽसौ सत्यं **वेदान्तभास्करः**॥

यः विवेकी अक्षरं परमं ब्रह्म विदित्वा प्रैति स एव ब्राह्मणः।

मार्च् १

६१. अयमेव हि 'ब्राह्मणो' नाम

यो वा एतदक्षरं गार्गि विदित्वा अस्मात् लोकात् प्रैति स ब्राह्मणः। बृहदारण्यकोपनिषत् ३-८-१०

हे गार्गि, यः एतदक्षरं विदित्वा अस्मात् लोकात् प्रैति स एव अन्वर्थब्राह्मणः।

वेदान्तेषु ब्राह्मणो नाम ब्रह्मज्ञानी एव। **ब्रह्म जानाति इति ब्राह्मणः।** पूर्वजन्मसु कृताभ्यां पुण्यपापाभ्यां हि इदानीं मानवत्वेन जातोऽस्ति। मनोः वंशे जातो हि मानवः। मानवस्यैव मनुष्यः, नरः इति नामान्तरम्। मानवाय हि भगवान् बुद्धिसामर्थ्यं विचारयोग्यतां च अनुगृहीतवान् अस्ति। जातस्य मानवस्य मरणं निश्चितमेव। अतः जातोऽयं मानवः नाशरहितं निरुपाधिकम् अजम् अक्षरं विदित्वा अन्वर्थो **ब्राह्मणो** भवति॥

नाशरहितं परिणामरहितम् अपरिच्छिन्नम् अक्षरम् आत्मत्वेन जानन्नेव **ब्राह्मणो** भवति। मरणात् पूर्वमेव, जीवन्नेव यो वै एतत् आत्मतत्त्वं जानाति स एव ब्राह्मणः, सत्यं ब्राह्मण एवासौ। सर्वेणापि सुसम्पाद्यं ह्येतत् ब्राह्मण्यम्। सर्वेषां मानवानाम् आजन्मसिद्धः अधिकारोऽयम्। एतदक्षरम् आत्मत्वेन विज्ञाय सर्वेऽपि वयम् अन्वर्थाः ब्राह्मणा भवेम किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संसारगतिरहिताय वेदान्तभास्कराय नमः॥

अधीरो दुर्मनाश्चैव संसारं प्रतिपद्यते।
इन्द्रियाणां पराधीनः इति **वेदान्तभास्करः**॥

इन्द्रियाणां पराधीनः दुर्मनाः दीनो मनुष्यः अविद्यादोषेण पुनः पुनः जायते म्रियते च।

मार्च् २

६२. ईदृशस्य नष्टद्वयम्

न स तत् पदमाप्नोति संसारं चाधिगच्छति।

काठकोपनिषत् १-३-७

सः अज्ञः वैष्णवपदं न प्राप्नोतीति न केवलम्, किं तु सः संसारमेव प्रतिपद्यते।

मानवाय विवेकयुक्ता बुद्धिः, शुद्धं मनः, अत्यन्तोपयोगीनि इन्द्रियाणि, समर्थं शरीरं च भगवता दत्तानि सन्ति। एतानि सर्वाण्यपि विवेकेन साधुमार्गेण उपयुज्यन्ते चेत् तदा साधकः मुक्तिं लब्ध्वा कृतार्थो भवेत्, अन्यथा यथेच्छम् उपयुज्यन्ते चेत्, तदा तस्य अविवेकिनः हानिद्वयं (Double loss) भवति॥

किं तत्? इति चेत्, मुक्तेः अप्राप्तिः प्रथमा हानिः, संसारस्य प्राप्तिः द्वितीया हानिः। शरीरमेव हि मानवस्य दिव्यो रथः, शरीरं हि श्रेष्ठो रथः; इन्द्रियाण्येव उत्तमाः अश्वाः, मनः प्रग्रहम्, बुद्धिश्च विवेकी सारथिः, शब्दादयो विषयाः मार्गाः। एतानि सर्वाण्यपि मानवः साधुक्रमेण न उपयुङ्क्ते चेत् तदा तस्य आत्मज्ञानं वा मुक्तिर्वा न प्राप्यते इत्येव न, किं तु, सः पुनः पुनः संसारमेव प्राप्नोति। एवम् अज्ञस्य नष्टद्वयं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्महत्यादोषरहिताय वेदान्तभास्कराय नमः॥

अज्ञानिनो ह्यात्महनः जन्ममृत्युवशास्सदा।
आत्मज्ञानविहीनत्वात् इति **वेदान्तभास्करः**॥

आत्मज्ञानरहिताः सर्वेऽपि अज्ञानिनः आत्महन एव। ईदृशाना पौनःपुन्येन जन्ममरणप्राप्तिः नूनं भवत्येव॥

मार्च् ३

६३. सर्वेऽपि अज्ञानिनः आत्महन एव !

तागूँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

ईशावास्योपनिषत् ३

आत्महनः अज्ञाः मरणानन्तरं तं स्वर्गलोकं प्राप्नुवन्ति।

वेदान्तानाम् अयं धीरः सन्देशः सामान्यलौकिकानाम् आश्चर्यम् उत्पादयति। अस्य मन्त्रस्य अर्थः सम्यक् न गृह्यते चेत् तदा अपार्थ एव भवति॥

''आत्महनः स्वर्गलोकं गच्छन्ति'' इत्युक्ते कोऽर्थः ? ''आत्महनो' नाम आत्मानं ये घ्नन्ति ते इत्यर्थः। आत्मा नाम सच्चिदानन्दरूपः प्रत्यगात्मा। अस्य सम्यक् अज्ञानमेव हि अस्य हननम्। सर्वोऽपि जीवः परमार्थतः अमृत एव सन्नपि एवम् एनम् अविज्ञाय, शरीरमेव अहम् इति जानाति खलु, एतदेव आत्महननं नाम। आत्मानम् अविज्ञाय अविद्यया स्वर्गलोकं जिगमिषवः अज्ञाः आत्महनो न भवन्ति किम्?

शरीरमेव आत्मत्वेन गृहीत्वा जन्मजरामरणादिविकाररहितम् निजम् आत्मानं विस्मृत्य अविज्ञाय, अविद्याकामकर्मसु ये निमग्नाः ते अज्ञानिनः आत्मघातकाः न भवन्ति किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमवीर्यवते वेदान्तभास्कराय नमः॥

स्वात्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्।
आत्मज्ञानं परं वीर्यम् इति **वेदान्तभास्करः**॥

स्वात्मना वीर्यं विन्दते, आत्मविद्यया अमृतत्वं प्राप्नोति, तस्मात् आत्मज्ञानमेव सर्वाधिकं निजं वीर्यम्।

मार्च् ४

६४. आत्मवीर्यस्य महिमा

आत्मना विन्दते वीर्यम्, विद्यया विन्दते अमृतम्।

केनोपनिषत् २-४

आत्मना वीर्यं विन्दते। आत्मविद्यया अमृतत्वं प्राप्नोति।

वीरस्य भावो हि वीर्यं नाम। अस्मिन् विशाले जगति नानाविधानि वीर्याणि सन्ति। जपवीर्यम्, मन्त्रवीर्यम्, औषधवीर्यम्, आरोग्यवीर्यम्, तपोवीर्यम् इत्यादीनि। एतानि वीर्याणि स्वस्वदृष्ट्या अद्भुतान्येव; न हि तावता सुलभेन एतेषां सम्पादनं भवति। अपि तु **आत्मवीर्यस्य पुरतः एतानि सर्वाण्यपि निर्वीर्याण्येव भवन्ति।** आत्मवीर्यमेकमेव निजं वीर्यम्। आत्मवीर्येणैकेन हि केवलेन मानवः मृत्युं जयति, संसारभयात् मुच्यते, न तु अपरैः वीर्यान्तरैः॥

आत्मविद्यया एव अमृतत्वं मोक्षं प्राप्नुयात् मानवः। आत्मविद्याम् एकां विहाय इतरासां सर्वासामपि विद्यानाम् 'अनात्मविद्या' इति नामधेयम्। अनात्मविद्यया धनं, कीर्तिः अधिकारः, आरोग्यादीनि लभ्यन्ते; नैव तु मोक्षः प्राप्यते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं यतिपुङ्गवाय वेदान्तभास्कराय नमः॥

विषयध्याननिर्विण्णाः वेदान्तज्ञानतत्पराः।
यतयः शुद्धसत्त्वाश्च प्राज्ञा **वेदान्तभास्करः**॥

विषयध्यानबहिर्मुखाः शुद्धान्तःकरणाः सन्तः स्वभावतः वेदान्तविज्ञानतत्पराः प्राज्ञा एव अन्वर्था यतयो भवन्ति।

मार्च् ५

६५. परमार्थयतयो ह्येते

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगात् यतयः शुद्धसत्त्वाः।

मुण्डकोपनिषत् ३-२-६

वेदान्तविज्ञानेन सुनिश्चितार्थाः शुद्धसत्त्वाः यतयः सन्यासयोगात् परं ब्रह्म विज्ञाय ब्रह्मस्वरूपा एव भवन्ति।

संन्यासिनो नाम वेदान्तचिन्तनतत्पराः। त्यक्तबाह्यानात्मवस्तु-चिन्तना हि संन्यासिनः? अध्ययनम् अध्यापनम्, यजनं याजनम्, दानं प्रतिग्रहः इति हि शास्त्रीयाणि षट् कर्माणि भवन्ति। ये एतानि षडपि कर्माणि वेदान्तविचारार्थमेव त्यक्तवन्तः ते एव हि संन्यासिनो नाम। अनात्मभूतेभ्यः अनित्येभ्यः लौकिकव्यवहारेभ्यः ये विदूर-गामिनः ते एव हि संन्यासिनः, यतयश्च॥

वेदान्तानाम् अध्ययनेन जातं विज्ञानमेव वेदान्तविज्ञानम्। वेदान्तविज्ञानेन हि यतीनाम् आत्मस्वरूपम् निश्चितम् अवगम्यते। ईदृशाः ब्रह्मज्ञानिनः जीवन्त एव अमृताः ब्रह्मस्वरूपाश्च जाताः। तथा हि शाङ्करभाष्यवाक्यम् "**जीवन्त एव ब्रह्मभूताः यतयः मुच्यन्ते इत्यर्थः**" इति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं धर्मकामाय वेदान्तभास्कराय नमः॥

लौकिकव्यवहारे वा ह्याचारे संशयो यदि।
यथा युक्ताः प्रवर्तन्ते तथा **वेदान्तभास्करः**॥

लौकिकेषु सामान्यव्यवहारेषु वा आचारविचारेषु वा यदि अस्माकं संशयो जायेत तत्र वृद्धाः यथा अनुतिष्ठन्ति तथैव अस्माभिरपि अनुष्ठातव्यम्।

मार्च् ६

६६. वृद्धाः प्रमाणम् अस्माकम्

युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः॥ तैत्तिरीयोपनिषत् १-११

युक्ताः आयुक्ताः अलूक्षाः धर्मकामाश्च तद्विषये यथा वर्तन्ते तथैव युष्माभिः वर्तितव्यम्।

आचार्यः स्वशिष्याय इमम् उपदेशम् करोति। कर्मानुष्ठान-विषये वा आचारविचारविषये वा संशये जाते कथं वर्तितव्यम्? इति शिष्येण पृष्टः आचार्यः इमम् उपदेशं करोति। एतादृशाः संशयाः प्रश्नाश्च अस्माकमपि जीवने उद्भवन्ति हि। तदा कथं वर्तितव्यम्? इति चेत्, उच्यते॥

तस्मिन् विषये ज्येष्ठाः वृद्धाः यथा अनुतिष्ठन्ति, तथैव अस्माभिरपि अनुष्ठातव्यम्। के ते वृद्धाः? युक्ताः। तस्मिन् विषये निपुणाः। आयुक्ता इत्युक्ते अयुक्ताः, स्वतन्त्रप्रज्ञाः इत्यर्थः। तथा अलूक्षाः अरूक्षाः, अक्रूरमतयः इत्यर्थः। धर्मकामाः इति धार्मिकाः। निपुणाः स्वतन्त्रमतयः सात्त्विकाः धर्मरताश्च वृद्धाः अस्माभिः सदा अनुसर्तव्याः इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कर्मयोगरहस्यविदे वेदान्तभास्कराय नमः॥

कर्मयोगपरो भूयात् पापकर्मविवर्जितः।
ब्रह्मतत्त्वविजिज्ञासुः नूनं **वेदान्तभास्करः**॥

ब्रह्मतत्त्वस्य जिज्ञासुः साधकः पापकर्माणि सम्पूर्णतया विहाय कर्मयोगमेव चित्तशुद्ध्यर्थं कुर्यात्।

मार्च् ७

६७. सत्कर्माणि कर्तव्यानि

कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।

ईशावास्योपनिषत् २

अज्ञानिसाधकैः शतसवत्सरपर्यन्तं कर्माणि कर्तव्यान्येव।

अज्ञानिनः ज्ञानिनश्च इति मानवाः द्वेधा विभज्यन्ते। अज्ञानिनो नाम आत्मज्ञानरहिताः, फलापेक्षिणः कर्मिणो मानवाः। ज्ञानिनस्तु आत्मतत्त्वविदो धीराः। एतेषां न किञ्चिदपि प्राप्तव्यं फलं विद्यते, कुतः? आत्मनिष्ठत्वात्। न हि ज्ञानिनां केनापि कर्मणा कृतेन प्राप्तव्यानि फलानि विद्यन्ते॥

अज्ञानिनो हि फलार्थं अधर्मानुष्ठानमपि कुर्वन्ति। फलापेक्षिणां फलेष्वेव आसक्तिः, न तु धर्मानुष्ठानेषु। एतान् उद्दिश्य अत्र 'सत्कर्माणि कर्तव्यानि' इत्ययं मन्त्रः उपदिशति। अज्ञानिनः साधकाः कर्मयोगं कुर्युः। परपीडाकराणि शास्त्र-निषिद्धानि समाजघातकानि च पापकर्माणि त्यक्त्वा साधून्येव कर्माणि साधकः कुर्यादित्यर्थः। तानि च भगवदर्पणबुद्ध्या क्रियन्ते चेत् ततः चित्तशुद्धिद्वारा साधकस्य ज्ञानप्राप्तियोग्यता भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं दग्धपुण्यपापाय वेदान्तभास्कराय नमः॥

दह्यते पुण्यपापाभ्यां नैव ज्ञानी कथञ्चन।
ज्ञानाग्निदग्धकर्मत्वात् नूनं **वेदान्तभास्करः**॥

पुण्यपापकर्माणि ज्ञानिनं न दहन्ति। यतः तस्य सर्वाण्यपि कर्माणि ज्ञानाग्निना दग्धानि॥

मार्च् ८

६८. न पुण्यं न च पापं तस्य

एतं ह वाव न तपति। किमहं साधु नाकरवम्। किमहं पापमकरवमिति॥ तैत्तिरीयोपनिषत् २-९-२

''मया किमिति पुण्यं न कृतं? किमिति पापचरणं कृतम्'' इति ईदृशी चिन्ता ज्ञानिनं नैव दहति॥

''ब्रह्मैवाहमस्मि'' इति निश्चितज्ञानवान् हि ब्रह्मज्ञानी नाम। ''नाहं कदापि कर्ता भोक्ता वा अस्मि'' इति हि ब्रह्मज्ञानी जानाति। इत्थंभूतस्य ज्ञानिनः पुण्यं वा पापं वा अस्ति किम्? ब्रह्मविदः पुण्यपापयोः गन्धोऽपि नास्ति। एवंस्थिते कथं वा पुण्यपापकर्माणि ज्ञानिनं दहेयुः?

पुण्यं नाम शास्त्रचोदितानि सत्फलदायीनि साधुकर्माणि; पापं नाम शास्त्रनिषिद्धानि अनिष्टफलप्रदानि दुष्टकर्माणि। अज्ञानिनां हि इष्टफलानि अनिष्टफलानि च भवन्ति। अविद्यावतां कामाः सम्भवन्त्येव। कामप्रेरितास्ते कर्माणि कुर्वन्त्येव। ततः तेषां कर्मणां फलानि ते अनुभवेयुरेव। अज्ञानिनामेव पुण्यपापयोः अध्यासः सम्भवति। आत्मज्ञानिनः पुनः एवम् अध्यासद्वयमपि नैव विद्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदमूलविदे वेदान्तभास्कराय नमः॥

सर्वे ऋगादयो वेदाः परस्मादेव ब्रह्मणः।
उत्पद्यन्ते निरायासं ब्रूते **वेदान्तभास्करः**॥

ऋग्वेदादयो वेदाश्चत्वारः परस्मादेव ब्रह्मणः निःश्वसितमिव निरायासं जायन्ते।

मार्च् ९

६९. परस्मात् ब्रह्मण एव वेदाः

अस्य महतो भूतस्य निःश्वसितम् एतत् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः। बृहदारण्यकोपनिषत् २-४-१०

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः इत्येते महतः परमात्मनः निःश्वसितमेव।

सर्वे वेदाः, समस्ताः उपनिषदः, सकलानि शास्त्राणि च परमात्मन एव जायन्ते। मीमांसकाः वेदान् अपौरुषेयान् आचक्षते। अपौरुषेयत्वं नाम न केनापि पुरुषेण रचितत्वम्। वेदान्तिनोऽपि वेदान् अपौरुषेयान् एव वदन्ति। अपि तु द्वयोरपि वेदापौरुषेयत्व-विषये अस्ति विशेषः॥

वेदाः परमात्मनः निःश्वसितम्, भगवतः वाणी, ईश्वरस्य वचः —इति वेदान्तिनः कथयन्ति। नासिकावायुः उच्छ्वासः निश्श्वासश्च इति द्विधा विद्यते हि। प्रयत्नसाध्यः उच्छ्वासः, निरायासस्तु निश्श्वासः। वेदाः भगवतः निश्श्वासः। परमात्मनो निरायासम् आगता वेदाः, सहजतया अभिव्यक्ता इत्यर्थः। सर्वज्ञस्य सर्वशक्तस्य च परमात्मनः बाह्यसाकाररूपा एव हि वेदा नाम। तस्मादेव हेतोः वेदाः प्रमाणानि भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पापविदूराय वेदान्तभास्कराय नमः॥

शास्त्रोक्तधर्मनिष्ठानां सदाचारवतां सताम्।
पापलेपभयं नास्ति ब्रूते **वेदान्तभास्करः**॥

सदाचारसम्पन्नानां शास्त्रविहितकर्मानुष्ठानपराणां सत्पुरुषाणां पापलेपभयं नास्ति।

मार्च् १०

७०. ईदृशानां पापलेपो नास्ति

एवं त्वयि नान्यथेतोऽस्ति, न कर्म लिप्यते नरे।

ईशावास्योपनिषत् २

हे मानव, ईदृशे त्वयि पापाचरणस्य अवकाशो नास्ति, तेन पापफलस्य लेपः तव नास्ति॥

मानवस्य पापाचरणं नाम इदानींकाले स्वाभाविकं भवति, पापान्येव मानवः करोति। प्रातरुत्थाय रात्रौ शयनपर्यन्तमपि मानवस्य जीवनं पापमयमेव दृश्यते। अस्मात् पापजीवनात् परिहारोपायम् उपदिशति इयं श्रुतिः॥

''हे मानव, धर्मपरायणो भव'' इत्येष एव सः सन्देशः। मानवः सदाचारसम्पन्नश्चेत् तस्य दुराचारकरणे अवकाशः कुत्र? जपः, पारायणम्, पूजा, भगवद्ध्यानम्, सत्सङ्गः, पुराणश्रवणम्, सत्कथाकालक्षेपः—इत्यादिधर्ममार्गे एव निरतानां सज्जनानां चौर्यम्, वञ्चनम्, अनृतवचनम्, जिह्मम्, प्राज्ञ-देव-द्विज-गुरुनिन्दा इत्यादिपापाचरणे अवकाश एव नास्ति॥

पापाचारदूराणां मानवानां पापस्य फलानि नैव सम्भवन्ति। पापसंस्काराश्च नाशं गच्छन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं करणसाक्षिभूताय वेदान्तभास्कराय नमः॥

अक्षिस्थं पुरुषं श्रेष्ठं चक्षुःसाक्षिणमव्ययम्।
योऽसौ वेत्ति स आत्मानं वेद **वेदान्तभास्करः**॥

अक्षिस्थम् अक्षिसाक्षिणं श्रेष्ठ पुरुषम् आत्मत्वेन यो जानाति स एव आत्मवित्।

मार्च् ११

७१. अक्षिस्थपुरुषः कः?

य एषोऽक्षिणि पुरुषो दृश्यते, एष आत्मा इति होवाच, एतदमृतम् अभयम् एतद् ब्रह्मेति। छान्दोग्योपनिषत् ४-१५-१

चक्षुषि यः पुरुषो दृश्यते एष एव आत्मा इति होवाच। एषः अमृतः, एष एव अभयः; अयमेव च पुरुषो ब्रह्म॥

अस्या विद्यायाः **अक्षिपुरुषविद्या** इति नाम। चक्षुषि दृश्यमानमेव पुरुषम् अत्र आत्मा इति उपदिशति अयं मन्त्रः। ब्रह्मचर्यम्, अहिंसा, इन्द्रियनिग्रहः, शमदमादिसाधनैः युक्तानाम् उपासकानाम् अस्मिन् चक्षुषि आत्मदर्शनं भवति। उपासकाः अक्षिस्थं पुरुषमेव ब्रह्म इति उपासते॥

विवेकिनः आत्मज्ञानिनश्च चक्षुषोऽपि चक्षुर्भूतं चिन्मात्र-स्वरूपम् आत्मानं पश्यन्ति। नायमात्मा प्रतिबिम्बरूपः छायात्मा। एषः ब्रह्मैव। केनोपनिषदि अयमेव आत्मा ''श्रोत्रस्य श्रोतम्, मनसो मनः, वाचो ह वाचम्'' इति उपदिष्टोऽस्ति। अयमेव आत्मा इन्द्रियाणां मनसश्च आत्मा सन् अमृतः अभयश्च ब्रह्मैव च भवति। अयमेव आत्मा अत्र मन्त्रे अक्षिपुरुषत्वेन उपदिश्यते। य एवंवित् सः अमृतो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विश्वात्मविदे वेदान्तभास्कराय नमः॥

परस्मादात्मनः सर्वे जीवा जाता भवन्ति च।
तत्रैव च विलीयन्ते नूनं **वेदान्तभास्करः**॥

परमात्मन एव सर्वे जीवाः जायन्ते, तस्मिन्नेव जीवन्ति, तस्मिन्नेव च नूनं लीयन्ते।

मार्च् १२

७२. सर्वमपि विश्वम् आत्मैव

एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति, न प्रेत्य संज्ञा अस्तीति होवाच याज्ञवल्क्यः॥

बृहदारण्यकोपनिषत् २-४-१२

इदं सर्वं जगत् भूतेभ्यः समुत्थितम् सत् अन्ते तेष्वेव विनश्यति। मरणानन्तरं सज्ञा नास्ति इति याज्ञवल्क्यः उवाच॥

इदं सर्वं विश्वं परमात्मन एव जनित्वा परमात्मन्येव स्थित्वा, परमात्मन्येव लीयते। स्थितिकाले ब्रह्मणः भिन्नमिव दृश्यमानत्वं तु अविद्यया एव, न तु परमार्थतः। तरङ्गबुद्बुदफेनादयः समुद्रादेव जायन्ते, समुद्रे एव विद्यन्ते, अन्ते समुद्रे एव विलीयन्ते हि?

नामरूपाभ्यां भिन्नभिन्नमिव दृश्यमानम् इदं विश्वं सर्वदा ब्रह्मैव सदपि अविद्यादोषेण अज्ञानिनाम् एवं बुद्धिं नारोहति। अन्ते सर्वं ब्रह्मण्येव प्रलीयते। अविद्यानिरसनानन्तरं यथापूर्वं जीवत्वं वा नानात्वं वा नावशिष्यते। ब्रह्मविदः नानात्वज्ञानं वा नामरूपविशेषज्ञानं वा कथम् अवशिष्येत? नैव अवशिष्येत। अज्ञानप्रदर्शितं विशेषविज्ञानं ज्ञानोदयसमकालमेव बाधितं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं निश्चितज्ञानवते वेदान्तभास्कराय नमः॥

जिज्ञासोर्गुरुभक्तस्य श्रवणासक्तचेतसः।
आत्मज्ञानोदयस्तस्य नूनं **वेदान्तभास्करः**॥

श्रवणासक्तचेतसः गुरुभक्तस्य जिज्ञासोः ब्रह्मात्मज्ञानोदयः नून भवत्येव।

मार्च् १३

७३. नूनं ज्ञानोदयस्तस्य

तद्धास्य विजज्ञाविति विजज्ञाविति।

छान्दोग्योपनिषत् ६-७-६

जनकस्य उपदेशं पुत्रः श्वेतकेतुः सम्यक् विज्ञातवान्, विज्ञातवानेव।

अत्र उद्दालकः पिता, पुत्रस्तु श्वेतकेतुः। पिता स्वपुत्र प्रति "**तत् सत्यम्, स आत्मा तत्त्वमसि श्वेतकेतो**" इति नवकृत्वः उपदिष्टवान्। "तद् ब्रह्मैव एकं सत्यम्, तद् ब्रह्मैव आत्मा, तद् ब्रह्मैवासि त्वम्" इति उपदेश कृतवान् पिता॥

अयम् उपदेशः यद्यपि दृप्तस्य श्वेतकेतोः प्रारम्भे अवगन्तुम् कष्ट इव दृष्टः, तथापि अन्ते सुलभतया स्पष्टतया च श्वेतकेतुः उपदेशार्थम् अवगतवानेव। **अहं ब्रह्मास्मि** इतिज्ञानं जिज्ञासूनां जायेत वा न वा इति सशयो मास्तु। वेदान्तेषु उपदिष्ट ब्रह्मात्मज्ञानं चित्तशुद्धिमतां मुमुक्षूणां मनसि परिपक्व भवति। गुरुभक्तानां सात्त्विकानां श्रवणतत्पराणां च जिज्ञासूना ब्रह्मात्मज्ञानोदयः नूनं भवत्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मभूताय वेदान्तभास्कराय नमः॥

इन्द्रियाणि मनश्चास्य नोत्क्रामन्ति कथञ्चन।
ब्रह्मैव सन् ब्रह्माप्नोति ज्ञानी **वेदान्तभास्करः**॥

ब्रह्मविदः इन्द्रियाणि मनश्च नैव उत्क्रामन्ति। यतः अयं ब्रह्मैव सन् ब्रह्म अप्येति॥

मार्च् १४

७४. अस्य तु गतिर्नास्ति

न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।

बृहदारण्यकोपनिषत् ४-४-६

तस्य ब्रह्मज्ञानिनः प्राणाः न उत्क्रामन्ति, यतः अयम् इदानीं ब्रह्मैव सन् ब्रह्म अप्येति।

अज्ञानिनां कामिनाम् उत्क्रान्तिः गतिः आगतिश्च सम्भवत्येव। कामरहितस्य आत्मज्ञानिनस्तु गतिः नैव विद्यते। कर्मप्रेरितः अज्ञः फलानुभोगाय इतः त्यक्त्वा शरीरं तत्र गच्छेत्। अविद्याकाम-कर्मप्रेरितः अज्ञः पुनः पुनः जायते म्रियते च। अज्ञो हि जन्ममरण-चक्रे बद्धः सुखदुःखफलानि अनुभवति॥

ब्रह्मज्ञानिनस्तु कामाभावात् कर्माभावः। आप्तकामस्य आत्मकामस्य अकामस्य ब्रह्मविदः लोकान्तरजन्मान्तरगमना-भावात् तस्य इन्द्रियाणि न उत्क्रामन्ति। निर्विशेषः अद्वैतः परिपूर्णश्च आत्मा अहमस्मि इति अनुभवेन ज्ञातवतः ज्ञानिनः कुतः किं विहाय कुत्र वा गमनं भवेत्? अत्रैव इदानीमेव ज्ञानी ब्रह्मस्वरूप एव सन् परस्मिन् ब्रह्मण्येव एकीभवति। जीवन्मक्तो हि ज्ञानी नाम? अस्य ब्रह्मविदः गतिर्नास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मूर्तामूर्तस्वरूपाय वेदान्तभास्कराय नमः॥

मूर्तामूर्तं जगत् सर्वं चेतनाचेतनात्मकम्।
स्थावरं जङ्गमं चैव ब्रह्म **वेदान्तभास्करः**॥

मूर्तामूर्तरूपेण, चेतनाचेतनरूपेण, स्थावरजङ्गमरूपेण च अवभासमानम् इदं सर्वं जगत् परमार्थतो ब्रह्मैव।

मार्च् १५

७५. जगत् सर्वं ब्रह्मैव

सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं च अनिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यम् अभवत्॥ तैत्तिरीयोपनिषत् २-६-७

परमात्मा स्वयमेव सत् असच्च अभवत्। निरुक्तम् अनिरुक्तम्, निलयनम् अनिलयनम्, विज्ञानम् अविज्ञानम्, सत्यम् अनृत च स एव। तथा स एव सत्य च अभवत्॥

एकमेवाद्वितीयः चिन्मात्रस्वरूपः स एव परमात्मा इमं प्रपञ्चं सृष्ट्वा अनन्तरं स्वयमेव इद जगत् प्रविष्टवान्। कोऽयं प्रपञ्चो नाम? इति चेत्, अस्य प्रपञ्चस्य प्रपञ्च स्वयमेव करोति मन्त्रः। **सत्** इति मूर्तम्, व्याकृतम् इत्येतत्। **त्यत्** इति अमूर्तम्, अव्याकृतम्। **निरुक्तम्** शब्दैः अभिव्यङ्ग्यम्। **अनिरुक्तम्** शब्दैः वर्णयितुम् अशक्यम्। **निलयनम्** आश्रयभूतम्। **अनिलयनम्** अनाश्रयभूतम्। **विज्ञानम्** चेतनम्। **अविज्ञानम्** अचेतनम्। **सत्यं** व्यवहारगोचरम्। **अनृतम्** मिथ्याभूतम्। इद सर्वमपि सत्य ब्रह्मैव। एवं ज्ञाते सति अब्रह्मभूत न किञ्चित् विद्यते, सर्वमपि ब्रह्मैव। इदरहस्यविदेव ब्रह्मज्ञानी नाम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं व्यवहारातीताय वेदान्तभास्कराय नमः॥

सर्वमात्मैव यस्य स्यात् विश्वं ज्ञानप्रभावतः।
द्वैताभावात् क्रियाभावः इति **वेदान्तभास्करः**॥

आत्मज्ञानप्रभावेण यस्य विश्वमिदम् आत्मैव भवति, तस्य द्वैताभावात् कर्माभावः।

मार्च् १६

७६. अस्य, व्यवहारः अस्ति किम्?

यत्र तु अस्य सर्वम् आत्मैवाभूत्, तत् केन कं जिघ्रेत्, पश्येत्, शृणुयात्, अभिवदेत्? बृहदारण्यकोपनिषत् २-४-१४

यदा अस्य आत्मविदः "इदं सर्वम् आत्मैव" इति ज्ञानम् उत्पन्नम्, तदा सः केन प्रमाणेन कं पदार्थं जिघ्रेत्? कं वा पश्येत्? कं विषयं शृणुयात्? कं वा अभिवदेत्?

आत्मज्ञानोदयो नाम "अद्वितीयः आत्मा एव अहमस्मि" इति निश्चयः। नैतत् केवलं वाचा उच्चारणम्, न च शास्त्रज्ञान-पाण्डित्यम्। किं तु अनुभवस्य रसपाकः। एवंविदः ब्रह्मज्ञानिनः भेदज्ञानं (त्रिपुटिज्ञानं) सत्यतया नावशिष्यते॥

त्रिपुटिज्ञान नाम प्रमाता अहम् प्रमेयम् इमम् प्रमाणेन जानामि इति त्रिवृत्कृतं ज्ञानम्। प्रमाता, प्रमाणम्, प्रमेयं च परमार्थतः आत्मैव इति निश्चिते ज्ञाने जाते, पुनः तत्र सत्यत्वभ्रमः न सम्भवति। स आत्मविद्भवति। ततः सः केन प्रमाणेन कीदृशं प्रमेयं कथं वा पश्येत्? प्रमाणभूतानि इन्द्रियाणि प्रमेयभूताः पदार्थाः प्रमाता स्वयम् च—एतत् त्रयमपि आत्मैव सम्पन्नम्। एवंविदः व्यवहारः सम्भवति वा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रज्ञानेत्रस्वरूपाय वेदान्तभास्कराय नमः॥

प्रज्ञानेत्रं जगत् सर्वं यत्किञ्चित् सचराचरम्।
प्रज्ञा त्वेव परं ब्रह्म सत्यं **वेदान्तभास्करः**॥

चराचरात्मकं विश्व सर्वं प्रज्ञानेत्रम् एव। प्रज्ञा, प्रज्ञानं च परमार्थतः ब्रह्मैव।

मार्च् १७

७७. सर्वं विश्वं प्रज्ञानेत्रमेव

अश्वा गावः पुरुषाः हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च, यच्च स्थावरं, सर्वं तत् प्रज्ञानेत्रम्। प्रज्ञाने प्रतिष्ठितम्॥ ऐतरेयोपनिषत् ३-१-३

अश्वाः, गावः, पुरुषाः, गजाः, प्राणिनः, जङ्गमाः, पतत्रिणः, स्थावराश्च प्राणिनः—एतत् सर्वं प्रज्ञानेत्रमेव। इद सर्वमपि प्रज्ञाने एव प्रतिष्ठितमस्ति॥

अस्याम् ऐतरेयोपनिषदि परं ब्रह्म 'प्रज्ञानम्' इति उपदिश्यते। प्रज्ञानं नाम प्रज्ञप्तिस्वरूपम् इत्यर्थः। समस्तम् इदं चेतनाचेतनात्मकं विश्वम् प्रज्ञानम् एव। न केवलं श्रेष्ठाः देवगन्धर्वमानवाः प्रज्ञानम्, किं तु नीचाश्च प्राणिनः प्रज्ञानमेव॥

राजसाः अश्वाः, सात्त्विकाः गावः, तामसाश्च गजाः परमार्थतः निरुपाधिकदृष्ट्या गुणातीतं प्रज्ञानमात्रमेव भवन्ति। श्वानः, शृगालाः, गर्दभाः, वराहाः, मार्जाराः, वानरादयो जङ्गम-प्राणिनः; काकाः, शुकाः, उलूकादयः पक्षिणः; एतत् सर्वमपि प्रज्ञानमेव, चैतन्यम् एकमेव, आकारक्रियास्तु भिन्नाः विभिन्नाः भवन्ति। परमार्थतस्तु सर्वमपि प्रज्ञानमेव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वाध्यायमहत्त्वविदे वेदान्तभास्कराय नमः॥

वेदसंरक्षणं चैव स्वाध्यायः परमं तपः।
नित्यं द्विजेन कर्तव्यं तपो **वेदान्तभास्करः**॥

द्विजेन वेदसरक्षणरूप तपः नित्य कर्तव्यम्। यतः स्वाध्याय एव परम तपः॥

मार्च् १८

७८. स्वाध्यायस्य महिमा

स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥ तैत्तिरीयोपनिषत् १-९

स्वाध्यायः प्रवचन च अवश्यं कर्तव्यमेव इति नाकमौद्गल्यः अभिप्रैति। यतः तदेव तपः, तदेव हि तपः॥

सर्वाण्यपि साधनानि कर्तव्यत्वेनैव शास्त्रेषु विहितानि। न हि शास्त्रविहितानि साधनानि कनिष्ठानि भवन्ति। सर्वाण्यपि अनुष्ठेयान्येव। अपि तु सर्वाणि साधनानि सर्वेण पुरुषेण न अनुष्ठेयानि, न च अनुष्ठातुं शक्यन्ते। तस्मात् भिन्नभिन्नेभ्यः वर्णेभ्यः भिन्नभिन्नेभ्यः आश्रमेभ्यश्च विशिष्य भिन्नानि साधनानि विहितानि सन्ति। तान्येव तैः अनुष्ठेयानि भवन्ति॥

प्रकृते तु, द्विजैः तत्रापि ब्राह्मणैः अवश्यं कर्तव्यमेव साधनं नाम स्वाध्यायः प्रवचनं च। **स्वाध्यायो** नाम स्वेन प्रत्यहं क्रियमाणम् वेदाध्ययनम्। **प्रवचनं** नाम स्वेन अधीतस्य वेदस्य अन्येभ्यः प्रतिपादनम्, स्वाध्यायप्रवचने इति अध्ययनाध्यापने। स्वेन अध्ययनं यथा तपः तथैव अधीतस्य वेदस्य इतरेभ्यः अध्यापनं च मुख्यमेव तपः। अयं हि नाकमौद्गल्यस्य महर्षेः अभिप्रायः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्मानम् आत्मत्वेनविदे वेदान्तभास्कराय नमः॥

विषयत्वेन जानाति योऽसौ ब्रह्म न वेत्ति सः।
आत्मत्वेन तु जानाति वेद **वेदान्तभास्करः**॥

यः ब्रह्म विषयत्वेन जानाति सः ब्रह्म सम्यक् न जानाति, यस्तु आत्मत्वेन ब्रह्म जानाति स एव सम्यक् ब्रह्म वेद इत्यर्थः।

मार्च् १९

७९. जानतः न ज्ञातम्

यस्यामतं तस्य मतं, मतं यस्य न वेद सः।

केनोपनिषत् २-३

ब्रह्म यस्य 'अमतं' तस्यैव 'मतम्'। यस्य तु 'मतम्' सः ब्रह्म न वेद॥

अय मन्त्रः गूढार्थकः। तद्यथा, अजानतः ब्रह्म ज्ञातम्, जानतस्तु ब्रह्म न ज्ञातम् इति। अस्मिन् मन्त्रे विरोधाभास इव दृश्यते। अस्य मंत्रस्य अंतरार्थं पश्याम॥

ब्रह्म प्रमाणागोचरम्, आत्मनो अभिन्नम्, न केनापि प्रमाणेन विषयीकृत्य ज्ञातुं शक्यम् इति यः जानाति तस्यैव ब्रह्मतत्त्वं सम्यग्ज्ञातम् इत्यर्थः। यस्तु अज्ञः ब्रह्म सविशेषवस्तुत्वेन जानाति, प्रमाणैः विषयीकृत्य अनात्मवस्तुवत् ज्ञातुं प्रयतते, तस्य ब्रह्मस्वरूपम् अज्ञातमेव इति वक्तव्यम्। स्वस्वरूपभूतस्य ब्रह्मणः ज्ञान नाम **अहमेव ब्रह्मास्मि** इति अनुभवावगतिरेव। ब्रह्मात्मावगतौ सत्यां प्रमातृप्रमाणप्रमेयाख्या त्रिपुटी न विद्यते। प्रमातृप्रमाणप्रमेय-रूपाः सर्वेऽपि पदार्थाः ज्ञानेन ब्रह्मैव सम्पद्यन्ते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं दुराचारविदूराय वेदान्तभास्कराय नमः॥

दुराचारी न जानीयात् ह्यात्मानं निरुपाधिकम्।
नाशान्तमानसश्चापि वेद **वेदान्तभास्करः**॥

दुराचारी मानवः निरुपाधिकम् आत्मानं न जानीयात्, अशान्तमानसः साधकश्च न आत्मानं वेद।

मार्च् २०

८०. दुराचारी नात्मानं जानीयात्

नाविरतो दुश्चरितात् नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥ काठकोपनिषत् १-२-२४

दुश्चरितात् अविरतः, अशान्तः, असमाहितः, अशान्तमानसश्च साधकः एनम् आत्मानं प्रज्ञानेन ज्ञातुं न शक्नोति।

आत्मज्ञानं तु अत्यन्तं सुलभमेव, तथापि तस्य अनुत्पत्तौ अनेके दोषाः भवन्ति। एते सर्वेऽपि दोषाः मानसा एव। एतैः दोषैः युक्तस्य मनसः 'अशुद्धं मनः' इति नाम। एतेभ्यः दोषेभ्यः मुक्तमेव ''शुद्धं मनः''। अध्यात्मसाधकैः एतेषां मानसदोषाणां परिहाराय प्रयत्नः कर्तव्यः॥

के एते दोषाः? इति चेत्, दुराचारः प्रथमो दोषः, इन्द्रियाणां स्वेच्छाविहाराय अवकाशदानमेव **दुराचारो** नाम। शास्त्रविरुद्धाः अनाचाररूपाः संप्रदायबाह्याः व्यवहाराः साधकेन सर्वथा परिहर्तव्याः। अशान्तमनस्त्वं द्वितीयो दोषः। मनसि विषयवासनापूर्णस्य साधकस्य आत्मज्ञानं लभ्यते वा? नैव लभ्यते। सदाचारसम्पन्नस्य शान्तमनसः वेदान्तवाक्यार्थविचारपरस्य साधकस्य आत्मज्ञानम् अवश्यम् उदेति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अविद्यातमोरहिताय वेदान्तभास्कराय नमः॥

अविद्यायां सुनिर्मग्नाः स्वयं धीराभिमानिनः।
अकृतार्थाः स्वयं मूढाः **बाला वेदान्तभास्करः**॥

अविद्याया सुनिर्मग्नाः अपि स्वय धीराभिमानिनः ये, ते तु स्वयम् अकृतार्था एव। ते मूढाः बाला एव॥

मार्च् २१

८१. ईदृशाः 'बाला' एव

अविद्यायां बहुधा वर्तमानाः वयं कृतार्थाः इत्यभिमन्यन्ति बालाः। मुण्डकोपनिषत् १-२-९

अविद्यायां बहुप्रकारेण विद्यमाना अपि आत्मानं कृतार्थान् मन्यमानाः एते मूढाः बाला एव।

आत्मज्ञानस्य रुचिमेव अजानन्तः, ज्ञातुं प्रयत्नमपि अकुर्वन्तः, आत्मज्ञानविचारे अपहास्य कुर्वन्तः, केवलानि शास्त्रीयाणि कर्माण्येव कुर्वन्तः, तदेव तावतैव मानवजन्मनः सार्थक्यं मन्यमानाः पुरुषाः ये विद्यन्ते, ते अत्र मन्त्रे '**बालाः**' इति निन्द्यन्ते। वयसा वृद्धा अपि आत्मविचारमार्गे तत्त्वविवेके असमर्थाः इतिहेतुना एते ''बालाः'' इति व्यपदिश्यन्ते॥

केवलकर्मिणः अविद्यायां निमग्नाः। अविद्या नाम अध्यासः, मिथ्याज्ञानम्। आत्मानं देहं, कर्तारं, भोक्तारं मन्यन्ते चेत् ननु अयम् अध्यासः? क्रियाकारकफलेषु सत्यत्वबुद्धिर्हि अविद्या। कृत्वा फलप्राप्तिर्हि अविद्या। अविद्याव्यवहारे मग्ना अपि ते आत्मानं ''बुद्धिमन्तः कृतार्थाः'' इति मन्यन्ते खलु! अहो! अयमेव खलु अविद्याप्रभावो नाम! एते नूनमपि बाला एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नानोपाधिविशिष्टात्मविदे वेदान्तभास्कराय नमः॥

एकमेव परं ब्रह्म नामरूपाद्युपाधिभिः।
चन्द्रादित्यमनुष्यादिरूपैर्**वेदान्तभास्करः**॥

एकमेव परं ब्रह्म चन्द्रः, आदित्यः, मनुष्याः इत्यादिरूपैः नामरूपाद्युपाधिभिः दृश्यते॥

मार्च् २२

८२. ब्रह्म एकमेव, नामरूपणि अनेकानि

रूपं रूपं प्रतिरूपो बभूव
तदस्य रूपं प्रतिचक्षणाय।
इन्द्रो मायाभिः पुरुरूप ईयते
युक्ता ह्यस्य हरयः शता दशेति॥

बृहदारण्यकोपनिषत् २-५-१९

*अयं परमात्मा आत्मनः रूपं लोकस्य प्रदर्शनाय रूपं रूपं प्रतिरूपो दृश्यते। सर्वशक्तः परमात्मा आत्मीयैः "**माया**"रूपैः नानोपाधिभिः नानारूपेण अवभासते। अस्य उपाधिरूपाणि इन्द्रियाणि शताधिकानि दृश्यन्ते॥*

अत्र इन्द्रो नाम सर्वज्ञः परमात्मा। अयमेव परं ब्रह्म। अयम् अनेकोपाधिभिः नानारूपेण अवभासते। आत्मा एक एव, अविद्या-कल्पिताः उपाधयस्तु अनेके। अद्वितीयः परमात्मा एक एव सन् देवतारूपेण, मनुष्यरूपेण, लोकपञ्चभूतरूपेण, क्रिमिकीटादि-रूपेणापि दृश्यते॥

एतेषां रूपाणां 'माया' इति नाम। 'माया' इति मिथ्याभासः इत्यर्थः। आत्मनः मिथ्याभासरूपमेव हि इदं जगत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं निजपदतत्त्वविदे वेदान्तभास्कराय नमः॥

मातृगर्भे शयानोऽयं वामदेवो निजं पदम्।
सर्वात्मभावमापन्नो ज्ञात्वा **वेदान्तभास्करः**॥

अयं वामदेवो महर्षिः मातृगर्भे शयान एव निज पद ज्ञात्वा सर्वात्मभावम् आपन्नः।

मार्च् २३

८३. गर्भस्थस्यैव ज्ञानोदयः

गर्भे नु सन् नु अन्वेषामवेदम् अहं देवानां जनिमानि विश्वा।....गर्भे एवैतत् शयानो वामदेव एवमुवाच॥

ऐतरेयोपनिषत् २-१-५

मातृगर्भे एव शयानो वामदेवमहर्षिः ''अहं गर्भे एव विद्यमानः सन् सर्वासा देवतानां जन्मानि वेद'' इति ज्ञातवान्।

यौवने वा वार्धक्ये वा ज्ञानं प्राप्तव्यम् इति नियमो नास्ति, पूर्वजन्मसंस्कारप्राबल्यात् गर्भस्थस्यैव पुरुषस्य आत्मज्ञानोदयो भवेत्। जन्मान्तरकृततपसा शुद्धान्तःकरणस्य अस्मिन्नेव जन्मनि बाल्ये एव आत्मज्ञानं प्राप्येत॥

वामदेवमहर्षिः मातृगर्भे शयान एव सर्वात्मभावरूपम् आत्मज्ञानं लब्धवान् इति अयं मन्त्रः उद्घोषयति। देवानामपि आदिरहम्, समस्तस्यापि विश्वस्य अहमेव कारणम् इति ज्ञानमेव हि आत्मज्ञानं नाम। इदं सर्वेषामपि सुलभम्। सर्वथा चित्तशुद्धिमतः आत्मज्ञानं सर्वात्मभावरूपो मोक्षश्च निश्चितमेव भवति इत्यर्थः। ज्ञानोदयसमकाले एव मोक्षप्राप्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विचारपरमाय वेदान्तभास्कराय नमः॥

कालः स्वभावो नियतिः पञ्चभूतानि वा तथा।
आत्मा वा जगतो हेतुः चिन्त्यं **वेदान्तभास्करः**॥

जगतः हेतुः कालो वा? स्वभावो वा? नियतिर्वा? पञ्चभूतानि वा? अथवा आत्मा? इति ऋषयः चिन्तयन्ति॥

मार्च् २४

८४. महर्षीणां विचारक्रमः

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या। संयोग एषां न त्वात्मभावात् आत्माप्यनीशः सुखदुःखहेतोः॥ श्वेताश्वतरोपनिषत् १-२

अस्य विश्वस्य कारणं किं कालः? स्वाभावो वा? नियतिर्वा? जीवात्मा वा? अथवा एतेषां समूहो वा? इति ज्ञानिनः विचारं कुर्वन्ति। स्वयं सुखदुःखभोक्ता दीनः जीवात्मा तु नास्य जगतः कारणं भवेत्॥

अनेके महर्षयः अन्योन्यं मिलित्वा एवं सन्तोषेण विचारं कुर्वन्ति। इमं प्रपञ्चं दृष्ट्वा यस्य कस्यापि आश्चर्यं भवति, अद्भुतमेव इदं विश्वं नाम। अस्य विशालस्य जगतः केनापि कारणेन भाव्यमेव। अतः किं तत् कारणं स्यात्? इति ते दीर्घम् आलोचयन्ति। केवलं तर्कबलेन बुद्धिसामर्थ्येन यथाकथञ्चित् लघुतया न विचार-चिन्तनमेतत्। किं तु श्रुतियुक्तिअनुभवानां समन्वयेन निर्णयः महान् विचारक्रमोऽयम्। सुखदुःखरूपे संसारसागरे स्वयं निमग्नः जीवस्तु नास्य संसारस्य कारणं भवेत्। तर्हिं किं कारणं स्यात्? इति हि महर्षीणां विचारस्य विषयः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मायारहस्यविदे वेदान्तभास्कराय नमः॥

प्रकृतिर्या तु माया सा मायावी तु महेश्वरः।
मायातीतं परं ब्रह्म विद्यात् **वेदान्तभास्करः**॥

प्रकृतिः इति या प्रसिद्धा सा एव माया। यः महेश्वरः स एव मायावी। परं ब्रह्म तु मायातीतम् इति विद्यात्॥

मार्च् २५

८५. माया, मायावी, ब्रह्म

मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्।

श्वेताश्वतरोपनिषत् ४-१०

प्रकृतिं मायाम्, महेश्वर च मायाविन विद्यात्॥

साङ्ख्यवैशेषिकादिदर्शनेषु वादिनः 'प्रकृतिम्', 'परमाणून्' च अस्य विश्वस्य मूलकारणम् इति वर्णयन्ति। कापिलसाङ्ख्यदर्शनं तु इमां सत्यभूतां मूलप्रकृतिमेव जगत्कारणमिति प्रतिपादयति॥

यद्यपि वेदान्तदर्शनेऽपि साङ्ख्यानां प्रकृतेः विचारः अनूद्यते, तथापि इमां प्रकृतिं वेदान्तेषु **मायाम्** वदन्ति वेदान्तिनः इत्येतावानेव विशेषः। ईश्वराधीना हि प्रकृतिः वेदान्तेषु अविद्याकल्पिता, एषा प्रकृतिः माया चेति कथ्यते। प्रकृतेः स्वतन्त्रा अस्तिता नास्ति। आत्मनि भ्रान्त्या कल्पिता प्रकृतिः केवलम् आभासरूपा॥

मायातीतः स्वाधीनकृतमायः मायावी एव ईश्वरः। मायां मायाविन च अतीत्य स्वीयेन निरुपाधिकेन परिपूर्णस्वरूपेण विद्यमानमेव पर ब्रह्म। ईश्वरं प्रपद्यमानस्य विज्ञासोः माया अपगच्छति। न हि मायाविन माया वञ्चयेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अज्ञानान्धकाररहिताय वेदान्तभास्कराय नमः॥

असुरा एव ते सर्वे स्वर्गलोकनिवासिनः।
अविद्याकामपूर्णत्वात् इति **वेदान्तभास्करः**॥

स्वर्गलोकनिवासिनोऽपि सर्वे देवा अविद्याकामपूर्णत्वात् परमार्थदर्शनरहितत्त्वाच्च असुरा एव।

मार्च् २६

८६. देवा अपि अन्धा एव

असुर्या नाम ते लोकाः अन्धेन तमसावृताः।

ईशावास्योपनिषत् ३

ते स्वर्गलोकाः असुरैः सम्पूर्णाः। ते लोकाः अन्धेन तमसा आवृताः॥

पुण्यकर्माणः मरणानन्तरं स्वर्गादिलोकान् प्राप्य तत्र अमराः सन्तः जायन्ते इति शास्त्राणि उद्घोषयन्ति। सत्यमेतत्, तावता सर्वेऽपि ते अमराः ब्रह्मज्ञानिनः एव भवेयुः इति नियमो नास्ति। अमरा देवाः विषयभोगलोलुपाः देहाभिमानिनः अज्ञानिनश्च भवेयुः। तस्मात् ते सुरा अपि पक्षे असुराः एव भवन्ति॥

असुषु रमन्ते ये ते असुराः। इन्द्रियभोगानुरक्ताश्च असुराः। न हि स्वर्गलोकनिवासित्वमात्रेण ते अध्यासरहिताश्च भवितुम् अर्हन्ति। ब्रह्मज्ञानिनां दृष्ट्या देवाधिदेवाश्च असुरा एव। यतः एतेषां ब्रह्मात्मज्ञानं वा मोक्षानन्दो वा नास्ति॥

देवैः अणिमादिसिद्धिमद्भिः भाव्यम्, निग्रहानुग्रहादिसामर्थ्यवद्भिश्च भाव्यम्। तथाप्येते देवा अपि अन्धा एव, ब्रह्मात्मज्ञानविमुखत्वात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रणवोपासनरहस्यविदे वेदान्तभास्कराय नमः॥

ओङ्कारोपासका ये हि यतयो वनवासिनः।
सूर्यद्वारेण गच्छन्ति चोर्ध्वं **वेदान्तभास्करः**॥

वनवासिनो यतयः ओङ्कारोपासकाः सूर्यरश्मिद्वारा ऊर्ध्वं लोकं गच्छन्ति।

मार्च् २७

८७. ओङ्कारोपासनस्य फलमिदम्

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः। सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा॥ मुण्डकोपनिषत् १-२-११

ये हि सन्यासिनः तपः उपासनं च कुर्वन्तः अरण्ये वसन्ति, शान्ताः सन्तः भिक्षान्नमात्रभोजनाः जीवन्ति, ते पापमुक्ताः सन्तः सूर्यमार्गद्वारेण हिरण्यगर्भलोक प्राप्नुवन्ति।

वानप्रस्थानां संन्यासिनां च अयं मन्त्रः मार्गदर्शनं करोति। वानप्रस्थाः इन्द्रियनिग्रहतत्पराः सन्तः हिरण्यगर्भब्रह्मणः उपासनं कुर्युः। संन्यासिनश्चेत् ते केवलं प्रणवोपासनतत्पराः भवेयुः। उभौ अपि एतौ अरण्यवासिनौ एव। अरण्यमित्युक्ते न 'वनम्' इत्येव, किं तु जनसमर्दरहितं शान्तं मङ्गळस्थानमित्यर्थः॥

वानप्रस्थसन्यासिनौ उभावपि भिक्षान्नमात्रेण जीवनं निर्वहन्तौ ओङ्कारोपासननिष्ठौ चेत् उत्तरायणेन मार्गेण सुषुम्नानाडीद्वारेण ब्रह्मलोक गत्वा तत्र ब्रह्मणा सहैव वसतः। तत्रलोके आत्मज्ञानोदयस्यापि अवकाशो भवति। ब्रह्मज्ञाने जाते तु मुक्तौ भवतः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापविवर्जिताय वेदान्तभास्कराय नमः ॥

ब्रह्मज्ञानप्रभावेण पुण्यपापविवर्जितः।
ब्रह्मैव सन् ब्रह्माप्येति ब्रूते **वेदान्तभास्करः**॥

ब्रह्मज्ञानप्रभावेण पुण्यपापविवर्जितः सन् ब्रह्मज्ञानी जीवन्नेव ब्रह्मैव सन् ब्रह्मैव अप्येति।

मार्च् २८

८८. पापक्षयाय ज्ञानमेव रामबाणः

यो वा एतामेवं वेद, अपहत्य पाप्मानम्।

केनोपनिषत् ४-९

आत्मतत्त्वं सम्यक् जानाति चेत्, सः पुण्यपापे अत्येति।

यथाशास्त्रं पुण्यकर्माणि कृत्वा शुभानि फलानि प्राप्नोति। शास्त्रनिषिद्धानि पापानि कर्माणि कृतानि चेत् अशुभमेव फलं प्राप्यते। तस्मात् मानवेन सदा पुण्यकर्माण्येव कर्तव्यानि, पापकर्माणि च हातव्यानि इति पूर्वमीमांसादर्शनं तथा सकल-शास्त्राणि पुराणानि च उपदिशन्ति। सत्यमेवैतत्॥

वेदान्तेषु तु पुण्यपापे उभेऽपि कर्मणी '**पाप**' शब्देनैव व्यपदिश्य एतत्पापपरिहाराय 'राजमार्गः' उपदिश्यते। पुण्यपापे उभेऽपि कर्मणी देहान्तरोत्पत्तौ हेतुत्वात् 'बन्धके' एव भवतः॥

अज्ञानमेव हि पुण्यपापयोः हेतुः। अज्ञानादेव कामः, कामादेव च कर्माणि। तस्मात् आत्मज्ञानादेव अज्ञानस्य नाशः। अज्ञाननिवृत्त्यै आत्मज्ञानमेकमेव रामबाणः। आत्मानम् अकर्तारम् अभोक्तारम् यः जानाति स एव आत्मवित्। विचारेण पुण्यपाप-सम्बन्धरहितम् आत्मानम् विजानतः पुण्यपापे भस्मीभवतः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रेयोमार्गविमुखाय वेदान्तभास्कराय नमः॥

प्रेयोमार्गरता ये तु श्रेयोमार्गविवर्जिताः।
जन्ममृत्युजराव्याधिभाजो **वेदान्तभास्करः**॥

ये तु मानवाः श्रेयोमार्गविवर्जिताः सन्तः प्रेयोमार्गनिरताः सन्ति, ते जन्ममृत्युजराव्याधिभाजो भवन्ति।

मार्च् २९

८९. एतेषां जन्ममरणे एव फलम्

एतत् श्रेयो येऽभिनन्दन्ति मूढाः, जरामृत्युं ते पुनरेवापियन्ति।

मुण्डकोपनिषत् १-२-७

ये मूढाः कर्मफलमेव श्रेयोमार्गं मन्यन्ते, तत्रैव सन्तुष्यन्ति च, ते पुनः पुनः जन्ममरणान्येव प्राप्नुवन्ति॥

कर्मानुष्ठानेन अस्माकम् इष्टफलप्राप्तिर्भवति, अनिष्ट-परिहारश्च भवति। कर्मभिः सर्वविधानि अभ्युदयफलानि लभ्यन्ते, अतः कर्तव्यान्येव कर्माणि; इत्येतत् सत्यमेव। न तु कर्मफलं मुक्तिर्भवति। कर्मयोगरूपेण अनुष्ठीयन्ते चेत् तदा चित्तशुद्धिद्वारा कर्माणि आत्मज्ञानोदयाय सहायकानि भवन्ति॥

इदं सूक्ष्मं रहस्यम् अविज्ञाय ये केवलकर्ममार्गनिरताः सन्तः कर्ममार्गमेव च श्रेयोमार्गं मन्यन्ते ते मूढा एव ननु? पित्तललोहमेव सुवर्णं मन्यमानाः किं न मूढाः? भवतु, एतेषां किं वा फलं भवेत्? जन्मजरादुःखमरणान्येव फलम्। कर्मफलानि अनुभवितुं जायन्ते। जाताः सन्तः पुनः कर्माणि कुर्वते, पुनः म्रियन्ते। एवम् एतेषां जन्ममरणानि अपरिहार्याणि। आत्मज्ञानादेव मुक्तिः लभ्यते, न तु कर्मकोटिभिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सत्यधर्मसन्धाय वेदान्तभास्कराय नमः॥

सत्यमेव वदेत् धीरो धर्ममेव चरेत् पुमान्।
स्वाध्यायाभ्यसनं कुर्यात् द्विजो **वेदान्तभास्करः**॥

धीरः पुमान् द्विजः सत्यमेव वदेत्, धर्ममेव चरेत्, स्वाध्यायाभ्यसनं च कुर्यात्।

मार्च् ३०

९०. एतत् त्रयं तु कर्तव्यमेव

सत्यं वद। धर्मं चर। स्वाध्यायात् मा प्रमदः॥

तैत्तिरीयोपनिषत् १-११

सत्यमेव वद, धर्ममेव आचर, स्वाध्यायात् प्रमत्तो मा भव॥

आचार्येण हि शिष्याय क्रियमाणः उपदेशोऽयम्। सद्गुरुसेवापरायणः शिष्यः गुरोः सकाशात् वेदविद्यां कृत्स्नतया अधीत्य गुरुगृहात् स्वगृहं प्रति यदा जिगमिषति, तदा गुरुणा प्रीत्या स्वशिष्यं प्रति क्रियमाणोऽयम् उपदेशः, आदेशश्च॥

अत्रमन्त्रे प्राधान्येन उपदेशत्रयं गुरुणा क्रियते। ते च त्रयः उपदेशाः इमे, सत्यवचनम्, धर्माचरणम् स्वाध्यायानुष्ठानं च। एतानि साधनानि अनुतिष्ठतः अभ्युदयफलानि लभ्यन्ते॥

सत्यवचनम् नाम अतिमुख्यं तपः। सत्यात् नास्ति परं तपः। सत्यमेव परं तपः। अतः सत्यमेव वक्तव्यम्॥

धर्माचरणम् नाम अहिंसा जपशमदमादयः। ते च धर्मस्य रूपान्तराणि। धर्म एव सदा अनुष्ठेयः, न कदापि अधर्मः॥

स्वाध्यायो नाम वेदाध्ययनम्। एतानि कर्तव्यान्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जगत्तत्त्वविदे वेदान्तभास्कराय नमः॥

नाम रूपं क्रिया चैव जगदेतच्चराचरम्।
तद्भिन्नं नास्ति नास्त्येव विश्वं **वेदान्तभास्करः**॥

एतत् चराचरात्मकं सर्वं जगत् नामरूपक्रियात्मकम्। नामरूप-क्रियाभिन्नं तु विश्वं नाम नास्त्येव॥

मार्च् ३१

९१. इदं त्रयमेव हि जगत् नाम?

त्रयं वा इदं नाम रूपं कर्म।

बृहदारण्यकोपनिषत् १-६-१

इदं जगन्नाम, नाम रूपं कर्म च।

अयं व्याकृतप्रपञ्चः अत्यन्तं विशालः महान् च। अस्य विस्तारः अद्भुतः। इमं प्रपञ्चं शब्दैः कृत्स्नतया वर्णयितुं न कोऽपि समर्थः, चेतनप्राणिभिः अचेतनवस्तुभिश्च सम्पूर्णोऽयं प्रपञ्चः। साङ्ख्यादिदर्शनानि अस्य प्रपञ्चस्य मूलम् अन्वेष्टुं प्रवृत्तानि। पञ्चभूतानि, नक्षत्रमण्डलानि, देवाः, असुराः, मनुष्याः, पशुपक्षिणः, क्रिमिकीटादयः—इत्यादिरूपेण विस्तृतोऽयं विशालः प्रपञ्चः॥

इमं प्रपञ्चं त्रेधा विभजते वेदान्तः। अयं विभागस्तु नाम, रूपं, कर्म च इति। नामरूपक्रियाः विहाय प्रपञ्चो नाम नास्त्येव। सर्वस्यापि वस्तुनः एकं नाम, एकं रूपं विद्यते एव। चेतनं वस्तु चेत् तस्य एका क्रियाऽपि विद्यते। मनुष्याणां पशुपक्षिक्रिमिकीटानां च समानमेव जातकमेतत्। एतावदेव अस्य विशालप्रपञ्चस्य सारम्। अस्य आश्रयभूतं ब्रह्मतत्त्वम्। परं ब्रह्म तु नामरूपक्रियाऽतीतम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जन्मरहस्यविदे वेदान्तभास्कराय नमः॥

पुरुषस्य यदा वीर्यं भार्यायोनौ प्रवेश्यते।
तदस्य प्रथमं जन्म ब्रूते **वेदान्तभास्करः**॥

वीर्यं भार्यायोनौ यदा प्रवेश्यते, तत् अस्य जीवस्य प्रथमं जन्म।

एप्रिल् १

१२. जीवात्मनः प्रथमं जन्म एतत्

तदेतत् सर्वेभ्योऽङ्गेभ्यः तेजः सम्भूतम्। आत्मन्येवात्मानं बिभर्ति। तद्यदा स्त्रियां सिञ्चति अथैनत् जनयति, तदस्य प्रथमं जन्म॥ ऐतरेयोपनिषत् २-१-१

तदेतद् वीर्यं सर्वेभ्यः अङ्गेभ्यः रेतोरूपेण उत्पद्यते। आत्मानम् आत्मन्येव अयं जीवः धरति। यदा पुरुषः तद् रेतः स्वभार्यायां सिञ्चति तदा इमं जीवम् उत्पादयति। इदम् प्रथमं जन्म॥

अस्य मानवस्य त्रीणि जन्मानि भवन्ति। मातुः योनिं पितृरेतोरूपेण प्रविशति इति यत् तदेवास्य प्रथमं जन्म। नवमासानन्तरं योनिद्वारा भूलोकं प्रति बहिरागमनम् एव द्वितीयं जन्म। मरणानन्तरं पुनः पुत्ररूपेण जननमेव तृतीयं जन्म। एवम् अविद्यावतः जीवात्मनः त्रीणि जन्मानि भवन्ति॥

प्रकृते अत्र मन्त्रे जीवस्य प्रथमजन्मविवरणं कथ्यते। वीर्यं नाम मानवस्य सर्वाङ्गानां सारभूतं तेजः। एको वीर्यबिन्दुः मानवेन भुक्तस्य समस्तस्य आहारस्य सारतमो रसः। यदा वीर्यबिन्दुः स्त्रीयोनिं प्रविशति तदा एव अस्य जीवस्य प्रथमं जन्म प्राप्तमिव। अविद्यया कामः, कामेन कर्माणि, कर्मभिः जन्मानि। विद्यया अविद्यायां निवृत्तायां पुनः जन्मान्तरप्राप्तिर्नास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अन्नान्नादरूपब्रह्मविदे वेदान्तभास्कराय नमः॥

अहमेव परं ब्रह्म चान्नमन्नाद एव च।
इत्यात्मानं विजानाति ज्ञानी **वेदान्तभास्करः**॥

अहमेव अन्नम्, अन्नादश्च, अहमेव परं ब्रह्म इति आत्मान ज्ञानी विजानाति।

एप्रिल् २

९३. ज्ञानिनः निजानन्दः

अहमन्नमहमन्नमहमन्नम्। अहमन्नादो अहमन्नादो अहमन्नादः।

तैत्तिरीयोपनिषत् ३-१०-८

अहमेव अन्नम्, अहमेव अन्नम्, अहमेव अन्नमस्मि। अहमेव च अन्नादः, अहमेव अन्नादः, अहमेव अन्नादः अस्मि इति ज्ञानी आत्मानं जानाति॥

ब्रह्म आत्मस्वरूपत्वेन विज्ञाय ज्ञानी कृतार्थः संवृत्तः। सर्वात्मभूतं ब्रह्म विज्ञाय ज्ञानी अपि स्वयं सर्वात्मा भवति। तादृशः ज्ञानी स्वानुभवं प्रदर्शयितुम्, स्वस्य स्वानन्दामृतसागरमग्नत्वं प्रकाशयितुम् इदं साम गायति॥

''अहमेव अन्नम् अन्नादश्च अस्मि'' इति ज्ञानी उद्घोषयति। यद्यपि स्वयम् ज्ञानी अद्वितीयः आत्मा एव, तथापि अन्नम् अन्नादश्च अहमेव इति ज्ञानी जानाति आत्मानम्। अन्नं नाम खाद्यः आहारः, अन्नादो नाम खादकः, अन्नम् अन्नादश्च उभयमपि ब्रह्मस्वरूपमेव। आत्मज्ञानिनः पूर्णदृष्ट्या उच्चनीचभेद एव नास्ति। सर्वेषु पदार्थेषु परिपूर्णः एक आत्मा नाम ब्रह्मैव। ज्ञानिनः अनुभवोऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वैष्णवपदनिष्ठाय वेदान्तभास्कराय नमः॥

वेदशास्त्रपुराणानि ब्रह्मचर्यं दमस्तपः।
यदर्थं तद्विजानीयात् ब्रह्म **वेदान्तभास्करः**॥

वेदाः, शास्त्राणि, पुराणानि च यत् तत्त्वम् उपदिशन्ति; ब्रह्मचर्यं, दमः, तपश्च यत्प्राप्त्यर्थम् अनुष्ठीयन्ते तत् परं ब्रह्मैव आत्मत्वेन ज्ञातव्यम्॥

एप्रिल् ३

१४. ज्ञानार्थमेव सकलान्यपि साधनानि

सर्वे वेदा यत्पदम् आमनन्ति तपांसि सर्वाणि च यद्वदन्ति।

काठकोपनिषत् १-२-१५

सर्वे वेदाः यत् तत्त्वम् उपदिशन्ति, सर्वाणि तपांसि च यत्प्राप्त्यर्थानि अनुष्ठीयन्ते तदेव ब्रह्म। तदेव जानीयात्।

अस्माकं भारतीयसंस्कृतौ अध्ययनयोग्याः ग्रन्थाः लक्षशः विद्यन्ते। न कश्चिदपि तान् सर्वान् ग्रन्थान् एकस्मिन् जन्मनि पूर्णतया पठितुं समर्थो भवति। तेषां सारतया वेदाः, उपनिषदः, वेदाङ्गानि, महाभारतम्, पुराणानि, इतिहासः—इति संगृह्यन्ते। एतेऽपि ग्रन्थाः न अल्पसंख्यया विद्यन्ते। सर्वैरप्येतैः वेदशास्त्रैः तात्पर्यतया प्रतिपाद्यमानम् एकमेव तत्त्वं नाम परं ब्रह्म॥

तथैव शताधिकानि नानाविधानि तपांसि च विद्यन्ते। तानि शारीरिकाणि, वाचिकानि, ऐन्द्रियकाणि, मानसानि च भवन्ति। ब्रह्मज्ञानप्राप्तिरेव हि एतेषां सर्वेषां तपसां परमं लक्ष्यम्। मानवजन्मनः परमं लक्ष्यं नाम आत्मज्ञानमेव। तदेव हि ब्रह्मज्ञानम्। ब्रह्मावगतिर्हि मोक्षसाधनं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापरहस्यविदे वेदान्तभास्कराय नमः॥

पुण्येन देवयोनित्वम् पापेन पशुयोनिताम्।
उभाभ्यां पुण्यपापाभ्यां नृत्वं **वेदान्तभास्करः**॥

पुण्येन कर्मणा देवजन्म, पापकर्मणा पशुजन्म लभ्यते; पुण्यपापाभ्यां समुच्चिताभ्यां तु मनुष्यजन्म मानवः प्रतिपद्यते॥

एप्रिल् ४

९५. कर्मानुगुणं जन्म

पुण्येन पुण्यं लोकं नयति, पापेन पापम्, उभाभ्यामेव मनुष्यलोकम्। प्रश्नोपनिषत् ३-७

उदानः सुषुम्नानाडीद्वारेण पुण्येन कर्मणा पुण्यलोकं नयति, पापेन कर्मणा पापलोकम् नयति, पुण्यपापमिश्रणेन मनुष्यलोकं नयति॥

सर्वस्य मानवस्य शरीरे एकोत्तरशतसङ्ख्याकाः नाड्यः वर्तन्ते। तासां मुख्या एका नाडी विद्यते, तस्याः **सुषुम्नानाडी** इति नाम। तया नाड्या उदानवायुः प्राणोत्क्रमणं कारयति॥

मानवानां प्रधानतया तिस्रः गतयो भवन्ति। शास्त्रविहितपुण्य-कर्मानुष्ठायिनाम् उत्तमा गतिः, उत्तमं जन्म लभ्यते। पितरः गन्धर्वाः, देवाः—तेषां लोकाः पुण्यलोकाः॥

पापकर्मभिः, शास्त्रनिषिद्धकर्मभिः पापलोकान् प्राप्नोति। श्वानः, जम्बूकाः, सर्पाः, वृश्चिकाः, क्रिमिकीटाः—तेषां जन्मानि पापलोकाः। पुण्यपापकर्मानुष्ठायिनां तु आगामिनि जन्मनि मनुष्यजन्मैव लभ्यते। कर्मानुगुणानि जन्मानि भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आचार्यपुङ्गवाय वेदान्तभास्कराय नमः॥

आचार्यानुग्रहादेव ब्रह्मविद्यां प्रपद्यते।
तस्मान्मुमुक्षुराचार्यं नमेत् **वेदान्तभास्करः**॥

आचार्यस्य अनुग्रहादेव मुमुक्षुः ब्रह्मविद्यां प्रपद्यते। तस्मात् मुमुक्षुः आचार्यं भक्त्या पूजयेत्॥

एप्रिल् ५

९६. आचार्यानुग्रहादेव ब्रह्मविद्याप्राप्तिः

आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्॥

तैत्तिरीयोपनिषत् १-३

आचार्यः पूर्वरूपम्, शिष्यः उत्तररूपम्। विद्या सन्धिः, प्रवचनं सन्धानम्॥

विद्यासम्पादनद्वारा कृतकृत्यताप्राप्तिर्हि मानवस्य प्रधानं कर्तव्यम्। तत्रापि ब्रह्मविद्या एव हि अन्वर्थविद्या। अनया एव मोक्षप्राप्तिः। मोक्ष एव मानवजन्मनः परमा गतिः। शिष्येणैव हि सम्पादनीया ब्रह्मविद्या? तस्याः प्रतिपादयिता आचार्यः॥

आचार्यस्य अनुग्रहादेव अस्माकं ब्रह्मविद्याप्राप्तिर्भवेत्। तस्मात् आचार्यस्य उच्चतमं स्थानमस्ति। आचार्य एव देवः, आचार्य एव च सर्वस्वं शिष्यस्य। आचार्यस्य सेवया, आचार्यस्य अनुग्रहादेव अस्माकम् आत्मज्ञानं प्राप्येत। प्रवचनं हि गुरुशिष्यौ उभावपि संयोजयति। एतयोः संयोगस्य फलमेव विद्या नाम। एवं हि साधकेन मन्तव्यम्। सद्गुरूपासनेन योग्याय शिष्याय आत्मज्ञानोदयो भवति। ततः मोक्षप्राप्तिश्च फलम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् ''अहं ब्रह्मास्मि''विदे वेदान्तभास्कराय नमः॥

'अहं ब्रह्मास्मि' यो वेत्ति ह्यात्मानं निरुपाधिकम्।
सर्वात्मभावमाप्नोति धीरो **वेदान्तभास्करः**॥

यः आत्मानं ''निरुपाधिक ब्रह्म अहं अस्मि'' इति वेत्ति, सः धीरः सर्वात्मभावम् आप्नोति॥

एप्रिल् ६

९७. ''अहं ब्रह्मास्मि''महिमा

ब्रह्म वा इदमग्र आसीत्, तदात्मानमेवावेत् 'अहं ब्रह्मास्मि' इति। तस्मात् तत् सर्वमभवत्॥

बृहदारण्यकोपनिषत् १-४-१०

अग्रे इद सर्वं ब्रह्मैव आसीत्। तद् ब्रह्म आत्मानमेव ''अह ब्रह्मास्मि'' इति अजानात्। तेन तद् ब्रह्म सर्वम् अभवत्॥

''अहं ब्रह्मास्मि'' इत्येतत् एक महावाक्यम्। शुक्ल-यजुर्वेदीयायाः बृहदारण्यकोपनिषदः सारभूतोऽय मन्त्रः ''अहं ब्रह्मास्मि'' इति। अय मन्त्रः जीवब्रह्मणोः ऐक्यम् उपदिशति। प्रज्ञानं ब्रह्म, अह ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म, इति हि चत्वारि वाक्यानि वेदान्तमहावाक्यानि इति सुप्रसिद्धानि सन्ति। कल्पितं जीवत्वम् अपोद्य अस्य जीवस्य ब्रह्मत्वम् उपदिशन्ति एते मन्त्राः॥

'अह ब्रह्मास्मि' इत्यत्र 'अहं' इति जीवः, 'ब्रह्मास्मि' इति चिन्मात्र तत्त्वम्, अस्मि इत्यर्थः। नाहं जीवः, किं तु ब्रह्मैवास्मि इत्यर्थः। जीवभावः आविद्यकः कल्पितः, आभासमात्रः। ब्रह्मस्वरूपमेव सहजं, पारमार्थिकम्। विचारे कृते एतत् स्पष्टतया ज्ञायते। वेदान्तवाक्यार्थविचारेण इदं रहस्यं ज्ञायते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वात्मस्वरूपविदे वेदान्तभास्कराय नमः॥

आत्मैवेदं जगत् सर्वं ब्रह्मक्षत्रादिरूपकम्।
वेदा देवाश्च लोकाश्च आत्मा **वेदान्तभास्करः**॥

ब्रह्मक्षत्रादिरूपकम् इदं सर्वं जगत् आत्मैव। सर्वे वेदाः देवाः लोकाश्च आत्मैव॥

एप्रिल् ७

९८. इदं सर्वम् आत्मैव

इदं ब्रह्म, इदं क्षत्रम्, इमे लोकाः, इमे वेदाः, इमे देवाः, इमानि भूतानि, इदं सर्वं यदयमात्मा।

बृहदारण्यकोपनिषत् २-४-६

इदं ब्रह्म, इदं क्षत्रम्, इमे लोकाः, इमे वेदाः, इमे देवाः, इमानि भूतानि–इत्येतत् सर्वम् आत्मैव।

'इदं सर्वं यदयमात्मा' इत्येषः प्रसिद्धो मन्त्रः। ''इदं सर्वम् आत्मैव'' इति अस्य मन्त्रस्य अर्थः। 'इदं सर्वम्' इत्युक्ते सर्व शब्देन किं किं स्वीकार्यम्? इति संशये अयं मन्त्रः तं परिहरति। ब्रह्म, क्षत्रियम्, वैश्यम्, शूद्रम् इति चत्वारोऽपि वर्णाः आत्मैव। ब्रह्मचर्यम्, गार्हस्थ्यम्, वानप्रस्थता, संन्यासः इति चत्वारोऽपि आश्रमाः आत्मैव। अतल वितल सुतल रसातल तलातल महातल पातालाख्याः सप्त अधोलोकाः आत्मैव। भूः भुवः सुवः महः जनः तपः सत्याख्याः ऊर्ध्वलोकाः सप्त आत्मैव॥

ऋग्वेद यजुर्वेद सामवेद अथर्ववेदाख्याः चत्वारोऽपि वेदाः आत्मैव। इन्द्र आदित्य वरुण मित्राद्याः सर्वे देवाश्च आत्मैव। एताः सर्वाः प्रजाश्च आत्मैव। इदं सर्वम् आत्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवतास्थानमर्मविदे वेदान्तभास्कराय नमः॥

जन्ममृत्युसमुद्रेऽस्मिन् शोकमोहादिरूपके।
प्रापतन् इन्द्रचन्द्राद्याः देवा **वेदान्तभास्करः**॥

इन्द्रचन्द्राद्याः देवाः शोकमोहादिरूपे अस्मिन् जन्ममृत्युरूपे संसारसमुद्रे प्रापतन्।

एप्रिल् ८

९९. देवा अपि संसारमग्ना एव

ता एता देवताः सृष्टाः अस्मिन् महत्यर्णवे प्रापतन्।

ऐतरेयोपनिषत् १-२-१

परमात्मना सृष्टाः एते इन्द्रादयो देवाः अस्मिन् ससारसागरे निपतितवन्तः।

इन्द्र आदित्य चन्द्रादयो देवाः मानवदृष्ट्या श्रेष्ठाः महान्त एव, तेषाम् अद्भुतानि शक्तिसामर्थ्यानि विद्यन्ते। सत्यमेतत्। तावन्मात्रेण न ते देवाः परमेव ब्रह्म। एते देवाः परस्माद् ब्रह्मणो हि जाताः। जाता एते देवाः मानववदेव महाससारिण एव॥

एते देवा अपि संसारसागरे एव निमग्नाः परिच्छिन्नात्मान एव, न तु परं ब्रह्म। देवाधिदेवा अपि संसारिण एव। अत्र ससारो नाम रागद्वेषौ, शोकमोहौ, इष्टानिष्टे, शोभनाशोभने, जन्ममरणे—इत्यादिरूपं द्वन्द्वमेव; देवानामपि द्वन्द्वम् अस्त्येव॥

देवत्वमात्रेण न तैः ब्रह्मज्ञानिभिर्भाव्यम्। न तैः ब्रह्मनिष्ठैर्भाव्यम्। देवाः अमरा एव भवन्ति न तु अमृतात्मानः। आत्मज्ञानादेव अमृतत्वम्, आत्मज्ञानादेव च मुक्तिः लभ्यते, न तु अन्यथा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सूत्रात्मतत्त्वविदे वेदान्तभास्कराय नमः॥

ब्रह्माधीनतया प्राणः वायुः सूत्रात्मको रविः।
विधत्ते सर्वकर्माणि नूनं **वेदान्तभास्करः**॥

सूत्रात्मको वायुः प्राणः रविः ब्रह्माधीनतया सर्वकर्माणि विधत्ते।

एप्रिल् ९

१००. परमात्मा सूत्रात्मा च

तस्मिन्नपो मातरिश्वा दधाति।

ईशावास्योपनिषत् ४

तस्मिन् परस्मिन् ब्रह्मणि सति एव हिरण्यगर्भः कर्मफलानि विदधाति।

प्राणिनां कर्मफलदाता भगवानेव। परमात्मा हि कर्मणां कर्मफलानां च केवलं साक्षिभूतः। ''कर्माध्यक्षः'' इति हि तस्य नाम। चैतन्यरूपेण सूर्यवत् कूटस्थः परमात्मा वर्तते॥

तर्हि कर्मफलनियामकः कः? स एव हिरण्यगर्भः। अयं हि सर्वेषां प्राणिनाम् अन्तर्यामितया समष्टिरूपः प्राणात्मा। अयमेव आध्यात्मिकोपाधिना **प्राणः** इति **वैश्वानरः** इति च व्यपदिश्यते। अयमेव आधिभौतिकोपाधिना **वायुः** इति **मातरिश्वा** इति च उपदिश्यते। आधिदैविकोपाधिना अयमेव **हिरण्यगर्भः विराट् पुरुषः, सूत्रात्मा** च इति उच्यते॥

परमात्मनः अधीनतया अयं हिरण्यगर्भः अस्य विश्वस्य सृष्टिस्थितिलयकर्माणि कुर्वाणः कर्मफलनियमान् च करोति। परमात्मनि न कोऽपि विकारः सम्भवति। परं ब्रह्म तु स्वतः परिपूर्णं कूटस्थं सत्यं चिन्मात्रस्वरूपम् अद्वितीयं च वर्तते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं धीरज्ञानिपुङ्गवाय वेदान्तभास्कराय नमः॥

आत्मानं पुरुषं ज्ञात्वा ह्यमृतोऽहं सनातनः।
ब्रह्मज्ञानी वदत्येवं धृत्या **वेदान्तभास्करः**॥

''पूर्णः परमात्मा एव अहमस्मि इति ज्ञात्वा अहं सनातनः अमृतश्चास्मि'' इति ब्रह्मज्ञानी धैर्येण उद्घोषयति।

एप्रिल् १०

१०१. ज्ञानिनः सानन्दः उद्गारः

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात्।
तमेव विदित्वा अतिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय॥ श्वेताश्वतरोपनिषत् ३-८

तमसः परस्तात्, आदित्यवर्णं, तं महान्त पुरुषम् अहम् विदित्वा धन्योऽस्मि। हे मानवाः, तम् आत्मानं ज्ञात्वा यूयमपि मृत्यु तरथ, अमृतत्वं प्राप्तुम् आत्मज्ञानात् मार्गान्तर नास्त्येव॥

परब्रह्म स्वस्वरूपत्वेन विज्ञाय कृतार्थस्य महर्षेः सानन्दः धीरः उद्गारोऽयम्। स्वयं परमात्मैव इति अनुभूय ऋषिः एवम् उद्घोषयति। ''अहम् आदित्यवत् भास्वरूपम् आत्मानम् दृष्टवानस्मि, अनेन ज्ञानेन अह कृतार्थोऽस्मि। अहो! आत्मज्ञानस्य महिमा कियान्! अहहा, आत्मज्ञानस्य फलम् अमृतत्वम् अद्भुतमिव''॥

अनन्तरं च तस्य ज्ञानिनः सन्देशोऽयम् ''हे मानवाः इमम् आत्मानम् एवं ज्ञात्वा यूयमपि अमृतात्मानः भवथ, आत्मज्ञानादेव युष्माक मुक्तिः, कैवल्यम्। मोक्षाय अन्यः मार्ग एव नास्ति''॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अन्तरात्मविदे वेदान्तभास्कराय नमः॥

आत्मा प्रियतमो ज्ञेयः पुत्रात् वित्तात् कळत्रतः।
अयमात्मा परं ब्रह्म ज्ञेयो **वेदान्तभास्करः**॥

पुत्रात् वित्तात् पत्नीतोऽपि अयमेव आत्मा प्रियतमः इति ज्ञेयः। अयम् आत्मैव परं ब्रह्म इति जानीयात्॥

एप्रिल् ११

१०२. आत्मैव अत्यन्तं प्रियः!

तदेतत् प्रेयः पुत्रात्, प्रेयो वित्तात्, प्रेयोऽन्यस्मात् सर्वस्मात् अन्तरतमं यत् अयमात्मा। बृहदारण्यकोपनिषत् १-४-८

सोऽयमात्मा पुत्रात् प्रियः, वित्तात् प्रियः, अन्यस्मात् सर्वस्मादपि प्रियः, अयम् आत्मा सर्वस्मादपि अन्तरतमः॥

आत्मा नाम स्वयमेव। आप्नोति इति आत्मा। अयमेव आत्मा अस्माभिः ज्ञेयः, अयमेव च प्राप्तव्यः। अस्य आत्मनः ज्ञानेनैव ब्रह्मानन्दप्राप्तिः, आत्मज्ञानानन्द एव परमः पुरुषार्थः। तस्मात् आत्मैव ज्ञेयः॥

कुतः एतत्? यतः आत्मैव सर्वस्मादपि प्रियतमः। लोके हि पत्नी-पुत्र-गृहवाहनादीनि अस्माकं प्रियत्वेन प्रसिद्धानि सन्ति खलु? कुतः, इति ज्ञायते वा? आत्मार्थत्वात्। आत्मा हि नाम स्वयम्। आत्मा नाम स्वरूपम्। पुत्रादपि आत्मा आत्मनः अत्यन्तं प्रियः। पत्न्याः अपि आत्मा आत्मनः अत्यन्तं प्रियः। पत्युः अपि आत्मा आत्मनः अत्यन्तं प्रियः खलु? अस्मिन् प्रपञ्चे सर्वेभ्यः प्रियवस्तुभ्योऽपि आत्मैव आत्मनः प्रियतमः खलु? तस्मात् अस्मिन् आत्मनि एकस्मिन् विज्ञाते सर्वमिदं विश्वमेव विज्ञातं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सच्छिष्यलक्षणबोधकाय वेदान्तभास्कराय नमः॥

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयादनृतं कदा।
सच्छिष्यलक्षणं ह्येतत् ब्रूते **वेदान्तभास्करः**॥

सत्यमेव ब्रूयात्, प्रियमेव ब्रूयात्, न कदापि अनृत ब्रूयात्। एतत् सच्छिष्यलक्षणम्।

एप्रिल् १२

१०३. सच्छिष्यस्य लक्षणमिदम्

सोऽहं सत्यकामो जाबालोऽस्मि भोः इति।

छान्दोग्योपनिषत् ४-४-४

भोः गुरवः, अहं सत्यकामजाबालोऽस्मि इति शिष्यः अवदत्।

सत्यकामो नाम बालकः गुरोः समीप गत्वा ''भगवन्, अहं भवत्कुले ब्रह्मचर्यवासं कर्तुमिच्छामि, कृपया अनुमन्यताम्'' इति प्रार्थितवान्। तदा गुरुः ''तव गोत्रं किम्?'' इति अपृच्छत्। तदा सः बालकः सविनयम् एवम् अवदत्॥

तद्यथा ''भोः आचार्य, यदा अहम् इमं विषयमधिकृत्य मम मातरम् अपृच्छम्, तदा सा 'बालिकावस्थायामेव मम विवाहो जातः, अहम् अनेकेषु गृहेषु परिचारिका सती कर्माणि कुर्वन्ती आसम्, तदा एव त्व मयि जातः, अतः अहम् न तव गोत्रं वा पितरं वा जानामि; अपि तु अहं जबाला, त्वं च सत्यकामः। जबालायाः अपत्यं पुमान्, त्वं सत्यकामजाबालः इत्येव आत्मानं कथय' इति उक्तवती'' इति सत्यमेव अवदत्। अतः 'अहं सत्यकामजाबालोऽस्मि भोः' इति अब्रवीत्। इदं हि शिष्यस्य सत्यव्रतित्वं सत्यनिष्ठता च। इदमेव हि सच्छिष्यस्य लक्षणम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मप्रवेशरहस्यविदे वेदान्तभास्कराय नमः॥

ब्रह्म सृष्ट्वा जगत् सर्वं प्रविवेश स्वयं ततः।
ब्रह्मैवेदं जगत् तस्मात् नूनं **वेदान्तभास्करः**॥

ब्रह्म सर्वं जगत् सृष्ट्वा ततः स्वयमेव प्रविवेश, तस्मात् इदं जगत् नूनं ब्रह्मैव॥

एप्रिल् १३

१०४. जगदन्तः सर्वं ब्रह्मैव

तत् सृष्ट्वा। तदेवानुप्राविशत्॥

तैत्तिरीयोपनिषत् २-६-६

तद् ब्रह्म इमं प्रपञ्चं सृष्ट्वा अनन्तरं स्वयमेव इम प्रपञ्चं प्राविशत्।

परमात्मा हि सर्वज्ञः सर्वशक्तश्च। स परमात्मा स्वयमेव इदं जगत् सृष्टवान्। सर्वज्ञत्वात् परमात्मा अस्य जगतः निमित्तं कारणम्, सर्वशक्तत्वाच्च स एव उपादानकारणं च। सर्वथापि परमात्मा स्वयमेव आत्मानमेव प्रपञ्चरूपेण सृष्टवान्, इमान् देहादीन् च स एव सृष्टवानस्ति॥

इमं देहं सृष्ट्वा स भगवान् स्वयमेव इमं देहं प्रविष्टवान्। सन्देशस्यास्य रहस्यं किं वा भवेत्? इति चिन्त्यम्। अस्मिन् देहे जीवरूपेण, कर्तृभोक्तृरूपेण प्रमातृरूपेण च अवभासमानः स एव सृष्टिकर्ता भगवान्। संसारिजीवरूपेण अवभासमानः अयम् आत्मा परमार्थतः असंसारी परमात्मैव। नित्यशुद्धः आत्मैव देहाद्युपाधि-सम्बन्धेन संसारीव जीवात्मा इव च अवभासते। परमार्थतस्तु जीवात्मा नाम परमात्मैव इत्यर्थः। 'ब्रह्म देहं प्रविष्टम्' इत्युक्ते एष एवार्थः। जीवस्य संसारित्वम् अविद्याकल्पितम् इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुहृदयविदे वेदान्तभास्कराय नमः॥

शरीरमिन्द्रियं चैव मनोबुद्धी तथैव हि।
विद्यायोग्यं सदा भूयात् पुंसो **वेदान्तभास्करः**॥

मम शरीरम्, इन्द्रियाणि, मनोबुद्धी इत्येतत् सर्वं सदा ब्रह्मविद्याप्राप्तिसाधनं भूयात् इति मुमुक्षोः प्रार्थना।

एप्रिल् १४

१०५. मुमुक्षोः प्रार्थना इयम्

शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्॥ तैत्तिरीयोपनिषत् १-४

मम शरीरं नीरोग सत् आत्मज्ञानप्राप्तियोग्यं भवतु। मम जिह्वा मधुमती भवतु। अह कर्णाभ्या ब्रह्मविचारमेव सदा शृणुयाम्॥

मुमुक्षुसाधकः प्रणवस्वरूपं परमात्मानम् अस्मिन् मन्त्रे एवं प्रार्थयते। "भोः परमात्मन्, मम शरीरं रोगवर्जितं सत् आत्मज्ञान-प्राप्तियोग्यं भवतु। आत्मज्ञानमेव मानवशरीरस्य, मानवजन्मनः परम प्रयोजनम्। आरोग्यं हि न विषयभोगाय, किं तु आत्मज्ञानाय। आरोग्ये सत्येव खलु श्रवणादिद्वारा ज्ञानप्राप्तिर्भवति?

दैवदत्तया जिह्वया नाहं कञ्चिदपि निन्देयम्। मनुष्याय भगवता दत्ता महती सम्पत् नाम जिह्वा। अनया रसनया मधुरमेव वचः अहं वदेयम्। श्रोत्राभ्यां सदा अहं वेदान्तसन्देशमेव शृणुयाम्। ब्रह्मैवेदं विश्वम्, आत्मैवेदं सर्वम्, अहं ब्रह्मास्मि, ईशावास्यमिदं सर्वम्—इत्यादिरूपान् पवित्रान् वेदान्तसन्देशानेव वय सर्वदा शृणुयाम इति हि मुमुक्षोः प्रार्थना॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जन्मसार्थक्यरहस्यविदे वेदान्तभास्कराय नमः॥

इहैव ब्रह्मणि ज्ञाते जिज्ञासोर्जन्म सार्थकम्।
निरर्थकं न चेत्तस्य सत्यं **वेदान्तभास्करः**॥

इहैव जन्मनि ब्रह्मणि ज्ञाते सति जिज्ञासोः जन्म सार्थकं भवति। अथ, ब्रह्म न ज्ञातं चेत् मनुष्यस्य जन्म निरर्थकमेव। एतत् सत्यम्॥

एप्रिल् १५

१०६. अविज्ञाते महती हानिः

इह चेदवेदीदथ सत्यमस्ति, न चेदिहावेदीत् महती विनष्टिः।

केनोपनिषत् २-५

अस्मिन्नेव जन्मनि आत्मानं जानाति चेत् तदा साधकस्य सत्यवस्तुनः प्राप्तिर्भवेत्, न जानाति चेत् तदा महती हानिः।

इदं मानवजन्मैव अत्यन्तदुर्लभम् तथा अत्यन्तश्रेष्ठम्। पूर्वजन्मसु कृतानां पुण्यकर्मणां फलत्वेन अद्य अस्माकम् ईदृशम् उत्तमोत्तमं मानवजन्म प्राप्तमस्ति। ईदृशे पवित्रे मानवजन्मनि उत्तमं श्रेष्ठमेव फलं प्राप्तव्यं खलु? नौव्यापारं चिकीर्षुः चणकव्यापारं कर्तुं नेच्छति हि?

भवतु, तर्हि, अस्मिन् मानवजन्मनि बुद्धिमता पुरुषेण किं वा सम्पादनीयम्? आत्मज्ञानम्। आत्मैव गुरुतरं सारतमं च तत्त्वम्। आत्मैव हि समस्तस्यापि जगतः आधारभूतं मूलं वस्तु। मानवस्यैव ईदृशम् आत्मानं विज्ञातुं सुवर्णावकाशः। तस्मात् आत्मज्ञानम् सम्पादनीयमेव। तदैव मानवजन्मप्राप्तेः सार्थक्यम्। प्रत्यगात्मनि अविदिते तु महती हानिरेव स्यात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रेष्ठबुद्धिमते वेदान्तभास्कराय नमः॥

बुद्धिमान् श्रेय आदद्यात् मंदः प्रेयसि वर्तते।
श्रेय एव परो मोक्षः इति **वेदान्तभास्करः**॥

बुद्धिमान् श्रेयः आदद्यात्। मन्दस्तु अज्ञः प्रेयसि वर्तते। परो मोक्ष एव श्रेयः॥

एप्रिल् १६

१०७. अयमेव कुशलः, बुद्धिमान्

तयोः श्रेय आददानस्य साधु भवति। हीयते अर्थात् य उ प्रेयो वृणीते॥

काठकोपनिषत् १-२-१

तयोः मध्ये यः श्रेयः स्वीकरोति तस्य मोक्षरूपं सत्यं फलं लभ्यते, यस्तु प्रेयः अपेक्षते सः मोक्षात् श्रेयसः अधः पतति॥

श्रेयः, निःश्रेयसम्, मोक्षः, अमृतत्वम्, कैवल्यम् इति पर्यायपदानि। इदमेकमेव शाश्वतं फलम्। बुद्धिमता साधकेन अनित्यानि फलानि विहाय, नित्यं शाश्वतम् अजम् अजरम् अमृतम् अभयम् अद्वितीयं च मोक्षफलमेव प्राप्तुं प्रयत्नः कर्तव्यः। मुमुक्षुसाधकः एक एव धीरः, एष एव च बुद्धिमान्, विवेकी, पण्डितश्च। अय हि आत्मज्ञानं लब्ध्वा तेन मोक्षमेव लब्ध्वा कृतार्थो भवति। जन्ममरणरूपात् संसारचक्रात् आत्मानं विमोच्य कृतकृत्यो भवति अयं धीरो मुमुक्षुः॥

मोक्षमार्गे प्रयत्नमेव अकृत्वा प्रेयोमार्गे एव निमग्नस्य अनित्यान्येव फलानि लभ्यन्ते। तुषान्येव स्वीकुर्वतः तावतैव तुष्यतः अविवेकिनः सारतमाः तण्डुलाः लभ्यन्ते किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भेददर्शनरहिताय वेदान्तभास्कराय नमः॥

भेददर्शनमेवास्य भयहेतुः सदैव हि।
भेदसन्दर्शनादेव बन्धो **वेदान्तभास्करः**॥

अस्य अज्ञस्य भेददर्शनमेव सदा भयहेतुः। भेददर्शनादेव बन्धः॥

एप्रिल् १७

१०८. भेदज्ञानमेव भयहेतुः

यदा ह्येवैष एतस्मिन् उदरमन्तरं कुरुते। अथ तस्य भयं भवति॥

तैत्तिरीयोपनिषत् २-७-५

यदा एतस्मिन् ब्रह्मणि अज्ञः कश्चिदपि भेदं पश्यति, ततः तस्य भयं भवति॥

लोके भयं नाम सर्वेषामपि ज्ञात एव विषयः। भयं नाम भीतिः। भयस्य अनुभवः कस्य नास्ति? ब्रह्माणम् आरभ्य पिपीलिकापर्यन्तानां सर्वेषां प्राणिनाम् भयम् अस्त्येव। मानवेभ्य एव मानवानां भयम्। धनवतां स्वपुत्रेभ्य एव भयम्। हिंस्रमृगेभ्यः मानवानाम्, मानवेभ्यः तेषां क्रूरप्राणिनां च परस्परं भयं दृश्यते। अस्मिन् प्रपञ्चे सर्वत्रापि सर्वमपि भयमयमेव। सर्वं भयमयं जगत्॥

किमत्र कारणम्? इति पृष्टे प्रतिवचनं ददाति अयं मन्त्रः। आत्मनि भेददर्शनमेव भयहेतुः। आत्मनः परिपूर्णब्रह्मत्वम् अविज्ञाय, अविद्यया आत्मानं परिच्छिन्नं जीवं मन्यते खलु। तदेव भयकारणम्। अहम् अन्यः, ब्रह्म च अन्यत् इति अन्यथाज्ञानमेव भयस्य कारणम्। आत्मनः ब्रह्मणश्च भेददर्शनादेव आत्मनः भयं भवति। आत्मानं परिपूर्णब्रह्मत्वेन विजानतः भयं विद्यते वा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मानवजन्मसाफल्यविदे वेदान्तभास्कराय नमः॥

इहैव यत्नः कर्तव्यः मोक्षप्राप्त्यै विवेकिना।
नो चेज्जन्मान्तरं नूनम् इति **वेदान्तभास्करः**॥

मोक्षप्राप्त्यै विवेकिना इहैव यत्नः कर्तव्यः। नो चेत् तस्य अज्ञस्य जन्मान्तर नूनं सम्भवति॥

एप्रिल् १८

१०९. अत्रैव विज्ञाते साफल्यम्

इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः।

काठकोपनिषत् २-३-४

अस्य शरीरस्य पतनात् पूर्वम् आत्मानं जानाति चेत् स एव कृतकृत्यः।

आत्मज्ञानप्राप्त्यर्थमेव इदं मानवजन्म अस्माकं प्राप्तमस्ति। उपाधिरहितस्वरूप एव हि आत्मा नाम। अयमेव आत्मा ब्रह्म इति श्रुतयः प्रतिपादयन्ति। आत्मनि ब्रह्मत्वेन अवगते तद् आत्मज्ञानं भवति, आत्मनि देहत्वेन विज्ञाते तद् भ्रान्तिज्ञानं भवति। भ्रान्तिज्ञानमेव अध्यासः। अध्यासादेव जन्ममरणानि, अनर्थाः, दुःखपरम्पराश्च भवन्ति॥

इदं शरीरम् अनित्यं क्षणिकं च। कदा कुत्र कस्मै किं भवति? इति वा, कस्मिन्क्षणे अयं देहः पतेद्? इति वा न कोऽपि जानाति। न ज्ञायते, न च ज्ञातव्यम्। बुद्धिमद्भिः मानवैः अवश्यं कर्तव्यं नाम ''आत्मनः विज्ञानम्''। आत्मज्ञानं यद्यपि कष्टमिव दृश्यते, तथापि नैव कष्टं, किं तु सुसुखमेव। दुर्लभमपि आत्मज्ञानं विवेकिना सम्पादनीयमेव। तदैव मानवजन्मनः सार्थक्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्माभिन्नजगत्दर्शकाय वेदान्तभास्कराय नमः॥

ब्रह्मत्यक्तं ब्रह्मभिन्नं दृष्टं चेत् जगदीदृशम्।
तिरस्कुर्यात् तदा मूढं बालं **वेदान्तभास्करः**॥

यः मूढः इदं विश्वं ब्रह्मभिन्नमिव पश्यति तादृशं मूढं बालम् तदीदृशं जगत् तिरस्करोति।

एप्रिल् १९

११०. प्रपञ्चः ईदृशं तिरस्करोति

ब्रह्म तं परादात् योऽन्यत्र आत्मनो ब्रह्म वेद; क्षत्रं, लोकाः, देवाः, भूतानि, सर्वं तं परादात् योऽन्यत्र आत्मनः सर्वं वेद।

बृहदारण्यकोपनिषत् २-४-६

आत्मनः भिन्नत्वेन येन दृष्ट ब्राह्मण्यम् तं मूढं तत् निराकरोति, तथा आत्मनः भिन्नत्वेन येन दृष्टा क्षत्रियजातिः तं सा तिरस्करोति; तथा लोकाः देवाः भूतानि आत्मनः भिन्नत्वेन ज्ञातानि चेत् तदा तादृशं मूढं तानि सर्वाणि तिरस्कुर्वन्ति॥

न किञ्चित् वस्तु आत्मनः भिन्नतया जीवेत्। आत्मनः भिन्नतया न किञ्चित् वस्तु परमार्थतः अस्ति। इदं रहस्यम् अविज्ञाय अज्ञानिनः दुःखकूपे पतिताः सन्तः नित्यदुःखिनो भवन्ति॥

तस्मात् आत्मनः भिन्नत्वेन दृष्टं यत्किञ्चित् वस्तु भवतु, तत् स्वयं नैव सन्तोषम् अनुभवति। न केवलं तावदेव, किं तु तादृशं वस्तु तथादर्शिनं निराकरोति। आत्मनः भिन्नत्वेन दृष्टाः लोकाः तथादर्शिनम् अज्ञानिनं तिरस्कुर्वन्ति। आत्मनः भिन्नत्वेन ज्ञाताः देवाः तम् अज्ञानिनं मूढत्वेन निराकुर्वन्ति। भूतानि, प्राणाश्च आत्मनः भिन्नत्वेन दृष्टाश्चेत् ते तं भेददर्शिनं तिरस्कुर्वन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्ति'राजमार्ग'विदे वेदान्तभास्कराय नमः॥

देशकालापरिच्छिन्नं मत्वात्मानं विमुच्यते।
विमुक्तये भवेत् पन्थाः नान्यो **वेदान्तभास्करः**॥

आत्मान देशकालापरिच्छिन्नं मत्वा मुक्तो भवति। मुक्तेः अयमेव राजमार्गः, अन्यः मार्गः नास्त्येव।

एप्रिल् २०

१११. मुक्तेः राजमार्गोऽयम्

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये॥

कैवल्योपनिषत् १-९

भूतं, भवत्, भविष्यत्—इत्येतत् सर्वमपि आत्मैव। तादृशं परमात्मानं ज्ञात्वा मृत्युमत्येति। मोक्षस्य अन्यः पन्था नास्ति॥

मोक्षो नाम मरणात् मुक्तिः। आत्मज्ञानस्य फलमेव मुक्तिः। ज्ञानं नाम ब्रह्मज्ञानमेव। ब्रह्मैवाहमस्मि इति ज्ञानमेव ब्रह्मज्ञानम्। 'ब्रह्मज्ञानिनः मरणं नास्ति, ब्रह्मज्ञानी न म्रियते, ब्रह्मज्ञानिनः मरण भयं नास्ति' इति श्रुतयः पुनः पुनः उद्घोषयन्ति। अस्य रहस्यस्य आशयम् अयं मन्त्रः उपदिशति॥

ब्रह्म नाम न हि कश्चित् देवः। देवाः देशकालपरिच्छिन्नाः। देवताः नामरूपैः ससारबन्धनैः परिच्छिन्नाः। ब्रह्म तु न देशकाल नामरूपैः परिच्छिद्यते। तदा अद्य श्वः इति कालत्रयम्, तत्र अत्र इति देशं च अतीत्य परिशुद्धतया परं ब्रह्म अस्माकं स्वरूपतयैव अवतिष्ठते। एवंविजानतो धीरस्य कस्मात् कुत्र कथं वा भय प्राप्तिर्भवेत्? मोक्षस्य राजमार्गोऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वीतशोकाय वेदान्तभास्कराय नमः॥

अणोरणीयानात्मायं सर्वभूतगुहाशयम्।
वीतशोको हीशभक्तो ज्ञात्वा **वेदान्तभास्करः**॥

अयम् आत्मा अणोः अणीयान् अस्ति, सर्वभूतगुहाशयं इमम् आत्मानं ज्ञात्वा, ईशभक्तः सन् वीतशोको भवति।

एप्रिल् २१

११२. प्रश्नचतुष्टयस्य प्रतिवचनान्यत्र

अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमात्मनः॥ श्वेताश्वतरोपनिषत् ३-२०

आत्मा अणोः अणीयान्, महतो महीयान् सन् सर्वेषां प्राणिनां गुहायां वसति। परमात्मनः अनुग्रहेण आत्मानं विज्ञाय दुःखरहितो भवति॥

आत्मा कुत्रास्ति? कथमस्ति? तस्य अवगतिः कथम्? तस्य ज्ञानेन किं वा फलं भवति? इति चतुर्णामपि प्रश्नानाम् प्रतिवचनानि अयं मन्त्रः सुन्दरतया उपदिशति॥

परमात्मा सर्वप्राणिनां हृदये वसति। सः सूक्ष्मः स्थूलश्च भवति। आत्मा परमाणोरपि सूक्ष्मः, पृथिव्याः अपि महान्। ईदृशम् आत्मानम् अवगन्तुं साधकः भगवद्भक्तः भवेत्, ततः भगवतः अनुग्रहं लभेत। जिज्ञासुर्हि शमदमादिसाधनसम्पन्नो भवेत्। अस्य आत्मनः ज्ञानेन साधकः सर्वदुःखानि अत्येति। आत्मनः महिमानं ज्ञात्वा आत्मवित् सर्वान् तापान् अतीत्य मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विगतदुःखाय वेदान्तभास्कराय नमः॥

प्रत्यगात्मनि विज्ञाते कामाभावः प्रकीर्तितः।
शोकमोहप्रहाणिः स्यात् नूनं **वेदान्तभास्करः**॥

प्रत्यगात्मनि विज्ञाते तस्य कामाभावः फलम् इति प्रकीर्तितम्, ततः शोकमोहप्रहाणिः नूनं स्यात्।

एप्रिल् २२

११३. ज्ञानेन दुःखनाशः

आत्मानं चेद्विजानीयात् अयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥

बृहदारण्यकोपनिषत् ४-४-१२

यः मानवः प्रत्यगात्मानम् आत्मत्वेन जानाति, सः किं फलम् इच्छन्, कस्य कामस्य प्राप्त्यर्थम् इदं शरीरम् अनु सज्वरेत्?

अयं हि सुप्रसिद्धो जनप्रियश्च मन्त्रः। आत्मतत्त्वे सम्यक् विज्ञाते सति तस्य धीरस्य दुःखमेव न विद्यते। 'अहं निरुपाधिकः असंसारी आत्मा' इति यः जानाति स एव धीरः। अस्य ज्ञानस्य 'ब्रह्मात्मविद्या' इत्यपि नाम भवति। 'अहं नित्यशुद्धनित्यबुद्ध-नित्यमुक्तः आत्मा अस्मि' इतिज्ञानमेव आत्मदर्शनं नाम। इदमेव च सत्यदर्शनं सम्यग्दर्शनं चेति कथ्यते॥

एवंविदः उपादेयं वा हेयं वा न किञ्चिदस्ति। किं वा एषः कामयेत्? सर्वमपि अहमेव इति जानतः कामाः न सम्भवन्ति खलु? एवं स्थिते अस्य सुखदुःखानि सम्भवन्ति वा? न कदापि सम्भवन्ति। सर्वात्मदर्शनसम्पन्नस्य आत्मज्ञानिनः संसारदुःखस्य सम्बन्धो नास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विधूताहङ्काराय वेदान्तभास्कराय नमः॥

ब्रह्मिष्ठो निरहङ्कारः दग्धाविद्यादिबन्धनः।
सर्वभूतात्मभूतोऽसौ धीरो **वेदान्तभास्करः**॥

धीरो **ब्रह्मिष्ठो** निरहङ्कारः दग्धाविद्यादिबन्धनः सन् असौ सर्वभूतात्मभूतः सम्पन्नः।

एप्रिल् २३

११४. अयमेव हि ब्रह्मिष्ठः!

स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्मः इति। बृहदारण्यकोपनिषत् ३-१-२

वयं ब्रह्मिष्ठाय नमः कुर्मः। गोकामा एव वयं स्मः—इति याज्ञवल्क्यः उवाच॥

जनकमहाराजः विदुषां सभाम् आयोज्य तत्र बहुदक्षिणाकं यज्ञम् आयोजितवान्। विदुषां विद्वत्तायै पणत्वेन एकसहस्रं गावः तेन तत्र स्थापिताः। तस्यां सभायां याज्ञवल्क्योऽपि अन्यतमः विद्वान्। सः आत्मनः शिष्यं **सामश्रवम्** आहूय ''सौम्य, इमाः गाः अस्मत्कुलं गमय'' इति अवदत्॥

अनन्तरम् उत्थाय सगौरवं याज्ञवल्क्यः इदं वाक्यम् अवदत् ''वयं गोकामाः, युष्मासु यः कोऽपि ब्रह्मिष्ठः अस्ति चेत् तस्मै अस्माकं नमस्काराः''। स्वयं ब्रह्मिष्ठः याज्ञवल्क्यः सम्यगधीत-काण्डद्वयः पण्डितोत्तमश्च, तथापि तेषां विदुषां संसदि 'अहं ब्रह्मिष्ठः' इति आत्मानं नैव स्तुतवान्। अध्यासरहितस्य ब्रह्मिष्ठस्य अहङ्काराभिमानयोः कुत्र वा अवकाशः? सौजन्यमूर्तिर्हि ब्रह्मिष्ठः? सर्वात्मकस्य ब्रह्मिष्ठस्य सौजन्यं नाम सहजं खलु?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'ईश्वरध्यान' मर्मविदे वेदान्तभास्कराय नमः॥

ईशध्यानात् सर्वैश्वर्यं ब्रह्मलोके समश्नुते।
आप्तकामो भवेत्तत्र नूनं **वेदान्तभास्करः**॥

ईशध्यानात् साधको ब्रह्मलोके सर्वैश्वर्यं समश्नुते। तत्र नूनम् आप्तकामो भवेत्॥

एप्रिल् २४

११५. ईशध्यानेन विदेहमुक्तिः

तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवलः आप्तकामः। श्वेताश्वतरोपनिषत् १-११

तस्य परमात्मनः ध्यानेन, देहपतनानन्तर विश्वैश्वर्यरूपा तृतीयाम् अवस्थां प्राप्नोति। ततः सः केवलं ब्रह्मस्वरूपः सन् आप्तकामो भविष्यति॥

वेदान्तेषु जीवन्मुक्तिः विदेहमुक्तिश्च इति मुक्तिः द्विधा विभज्यते। उत्तमाधिकारिणः ब्रह्मात्मज्ञानिनः अस्मिन्नेव जन्मनि जीवन्मुक्ता भवन्ति। एतेषां साक्षान्मार्गः, वस्तुतन्त्रज्ञानमार्गः, साक्षात् शुकमार्गः; अपरः परंपरामार्गः, पिपीलिकामार्गः, मन्दमध्यमाधिकारिणां सामान्यमार्गः॥

परब्रह्मोपासकाश्चेत् तादृशाः एतस्य शरीरस्य पतनानन्तरं हिरण्यगर्भस्य लोकं गच्छन्ति। तत्रलोके हिरण्यगर्भब्रह्मणा सह सर्वान् दिव्यान् भोगान् अनुभविष्यन्ति। अनन्तरं ब्रह्मणि लीयन्ते। तत्र ब्रह्मज्ञान प्राप्य ते आप्तकामाः भविष्यन्ति। अविद्याकामकर्मभिः बन्धनैः मुच्यन्ते। तेषां पुनर्जन्मनः सम्भवो नास्ति। इयमेव च विदेहमुक्तिः इति कथ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं चिन्मात्रस्वरूपनिष्ठाय वेदान्तभास्कराय नमः॥

चक्षुरादिविहीनोऽयम् आत्मा सर्वान् हि पश्यति।
नित्यचिन्मात्ररूपत्वात् इति **वेदान्तभास्करः**॥

अयम् आत्मा चक्षुरादिविहीनोऽपि सर्वान् विषयान् पश्यति। नित्यचिन्मात्रस्वरूपत्वात्॥

एप्रिल् २५

११६. अचक्षुः द्रष्टायम्

अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम्॥ श्वेताश्वतरोपनिषत् ३-१९

पाणिरहितोऽपि आत्मा सर्वान् गृह्णाति, पादरहितोऽपि वेगेन धावति, अचक्षुरपि सर्वान् पश्यति, अकर्णोऽपि सर्वान् शब्दान् शृणोति। सः आत्मा सर्वं वेद्यं वेत्ति, न तु तं कश्चिदपि वेत्ति। "स एव अस्य जगतः मूलं कारणम्, स एव महान् पुरुषः" इति वेदशास्त्रपुराणानि उपदिशन्ति॥

अत्र आत्मा नाम परमात्मा। अयम् आत्मा अवयवैः संयुक्तः न कश्चित् परिच्छिन्नो मनुष्यः। नायं कश्चित् व्यक्तिविशेषः। अस्य आत्मनः स्वीयान्येव चत्वारि वा अष्टौ, दश, द्वादश वा हस्तपादादीनि न हि विद्यन्ते। न च अयमात्मा पङ्गुर्वा अन्धो वा अस्ति। किं तु तेषामेव प्राणिनां, तेषामेव मनुष्याणां पाणिपादादीनि करणानि उपयुज्य आत्मा सर्वाणि कार्याणि करोति। न कश्चिदपि एनम् आत्मानं विषयीकृत्य पश्येत्। अचक्षुरपि द्रष्टायमात्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सौषुप्तानन्दविदे वेदान्तभास्कराय नमः॥

सुषुप्ते विद्यमानो यः परानन्द इति श्रुतः।
एषा हि परमा सम्पत् नूनं **वेदान्तभास्करः**॥

सुषुप्तौ विद्यमानः यः आनन्दः स एव परमानन्दः, एषा एव च परमा सम्पत् च इति श्रूयते।

एप्रिल् २६

११७. अयमेव निजानन्दः

एषाऽस्य परमा गतिः, एषाऽस्य परमा सम्पत्, एषोऽस्य परमो लोकः, एषोऽस्य परम आनन्दः।

बृहदारण्यकोपनिषत् ४-३-३२

एषा सुषुप्तिरेव आत्मनः परमा गतिः, एषा परमा सम्पत्, एष एव च परमो लोकः, एष एव च अस्य परमः आनन्दः॥

अयं मन्त्रः सुषुप्तेः महिमानं वर्णयति। सुषुप्तौ उपाधि-सम्बन्धाभावात् स्वानन्दामृतसागरे निमग्नोऽसौ आत्मा। जाग्रत् स्वप्नयोः अयमात्मा सर्वदा दुःखशोकमोहपरिपूर्ण इव दृश्यते। द्वैतसत्यत्वे सदा दुःखानि भवन्त्येव। एषः अनुभवः सार्वत्रिकः॥

सुषुप्तौ तु एवं दुःखानि नैव विद्यन्ते। एषा परमा गतिः। इतरास्तु सर्वा अपि गतयः दुःखपूर्णा एव। एषा गतिस्तु दुःखरहिता। तस्मात् इयं परमा गतिः। एषा परमा सम्पत्। सुषुप्तौ विद्यमाना सम्पत् स्वाभाविकी हि। अयमेव परमो लोकः। सर्वे इतरे लोकाः दुःखमिश्रिता एव। अयं तु लोकः दुःखरहितः। अयमेव परमः आनन्दः। सुषुप्तौ हि दुःखस्य गन्धोऽपि न विद्यते। इयं सार्वत्रिकी सहजा परिपूर्णा च आनन्दस्थितिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सम्यग्ज्ञानरहस्यविदे वेदान्तभास्कराय नमः॥

अज्ञानिनां ज्ञेयभूतमज्ञेयं ज्ञानिनां सदा।
इति सञ्जानतां मोक्षः इति **वेदान्तभास्करः**॥

ब्रह्म अज्ञानिनां 'ज्ञेयम्' विषयभूतम्; ज्ञानिनां तु 'अज्ञेयम्' अविषयभूतम् इति सञ्जानतां मुक्तिः भवति।

एप्रिल् २७

११८. ब्रह्मावबोधनक्रमोऽयम्

अविज्ञातं विजानताम्, विज्ञातम् अविजानताम्।

केनोपनिषत् २-३

विवेकेन विजानताम् ब्रह्म अविज्ञातमेव, सम्यक् अविजानतां ब्रह्म विज्ञातम् इति एकोऽर्थः; विषयत्वेन जानतां ब्रह्म अविज्ञातमेव, अविषयत्वेन जानतां ब्रह्म ज्ञातमेव इति अपरोऽर्थः॥

विवेकेन ब्रह्म विज्ञातव्यम्। अनात्मवस्तुभ्यः विविच्य आत्मत्वेन ब्रह्म ज्ञातव्यम्। एवं ज्ञाते प्रमाणागोचरत्वेन आत्माभिन्नत्वेन च ब्रह्म ज्ञातं भवति। आत्मैव च ब्रह्म इति ज्ञातं भवति। एवं ज्ञाते हि ब्रह्म विज्ञातं भवति। एवंविदेव ब्रह्मज्ञानी भवति॥

विशेषत्वेन ब्रह्मणः विज्ञानं नाम, ब्रह्म तादृशम्, ईदृशम्, महत्तमम्, अष्टाविंशतिभुजम्, मया तद् ब्रह्म उपास्यम्, मया चिन्त्यम्, मया ज्ञातव्यं ब्रह्म; तस्य ब्रह्मणः उपासनेन मयि ब्रह्मणः अनुग्रहो भविष्यति, मरणानन्तरम् अहं तत्र गत्वा तद् ब्रह्म प्राप्नुयाम् इत्यादिरूपेण ज्ञानम्। एवमादिक्रमेण सविशेषतया ब्रह्म विदितवतः परं ब्रह्म नैव ज्ञातम् इत्यर्थः, स्वस्वरूपत्वेन ब्रह्मणि विज्ञाते सति ब्रह्म ज्ञातं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वव्यापकाय वेदान्तभास्कराय नमः॥

ब्रह्मैवेदमिदं विश्वं सर्वव्यापकमीश्वरम्।
ब्रह्मभिन्नं जगन्नास्ति सत्यं **वेदान्तभास्करः**॥

इद समस्तं विश्वं ब्रह्मैव। ब्रह्म इति सर्वव्यापकम् ईश्वरं च। ब्रह्मभिन्नं सत् जगत् इति सत्यं वस्तु नास्त्येव॥

एप्रिल् २८

११९. आत्मैव प्रपञ्चरूपेण भाति

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।

ईशावास्योपनिषत् ५

तद् ब्रह्मैव अस्य विश्वस्य अन्तः बहिश्च पूर्णम्।

आत्मानं विचारपरत्वेन विमर्शकत्वेन मन्यमानाः केचित् प्राज्ञाः एवं पृच्छन्ति ''देवः कुत्रास्ति''? यथा 'सूर्यः कुत्रास्ति'? आकाशे। जलं कुत्रास्ति? भूमौ। नक्षत्राणि कुत्र सन्ति? आकाशे। एवमेव देवः कुत्रास्ति? इति पृच्छन्ति॥

आत्मानं बुद्धिमत्त्वेन मन्यमानाः पण्डिताः अस्य प्रश्नस्य उत्तरत्वेन ''देवः सर्वत्रापि विद्यते'' इति प्रतिवदन्ति च। इदं प्रश्नप्रतिवचनद्वयमपि हास्यास्पदमेव भवति। अयं प्रश्नः इदं प्रतिवचनम् इति द्वयमपि अनुचितमेव। यतो हि परमात्मा नाम नैव साकारः सविशेषः कश्चित् पदार्थविशेषः। येन, 'सः कुत्र अस्ति?' इति प्रश्नो वा, 'सः सर्वत्रापि अस्ति' इति प्रतिवचनं वा साधु अभविष्यत्। तस्मिन्नेव परमात्मनि देशः कालश्च अवभासते। अन्तः बहिः सर्वत्रापि भगवानेव। भगवान् नाम देशकालयोरपि कारण- भूतः सन् प्रपञ्चत्वेन दृश्यते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमपुरुषतत्त्वविदे वेदान्तभास्कराय नमः॥

विनश्यद्धि जगत् सर्वं पुरुषान्तं हि नश्यति।
पुरुषान्न परं किञ्चित् इति **वेदान्तभास्करः**॥

पुरुषमेकं विहाय इदं सर्वं नश्वरं विश्वं विनश्यति। पुरुषात् परं किञ्चिदपि नास्ति॥

एप्रिल् २९

१२०. अयमेव हि परमपुरुषः

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।

काठकोपनिषत् १-३-११

पुरुषात् न परं किञ्चिदप्यस्ति। सा काष्ठा, सा एव परा गतिश्च॥

अस्मिन् विशाले प्रपञ्चे 'तारतम्यं' सर्वक्षेत्रेष्वपि दृश्यते। न हि कश्चिदपि पदार्थः अन्तिमनिर्णयत्वेन दृश्यते। 'मीनात् मीनः', 'वृक्षात् वृक्षः' इतिवत् एकस्मात् अपरः महत्तरः मनुष्यः अस्त्येव। वैषम्यं तारतम्यमेव हि अस्य प्रपञ्चस्य स्वभावः॥

अपि तु वेदान्तप्रतिपादितात् पुरुषात् परं महत्तरं वस्तु न किञ्चिदस्ति। पाञ्चभौतिकात् शरीरात् इन्द्रियाणि सूक्ष्माणि, इन्द्रियेभ्यः प्राणः श्रेष्ठः, प्राणाच्च मनः श्रेष्ठम्, मनसोऽपि बुद्धिः श्रेष्ठा, बुद्धेरपि समष्टिरूपः हिरण्यगर्भः सूक्ष्मः, श्रेष्ठः, व्यापकश्च। सर्वेभ्योऽपि एतेभ्यः पुरुषः श्रेष्ठः सूक्ष्मः व्यापकश्च॥

पूर्णम् अनेन सर्वम् इति पुरुषः। अनेनैव हि समस्तमपि विश्वं परिपूर्णम्। **पुरि शेते इति वा पुरुषः।** अस्मासु एव वर्तते इति पुरुषः। पुरुषात् श्रेष्ठः, पुरुषेण समः अन्यो नास्ति। अयमेव हि परमः पुरुषः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परब्रह्मस्वरूपाय वेदान्तभास्कराय नमः॥

अहमेव परं ब्रह्म मत्तः सर्वं प्रवर्तते।
मय्येव प्रलयं याति वेत्ति **वेदान्तभास्करः**॥

अहमेव परं ब्रह्म, मत्त एव सर्वं प्रवर्तते, मय्येव च सर्वं प्रलयं याति इति ब्रह्मवित् अवगच्छति।

एप्रिल् ३०

१२१. द्वयोरप्यन्तरमिदम्

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद् ब्रह्म अद्वयमस्म्यहम्॥

कैवल्योपनिषत् १-१९

सकलं मय्येव जातम्, मयि सर्वं प्रतिष्ठितम्, सर्वं मयि लयं याति, तद् अद्वयं ब्रह्म अहमस्मि—इति आत्मविदः निश्चयः॥

व्यवहारदृष्ट्या ज्ञान्यज्ञानिनौ समानत्वेनैव यद्यपि दृश्येते तथापि तयोः 'ज्ञाने' अन्तरम् अस्ति। अज्ञो हि आत्मनि प्रपञ्चम् अपश्यन्, प्रपञ्चे आत्मानम् एकं सामान्यं मनुष्यं जानाति॥

ब्रह्मज्ञानी तु आत्मनि विश्वं पश्यति। आत्मस्वरूपमेव पश्यन् ब्रह्मज्ञानी आत्मानं परिपूर्णं पश्यति। आत्मनः एव विश्वम्, आत्मन्येव विश्वम्, समस्तस्यापि विश्वस्य आत्मैव आधारभूतः इति ज्ञानी अवगच्छति। देहादीन् उपाधीन् अविद्याकल्पितान् विजानतः ब्रह्मज्ञानिनः अध्यासः स्वप्नेऽपि न हि सम्भवति। ब्रह्मज्ञानी नाम ब्रह्मस्वरूप एव। एवं हि ज्ञानिनः निश्चयः। केवलं देह एव अहम् इति अज्ञानिनां निश्चितं ज्ञानम्। अहं जातः, अहं म्रिये इति अज्ञाः मन्यन्ते। इदमेव हि उभयोरपि ज्ञान्यज्ञानिनोः अन्तरम्!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अभयप्रतिष्ठाय वेदान्तभास्कराय नमः॥

अभेददर्शनादेव ह्यभयं प्रतिपद्यते।
अभेददर्शनान्मोक्षः सत्यं **वेदान्तभास्करः**॥

अभेददर्शनादेव हि साधकः अभयं प्रतिपद्यते, अभेददर्शनादेव मोक्षः भवति इति सत्यम्।

मे १

१२२. अभेदज्ञानात् अभयप्राप्तिः

यदा ह्येवैष एतस्मिन् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयङ्गतो भवति॥

तैत्तिरीयोपनिषत् २-७-४

यदा एषः जिज्ञासुः एतस्मिन् अदृश्ये अनात्म्ये अनिरुक्ते अनिलयने ब्रह्मणि अभयां प्रतिष्ठां विन्दते तदैव सद्यः सः अभयं प्राप्नोति।

सर्वस्यापि मानवस्य 'भयम्' अस्त्येव खलु? न कयापि लौकिक्या सम्पदा वा विद्यया वा इदं भयं परिहर्तुं शक्यते। वेदान्तेषु पुनः भयपरिहाराय सूक्तः उपायोऽस्ति। अयं मन्त्रः भयपरिहाराय उपायं सूचयति॥

आत्मनि सम्यक् विज्ञाते सति भयस्य प्रश्न एव नास्ति। ब्रह्मैव हि आत्मनः निजस्वरूपम्। ब्रह्मैव हि अहम्; अहम् **अदृश्यः** इति अकार्यम् आत्मानं जानीयात्। आत्मा **अनात्म्यः**, अशरीरः इति पश्येत्। आत्मा **अनिरुक्तः** प्रमाणागोचरः इति जानीयात्। आत्मा **अनिलयनः**, स्वतन्त्रः इति विद्यात्। एवम् अभेदज्ञानेन अभयप्राप्तिर्भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वायुतत्त्वविदे वेदान्तभास्कराय नमः॥

वायावेव हि सूर्याग्निचन्द्रादिपरदेवताः।
संवर्गोऽसौ प्रलीयन्ते लये **वेदान्तभास्करः**॥

प्रलयकाले सूर्य अग्नि चन्द्राद्याः सर्वाः देवताः वायौ एव प्रविलीयन्ते, अतः असौ वायुः **संवर्गः**॥

मे २

१२३. वायुरेव संवर्गः

वायुर्वाव संवर्गः.....अग्निः वायुमेवाप्येति,.....सूर्यो वायुमेवाप्येति, चन्द्रो वायुमेवाप्येति।

छान्दोग्योपनिषत् ४-३-१

वायुरेव संवर्गः, अग्निः वायुमेव अप्येति, सूर्यः वायुमेव अप्येति, चन्द्रः वायुमेव अप्येति।

उपासनमेतत्, अस्य 'संवर्गविद्या' इति नाम। संवर्गो नाम संवर्जनम्। वायुर्नाम हिरण्यगर्भः अथवा विराट्पुरुषः। अस्मिन्नेव वायौ सर्वोऽपि प्रपञ्चः प्रविलीयते॥

अग्निः, सूर्यः, चन्द्रः, नक्षत्राणि, इत्याद्याः सर्वा अपि देवताः प्रलयकाले इमं वायुमेव अपियन्ति। हिरण्यगर्भादेव जनित्वा, तस्मिन्नेव स्थित्वा, अन्ते तस्मिन्नेव इदं विश्वं लीयते च। अस्यैव **वायुः** इति नाम। **'संवर्गः'** इत्यपि अस्यैव नाम। वायुः, प्राणः, विराट्पुरुषः, वैश्वानरः इति नामान्तराणि च। सर्वदेवतानामपि आत्मन्येव संवर्जनात् **वायुः संवर्गः**। एवम् उपासनं कुर्यात्। अस्य उपासनस्य **''वायुसंवर्गविद्या''** इति नामधेयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं व्याकृताव्याकृततत्त्वविदे वेदान्तभास्कराय नमः ॥

अव्याकृतं जगत् पूर्वं नामरूपविवर्जितम्।
नामरूपादिसंयुक्तं व्यक्तं **वेदान्तभास्करः** ॥

इदं जगत् पूर्वं नामरूपविवर्जितम् अव्याकृतम् आसीत्। इदानीं तु नामरूपादिसयुक्तं सत् व्याकृतं दृश्यते॥

मे ३

१२४. व्याकृतम् अव्याकृतम् च आत्मैव

तद्धेदं तर्हि अव्याकृतमासीत्, तन्नामरूपाभ्यामेव व्याक्रियत।

बृहदारण्यकोपनिषत् १-४-७

तदिदं जगत् तदा सृष्टेः पूर्वम् अव्याकृतमेव आसीत्, अनन्तरम् नामरूपाभ्यां व्याकृतम् अक्रियत।

इदानीं दृश्यमानस्य अस्य विश्वस्य 'व्याकृतम्' इति नामधेयम्। सृष्टेः पूर्वम् इदम् 'अव्याकृतम्' आसीत्। व्याकृतं नाम वि + आ + कृतम्; वि = विविधनामभिः, रूपैः, क्रियाभिश्च; आ = समन्तात् विविक्ततया सुस्पष्टतया; कृतम् = सृष्टम्। व्याकृतस्य सर्वस्यापि वस्तुनः विलक्षणानि नामानि, आकाराः, वर्णाश्च विद्यन्ते एव॥

इदं व्याकृतं विश्वं सृष्टेः पूर्वम् एवम् विविक्ततया, भिन्नभिन्नतया नासीत्, किं तु बीजरूपेण आसीत्, अत एव 'अव्याकृत'म् इति तस्य नाम। इदम् अव्याकृतं हि अविद्या-कल्पितम् आभासरूपम्। आत्मन्येव कल्पितं सत् गूढमासीत्। तदेव इदानीं व्याकृतप्रपञ्चत्वेन अवभासते। इदं व्याकृतं जगत् इदानीमपि परमार्थदृष्ट्या अयमात्मैव अस्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओं 'स्वपिति'रहस्यविदे वेदान्तभास्कराय नमः॥

सुप्तिकाले त्वयं जीवः 'स्वपीती'ति हि कथ्यते।
स्वात्मना सङ्गतो ह्येषः यस्मात् **वेदान्तभास्करः**॥

अयं जीवः सुप्तिकाले 'स्वपिति' इति कथ्यते हि। यस्मात् एषः तदा सुषुप्तौ स्वात्मान सङ्गतः।

मे ४

१२५. 'स्वपिति'शब्दस्य रहस्यम्

स्वम् अपीतो भवति, तस्मादेनं 'स्वपिति' इत्याचक्षते, स्वं हि अपीतो भवति। छान्दोग्योपनिषत् ६-८-१

निद्रासमये आत्मानमेव सङ्गच्छते। तस्मादेव कारणात् निद्रागतं पुरुषं 'स्वपिति' इति वदन्ति। यतः ''स्वं हि अपीतो भवति इति स्वपिति'' इति व्युत्पत्तिः अस्ति॥

संस्कृतभाषायां 'स्वपिति' इति क्रियापदम् अस्ति। 'स्वपिति' इति निद्रां करोति इत्यर्थः। गाढनिद्रासमये अयं जीवः सर्वान् द्वैतव्यवहारान् विहाय स्वयं स्वरूपस्थः सन् नैजस्वरूपं प्रतिपन्नः खलु? तस्मादेव कारणात् सुप्तं 'स्वपिति' इत्येव कथयन्ति जनाः॥

जीवः जाग्रदवस्थायाम् अविद्याकल्पितैः नामरूपक्रियावर्ण आश्रमसम्प्रदायमतविद्याअधिकारादिभिः उपाधिभिः संसारधर्मैः विराजते। अहं हिंदुः, अहं महम्मदीयः, अहं ब्राह्मणः, अहं वैश्यः, गृहस्थः, राजा, सेवकः, पुत्रः, मित्रम् इत्यादिभिः शताधिकैः बन्धनैः बद्धः सन् संसरति। सुषुप्तौ तु एतेषां बन्धनानाम् अन्यतमम् अपि नास्ति। तदा अयम् स्वस्वरूपे भवति। इदमेव 'स्वम् अपीतो भवति इति स्वपिति' इत्युच्यते। **'स्वपिति'शब्दस्य रहस्यमिदम्!**

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वभूतात्मविदे वेदान्तभास्कराय नमः॥

आत्मानं सर्वभूतस्थं निर्विशेषं निरञ्जनम्।
विदित्वा परमं ब्रह्म मुक्तो **वेदान्तभास्करः**॥

आत्मानं सर्वभूतस्थं निर्विशेषं निरञ्जनं परमं ब्रह्म विदित्वा मानवो मुक्तो भवति।

मे ५

१२६. सम्यग्दर्शनस्य रहस्यमिदम्

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना॥

कैवल्योपनिषत् १-१०

आत्मानं सर्वभूतस्थम्, आत्मनि च सर्वभूतानि सम्पश्यन् परमं ब्रह्म याति; अन्येन हेतुना मार्गेण परमं ब्रह्म न याति।

'सम्यग्दर्शनं' नाम किम्? इति चेत्, अयं मन्त्रः सरळतया सुन्दरतया उपदिशति। आत्मनि सर्वभूतानाम्, सर्वभूतेषु च आत्मनः दर्शनमेव सम्यग्दर्शनं नाम। इदमेव समात्मदर्शनम् **समात्मज्ञानम्, ब्रह्मज्ञानमिति** च कथ्यते॥

अस्तु, ज्ञातम्। ईदृशं सम्यग्दर्शनं प्राप्तुं शक्यते वा? किं वयमपि प्राप्नुयाम? सत्यं शक्यत एव। अस्यैव 'सर्वात्मभावः' इत्यपि नाम भवति। नैतत् सम्यग्दर्शनं प्रत्यक्षप्रमाणैः अवगन्तुं शक्यते। नात्मा चक्षुर्भ्यां दृश्येत। उपाधिसहिताः पदार्थाः समाः न भवन्ति हि। किं तु विवेकेन विवेक्तव्यमेतत्। उच्चनीचोपाधीन् विहाय विवेकेन विचारे कृते ''एक एव आत्मा सर्वेष्वपि अस्ति'' इतिसन्देशः अनुभवम् आरोहति। इदमेव **सम्यग्दर्शनरहस्यम्**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वप्नमहिमविदे वेदान्तभास्कराय नमः॥

आत्मा स्वप्ने सृजत्येषः स्वेष्टान् सङ्कल्पमात्रतः।
पदार्थान् सर्वशक्तत्वात् इति **वेदान्तभास्करः**॥

एषः आत्मा स्वप्ने सङ्कल्पमात्रतः स्वेष्टान् पदार्थान् सृजति। कुतः? आत्मनः सर्वशक्तत्वात्॥

मे ६

१२७. आत्मा स्वप्नस्य राजा

न तत्र रथाः न रथयोगाः न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते। बृहदारण्यकोपनिषत् ४-३-१०

तत्र रथाः, अश्वाः, पन्थानो वा न विद्यन्ते। तथापि आत्मा स्वयमेव रथान्, अश्वान्, पथश्च सृजति॥

स्वप्ने आत्मा स्वयंज्योतिःस्वरूपः। जागरिते आत्मनः सहायकत्वेन शरीरेन्द्रियमनोबुद्धिप्राणाः शब्दस्पर्शादिविषयाश्च विद्यन्ते। जाग्रदवस्थायां प्रमातृप्रमाणप्रमेयाः क्रियाकारकफलानि सर्वाणि विद्यन्ते। जागरिते रथाः, अश्वाः, मार्गाः, सारथिः, गन्तव्यं स्थानं च इति सर्वं विद्यते॥

स्वप्ने तु? न किञ्चिदेतत् विद्यते। स्वप्नावस्थायाम् अश्वाः न विद्यन्ते, रथाः न सन्ति, पन्थानश्च न विद्यन्ते, सारथिश्च न विद्यते। तथापि तत्र स्वप्ने आत्मा सर्वमपि स्वयमेव एकः सन् सृजति। स्वप्नेऽपि वयं भोजनादिकं कुर्मः, होमहवनादिकं च कुर्मः। देशात् देशान्तरं च गच्छामः। यद्यपि तत्र न कानिचन वस्तूनि विद्यन्ते, तथापि तानि सर्वाणि आत्मैव सृजति, आत्मा स्वयमेव सर्वं भवति। अनेन आत्मनः सर्वशक्तित्व स्वयप्रकाशत्वं च ज्ञायते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अक्षरब्रह्मनिष्ठाय वेदान्तभास्कराय नमः॥

जन्मस्थितिलयातीतं गुणत्रयविवर्जितम्।
अक्षरं ब्रह्म जानीयात् परं **वेदान्तभास्करः**॥

जन्मस्थितिलयातीतं गुणत्रयविवर्जितम् अक्षरमेव परं ब्रह्म जानीयात्।

मे ७

१२८. त्रयमिदं ब्रह्मणि कल्पितम्!

उद्गीतमेतत् परमं तु ब्रह्म तस्मिन् त्रयं सुप्रतिष्ठाऽक्षरं च।

श्वेताश्वतरोपनिषत् १-७

इदम् उद्गीतं परं ब्रह्मेति कथ्यते। तस्मिन् त्रयम् अवभासते। इदमेव ब्रह्म जगतः सुप्रतिष्ठा। इदमेव च अक्षरम्॥

अस्य दृश्यमानस्य विश्वस्य पारमार्थिकं स्वरूपमेव ब्रह्म। नामरूपैः व्याकृतत्वेन दृश्यमानोऽयं प्रपञ्चः परमार्थतः नामरूपरहितं ब्रह्मैव। अस्य जगतः आस्पदभूतं परमेव ब्रह्म। अस्य जगतः मूलमेव ब्रह्म। अस्य जगतः सारभूतमेव ब्रह्म। न हि परं ब्रह्म नाम यत्रकुत्रापि विद्यमाना दूरस्था एका काचिद्देवता॥

अस्मिन्नेव ब्रह्मणि त्रयमपि भाति। त्रयं नाम—देशकाल-निमित्तानि, कर्तृभोक्तृप्रमातारः, देवमानवराक्षसाः, सत्त्वरजस्तमो-गुणाः, जाग्रत्स्वप्नसुषुप्ताख्याः तिस्रोऽवस्थाः। सृष्टिस्थितिलयाः, भूतभवत्भविष्याणि, ब्रह्मविष्णुमहेश्वराः, ऋग्वेदयजुर्वेदसामवेदाः। एवं त्रिधा विभक्तं समस्तमपि जगत् परस्मिन्नेव ब्रह्मणि अवभासते। सर्वस्यापि जगतः आस्पदभूतं ब्रह्म॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणमहिमविदे वेदान्तभास्कराय नमः॥

प्राण एव परा प्रज्ञा प्राण एव परो मतः।
प्राण एव परं ब्रह्म सत्यं **वेदान्तभास्करः**॥

प्राण एव परा प्रज्ञा, प्राण एव परः, प्राण एव सत्यं परं ब्रह्म।

मे ८

१२९. प्राणस्य महिमा ह्येषः!

यो वै प्राणः सा प्रज्ञा, या प्रज्ञा स प्राणः।

कौषीतकिब्राह्मणोपनिषत् ३-३

यो वै प्राणः सा एव प्रज्ञा, या प्रज्ञा स एव च प्राणः।

अस्मिन् मन्त्रे प्राणप्रज्ञयोः अभेदः प्रतिपाद्यते। प्राणो नाम देहेन्द्रियाणि संव्याप्य तेषु चैतन्यपूरयिता तद्द्वारा नानाव्यापारान् कुर्वती सूक्ष्मा शक्तिः। अयमेव प्राणः, अपानः, व्यानः, उदानः, समानः इति पञ्चभिः व्यापारैः पञ्चनामा भवति। अयमेव च प्राणः ज्येष्ठः श्रेष्ठः सूक्ष्मः सर्वव्यापकश्च इति वेदान्तेषु गीयते। प्राणो नाम परमार्थतः परमात्मा अपि भवति॥

प्रज्ञा तु चैतन्यम्। इयं प्रज्ञा अपि देहेन्द्रियादीनि संव्याप्य विद्यमाना अद्भुता शक्तिः। प्रज्ञाहीनश्चेत् जन्तुः शव एव खलु? प्रज्ञाप्राणयोः अनुग्रहेणैव हि इदं शरीरं जीवति? उभयमप्येतत् एकस्यैव नाणकस्य मुखद्वयमिव। तस्मादेव हेतोः प्रज्ञा एव प्राणः, प्राण एव च प्रज्ञा इति अत्र उपदिश्यते। परमात्मैव प्राणरूपेण प्रज्ञास्वरूपेण च अवभासते। प्राणेन विना, प्रज्ञया च विना सर्वं वस्तु व्यवहारायोग्यं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कामरहिताय वेदान्तभास्कराय नमः॥

काम एव महान् शत्रुः कर्मजन्मप्रवर्तकः।
ब्रह्मज्ञानी त्वकामः स्यात् मुक्तो **वेदान्तभास्करः**॥

कर्मसु जन्मसु च अज्ञानिना प्रवर्तकः महान् शत्रुर्नाम काम एव। मुक्तः ब्रह्मज्ञानी तु अकामः स्यात्॥

मे ९

१३०. आत्मकामोऽयम्

अथ अकामयमानो योऽकामो निष्कामः आप्तकामः आत्मकामः। बृहदारण्यकोपनिषत् ४-४-६

अकामयमानः आत्मज्ञानी तु स्वतः अकामः, निष्कामः, आप्तकामः, आत्मकामश्च भवति॥

अविद्याकामभिः प्रेरितः अज्ञः कर्माणि कुर्वन्, तेषां फलानि अनुभवितुं जन्मान्तरं गच्छति। ततः पुनः अत्र आगच्छति। एवं कामकर्मणोः दासभूतः इतस्तत्र, ततो अत्र सञ्चरन् संसारचक्रे गृहीतः सन् अज्ञः सङ्कटानि अनुभवन् आस्ते॥

ब्रह्मज्ञानी पुनः? अस्य कामपीडा एव नास्ति। आत्मानन्द-सागरे निमग्नस्य ब्रह्मज्ञानिनः विषयविषसागरस्य कल्पना एव न सम्भवेत्। कामरहितस्य आत्मज्ञानिनः कर्मणां सम्बन्धो वा तैः बन्धनं वा सम्भवेद्वा? नैव। अकामो हि आत्मज्ञानी निष्कामो भवति। निष्कामत्वादेव च अयम् आप्तकामः। आप्तकामत्वादेव ज्ञानी आत्मकामः। एवम् आप्तकामस्य अकामस्य च आत्मज्ञानिनः स्वर्गलोकं प्राप्तुं कामः सम्भवेद्वा? आत्मनिष्ठस्य आत्मज्ञानिनः जन्मान्तरकल्पनमपि नैव सम्भवेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'नाहं वेद ब्रह्म' इतिविदे वेदान्तभास्कराय नमः॥

'अहं वेद्मि परं ब्रह्म' एवं यो वेत्ति साक्षिणम्।
बालिशः स तु विज्ञेयः नूनं **वेदान्तभास्करः**॥

'अहं परं ब्रह्म जानामि' इति यः वदति, तं बालिशमेव विद्यात्।

मे १०

१३१. आत्मज्ञानस्य मर्मेदम् !

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनम्। केनोपनिषत् २-१

हे शिष्य, 'अहं ब्रह्म सुवेद' इति त्वं यदि मन्यसे, तर्हि तव तादृशं ज्ञानं दभ्रमेव, अल्पमेव॥

''आत्मानमेव विजानीयात्, आत्मज्ञानादेव दुःखनिवृत्तिः मोक्षप्राप्तिश्च; आत्मनि अविज्ञाते मानवजन्मैव व्यर्थं भवति'' इत्यादि हि वेदान्तेषु तत्र तत्र उपदिश्यते। यदा मुमुक्षुजनाः ईदृशानि वाक्यानि शृण्वन्ति तदा तेषां मनसि सहजतः एकं भ्रान्तिज्ञानं च उत्पद्येत यत् आत्मा नाम इतरदेववत्, अनात्मवस्तुवत् आत्मनो भिन्नं वस्तु स्यादिति॥

नैषा भावना साध्वी। अहं समुद्रं जानामि, नक्षत्राणि जानामि, अहं देवान् जानामि—इतिवत् नैवम् आत्मज्ञानम्। यतो हि अयमात्मा ज्ञातुः स्वरूपमेव। ज्ञातुः स्वरूपभूतम्, ज्ञप्तिस्वरूपमेव सन्तम् एनम् आत्मानम् विषयतया अवबोद्धुं कथमिव सम्भवेत्? तस्मात् आत्मावबोधो नाम आत्मस्वरूपेण अवस्थितिरेव इत्यर्थः। आत्मनः आत्मत्वेन ज्ञानमेव आत्मज्ञानम्। इदमेव हि आत्मज्ञानस्य मर्म॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अविद्यादोषरहिताय वेदान्तभास्कराय नमः॥

कर्मोपासननिष्ठास्तु ह्यविद्याकाममोहिताः।
जायन्ते च म्रियन्ते च सदा **वेदान्तभास्करः**॥

ये कर्मोपासननिष्ठाः ते मूढाः अविद्याकाममोहिताः सन्तः सदा जायन्ते च म्रियन्ते च।

मे ११

१३२. अविद्यापण्डिता इमे !

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।

काठकोपनिषत् १-२-५

घनीभूते अविद्यान्धकारे मग्ना अपि अज्ञानिनः आत्मानं धीरान् पण्डिताश्च मन्यन्ते।

वेदान्तेषु विद्या नाम आत्मविद्या, ब्रह्मविद्या एव। ब्रह्मविद्याम् एकां विहाय इतराः सर्वा अपि विद्याः अविद्या एव। सकलशास्त्रपारङ्गतोऽपि महामेधावी सन्नपि आत्मज्ञानरहितश्चेत् तादृशं वेदान्तेषु अज्ञमेव कथयन्ति। अत्र अज्ञानं नाम अध्यासः॥

कर्मोपासनानुष्ठानतत्पराः लब्धदेवतासाक्षात्काराः, प्राप्ताणिमादिसिद्धयः, निग्रहानुग्रहसामर्थ्यवन्तः, जनानुरागिणः अनेके तपस्विनः आत्मानं धीरान् पण्डितोत्तमान् च मन्यन्ते। सत्यमेते विभूतिपुरुषा एव, अद्भुतमानवा एव, अतिमानवा एवैते; अपि तु नैते आत्मज्ञानिनः। न केवलं नैते ज्ञानिनः, किं तु एते उपासकाः पण्डितंमन्याः सन्तः, आत्मानमेव प्राज्ञान् आत्मज्ञानिनश्च कथयन्तः सन्तः परमार्थतत्त्वविदः आत्मज्ञानिन एव तिरस्कुर्वन्ति। तस्मात् एते अविद्यापण्डिता एव खलु?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनस्तत्त्वविदे वेदान्तभास्कराय नमः॥

सर्वं चराचरं विश्वं पञ्चभूतात्मकं जगत्।
मनस्येव प्रलीनं स्यात् स्वप्ने **वेदान्तभास्करः**॥

चराचरात्मकं पञ्चभूतात्मक च इद सर्वं विश्वं स्वप्नकाले मनस्येव प्रलीनं स्यात्॥

मे १२

१३३. अहो, मनसो महिमा!

तत् सर्वं परे देवे मनसि एकीभवति।

प्रश्नोपनिषत् ४-२

तत् सर्वमपि परे देवे मनसि एकीभवति।

जागरितम्, स्वप्नः, सुषुप्तिरिति प्रत्यहम् अस्माकं तिस्रो अवस्थाः भवन्ति। एतस्यैव अनुभवस्य वेदान्तेषु '**अवस्थात्रय**'म् इति नाम भवति। जागरिते शरीरेन्द्रियमनांसि स्वीयानि स्वीयानि कर्माणि कुर्वन्ति। स्वप्ने तु इमानि शरीरेन्द्रियाणि वा शब्द-स्पर्शादिविषया वा न विद्यन्ते॥

स्वप्ने केवलं मन एव विद्यते। मनसः एव सर्वं जायते, मनस्येव च सर्वं लीयते। गाढनिद्रायां न कोऽपि व्यापारः सम्भवति। तत्र सर्वेऽपि व्यापाराः मनस्येव लीयन्ते। सूर्योदये सर्वाणि किरणानि जायन्ते, सूर्यास्तमाने तत्रैव यथा लीयन्ते, तथैव स्वप्ने सर्वेऽपि पदार्थाः मनसो जायन्ते, सुषुप्तौ मनस्येव लीयन्ते। तन्मन एव परो देवः। मन एव सर्वं भवति। अस्मिन्नेव मनसि चराचरात्मकः प्रपञ्चः लीयते च। मनअधीनतयैव प्रपञ्चः अवभासते। अयमेव हि मनोदेवस्य महिमा, इदमेव च मनसो वैभवम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनोविलासविदे वेदान्तभास्कराय नमः॥

मन एव जगत् सर्वं कामसङ्कल्परूपतः।
श्रद्धाऽश्रद्धा धृतिर्भीश्च मनो **वेदान्तभास्करः**॥

कामः, सङ्कल्पः, संशयः, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, ह्रीः, धीः, भीः, इत्येतत् सर्वं मन एव। सर्वमप्येतत् जगत् मनोविकार एव॥

मे १३

१३४. मनोविलास एव एषः!

कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिः अधृतिः ह्रीः धीः भीः इत्येतत् सर्वं मन एव।

बृहदारण्यकोपनिषत् १-५-३

कामः, सङ्कल्पः, सशयः, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, ह्रीः, धीः, भयम्—इत्येतत् सर्वं मन एव॥

मनो नाम अन्तःकरणम्। प्रत्यक्षप्रमाणागोचरं सूक्ष्मं करणं नाम मनः। मनः सूक्ष्मानपि विचारान् गृह्णाति। मनसैव बन्धनम्, मनसैव च मोक्षः; मनसा एव स्वर्गः, मनसा एव च नरकम्; मनसा एव सुखम्, मनसा एव दुःखम्; मनसा एव धैर्यम्, मनसा एव भीतिः, मनसा एव जीवनम्, मनसा एव च मरणम्॥

अहो, अद्भुतमेतन्मनः! भवतु, तर्हि किं तन्मनः? इति चेत्। विचार्यते। कामनं कामः, सङ्कल्पविकल्पाः, संशयः, श्रद्धा, अश्रद्धा, धैर्यम्, अधैर्यम्, ह्रीः, धीः, भयम्, इदं सर्वमपि मन एव। इतराभिश्च शताधिकाभिः वृत्तिभिः संयुक्तम् एतन्मनः दैवदत्ता अद्भुता सम्पत्। अस्य मनसः विवेकपूर्वकम् उपयोगेन मानवाः सर्वे कृतार्था भवेयुः आत्मोद्धारं च कुर्युः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणोपासनरहस्यविदे वेदान्तभास्कराय नमः॥

प्राणे एव हि श्रोत्रादिकरणाप्ययदर्शनात्।
प्राण एव हि **संवर्गो** ब्रूते **वेदान्तभास्करः**॥

श्रोत्रादीनि करणानि सुषुप्तौ प्राणे एव प्रविलीयन्ते। तस्मात् प्राण एव **संवर्गः** इति उपास्यः॥

मे १४

१३५. प्राणस्य महिमा!

प्राणो वाव संवर्गः, प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रं, प्राणं मनः, प्राणो ह्येव एतान् सर्वान् संवृङ्क्ते।

छान्दोग्योपनिषत् ४-३-३

प्राण एव संवर्गः। निद्रासमये वागिन्द्रियं प्राणमेव अप्येति। नेत्रमपि प्राणमेव अप्येति, श्रोत्रमपि प्राणमेव अप्येति, मनश्च प्राणमेव अप्येति। प्राण एव हि सर्वमेतत् आत्मनि सवर्जयति॥

अस्य **प्राणसंवर्गविद्या** इति नाम। अत्र प्राणो नाम मुख्यः प्राणः। अयमेव आधिभौतिकदृष्ट्या **वायुर्भवति**, आधिदैविक-दृष्ट्या **हिरण्यगर्भो** भवति। अत्र प्रकृते आध्यात्मिकस्य प्राणस्य उपासनम् इदमुच्यते। वाक्श्रोत्रनेत्रादीनि ज्ञानेन्द्रियाणि, मनो नाम अन्तरिन्द्रियम्—इत्येतत् सर्वं निद्राकाले प्राणमेव अप्येति। सकलेषु इन्द्रियेषु प्रलीनेषु एक एव प्राणः जागर्ति; अयं प्राण एव ब्रह्म, प्राण एव राजा, प्राण एव च सर्वं भवति। अस्मिन्नेव प्राणे जगत् सर्वं लीयते। संवर्जनात्, आत्मनि उपसंहारात् **संवर्गः** प्राणः। तस्मात् इममेव प्राणं '**संवर्गः**' इति साधकः उपासीत॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं "प्रज्ञानं ब्रह्म"विदे वेदान्तभास्कराय नमः॥

चराचरात्मकं विश्वं **प्रज्ञानं** केवलं परम्।
प्रज्ञारूपाः सदा जीवा ब्रह्म **वेदान्तभास्करः**॥

चराचरात्मक विश्वं केवल पर प्रज्ञानमेव। प्रज्ञारूपा जीवाः सदा परं ब्रह्मैव।

मे १५

१३६. ऋग्वेदस्य 'महावाक्य'मिदम्!

प्रज्ञाने सर्वं प्रतिष्ठितं, प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा 'प्रज्ञानं ब्रह्म'॥ ऐतरेयोपनिषत् ३-१-३

सर्वं प्रज्ञाने प्रतिष्ठितम्। अयं लोकः प्रज्ञानेत्रः। प्रज्ञा एव प्रतिष्ठा, **प्रज्ञानं ब्रह्म**॥

जीवब्रह्मणोः एकत्वप्रतिपादनपराणि इमानि महावाक्यानि। चत्वारि प्रसिद्धानि **महावाक्यानि** सन्ति। ऋग्वेदीय ऐतरेयोपनिषदि **प्रज्ञानं ब्रह्म**; यजुर्वेदीय बृहदारण्यकोपनिषदि **अहं ब्रह्मास्मि**; सामवेदीय छान्दोग्योपनिषदि **तत्त्वमसि**; तथा अथर्ववेदीय माण्डूक्योपनिषदि **अयमात्मा ब्रह्म** इति। एतेषु एकैकमपि महावाक्यम् उपनिषदां परमसन्देश एव॥

प्रकृते "**प्रज्ञानं ब्रह्म**" इत्येतत् ऐतरेयोपनिषदः महावाक्यम्। "प्रज्ञानम्" इति—प्रकृष्टं ज्ञानं प्रज्ञानम्। इन्द्रियोपाधिद्वारा भिन्न-भिन्नतया अवभासमानाः चैतन्यस्वरूपाः जीवाः प्रज्ञानम् इति कथ्यन्ते। एते परिच्छिन्ना जीवाः सर्वे परमार्थतः परिपूर्णब्रह्मस्वरूपा एव। प्रज्ञानं नाम पूर्णं ब्रह्मैव। जीवाः नूनं परं ब्रह्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् औदार्यमहत्त्वविदे वेदान्तभास्कराय नमः॥

गुरुभक्तो विवेकी च तत्त्वजिज्ञासुसाधकः।
उदारी ज्ञानमाप्नोति परं **वेदान्तभास्करः**॥

तत्त्वजिज्ञासुः साधकः, गुरुभक्तो विवेकी उदारी चेत् ब्रह्मज्ञानं प्राप्नोति।

मे १६

१३७. सम्पदः सार्थक्यमिदम् !

तान् होवाच, ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः, स एता गाः उदजतामिति।

बृहदारण्यकोपनिषत् ३-१-२

तान् विदुषः "भोः पूज्याः विद्वांसः ब्राह्मणाः, युष्मासु यो ब्रह्मिष्ठः सः एताः गाः नयतु" इति जनकमहाराजः उवाच॥

बृहदारण्यकोपनिषदि कश्चन कथासन्दर्भोऽयम्। जनकः सम्राट् विदुषां सभाम् एकाम् आयोज्य तत्र स्वर्णालङ्कृतशृङ्गैः अलङ्कृताः एकसहस्रं गाः विद्वत्तायाः पणत्वेन स्थापितवान् आसीत्। तां सभां प्रति देशस्य नानादिग्भ्यः पण्डितोत्तमाः आगताः आसन्। तान् विदुषः प्रति जनकः एतानि वचांसि उक्तवान्। तद्यथा—

"भोः पूज्याः विद्वांसः, भवत्सु यः कोऽपि विद्वान् ब्रह्मनिष्ठश्चेत् अवश्यं तादृशः इमाः धेनूः स्वगृहं नयेत्" इति जनकः उद्घोषितवान्। अनेन जनकराजस्य सम्पत्, तदनुगुणम् औदार्यम्, ब्रह्मजिज्ञासासक्तिः, ब्रह्मज्ञानिषु तस्य भक्तिगौरवम्, स्वतः आत्मनः मुमुक्षुत्वं च इत्येतत् सर्वं विज्ञायते। ब्रह्मिष्ठेभ्यः स्वसर्वसम्पदमपि दातुं सिद्धोऽयम्। सम्पदः साफल्यमिदम् !

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संसारचक्रविदूराय वेदान्तभास्कराय नमः॥

अज्ञानात् भ्राम्यते जीवः दुःखसंसारचक्रके।
अज्ञानं भेदविज्ञानम् द्वयोर्**वेदान्तभास्करः**॥

जीवः अज्ञानात् दुःखसंसारचक्रके भ्राम्यते, द्वयोः जीवब्रह्मणोः भेदज्ञानमेव अज्ञानम्।

मे १७

१३८. अज्ञानादेव भ्रमणम्!

सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारं च मत्वा। श्वेताश्वतरोपनिषत् १-६

सर्वप्राणिनाम् आश्रयभूते, लयभूते च, बृहति, अस्मिन् ब्रह्मचक्रे, ''अहम् अन्यः, परमात्मा च अन्यः'' इति मत्वा अयं जीवः सर्वदा संसारचक्रे भ्राम्यति॥

परमात्मन एव सकलजीवराशयः उत्पन्नाः सन्तः तस्मिन्नेव लीयन्ते। सः परमात्मा महान्। परमार्थतस्तु अयं परमात्मा जीवस्य परमार्थस्वरूपमेव अस्ति। अज्ञानात् तु जीवः ''अहम् अन्यः, परमात्मा अन्यः'' इति मत्वा अस्मिन् ब्रह्मचक्रे संसरति॥

जन्ममरण सुखदुःख रागद्वेष लाभहानि मानापमान अशनायापिपासादिरूपे संसारसागरे मग्नः अयं जीवः संसरति। सर्वस्याप्यस्य दुःखस्य प्रधानं कारणं नाम अज्ञानम्। भेदज्ञानेन दुःखम्, भेदज्ञाननैव अनर्थप्राप्तिः; अज्ञाननैव संसारभ्रमः॥

अस्मात् संसारभ्रमणात् परिहारोपायो नाम आत्मज्ञानमेकमेव। स्वात्मानं विज्ञाय दुःखनिवृत्तिः, आत्मज्ञानादेव मोक्षः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कर्मफलनियमविदे वेदान्तभास्कराय नमः॥

कामसङ्कल्पकर्माणि यादृशानि भवन्ति हि।
तादृशं फलमाप्नोति नरो **वेदान्तभास्करः**॥

यादृशानि कामसङ्कल्पकर्माणि भवन्ति तादृशमेव फलम् नरः प्राप्नोति।

मे १८

१३९. कामानुगुणं फलम् !

यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत् कर्म कुरुते, यत्कर्म कुरुते तद् अभिसम्पद्यते।

बृहदारण्यकोपनिषत् ४-४-५

यादृशकामो भवति, तादृशसङ्कल्पः, यादृशसङ्कल्पो भवति, तादृशानि कर्माणि करोति; यादृशकर्मा भवति तादृशानि फलानि अनुभवति।

कामसङ्कल्पकर्मफलप्राप्तयो हि संसारचक्रम्। बीजानुगुणो वृक्षः। सर्वः पुरुषः काममय एव। कामवत्त्वादेव तदनुगुणं क्रतुं करोति। क्रतुर्नाम सङ्कल्पः। कामसङ्कल्पाः अन्योन्यं पूरकाः। सङ्कल्पानुगुण्येन कर्माणि करोति॥

अविद्या एव हि कामानां मूलम्। स्वस्वरूपानवबोधो हि अविद्या नाम, आत्मानं संसारित्वेन मिथ्यावबोधो हि अविद्या? अविद्ययैव सङ्कल्पः, अविद्यया एव कर्माणि। सर्वथापि 'यावत्कालम् अविद्या तावत्कालं संसारः' इति सिद्धम्। अविद्या-स्थितिपर्यन्तमपि संसारस्य अनुवृत्तिरेव। आत्मज्ञानादेव संसार-निवृत्तिः। अविद्याकामकर्माणि आत्मज्ञानेन नश्यन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विषयभोगपराङ्मुखाय वेदान्तभास्कराय नमः॥

विषयानुभवात् सर्वशक्तिहानिर्हि जायते।
वैराग्यात् जायते ज्ञानम् ब्रूते **वेदान्तभास्करः**॥

विषयानुभोगात् सर्वशक्तिहानिः जायते। वैराग्यात् ज्ञानं जायते॥

मे १९

१४०. मुमुक्षोः बीजमन्त्रोऽयम् !

श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः।

काठकोपनिषत् १-१-२६

भो मृत्यो, एते भोगराशयः सर्वेऽपि अनित्या एव। तथा एते भोगाः इन्द्रियशक्तीः नाशयन्त्येव॥

नचिकेतसः मुखात् निर्गतोऽयम् उद्गारः सकलमुमुक्षूणामपि बीजमन्त्रवत् विद्यते। ये मुमुक्षवः इमं बीजमन्त्रं जपन्तः अस्य अन्तरार्थं सदा अनुसन्दधते, तेषां विवेकवैराग्योदयद्वारा अवश्यमेव चित्तशुद्धिर्जायते, तदनन्तरं वेदान्तवाक्यार्थविचारेण नूनम् आत्मज्ञानं जायते॥

श्रोत्र त्वक् नेत्र जिह्वा घ्राणानि पञ्च ज्ञानेन्द्रियाणि। तेषां शब्दस्पर्शरूपरसगन्धाः पञ्च विषयाः। विषयानुरक्तिरूपाः इमे भोगाः सर्वेन्द्रियाणां पटुत्वशक्तिं नाशयन्ति इति विवेकिनो नचिकेतसः आशयः। मुमुक्षोः बीजमंत्रोऽयं भवति। इन्द्रिय-भोगानुरागमग्नस्य जन्म व्यर्थमेव। अन्ते च अयं सर्वनाशमेव एति। तस्मात् मुमुक्षुः विषयभोगेभ्यः विरक्तः सन् सदा वेदान्तार्थमेव मननं कुर्यात्। इयमेव हि विवेकिनो मुमुक्षोः विचारधारा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं हार्दब्रह्मोपासनपराय वेदान्तभास्कराय नमः॥

स्वयम्प्रकाशश्चिन्मात्रः जरामरणवर्जितः।
चित्ताकाशे सदोपास्यो ह्यात्मा **वेदान्तभास्करः**॥

स्वयम्प्रकाशः चिन्मात्रः जरामरणवर्जितः आत्मा चित्ताकाशे सदा साधकैः उपास्यः।

मे २०

१४१. हृदयेऽन्तरात्मा

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः॥

तैत्तिरीयोपनिषत् १-६

हृदयस्य अन्तः यः प्रसिद्धः आकाशः अस्ति, तस्यान्तः मनोमयःपुरुषो विद्यते। अयं पुरुषो अमृतः हिरण्मयश्च भवति॥

प्रतिप्राणि हृदयमिति विद्यते एव। एतद् हृदयं तस्य प्राणिनः मुष्टिप्रमाणं विद्यते। तस्य अन्तः यः आकाशः सः **हृदयाकाशः**, **चित्ताकाशः** इति कथ्यते। अयं हि अत्यन्तसूक्ष्मः चित्ताकाशः। अस्मिन् अन्तः आत्मा वर्तते। अस्य आत्मनः **मनोमयः आत्मा** इति नाम। एषः अत्यन्तं सूक्ष्मः। अत एव अयं प्रमाणागोचरश्च॥

ईदृशम् आत्मानम् उपासीत। अयमात्मा **अमृतः** इति **हिरण्मयः** इति च साधकः उपासीत। अयमात्मा अमृतो नाम मरणरहितः; हिरण्मयः इति हिरण्यवत् नित्यशुद्धचैतन्यस्वरूपः इत्यर्थः। स्वस्मिन्नेव विद्यमानम् आत्मानम् एकाग्रतया उपासीत। इमं मनोमयमात्मानमेव परब्रह्मत्वेन उपासते चेत् तादृशः उपासकः मरणानन्तरं ब्रह्मलोकं गच्छति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रद्धाभक्तियोगमर्मविदे वेदान्तभास्कराय नमः॥

कर्माणि कुरुते यस्तु श्रद्धाभक्तिसमन्वितः।
अधिकं फलमाप्नोति नूनं **वेदान्तभास्करः**॥

श्रद्धाभक्तिसमन्वितः सन् यः कर्माणि कुरुते सः नूनम् अधिकं फलम् अवाप्नोति।

मे २१

१४२. एतैः त्रिभिः कर्मणः पुष्टिः

यदेव विद्यया करोति, श्रद्धया उपनिषदा, तदेव वीर्यवत्तरं भवति। छान्दोग्योपनिषत् १-१-१०

यत् कर्म विद्यया श्रद्धया उपनिषदा च क्रियते तद् वीर्यवत्तरं भवति।

अधिकृतः पुरुषः शास्त्रीयकर्माणि यथाविधि अनुतिष्ठति चेत् अनुरूपाणि फलानि तस्य नूनं भवन्त्येव। कर्मणां फलानि नियतानि भवन्त्येव। अपि तु तान्येव कर्माणि श्रद्धया कृतानि चेत् उत्तम-फलान्येव ददति॥

शास्त्रीयाणि कर्माणि उपासनसहितानि क्रियन्ते चेत् तदा इतोऽपि अधिकानि फलानि प्राप्यन्ते एव। तास्ता देवताः एकाग्रतया ध्यायन् भक्त्या भावयन् कर्माणि कुरुते चेत् तदा तेषां कर्मणां विशेषफलानि भवन्ति॥

उपनिषदा युक्तानि चेत् तदा अत्यन्तोत्तमान्येव फलानि भवन्ति। अत्र 'उपनिषत्' इति 'एकाग्रता' इत्यर्थः। सर्वथा, श्रद्धा भावनाएकाग्रताभिः कर्माणि क्रियन्ते चेत् उत्तमानि अधिकानि फलानि भवन्ति इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वास्पदात्मविदे वेदान्तभास्कराय नमः॥

प्रत्यगात्मनि भूतानि देवा लोकास्समर्पिताः।
सर्वे प्राणास्तथा वेदाः ओता **वेदान्तभास्करः**॥

सर्वभूतानि, सर्वदेवाः सर्वलोकाः, सर्वे प्राणाः, तथा सर्वे वेदाश्च प्रत्यगात्मन्येव ओतप्रोताः समर्पिताश्च।

मे २२

१४३. आत्मन्येव सर्वमपि कल्पितम्

अस्मिन् आत्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः, सर्वे प्राणाः, सर्वे एते आत्मानः समर्पिताः॥

बृहदारण्यकोपनिषत् २-५-१५

अस्मिन्नेव आत्मनि सर्वाणि भूतानि, सर्वा देवताः, सर्वे लोकाः, सर्वे प्राणिनः, इमे सर्वे आत्मानश्च समर्पिताः।

आत्मा नाम जगत्कारणभूतं परं ब्रह्म। आत्मैव ब्रह्म, ब्रह्मैव च आत्मा। आत्मनः जातमिदं विश्वम् आत्मन्येव लीयते हि। आप्नोति इति आत्मा इति व्युत्पत्तिम् अनुसृत्य सर्ववस्तुव्यापकः **आत्मा** भवति॥

अस्मिन्नेव आत्मनि सर्वे प्राणिनः समर्पिताः। ब्रह्मादयः पिपीलिकापर्यन्ताः सर्वेऽपि प्राणिनः आत्मैव। इन्द्रचन्द्रादयश्च सर्वे देवाः आत्मैव। चतुर्दश लोकाश्च आत्मैव। सर्वे प्राणाः (सर्वाणि इन्द्रियाणि) आत्मैव। सर्वे जीवात्मानश्च आत्मैव। ईदृशम् आत्मानम् आत्मत्वेन जानन् ज्ञानी अपि सर्वात्मा भवति। सर्वोऽपि अयं द्वैतप्रपञ्चः आत्मन्येव कल्पितो दृश्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं साक्षादपरोक्षाद्ब्रह्मविदे वेदान्तभास्कराय नमः॥

साक्षाच्चैवापरोक्षाच्च प्रत्यगात्मतया ध्रुवम्।
ब्रह्मैवात्मा न दूरस्थम् इति **वेदान्तभास्करः**॥

साक्षात् अपरोक्षत्वाच्च ब्रह्मैव आत्मा। प्रत्यगात्मत्वाच्च ब्रह्म ध्रुवम् आत्मैव। ब्रह्म न दूरस्थम्॥

मे २३

१४४. साक्षाद् अपरोक्षाद् ब्रह्म

यदेव साक्षात् अपरोक्षात् ब्रह्म, य आत्मा सर्वान्तरः, तं मे व्याचक्ष्व।

बृहदारण्यकोपनिषत् ३-४-१

यत् साक्षात् अपरोक्षाद् ब्रह्म, यः सर्वान्तरः आत्मा, तं मे व्याचक्ष्व इति उषस्तः चाक्रायणः याज्ञवल्क्यं पप्रच्छ।

अत्यन्तं प्रसिद्धः जनप्रियश्चायं मन्त्रः। न हि ब्रह्म नाम आत्मनो भिन्नं वस्तु। ब्रह्म हि आत्मनो भिन्नतया दूरस्थं परोक्षं वस्तु न भवति। ब्रह्म नाम निरुपाधिकं निरतिशयं तत्त्वमित्यर्थः। इदं हि असंसारि कूटस्थं परिपूर्णं तत्त्वम्। एतद् ब्रह्म **साक्षात्**। अस्माकं प्रत्यक्स्वरूपमेव ब्रह्म। परं ब्रह्म **अपरोक्षं** च, अस्मत्स्वरूपात् भिन्नतया विद्यमानम् अनात्मतत्त्वं न भवति ब्रह्म इत्यर्थः॥

अस्यैव 'आत्मा' इत्यपि नाम भवति। आत्मा हि नाम स्वयमेव। अयं सर्वान्तरः। नायमात्मा देहमात्रपरिच्छिन्नः। किं तु अन्तर्बहिश्च परिपूर्णोऽयमात्मा। 'इमम् आत्मानं ब्रूहि' इति उषस्तश्चाक्रायणः याज्ञवल्क्यं पृच्छति। अयमेक एव सर्वप्राणिनां प्रत्यागात्मभूतः असंसारी आत्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ध्यानयोगनिरताय वेदान्तभास्कराय नमः॥

ध्यानयोगात् परा शक्तिः ध्यानयोगात् परं तपः।
ध्यानयोगरतो भूयात् धीरो **वेदान्तभास्करः**॥

ध्यानयोगात् परा शक्तिर्लभ्यते, ध्यानयोगात् परं तपः प्राप्यते, तस्मात् धीरः साधकः ध्यानयोगनिरतो भूयात्।

मे २४

१४५. ध्यानयोगस्य महिमा

ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।

श्वेताश्वतरोपनिषत् १-३

ते ऋषयः ध्यानयोगानुगताः सन्तः स्वगुणैः निगूढां देवात्मशक्तिम् अपश्यन्।

ध्यानयोगस्य महिमानम् अयं मन्त्रः प्रदर्शयति। ध्यानं नाम मनसः एकाग्रता। बाह्यात् अनात्मप्रपञ्चात् मनसः प्रत्यक्प्रवणतया आत्मनः अनुसन्धानमेव हि ध्यानं नाम? मनसः परमात्मनि संयोजनमेव ध्यानयोगः। अनेन ध्यानयोगेन अतीन्द्रियगोचराश्च विषयाः ज्ञायन्ते॥

भगवतः अद्भुता शक्तिः यद्यपि अस्मास्वेव विद्यते तथापि सा मायया प्रतिबद्धा अस्ति। बाह्यान् अनात्मविषयानेव सत्यत्वेन गृहीत्वा तेष्वेव अनुरक्तता हि **माया** नाम। बाह्यविषयानुरक्तता एव **माया**। अज्ञानिनः मायापाशया बद्धाः सन्ति। मायावरणेन अस्माकं पारमार्थिकं स्वरूपं न अवभासते। ध्यानेन तु मायावरणस्य विनिवृत्तिर्भवति। अस्माकं प्राचीनमहर्षयः इदं रहस्यं प्रदर्शितवन्तः। भगवतः ध्यानेन वयमपि मायाजालात् मुक्ता भवेम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'हिततम'विदे वेदान्तभास्कराय नमः॥

आत्मज्ञानं हितं श्रेष्ठम् आत्मज्ञानं परं मतम्।
आत्मज्ञानं परा सम्पत् इति **वेदान्तभास्करः**॥

आत्मज्ञानं श्रेष्ठं हितम्, आत्मज्ञानं परं मतम्। आत्मज्ञानमेव परा सम्पत् च॥

मे २५

१४६. आत्मज्ञानमेव हिततमम्

मामेव विजानीहि इति, एतदेव अहं मनुष्याय हिततमं मन्ये, यन्मां विजानीयात्।

कौषीतकिब्राह्मणोपनिषत् ३-१

मामेव विजानीहि। एतदेव अहं मनुष्याय हिततमं मन्ये यद् आत्मज्ञानम्॥

ज्ञानिवरेण्यः देवेन्द्रः दैवोदासिप्रतर्दनं प्रति एतद् वचः उक्तवान्। ''मनुष्याणां हितं किम्? कृपया उच्यताम्'' इति प्रतर्दनेन पृष्टः देवेन्द्रः एतद् वचः उक्तवान्। आत्मनः विज्ञानम् एकमेव मानवानां हितभूतम्॥

बुद्धिमान् मानवः समस्तमेव विश्वं विज्ञातुकामः प्रयतते, यथाशक्ति विजानाति च। न तु एतद् आत्मज्ञानम्। न चैतत् हितं भवितुमर्हति। अनेन मुक्तिः न लभ्येत। तर्हि अत्यन्तं हितं किम्? आत्मज्ञानमेव। आत्मा नाम समस्तस्यापि विश्वस्य आस्पदभूतं, समस्तस्य विश्वस्य सारभूतं, विश्वरूपेण अवभासमानं सर्वव्यापकं ब्रह्म। सर्वविकाररहितं परिशुद्धं ब्रह्मैव आत्मा। आत्मज्ञानादेव मुक्तिः। आत्मज्ञानमेकमेव मानवानाम् हिततमम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विद्यापात्रत्वविदे वेदान्तभास्कराय नमः॥

आत्मविद्या ब्रह्मविद्या वेदान्ते प्रतिपादिता।
नायोग्याय प्रदातव्या परा **वेदान्तभास्करः**॥

वेदान्ते प्रतिपादिता परा आत्मविद्या ब्रह्मविद्या अयोग्याय न प्रदातव्या।

मे २६

१४७. अयोग्येभ्यो नेयं प्रदातव्या

वेदान्ते परमं गुह्यं पुरा कल्पे प्रचोदितम्।
नाप्रशान्ताय दातव्यं नापुत्राय अशिष्याय वा पुनः॥

श्वेताश्वतरोपनिषत् ६-२२

पुराकल्पे परमं रहस्यम् आत्मज्ञानं वेदान्ते महर्षिभिः उपदिष्टमस्ति। अप्रशान्ताय अयोग्याय पुत्राय, अभक्ताय शिष्याय वा नैतद् देयम्॥

वेदान्तेषु ब्रह्मविद्या समुपदिष्टास्ति। नैषा सामान्या विद्या। किं तु रहस्यविद्या ह्येषा, परा विद्या हीयम्। मोक्षविद्या खल्वेषा ब्रह्मात्मविद्या! श्रेष्ठविद्या ह्येषा! इयं मङ्गळविद्या हि! वेदान्तविद्या नाम पावनविद्या!

सद्गुरुप्रसादादेव सम्पादनीया ब्रह्मात्मविद्या! अनधिकारिभ्यो न प्रदातव्या ह्येषा विद्या! गुरुभक्तिरहितेभ्यः दुरभिमानिभ्यः नैव प्रतिपादनीया ब्रह्मविद्या। धनाभिमानेन अधिकारमदेन च प्रमत्तेभ्यः नैषा रहस्यभूता ब्रह्मविद्या विक्रेतव्या। केवलं सच्छिष्येभ्यः एषा दातव्या। यतो हि बुद्धिकौशलबलेन नानुभवितव्या ब्रह्मविद्या। साधनसम्पन्नस्य उत्तमसंस्कारवतः मुमुक्षोः परिपक्वे अन्तःकरणे सद्गुरुकृपया विकसमाना प्रकाशमाना हि एषा ब्रह्मविद्या॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वित्तदाहविदूराय वेदान्तभास्कराय नमः॥

न कस्यापि हि वित्तेन तृप्तिः कुत्रापि दृश्यते।
वित्तेन वर्धते दाहः इति **वेदान्तभास्करः**॥

वित्तेन तृप्तिः न कस्यापि कुत्रापि दृश्यते। वित्तेन दाहः वर्धते॥

मे २७

१४८. धनस्य दौर्भाग्यम्

न वित्तेन तर्पणीयो मनुष्यः।

काठकोपनिषत् १-१-२७

वित्तेन, धनेन मनुष्यं तर्पयितुं नैव शक्यते।

मनुष्याय अधिकेनापि धनेन, अधिकारेण, यशसा, आरोग्येण, अधिकेनापि आयुरादिना नालंभवेत्। तत् मे, इदं मे स्यात्, सर्वमपि मे भवेत् इति। केचित् अधिकारिणः कोटिशः धनं सम्पादयन्ति। भार्यायै, पुत्रेभ्यः, जामातृभ्यः, पौत्रेभ्यः, श्यालेभ्यः, नप्त्रेभ्यः, प्रप्रपौत्रेभ्यः इति अधिकं धनं सम्पाद्य राशी-कुर्वन्ति। भवतु, किं तावता धनसम्पादनेन तेषां तृप्तिर्जाता? नैव॥

यतो हि धनस्य स्वभाव एव एषः। अस्मिन् प्रपञ्चे एतावत् पर्यन्तं न कस्मैचिदपि धनेन तृप्तिर्नाम जाता अस्ति। दशरूप्यकेषु प्राप्तेषु शतं रूप्यकाणि स्युः, शतेषु रूप्यकेषु लब्धेषु सहस्रं रूप्यकाणि भवेयुः, सहस्रेषु रूप्यकेषु प्राप्तेषु दशसहस्रं रूप्यकाणि भवेयुः, तेषु प्राप्तेषु सत्सु ततोऽधिकं ततोऽप्यधिकं, ततः शतगुणं, सहस्रगुणम् इत्यादि। एवम् धनाशा वर्धमाना एव वर्तते। घृतेन हुतेन अग्निः वर्धते खलु? एवमेव धनाशा अपि। सर्वथा धनेन न कस्मैचित् तृप्तिः दृष्टा। धनस्य दौर्भाग्यमेतत्। दुस्थितिरेषा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनस्तत्त्वविदे वेदान्तभास्कराय नमः॥

सूक्ष्मत्वात् व्यापकत्वाच्च मनसो ब्रह्मवत् तथा।
मनो ब्रह्मेत्युपासीत धीरो **वेदान्तभास्करः**॥

मनसः ब्रह्मवत् सूक्ष्मत्वात् व्यापकत्वाच्च 'मनो ब्रह्म' इति धीरः उपासीत।

मे २८

१४९. 'मनोब्रह्मणः' उपासनम्

मनो ब्रह्मेत्युपासीत इत्यध्यात्मम्॥

छान्दोग्योपनिषत् ३-१८-१

मनः ब्रह्म इति उपासीत। इदम् अध्यात्मोपासनम्॥

लौकिकव्यवहारेषु इन्द्रियाणामेव प्राबल्यम्, तत्रापि चक्षुरेव प्रधानम्। चक्षुषि सति प्रपञ्चः, चक्षुरभावे सर्वं शून्यमेव। वेदान्तेषु तु मन एव प्रधानम्। मनसैव वेदवेदान्तवाक्यानां सन्देशग्रहणम्; लोकेऽपि खलु मनसः प्रधानं स्थानम् नूनम् अस्त्येव। 'मनसि सति महादेवः', 'यथामनः तथा महादेवः' इति हि वदन्ति॥

परं ब्रह्म समस्तमेव विश्वं व्याप्नोति। परब्रह्मणः उपासनानि आध्यात्मिकतया, आधिभौतिकतया, आधिदैविकतया च त्रिषु स्थानेषु उपनिषदः उपदिशन्ति। प्रकृते 'मनः एव ब्रह्म इत्युपासीत' इति अयं मन्त्रः उपदिशति। यद्यपि अचेतनं मनः, चिन्मात्रं तु ब्रह्म, तथापि मनोब्रह्मणोः सादृश्यं भवति। ब्रह्म सूक्ष्मम्, मनोऽपि सूक्ष्मम्; ब्रह्म व्यापकम्, मनश्च व्यापकम्; ब्रह्म अनन्तम्, मनश्च अनन्तम्; ब्रह्म सर्वज्ञम्, मनश्च सर्वज्ञम्—इत्यतः मन एव ब्रह्म इत्युपासीत। मनसि ब्रह्मभावः कर्तव्यः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'मूर्तामूर्ततत्त्व'विदे वेदान्तभास्कराय नमः॥

द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च।
मूर्तामूर्तविदूरं च ब्रह्म **वेदान्तभास्करः**॥

ब्रह्मणः मूर्तम् अमूर्तम् च इति अविद्याकल्पिते द्वे एव रूपे भवतः। ब्रह्म तु स्वरूपतः मूर्तामूर्तविदूरमेव॥

मे २९

१५०. ब्रह्मणः रूपद्वयम्

द्वे वाव ब्रह्मणो रूपे मूर्तं चैव अमूर्तं च।

बृहदारण्यकोपनिषत् २-३-१

कल्पिते द्वे रूपे ब्रह्मणः विद्येते, ते एव मूर्तम् अमूर्तं चेति।

परब्रह्म नाम समस्तस्यापि जगतः मूलकारणं परिपूर्णतत्त्वम्। ब्रह्मणः कार्यमेव इदं विश्वं नाम। ब्रह्मणः रूपमेव अयं प्रपञ्चः। ब्रह्मणः विकार एव इदं ब्रह्माण्डम्। अयं प्रपञ्चः मूर्तम् अमूर्तमिति द्वेधा विभज्यते। मूर्तं नाम इन्द्रियैः ग्राह्याणि शब्दस्पर्शरूपरसगन्धात्मकानि वस्तूनि। अमूर्तं नाम प्रमाणैः अगृह्यमाणं नामरूपरहितम् अव्याकृतं तत्त्वम्॥

इमे मूर्तामूर्ते, क्षराक्षरे, व्यक्ताव्यक्ते, कार्यकारणे, स्थूलसूक्ष्मे, मर्त्यामृते, व्याकृताव्याकृते च इत्यादिशब्दैः कथ्येते। निरुपाधिकस्य ब्रह्मणः एते द्वे अपि अविद्याकृते सोपाधिके रूपे भवतः। व्याकृताव्याकृते द्वे अपि परस्य ब्रह्मणः रूपे एव। परमार्थतस्तु परस्मात् ब्रह्मणः भिन्नतया व्याकृतं वा अव्याकृतं वा नैव विद्यते। परं च ब्रह्म स्वरूपतः न व्याकृतं न च अव्याकृतम्। उभयातीतमेव परं ब्रह्म॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'भार्गवीवारुणीविद्या'विदे वेदान्तभास्कराय नमः॥

भार्गवी भृगवे प्रत्ता वरुणेन महात्मना।
तस्मात् सैषा **वारुणी** च विद्या **वेदान्तभास्करः**॥

महात्मना **वरुणेन** प्रत्ता इति **वारुणी** इति, भृगवे प्रत्ता इति **भार्गवी** इति च सा एषा **ब्रह्मविद्या** प्रसिद्धास्ति।

मे ३०

१५१. 'भार्गवी वारुणी विद्या' नाम का?

सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति॥ तैत्तिरीयोपनिषत् ३-६-२

सा एषा भार्गवी वारुणी विद्या परमे आकाशे प्रतिष्ठिता। यः एतां विद्यां एवं वेद सः ब्रह्मणि प्रतितिष्ठति॥

भृगुर्नाम शिष्यः वरुणात् सद्गुरोः **ब्रह्मविद्यां** प्राप्तवान्। अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयाख्यान् पञ्चापि कोशान् अतीतं तत्त्वमेव हि परब्रह्मतत्त्वम्। अस्यैव तत्त्वस्य "आनन्दः" इत्यपि नाम। पञ्चानामपि कोशानाम् आत्मत्वेन स्थितम्, पञ्चभ्योऽपि कोशेभ्यः विलक्षणं ब्रह्मतत्त्वम् भृगुमहर्षिः ज्ञातवान् खलु, अतः अस्याः विद्यायाः "**भार्गवी विद्या**" इति नाम आगतम्॥

इमां विद्यां वरुणः उपदिष्टवान् इति एषा "**वारुणी विद्या**" इति प्रसिद्धा अभवत्। एषा विद्या परमात्मविद्या, इयमेव ब्रह्मविद्या च। हृदयान्तर्वर्तिनः आत्मनो विद्या "**हार्दविद्या**" इति च कथ्यते। भृगुमहर्षिः इमां विद्यां प्राप्य कृतकृत्योऽभवत्, यः कश्चित् इदं ब्रह्म आत्मत्वेन जानीयात् सः ब्रह्मणि प्रतिष्ठितो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं षड्ऊर्मिरहिताय वेदान्तभास्कराय नमः॥

अशनायां पिपासां च शोकं मोहं जरां मृतिम्।
आत्मा षड्ऊर्मीरत्येति सदा **वेदान्तभास्करः**॥

आत्मा अशनायां पिपासाम्, शोकं मोहम्, जरां मृत्युम् च— इति एता षड्ऊर्मीः सदा अत्येति।

मे ३१

१५२. षड्ऊर्मिरहितोऽयम्

यो अशनायापिपासे शोकं मोहं जरां मृत्युम् अत्येति।

बृहदारण्यकोपनिषत् ३-५-१

यः अशनायापिपासे शोकं मोहं जरां मृत्युम् अत्येति, स एव सर्वान्तरः आत्मा।

आत्मा षड्ऊर्मिरहितः असंसारी इति उपनिषदः प्रतिपादयन्ति। **षड्ऊर्मयो** नाम समुद्रस्य ऊर्मय इव षड् विकाराः। ते षड् विकारास्तु—अशनाया (अत्तुम् इच्छा), पिपासा (पातुम् इच्छा), शोकः (दुःखम्), मोहः (अज्ञानम्), जरा (वार्धक्यम्), मृत्युः (मरणम्) च। समुद्रस्य वीचय इव एते विकाराः जीवानां पुनः पुनः भवन्तीति षड्ऊर्मयः॥

षड्ऊर्मयः नात्मनो भवन्ति। आत्मा हि निरुपाधिकं सर्वान्तरं ब्रह्मैव। तर्हि षड्ऊर्मयः कस्य? उपाधीनामेव। अशनायापिपासे प्राणस्य, शोकमोहौ मनसः, जरामरणे तु देहस्य। उपाधिधर्माः आत्मनो न भवन्ति। यतः परिपूर्णः आत्मा नित्यशुद्धनित्यबुद्ध-नित्यमुक्तस्वरूपः निरवयवः निरुपाधिकश्च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुहितबोधकाय वेदान्तभास्कराय नमः॥

इन्द्रियाणि मनश्चैव सात्त्विकानि सदा बुधः।
धारयेताप्रमत्तः सन् मुक्त्यै **वेदान्तभास्करः**॥

मुमुक्षुर्विवेकी इन्द्रियाणि मनश्च अप्रमत्तः सात्त्विकानि धारयेत।

जून् १

१५३. मुमुक्षवे हितोक्तिः

दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेत अप्रमत्तः।

श्वेताश्वतरोपनिषत् २-९

दुष्टाश्वैः युक्त वाहनमिव दुष्ट मनः विद्वान् साधकः अप्रमत्तः सन् धारयेत॥

मनो नाम अत्यन्तं श्रेष्ठं साधनम्। इदं मनः मृदु कठोरं च। इन्द्रियाणि इदं मनः आत्माभिमुखं कर्तुम् इच्छन्ति सन्ति अश्वा इव वर्तन्ते। यद्यपि रथः उत्तमः तथापि रथबद्धाः अश्वाः अदान्ताः दुष्टाश्चेत् तदा विपद् आपतत्येव। तस्मात् विवेकिना सारथिना प्रथमं तावत् अश्वाः सुशिक्षितव्याः॥

एवमेव अश्वस्थानीयानि इन्द्रियाणि सात्त्विकानि भवेयुः। इन्द्रियाणि योग्यानि चेत् मनश्च सात्त्विक भवत्येव। तस्मात् साधकेन इन्द्रियाणि मनश्च सात्त्विकानि कर्तव्यानि। सात्त्विकान् विषयानेव इन्द्रियेभ्यः दद्यात् साधकः। सत्सङ्गः, सदाचारः, सद्वर्तनम्, जपः, तपः, पूजा, भक्तिः, नामस्मरणम्, कथाश्रवणम्, सत्सहवासः, उपासनं च इत्यादिसाधनैः साधकः इन्द्रियाणि दान्तानि कुर्यात्। विषयध्यानं विहाय आत्मचिन्तनम् वर्धनीयम्। सर्वथा अति-जागरूकतया एतत् साधन मुमुक्षुणा विवेकिना अनुष्ठातव्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रज्ञाब्रह्मविदे वेदान्तभास्कराय नमः॥

प्रज्ञाहीनं शरीरं हि सुखदुःखादिकं न हि।
वेत्ति यस्मात् ततो ब्रह्म प्रज्ञा **वेदान्तभास्करः**॥

शरीर प्रज्ञाहीनं चेत् सुखदुःखादिकं न हि वेत्ति। तस्मात् प्रज्ञा नाम ब्रह्मैव॥

जून् २

१५४. प्रज्ञाहीनः शव एव केवलम्

न हि प्रज्ञापेतं शरीरं सुखं दुःखं किञ्चन प्रज्ञापयेत्।

कौषीतकिब्राह्मणोपनिषत् ३-७

प्रज्ञारहितं चेत् शरीरं सुखं दुःखं वा किञ्चन न विजानीयात्॥

अस्मिन् शरीरे अनेके व्यापाराः सततं भवन्ति। अल्पम् अन्नं, किञ्चित् जलं च दत्तं चेत्, एतद् शरीरं स्वयमेव सकलानि कर्माणि करोति। अस्मिन् शरीरे नेत्रे पश्यतः, श्रोत्रे शृणुतः, मनसि सुखदुःखानुभवो भवति। इदं कथं साध्यम्? शरीरादीनि सर्वाण्यपि जडानि खलु? इति चेत्, अयं मन्त्रः प्रतिवचनं ददाति॥

सर्वेऽप्येते व्यापाराः प्रज्ञानिमित्ताः। प्रज्ञा नाम चिन्मात्रस्वरूपः आत्मैव। अचेतनस्यापि मनसः सुखदुःखानुभवशक्तिः प्रज्ञा-निमित्तैव। प्रज्ञासम्बन्धः विच्छिन्नश्चेत् इदं शरीर शव एव भवति। प्रज्ञा एव देहे शक्तिः। प्रज्ञा नाम शुद्धा निरुपाधिका चैतन्यशक्तिः। आत्मन एव **प्रज्ञा** इति नामान्तरम्। सूर्यस्य प्रकाशवत् आत्मनः स्वरूपभूतया प्रज्ञया सर्वे व्यापाराः, सर्वाणि कार्याणि च भवन्ति। प्रज्ञा एव ब्रह्म। परमेव ब्रह्म प्रज्ञारूपेण अवभासते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रणवध्याननिरताय वेदान्तभास्कराय नमः॥

श्रौतस्मार्तविनिर्विण्णः प्रणवध्यानतत्परः।
लभतेऽसौ परं ब्रह्म सत्यं **वेदान्तभास्करः**॥

श्रौतस्मार्तकर्माणि प्रविहाय प्रणवध्यानतत्परश्चेत् यतिः सत्यं परं ब्रह्म लभते।

जून् ३

१५५. ओङ्कारस्य लक्ष्यम्

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।

मुण्डकोपनिषत् २-२-४

प्रणव एव धनुः, आत्मैव शरः, ब्रह्मैव लक्ष्यम्, अप्रमत्तः सन् लक्ष्ये शरं योजयेत्।

साधकैः ब्रह्मणि एकता प्राप्तव्या। परब्रह्मणः आत्मनश्च अभेदो द्रष्टव्यः। सर्वासाम् उपनिषदां सन्देशोऽयम्। अभेदं प्राप्तुम् अनेके मार्गाः वेदान्तेषु उपदिष्टाः सन्ति। प्रकृतोऽयं मन्त्रः ओङ्कारद्वारा ब्रह्मणि अभेदप्राप्तिं दर्शयति॥

ओङ्कारः धनुर्भवेत्। शरं लक्ष्ये प्रवेशयितुं, योजयितुं धनुः अवश्यं खलु? धनुषि हि शरः सधेयः? तथैव जीवात्मरूपं शरं ब्रह्मरूपे लक्ष्ये ताडयितुं धनुर्नाम ओङ्कार एव। जीव एव शरः। देहाद्युपाधिभिः उपलक्षितः जीवः अस्मिन् देहे, 'अहम् अहम्' इतिरूपेण अवभासते खलु? अयमेव शरः। ब्रह्मैव गन्तव्य लक्ष्यम्। जीवः जीवत्वं विहाय निरुपाधिके ब्रह्मणि एकत्वं प्राप्नुयात्। ओङ्कारोपासनेन कल्पितं जीवत्वं त्यक्त्वा साधकेन स्वरूपभूते ब्रह्मणि ऐकाग्र्येण जीवः प्रविलापयितव्यः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वप्नरहस्यविदे वेदान्तभास्कराय नमः॥

मनसा कल्पितान् भेदान् स्वप्ने पश्यति नान्यतः।
मन एवात्र देवः स्यात् इति **वेदान्तभास्करः**॥

मानवः स्वप्ने मनसा कल्पितान् भेदान् पश्यति, अत्र मन एव देवः स्यात्।

जून् ४

१५६. मनोदेवस्य राज्यभारः

अत्रैष देवः स्वप्ने महिमानम् अनुभवति।

प्रश्नोपनिषत् ४-५

अत्र स्वप्ने मनोदेवः स्वमहिमानम् अनुभवति।

जागरिते इन्द्रियाणि जाग्रन्ति सन्ति स्वस्वव्यापारान् कुर्वन्ति। इन्द्रियाणां मनः सहायकं भवति। जाग्रति मनसोऽपि इन्द्रियाणामेव प्राबल्यम्, तेषामेव राज्यभारश्च॥

जागरितं विहाय स्वप्नं गते सति तत्र केवलं मन एव वर्तते। स्वप्ने इन्द्रियाणां चेष्टा न विद्यते। स्वप्ने मनः स्वेष्टान् पदार्थान् स्वयमेव सृष्ट्वा स्वयमेव आनन्दम् अनुभवति। स्वप्नकाले मनः राजवत् विराजते। तदा मनः स्वयमेव इन्द्रियाणि, विषयाः, शरीरं च भवति। तत्र यथेष्टं पश्यत्, यथाकामं शृण्वत्, स्वेष्टं खादत् देवं मनः सानन्दं वर्तते। तस्मात् मनः सर्वशक्तं सर्वज्ञं च वर्तते। इन्द्रियाणि मनस्तन्त्राणि, मनस्तु स्वतन्त्रम्। एकमेव सदपि मनः अनेकवस्तुरूपेण अवभासेत। मनसो महिमा ह्येषः। आत्मा तु ईदृशस्यापि मनसः प्रत्यक्चेतनभूतः। आत्मन एव मनसः अस्तित्वम्। आत्माधीन एव मनसो महिमायम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सदा जागृताय वेदान्तभास्कराय नमः॥

आत्मा ज्ञेयः सदा धीरैः त्यक्त्वा निद्रां भयप्रदाम्।
गुरुवाक्योपदेशेन धृत्या **वेदान्तभास्करः**॥

गुरुवाक्योपदेशेन भयप्रदां निद्रां त्यक्त्वा धीरैः साधकैः सदा धृत्या आत्मा एव विज्ञेयः।

जून् ५

१५७. ज्ञानप्राप्त्यै चत्वारि साधनानि

उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।

काठकोपनिषत् १-३-१४

हे विवेकिनो मुमुक्षवः, यूयं उत्तिष्ठत, जाग्रत, वरान् गुरून् प्राप्नुत, तेभ्यः आत्मान विजानीत।

अस्मिन् मन्त्रे ब्रह्मविद्याचार्यः ब्रह्मनिष्ठश्च मृत्युदेवः सर्वेभ्यः जिज्ञासुमुमुक्षुभ्यः ज्ञानप्राप्त्यै चतुरः सन्देशान् उपदिशति। ते च

उत्तिष्ठत—आत्मज्ञानं प्राप्तुं संकल्पं कुरुत। अनादि-भूतायाम् अविद्यानिद्रायामेव मा मग्ना भवत। नित्यशुद्धम् आत्मानम् अवगन्तुं प्रयत्नं कुरुत॥

जाग्रत—सर्वानर्थबीजभूतायाः अविद्यानिद्रायाः ऊर्ध्वम् आगच्छत। अज्ञानान्धकारासुरं संहरत। ज्ञानं सम्पादयत॥

वरान् प्राप्य—ब्रह्मनिष्ठान् सम्प्रदायविदः सद्गुरून् उपगम्य, सद्गुरुसेवां भक्त्या कुर्वन्तः तेभ्यः आत्मोपदेशं शृणुत॥

निबोधत—सद्गुरुभ्यः आत्मस्वरूपम् विज्ञाय मुक्ता भवत।
"Arise, Awake, stop not till the goal is reached".

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं त्यागमहत्त्वविदे वेदान्तभास्कराय नमः॥

कर्मणा प्रजया नैव मुक्तिं प्राप्नोति मानवः।
त्यागेनैव हि मुक्तिः स्यात् इति **वेदान्तभास्करः**॥

मानवः कर्मणा वा प्रजया वा मुक्तिं नैव प्राप्नोति, त्यागेनैव हि मुक्तिः प्राप्यते।

जून् ६

१५८. त्यागेनैव मुक्तिः

न कर्मणा न प्रजया धनेन, त्यागेनैके अमृतत्वम् आनशुः।

कैवल्योपनिषत् १-२

कर्मणा वा प्रजया वा धनेन वा अमृतत्वं न प्राप्यते। किं तु एके ज्ञानिनः त्यागेन अमृतत्वं प्राप्तवन्तः॥

अमृतत्वाय त्याग एव एकं साधनम् इति धैर्येण प्रतिपादयति अयं मन्त्रः। वैदिकसम्प्रदाये अयं मन्त्रः **यतिवन्दनमन्त्रः** इति सुप्रसिद्धः जनप्रियश्च॥

जपपूजापारायणहोमदानध्यानादीनि **कर्माणि**। एतेभ्यः इष्टफलानि लभ्यन्ते। कर्मभ्यः इष्टफलानि लभ्यन्ते। कर्मभ्यः अभ्युदयफलानि केवलानि लभ्यन्ते न तु मुक्तिः। सत्पुत्रेभ्यश्च गृहस्थानाम् अमृतत्वं न लभ्यते। अथ, धनम्! धनेन हि अद्यतनकाले सर्वं सम्पाद्येत। धनेन असाध्यमिति न किञ्चिदस्ति। अपि तु स्वतस्सिद्धः स्वाभाविको मोक्षः **धनेनापि** न लभ्यः॥

तर्हि मोक्षस्य किं वा साधनम्? इति चेत्। त्यागः, त्यागो नाम अध्यासस्य त्यागः। अहङ्काराममकारयोरेव त्यागः। अविद्याहानिरेव **त्यागः**। **आत्मज्ञानमेव** नूनं त्यागः। त्यागेनैव मुक्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कर्मफलसाक्षिणे वेदान्तभास्कराय नमः॥

जीवात्मा कुरुते कर्म तथैव फलमश्नुते।
न कुर्वन् नाश्नुते दुःखं साक्षी **वेदान्तभास्करः**॥

जीवात्मा कर्म कुरुते, तथैव फलम् अश्नुते। साक्षी तु कर्म न कुर्वन् अत एव दुःख न अश्नुते॥

जून् ७

१५९. उभावपि अन्योन्यविलक्षणौ

तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।

मुण्डकोपनिषत् ३-१-१

जीवसाक्षिणोः मध्ये अन्यो जीवः कर्मफल सम्यक् भुङ्क्ते, अन्यस्तु साक्षी ईश्वरः कर्मफलानि न अश्नन् केवलं पश्यति।

अस्माकं शरीरे द्वौ आत्मानौ भवतः, जीवात्मा परमात्मा चेति। उभावप्येतौ पक्षिद्वयरूपकेण अत्र उपनिषदि उपदिष्टौ। एतौ उभौ अपि पक्षिणौ एकमेव शरीरवृक्षम् आश्रित्य सहैव तिष्ठतः। यद्यपि एकस्मिन्नेव शरीरे उभावपि विद्येते, तथापि एकः आत्मा कर्माणि कुर्वन् तेषां फलानि अनुभवन् नित्यसंसारी भवति, अयमेव कर्तृभोक्तृस्वरूपः जीवात्मा॥

इतरस्तु न कान्यपि कर्माणि करोति, अत एव तस्य सुखदुःखे न सम्भवतः, जन्ममरणसंसारस्तु नतरां सम्भवति। अयं साक्षिमात्रः सन् सर्वान् विकारान् निर्विकारः सन् अवभासते। सर्वसंसार धर्मविलक्षणः अयं प्रत्यगात्मा। अयमेव अससारी परमात्मा। उभावप्येतौ परस्परं विलक्षणौ। अससारी प्रत्यगात्मा एव अहं इति यः धीरो जानाति स एव ब्रह्मवित् जीवन्मुक्तश्च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वविज्ञातृविदे वेदान्तभास्कराय नमः॥

आत्मनैव विजानाति प्रमात्रादीन् स्वभावतः।
न तं कोऽपि विजानीयात् इति **वेदान्तभास्करः**॥

प्रमात्रादीन् सर्वान् आत्मनैव स्वभावतः विजानाति लोकः, तम् आत्मान तु न कोऽपि जानीयात्।

जून् ८

१६०. आत्मैव सर्वस्यापि विज्ञाता

येनेदं सर्वं विजानाति तं केन विजानीयात्? विज्ञातारमरे केन विजानीयात्?

बृहदारण्यकोपनिषत् २-४-१४

येन इदं सर्वं विजानाति लोकः, तम् आत्मान केन विजानीयात्? अरे मैत्रेयि, विज्ञातारं केन कथं वा जीवः विजानीयात्?

वेदान्तेषु आत्मनः 'वेदिता' इति नाम विद्यते। वेत्ति इति वेदिता। ज्ञप्तिस्वरूपस्य आत्मनः संनिधानेनैव प्रमाणानि उपयुज्य वयं प्रमेयान् जानीमः। आत्मनः सांनिध्याभावे अस्य जडस्य देहस्य नास्ति किञ्चिदपि ज्ञानसामर्थ्यम्॥

प्रमाणानि इति इन्द्रियमनोबुद्धिरूपाणि करणानि, प्रमेयाः इति शब्दादयो विषयाः, प्रमाता नाम द्रष्टा श्रोता इत्यादिरूपः। एतेषां त्रयाणामपि प्रकाशकः आत्मा। अस्यैव आत्मनः नाम विज्ञाता इति। अयमेव सर्वमपि प्रकाशयति। अस्य विज्ञातुः न कोऽपि विज्ञाता अन्यो अस्ति। ज्ञप्तिस्वरूपमेव सन्तम् आत्मानं न कोऽपि विषयीकृत्य जानीयात्। प्रमातृप्रमाणप्रमेयानां मूलमेव हि आत्मा साक्षिस्वरूपः। तं चैतन्यस्वरूपमेव आत्मानं जानीयात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं त्रिवृत्करणतत्त्वविदे वेदान्तभास्कराय नमः॥

पृथिवीजलतेजांसि त्रिवृत्करणरूपतः।
शरीरं जायते कार्यं तेभ्यो **वेदान्तभास्करः**॥

पृथिवी आपः तेजः इति **त्रिवृत्करणम्** उच्यते। एतेभ्यः शरीरं नाम कार्यम् उत्पन्नम्॥

जून् ९

१६१. किंनाम 'त्रिवृत्'करणम्

अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक्।

छान्दोग्योपनिषत् ६-६-५

हे सोम्य, मनः अन्नमयम्, प्राणः आपोमयः, वाक् तेजोमयी।

अन्नम्, आपः, तेजश्च इति त्रीण्येव एतानि स्वीकृत्य अस्य विश्वस्य सृष्टिः उपदिष्टात्र। अस्य 'त्रिवृत्करण'मिति नाम। पृथिवी आपः तेजांसि—इति एतेभ्यः त्रिभ्य एव अस्य प्रपञ्चस्य सृष्टिः इति इयम् उपनिषत् उपदिशति॥

भुक्तादन्नात् मनो वर्धते। अन्नेन मनसः सम्बन्धः। **यादृशम् अन्नं तादृशं मनः**। सात्त्विकादाहारात् सात्त्विकं मनः। तस्मादेव कारणात् साधकैः सात्त्विका एव आहाराः स्वीकार्याः। मनसि शुद्धे सति मुमुक्षोः ज्ञानं प्राप्तप्रायमेव॥

आपोमयः प्राणः। जलेन हि प्राणो जीवति। जलाभावे मानवः म्रियते एव। अन्नाभावेऽपि जीवेत्, जलाभावे प्राणाभावः प्राणाभावे तु मरणमेव। वाक् तु तेजोमयी। तैजसैः आहारैः वाक् पटीयसी भवति। एवं शरीरमेतत् पृथिवीजलतेजोभिः सम्भूतम्। इदमेव **त्रिवृत्करणं** नाम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भोक्त्रादिस्वरूपविदे वेदान्तभास्कराय नमः॥

भोक्ता भोग्यं प्रेरिता च सर्वं ब्रह्मैव नान्यथा।
इति सञ्जानतां मुक्तिः इति **वेदान्तभास्करः**॥

भोक्ता, भोग्यं, प्रेरिता च इत्येतत् त्रयमपि ब्रह्मैव, नान्यत् इति विजानतां मुक्तिः।

जून् १०

१६२. एकमेव ब्रह्म त्रेधा वर्तते

भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्।

श्वेताश्वतरोपनिषत् १-१२

भोक्ता, भोग्यं, प्रेरिता च—इति एतत् त्रयमपि एतद् ब्रह्मैव इति जानन् एव ज्ञानी भवति।

अद्वितीयमपि परं ब्रह्म नानानामरूपैः अवभासते। एक एव सन्नपि समुद्रः अनेकैः नामरूपैः अवभासते खलु? अयं मन्त्रः इमं विशालं प्रपञ्चं त्रेधा विभजते। भोक्ता, भोग्यं, प्रेरिता च इति हि त्रेधा विभागः। भोक्तारो जीवाः, भोग्यानि नाम भोगविषयाः पदार्थाः, प्रेरिता इति प्रेरकः ईश्वरः॥

कर्तारो जीवाः इष्टानिष्टफलप्राप्त्यर्थम् अविद्यादोषेण कर्माणि कुर्वन्ति। अनन्तरं ते एव भोक्तारो भवन्ति। भोगान् अनुभवन्तः, कर्माणि कुर्वन्तः, दुःखसागरे पतन्ति इति यत् स एव सकलजीवानां सहजो गुणः। सकलानि भोग्यवस्तूनि भोक्तुः अधीनानि भवन्ति। भोक्तृभोग्ययोः संयोजकः प्रेरिता सर्वज्ञः ईश्वरः। परमार्थतः इदं त्रयमपि परब्रह्मैव। एकमेव ब्रह्म त्रेधा अवभासते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अशरीरत्वनिष्ठाय वेदान्तभास्कराय नमः॥

देहाभिमानरहितः कृतकृत्यो भवेदयम्।
अशरीरस्वभावोऽयं ज्ञानी **वेदान्तभास्करः**॥

आत्मज्ञानी देहाभिमानरहितः, अशरीरस्वभावः सन् कृतकृत्यो भवति।

जून् ११

१६३. देहाभिमानरहितोऽयम्

तद्यथा अहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत, एवमेवेदं शरीरं शेते। अथायम् अशरीरो अमृतः प्राणो ब्रह्मैव तेज एव॥

बृहदारण्यकोपनिषत् ४-४-७

यथा सर्पत्वक् वल्मीके मृता त्यक्ता पतति, एवमेव ज्ञानिनः शरीरमपि तूष्णीं पतति। अथ अयम् अशरीर एव अमृत एव, प्राण एव, ब्रह्मैव एषः। तेज एव संवृत्तः॥

ब्रह्मज्ञानिनः मनसि कामाभावात् तस्य विषयभोगेषु आसक्तिर्न विद्यते। ज्ञानिनः शरीराभिमानाभावात् शरीरपोषणेच्छा न विद्यते। अनेन देहेन कार्यं प्रयोजनं नाम मुक्तिरेव। तस्यां मुक्तौ प्राप्तायां सत्यां ज्ञानिनः अनेन देहेन प्राप्तव्यानि फलानि न सन्ति हि॥

अस्यार्थस्य प्रकाशनाय सर्पत्वचः दृष्टान्तः। आत्मनः भिन्नायां त्वचि सर्पस्य अभिमानः अस्ति किम्? यथा सर्पः तां मुक्तां त्वचं तत्रैव विहाय तत्र निरभिमानः सन् वर्तते, एवमेव ज्ञानी अपि देहाभिमानरहितः सानन्दः वर्तते। देहादीनां प्रारब्धं यथाकथञ्चित् वर्ततां नाम, आत्मज्ञानी तु सदा आत्मानन्दनिष्ठो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापमर्मविदे वेदान्तभास्कराय नमः॥

पुण्येन कर्मणा पुण्यः पापः पापेन कर्मणा।
सुखी पुण्येन, पापेन दुःखी **वेदान्तभास्करः**॥

पुण्येन कर्मणा पुण्यः सुखीभवति, तथा पापेन कर्मणा पापः दुःखी च भवति।

जून् १२

१६४. पुण्यपापाभ्यां सुखदुःखे

साधुकारी साधुर्भवति पापकारी पापो भवति।
पुण्यः पुण्येन कर्मणा भवति, पापः पापेन॥

बृहदारण्यकोपनिषत् ४-४-५

साधुकारी साधुर्भवति, पापकारी तु पापो भवति। पुण्येन कर्मणा पुण्यो भवति, पापेन कर्मणा पापो भवति॥

कर्मणां फलानि नियतानि भवन्त्येव। सत्कर्मभिः कृतैः सत्फलानि भवन्ति, पापकर्मभिः कृतैः अनिष्टानि फलानि भवन्ति। कर्मानुगुणानि फलानि भवन्ति। ''बीजानुगुणं फलम्'' इति प्रसिद्धमेव। निंबे बीजे उप्ते रसालफलं लभ्यते वा? रसालबीजेन उप्तेन निम्बफलनिरीक्षणमपि अयुक्तमेव खलु?

''**पुण्येन पुण्यः, पापेन पापः**'' इति हि कर्मनियमः। अस्मिन् जन्मनि कश्चित् सुखी चेत् तत् तस्य पूर्वार्जितपुण्यकर्मणः फलम्। अन्यः दुःखी चेत् तस्य पापकर्माण्येव कारणम्। तस्मात् यदि वयं सदा पुण्यकर्मानुष्ठानरताः स्मः तेन अवश्यं शुभं फलमेव लभामहे। मानवैः सदा पुण्यशीलैरेव भाव्यम्। न केनापि कारणेन विवेकिभिः पापाचरणं कर्तव्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संन्यासमुहूर्तविदे वेदान्तभास्कराय नमः ॥

यस्मिन्नेव क्षणे यस्य वैराग्यम् उपजायते।
तस्मिन्नेव क्षणे तस्य न्यासो **वेदान्तभास्करः** ॥

यस्मिन्नेव क्षणे यस्य वैराग्यम् उपजायते तस्मिन्नेव क्षणे तस्य संन्यासस्य सुमुहूर्तम्।

जून् १३

१६५. संन्यासस्य सुमुहूर्तः

यदहरेव विरजेत् तदहरेव प्रव्रजेत्। जाबालोपनिषत् ४-१

यदैव वैराग्यं जायते तदैव प्रव्याज्यं कुर्यात्।

प्रव्याज्यं नाम संन्यासः। संन्यासं कदा कुर्यात्? उत्तरायणे वा? दक्षिणायने वा? शुक्लपक्षे वा? कृष्णपक्षे वा? दिवा वा? रात्रौ वा? इति अनेके पृच्छन्ति। एतेषां सर्वेषां प्रश्नानाम् अयं मन्त्रः सुलभतया सुन्दरतया च उत्तरं ददाति। संन्यासो नाम अहङ्कारममकारत्यागः, संन्यासो नाम अध्यासत्यागः। संन्यासस्य तिथिवारनक्षत्राणि न मुख्यानि॥

तर्हि संन्यासस्य प्रेरको हेतुः कः? वैराग्यमेव। वैराग्ये जाते सति तदैव स एव संन्यासस्य सुमुहूर्तः। गृहे अग्निना दह्यमाने सति अग्नेः शमनं कदा कर्तव्यम्? सद्य एव खलु? अद्य शनिवासरः, अद्य अमावास्या इति वदामः किम्? नैव। एवमेव अन्तःकरणे तीव्रं वैराग्यं जातं चेत् तदैव संन्यासस्य मुहूर्तम्। संन्यासो नाम मानसी विरागस्थितिरेव, न तु उत्सवः। अनात्मविषयेषु अनासक्तिरेव संन्यासः। ईदृशः संन्यासः आत्मज्ञानस्य सहायकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ज्ञानसौलभ्यविदे वेदान्तभास्कराय नमः॥

इदानीमपि मर्त्यानां मुमुक्षूणां प्रयत्नतः।
''अहं ब्रह्मास्मि'' विज्ञानं लभ्यं **वेदान्तभास्करः**॥

मर्त्यानां मुमुक्षूणां ''अहं ब्रह्मास्मि'' इति विज्ञानं इदानीमपि प्रयत्नतः लभ्यमेव।

जून् १४

१६६. अद्यापि आत्मज्ञानं साध्यम्

तदिदमप्येतर्हि य एवं वेद 'अहं ब्रह्मास्मि' इति स इदं सर्वं भवति।

बृहदारण्यकोपनिषत् १-४-१०

तस्मात् अस्मिन्नपि काले इदानीमपि ''अहं ब्रह्मास्मि'' इति यः विजानाति सः सर्वमिदं भूत्वा सर्वात्मा भवति॥

''अहं ब्रह्मास्मि'' इतिविज्ञानं तदा इदानीम्, तेषाम् एतेषाम्, तत्र अत्रापि, देवानां मानवानां राक्षसानां च समानमेव। तस्मात् अद्यापि यः कश्चिदपि ब्रह्मात्मज्ञानं लब्ध्वा सर्वात्मत्वं प्राप्नुयात्॥

अस्मिन् कलियुगे, अस्मिन् काले, एतस्मिन् कलुषिते एकविंशतितमे शतमाने अस्मादृशानां दुर्बलानां जनानाम् अत्युत्तम-कालीनं तादृशं श्रेष्ठम् ब्रह्मात्मज्ञानं प्राप्यते वा? इति अस्माकं मनसि संशयो जायेत खलु? सत्यम्, जायते। अपि तु न युक्तोऽयं संशयः। यस्मात् ब्रह्मणि वा ब्रह्मात्मज्ञाने वा तत्फले मोक्षे वा न कोऽपि देशकालभेदो विद्यते। आत्मज्ञानस्य निर्विशेषस्य एक-रूपत्वात्। तस्मात् वेदकालीनं शुद्धं ब्रह्मात्मज्ञानमेव इदानीमपि मानवानां सामान्यानाम् अस्माकम् नूनं प्राप्यते एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वाग्व्यापारविदूराय वेदान्तभास्कराय नमः॥

यद्वाचा नोच्यते तत्त्वं यद्वाचं भाति सर्वदा।
तदेव ब्रह्म जानीयात् इति **वेदान्तभास्करः**॥

यत् तत्त्वं वाचा न उच्यते, वाचमेव यत् सर्वदा भाति, तदेव 'ब्रह्म' इति जानीयात्।

जून् १५

१६७. आत्मानं वर्णयितुं न शक्यते

यद् वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि॥

केनोपनिषत् १-५

वागिन्द्रियं वाग्भिः यत् न वर्णयेत्, येनैव वागिन्द्रियमपि विषयीक्रियते, तदेव 'ब्रह्म' इति त्व विद्धि॥

वागिन्द्रियं नाम जिह्वा। रसमपि रुचिमपि जानाति इतिहेतुना इयं जिह्वा रसनेन्द्रियत्वेन ज्ञानेन्द्रियं भवति; वचांसि वदतीतिहेतुना कर्मेन्द्रियमपि भवति। अस्य वागिन्द्रियस्य रसः वचः इति द्वयं विषयः। एवम् वागिन्द्रियम् अद्भुतमेव॥

चक्षुर्भ्याम् अदृश्यान् श्रोत्राभ्याम् अश्राव्यान्, मनसाऽपि अचिन्त्यान् अत्यन्तसूक्ष्मातिसूक्ष्मान् विषयान् अपि एतद् वागिन्द्रियं वर्णयेत्! तस्माद् वागिन्द्रियस्य 'असाध्यम्' इति नास्त्येव॥

तथापि एकस्मिन् विषये इदम् इन्द्रियम् आत्मनः सर्वथा पराजयम् अवश्यम् अभ्युपगच्छेदेव। कस्मिन् विषये? आत्म-स्वरूपवर्णनविषये। तत् कथम्? पश्याम। गुणा वा धर्मा वा आत्मनः नैव विद्यन्ते। वागिन्द्रियस्यापि चैतन्यभूतम्, वागिन्द्रिय-स्यापि अवभासकं प्रत्यगात्मानम् इदं वागिन्द्रियम् अवभासेत किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं धर्माधर्मातीताय वेदान्तभास्कराय नमः॥

देशकालाद्यतीतं च धर्माधर्मादिवर्जितम्।
परं ब्रह्म परं तत्त्वम् इति **वेदान्तभास्करः**॥

परं ब्रह्माख्यं परं तत्त्वं देशकालाद्यतीतम्, धर्माधर्मादिवर्जितं च।

जून् १६

१६८. परब्रह्मणः स्वरूपमिदम्

अन्यत्र धर्मात् अन्यत्राधर्मात् अन्यत्रास्मात् कृताकृतात्।

काठकोपनिषत् १-२-१४

आत्मा तु धर्मात् अधर्माच्च विलक्षणः, कृतात् अकृताच्च विलक्षणः।

उपनिषत्सु प्रतिपादितः आत्मा देवतावत् न सावयवः कश्चित् पदार्थः। पुराणेषु उपदिष्टाः सर्वा अपि देवताः सगुणाः सोपाधिकाः संसारिस्वरूपा एव। एता देवता उद्दिश्य वेदान्ताः न जिज्ञासां कुर्वन्ति। उपनिषदः असंसारिणः परब्रह्मणः स्वरूपम् अधिकृत्य विचारं कुर्वन्ति॥

अस्तु, तर्हि 'परब्रह्मणः' लक्षणं किम्? इति चेत्, कठोपनिषदः अयं मन्त्रः इदम् उपदिशति। परब्रह्मतत्त्वम् धर्माधर्मौ, कृताकृते, देशकालान् च अत्येति इति। धर्माधर्मयोः परमात्मनः निजस्वरूपस्य च न कोऽपि सम्बन्धोऽस्ति। कर्मणाम् अनुष्ठानेन वा त्यागेन वा ब्रह्मणि न कोऽपि विकारः सम्भवति। पुण्यतीर्थक्षेत्र सम्बन्धेन ब्रह्मणः अतिशयो वा अपवित्रदेशसम्बन्धेन अपवित्रता वा नास्ति। न च कालेनापि परब्रह्मस्वरूपे कश्चिदपि विकारः सम्भवेत्। इदमेव परब्रह्मणः स्वरूपम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुरुषयज्ञस्वरूपज्ञाय वेदान्तभास्कराय नमः॥

पुरुषं यज्ञरूपेण भावयेत् प्रयतः पुमान्।
पूर्णमायुरवाप्नोति ततो **वेदान्तभास्करः**॥

पुमान् प्रयतो भूत्वा पुरुष यज्ञरूपेण भावयेत्। ततः पूर्णम् आयुः अवाप्नुयात्॥

जून् १७

१६९. पुरुषयज्ञेन पूर्णायुःप्राप्तिः

पुरुषो वाव यज्ञः, तस्य यानि चतुर्विंशतिवर्षाणि तत् प्रातस्सवनम्। छान्दोग्योपनिषत् ३-१६-१

पुरुष एव यज्ञः, तस्य यानि चतुर्विंशतिवर्षाणि तदेव प्रातः-सवनम्।

अस्य 'पुरुषविद्या' इति नामधेयम्। पुरुष एव यज्ञत्वेन उपास्यः। अत्र पुरुषो नाम जीवात्मा। इमम् एव 'यज्ञः' इति उपासीत। पुरुषस्य यज्ञस्य च साम्यम् उपदिशति अयं मन्त्रः॥

यज्ञो हि सामान्येन प्रातस्सवनम्, माध्यन्दिनसवनम्, सायंसवनम् च इति त्रेधा विभज्यते। तद्वदेव पुरुषस्य आयुरपि कौमारम्, यौवनम्, वार्धक्यं च इति त्रिधा विभज्यते॥

प्राथमिकं चतुर्विंशतिसंवत्सराख्यम् आयुःपरिमाणम् **गायत्री प्रातस्सवनम्** इति, मध्यस्थं चतुश्चत्वारिंशत् संवत्सरपरिमाणम् आयुः **त्रिष्टुप् माध्यन्दिनसवनम्** इति, अन्त्यम् अष्टाचत्वारिंशत् संवत्सरपरिमितम् आयुः **जगती सायंसवनम्** इति च उपासितव्यम्। तादृशस्य उपासकस्य आरोग्यसन्तोषयुक्तं षोडशोत्तरशत-संवत्सरपर्यन्तं दीर्घमायुः लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुहितबोधकाय वेदान्तभास्कराय नमः॥

देवाराधननिष्ठाश्चेत् मानवाः स्युर्मुमुक्षवः।
देवानामप्रियं तत्स्यात् स्वार्था **वेदान्तभास्करः**॥

देवताराधननिष्ठाः मानवाः यदि मुमुक्षवः स्युः, तत् देवानाम् अप्रियं स्यात्। यतो देवाः स्वार्थिनः खलु?

जून् १८

१७०. देवाः अतीव स्वार्थिनः

एकैकः पुरुषो देवान् भुनक्ति... तस्मात् एषां तन्न प्रियं यदेतत् मनुष्या विदुः।

बृहदारण्यकोपनिषत् १-४-१०

यथा एकैकः पुरुषः अनेकान् पशून् पालयित्वा तेभ्यः स्वयं सुखम् अनुभवति, तथैव देवताः मनुष्यान् पशुवत् रक्षन्ति। अयं मानवः बहुदेवतानां पशुस्थानीयः सन् देवताराधनद्वारा ताभ्यो भोगान् उत्पादयति। तस्मात् यदि मनुष्याः आत्मानं विज्ञाय कृतार्थाः भवितुम् ईहन्ते, न तत् देवानाम् किञ्चिदपि इष्टं भवति॥

कर्मोपासनानि कुर्वन्तः, देवताः स्तुवन्तः, देवताभ्यः आहुतीः अर्पयन्तः मानवाः यदि देवताः सन्तोषयन्ति, तदा तास्ता देवताः सन्तुष्यन्ति। ततः सन्तुष्टाः देवताः मानवेभ्यः इष्टप्राप्तिरूपं फलम् अनुगृह्णन्ति। मानवैः प्रार्थितान् सर्वान् वरान् देवताः पूरयन्ति च॥

एतत् सर्वमपि लौकिकदृष्ट्या रमणीयमिव दृश्यमानमपि अत्र दोषोऽस्ति। मानवाः पशूनिव, देवा अपि मानवान् स्वार्थपशून् कृत्वा परिपालयन्ति। परमस्वार्थिनो हि देवाः। तस्मात् हे मानवाः, जाग्रत, जाग्रत! आत्मज्ञानेन यूयं कृतार्था भवत॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संसारतरणोपायविदे वेदान्तभास्कराय नमः॥

समं कायशिरोग्रीवं धारयन् अचलं स्थिरः।
प्रणवेन तरेत् दुःखोदधिं **वेदान्तभास्करः**॥

कायशिरोग्रीवं समम् अचलं धारयन्, स्थिरः प्रणवोपासकः प्रणवेन दुःखोदधिं तरेत्।

जून् १९

१७१. ओङ्काराख्यः उडुपः

त्रिरुन्नतं स्थाप्य समं शरीरम्
हृदीन्द्रियाणि मनसा संनिवेश्य।
ब्रह्मोडुपेन प्रतरेत विद्वान्
स्रोतांसि सर्वाणि भयावहानि॥ श्वेताश्वतरोपनिषत् २-८

विवेकी साधकः त्रिभिः उन्नतं शरीर सम सस्थाप्य, इन्द्रियाणि विवेकेन मनसि संनिवेश्य, प्रणवोडुपेन भयङ्करं ससारसागरं सुलभतया तरेत्॥

अयं संसारः सामान्यतः सागरेण उपमीयते उपनिषत्सु। जन्मजरामरणरूपः संसारसागरः तावता सुलभेन तरीतुं न शक्यते। तरीतुं सर्वथा अशक्यम् इत्यपि न। तरणाय उपायोऽस्ति॥

तर्हि संसारसागरतरणाय साधकैः किं कर्तव्यम्? इति चेत्, उपायविशेषम् उपदिशति अयं मन्त्रः। शरीरं समं धारयेत्। शिरः, ग्रीवम्, उरश्च समानि कृत्वा चञ्चलानि इन्द्रियाणि बाह्यविषयेभ्यः प्रत्यक् उपसंहरेत्। अनन्तरम् ओङ्कारोपासनद्वारा परमात्मानं ध्यायेत्। अनेन उपायेन आत्मज्ञानं लब्ध्वा संसारसागरं तरेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शुकमार्गविदे वेदान्तभास्कराय नमः॥

ब्रह्मात्मज्ञानमार्गोऽयं सूक्ष्मोऽव्यक्तः सनातनः।
ज्ञानादेव हि मुक्तिः स्यात् नूनं **वेदान्तभास्करः**॥

अयं ब्रह्मात्मज्ञानमार्गः सूक्ष्मः अव्यक्तः सनातनश्च। ज्ञानादेव नूनं मुक्तिः स्यात्। मार्गान्तरं नास्ति॥

जून् २०

१७२. ब्रह्मात्मज्ञानमार्गः सूक्ष्मः

अणुः पन्था विततः पुराणो
मां स्पृष्टो अनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकम् इत ऊर्ध्वं विमुक्ताः॥

बृहदारण्यकोपनिषत् ४-४-८

ज्ञानमार्गोऽयं सूक्ष्मः, अनादिकालादपि विततः, पुराणः; मां स्पृष्टो मार्गोऽयम्। मया सम्पादितश्च; ब्रह्मविदः अनेनैव ज्ञानमार्गेण प्रयाताः विमुक्ताः सन्तः ब्रह्मानन्दं प्राप्नुवन्ति॥

वेदान्तेषु उपदिष्टस्य मुक्तिमार्गस्य नाम '**ज्ञानमार्गः**' इति। वेदान्तानां मार्गः राजमार्गः, अयमेव हि ज्ञानमार्गः, अयमेव मुक्तिमार्गः, अयमेव शुकमार्गः। वेदोपनिषत्सु विततः अनादिः श्रेयोमार्गोऽयम्। अणुरयं सूक्ष्ममार्गः। मन्दमध्यमाधिकारिणां सुलभतया अगम्यः, अनुभवैकगम्यः गहनमार्गोऽयम्॥

एतन्मार्गानुसारिणां परमं फलं मुक्तिरेव। सा प्राप्ता एव। विवेकिनः केवलं ब्रह्मज्ञानिनः अस्मिन् ज्ञानमार्गे प्रवृत्ताः मुक्ता भवन्ति। आत्मज्ञानेन अज्ञाने निवृत्ते सति मोक्षः प्राप्त एव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रज्ञामहिमविदे वेदान्तभास्कराय नमः॥

प्रज्ञा ह्येव परं ब्रह्म प्रज्ञया व्यापृतं जगत्।
प्रज्ञया हीन्द्रियाण्येव सन्ति **वेदान्तभास्करः**॥

प्रज्ञया जगत् व्यापृतम्, प्रज्ञया एव इन्द्रियाणि सन्ति, तस्मात् प्रज्ञा एव परं ब्रह्म।

जून् २१

१७३. प्रज्ञामहिमायम्

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामानि आप्नोति।

कौषीतकिब्राह्मणोपनिषत् ३-६

जीवात्मा प्रज्ञया वाचम् समारुह्य, वाचा सर्वाणि नामानि व्याप्नोति।

जीवात्मा नाम चेतनः आत्मा। अयं प्रज्ञया चैतन्येन, वाचं वागिन्द्रियं समारोहति। अचेतनस्य वागिन्द्रियस्य चैतन्यदाता अयमेव आत्मा। आत्मनः अनुग्रहादेव खलु वागादीनि इन्द्रियाणि आत्मनः कार्याणि कुर्वन्ति सन्ति। आत्मा इन्द्रियेषु चैतन्यं पूरयति॥

अनेन चैतन्येन पूर्णानि इन्द्रियाणि स्वस्वविषयान् प्रकाशयन्ति। अस्मिन् विशाले जगति विद्यमानं सर्वं वस्तु केवलं द्वयमेव। एकं नाम, अपरं रूपं च। नामप्रपञ्चं सर्वमपि व्याप्य स्थितम् इन्द्रियं नाम वागेव। सर्वे वेदाः, सर्वाणि शास्त्राणि, सर्वाणि पुराणानि च वाग्रूपाण्येव भवन्ति। वाचा अव्याप्तं नामैव न स्यात्। ओङ्कारः सकलाः वाचः व्याप्नोति। प्रज्ञा एव ओङ्कारमपि व्याप्नोति। एतां प्रज्ञां परं ब्रह्म जानीयात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं निरवद्यात्मनिष्ठाय वेदान्तभास्कराय नमः॥

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
सर्वभूतात्मभूतस्थं ब्रह्म **वेदान्तभास्करः**॥

सर्वभूतात्मभूतस्थं ब्रह्म निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं निरुपाधिकं निरवयवं च।

जून् २२

१७४. आत्मा परमशान्तस्वरूपः

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परं सेतुम् दग्धेन्धनमिवानलम्॥

श्वेताश्वतरोपनिषत् ६-१९

कलारहितं क्रियारहितं शान्तं दोषरहितं सङ्गरहितम् अमृतत्वस्य सेतुं दग्धेन्धनम् अनलमिव स्थितम् आत्मानं विजानीयात्।

आत्मनः नैजं स्वरूपम् उपदिशति अयं मन्त्रः। न हि आत्मा नाम कश्चित् मानवः। न च एका देवता, न च अचेतनं वस्तु। आत्मनि अवयवाः, अंशाः, भागा वा न सन्ति। आत्मनि स्वतः न कापि क्रिया सम्भवति। न च आत्मनि विकाराः विक्रियाः सन्ति। आत्मनि पुण्यपापकर्मणां लेपः नैव सम्भवति॥

आत्मनि गुणदोषाः न सन्ति। ईदृशस्य एव आत्मनः ज्ञानम् अमृतत्वप्राप्त्यै साधनं भवति। 'अहम् ईदृशः आत्मा अस्मि' इति ज्ञाते एव मोक्षः प्राप्यते। दग्धेन्धनः अग्निरिव आत्मा शान्तः। आत्मनि न कापि विक्रिया अस्ति, विकारो नास्ति। आत्मा परिपूर्णः निरवयवः चिन्मात्रस्वरूपश्च। एवंविदः अमृतत्वफलमेव लभ्यते। संसारसागरं तीर्त्वा अमृतत्वं प्राप्तुम् आत्मज्ञानमेव साधनं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवतोपास्तिरहस्यविदे वेदान्तभास्कराय नमः॥

देवतोपासको धीरो देवो भूत्वा तदंशकः।
देवसायुज्यमेत्येषः ततो **वेदान्तभास्करः**॥

धीरः देवतोपासकः देवो भूत्वा देवतांशकः सन् मरणानन्तरं देवतासायुज्यमेव एति।

जून् २३

१७५. उपासनस्य फलमिदम्

देवो भूत्वा देवान् अप्येति य एवं विद्वान् एतदुपास्ते।

बृहदारण्यकोपनिषत् ४-१-२

यः एवं देवतास्वरूपं विद्वान् देवतोपासनं करोति, सः तादृश-देवतास्वरूप एव सन् मरणानन्तरं तामेव देवताम् अप्येति॥

'देवो भूत्वा देवानप्येति' इत्येषः मन्त्रः बृहदारण्यकोपनिषदि षड्वारम् श्रूयते। अयं मन्त्रः उपासनस्य महत्त्वं दर्शयति। याम् देवताम् उपास्ते तस्याः देवतायाः साक्षात्कारम् अस्मिन्नेव जन्मनि प्राप्य, मरणानन्तरं तस्याः देवतायाः सायुज्यमेव प्राप्नोति इत्यर्थः॥

उपासनस्य द्वे फले भवतः। एकं दृष्टं फलम्, अपरम् अदृष्टं फलम्। **देवतासाक्षात्कार एव दृष्टं फलम्, देवतासायुज्यं तु अदृष्टं फलम्**। जीवत एव उपासकस्य देवतानुग्रहेण सकलाः सम्पदः लभ्यन्ते, देवतासाक्षात्कारश्च भवति। निग्रहानुग्रहशक्तिः, अष्टसिद्धयश्च प्राप्यन्ते। ततो मरणानन्तरं तद्देवतासायुज्यप्राप्तिश्च भवति। न त्वेषा मुक्तिः। ज्ञायताम्। यतः उपासकस्यापि देवलोकात् पतनभीतिः अस्त्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्थानत्रयसाक्षिविदे वेदान्तभास्कराय नमः ॥

स्वप्नं जागरितं चैव सुषुप्तं यत् प्रकाशते।
तमात्मानं विदित्वैव मुक्तो **वेदान्तभास्करः** ॥

यत् चिन्मात्रतत्त्वं, जागरितं स्वप्नं सुषुप्तं च प्रकाशते, तम् आत्मानं विदित्वा मुक्तो भवति।

जून् २४

१७६. बन्धननिवृत्त्यै उपायोऽयम्

जाग्रत् स्वप्न सुषुप्त्यादि प्रपञ्चं यत् प्रकाशते।
तद् ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते॥

कैवल्योपनिषत् १-१७

जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चम् सर्वं यत् प्रकाशते 'तद् ब्रह्मैव अहम्' इति ज्ञात्वा सकलबन्धनेभ्यः सम्पूर्णतया मुच्यते॥

वेदान्तेषु 'ब्रह्म'शब्दः पौनःपुन्येन प्रयुज्यते। 'ब्रह्म' शब्दस्य वेदः, तपः, सृष्टिकर्ता, ब्राह्मणः—इति च अर्थाः भवन्ति। औपनिषदं ब्रह्म तु नान्यतमम्। 'ब्रह्मज्ञानेन मुक्तिः' इत्यत्र 'ब्रह्म' शब्दस्य अर्थः एतेभ्यः अन्य एव॥

तर्हि वेदान्तेषु 'ब्रह्म' पदार्थः कः? इति संशये अयं मन्त्रः परिहरति। अवस्थात्रयसाक्षिभूतः, अवस्थात्रयविलक्षणः, अवस्थात्रयास्पदभूतः, निर्विकारी, असंसारी आत्मैव औपनिषदं परब्रह्म। इदं परब्रह्म न स्वस्मात् भिन्नभूतम् अनात्मवस्तु। इदं ब्रह्म इन्द्रचन्द्रादिदेवतासु अन्यतमा परिच्छिन्ना देवता न भवति। किं तु परिपूर्णं निरुपाधिकं तत्त्वमेतत्। 'इदं ब्रह्मैव अहम्' इति विजानतः संसारबन्धनम् भवेद्वा? भयं भवेद्वा? दुःखं भवेद्वा? नैव॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओं पितृगुरुभक्ताय वेदान्तभास्कराय नमः॥

मातृमान् पितृमांश्चैव तथैवाचार्यवान् नरः।
सुप्रामाण्यं भजत्येषः कृती **वेदान्तभास्करः**॥

मातृमान् पितृमान् तथा आचार्यवान् कृती नरः लोके सुप्रामाण्यं भजति।

जून् २५

१७७. एतत्त्रयेण कियत् प्रामाण्यम् !

यथा मातृमान्, पितृमान्, आचार्यवान् ब्रूयात्।

बृहदारण्यकोपनिषत् ४-१-४

मातृमान् पितृमान् आचार्यवान् पुरुषः यथा ब्रूयात् तता अब्रवीत्।

अयं मन्त्रः अत्र उपनिषदि पञ्चवारम् आम्नातः। मात्रा पित्रा तथा आचार्येण कृतसंस्कारस्य मानवस्य योग्यताम् एषः मन्त्रः उपदिशति। जननीजनकगुरवः एकस्य मनुष्यस्य विकासाय, संस्कारस्य योग्यतायाः कारणं भवन्ति खलु?

शिशूनां मातैव प्रथमो गुरुः। मातुः आशीर्वादः अतीव मुख्यः। मातुः अनुशासनं सर्वेषामपि अपेक्षितमेव। ततः पिता उपनयनादिसंस्कारं पुत्राय ददाति। जनकस्य मार्गदर्शनं तु पुत्राणाम् अवश्यम् अपेक्षितमेव। अथ आचार्यस्य अनुग्रहः? आत्मज्ञान-मार्गस्य प्रदर्शयिता प्रत्यक्षदैवतं खलु आचार्यो नाम? एवं त्रिभिरपि दर्शितमार्गस्य मानवस्य जन्म सार्थकमेव। मातृपितृसद्गुरुवचनानु-सारिणः तादृशस्य पुरुषस्य वचसि प्रामाण्यं लभ्यते। तादृशं नरं लोकः सगौरवं पश्यति। ज्ञातं वा भारतीयसंस्कृतेः वैभवम्?

॥ ओं शान्ति शान्तिः शान्तिः॥

॥ ओं बौद्धप्रत्ययसाक्षिणे वेदान्तभास्कराय नमः ॥

मनःप्रत्ययसाक्षित्वे ज्ञाते ब्रह्मणि तन्मतम्।
बौद्धप्रत्ययसाक्षित्वात् इति **वेदान्तभास्करः** ॥

ब्रह्मणि मनःप्रत्ययसाक्षित्वेन ज्ञाते सति तदैव ब्रह्म मतम् भवति। यस्मात् ब्रह्म सर्वबौद्धप्रत्ययसाक्षिभूतम् अस्ति॥

जून् २६

१७८. आत्मज्ञानं नाम कोऽर्थः?

प्रतिबोधविदितं मतम् अमृतत्वं हि विन्दते।

केनोपनिषत् २-४

सर्वमानसप्रत्ययानां साक्षित्वेन यदा आत्मा विज्ञातो भवति, तदैव सः सम्यग् विदितो भवति। ततो अमृतत्वं प्राप्नोति॥

मनसि शतशः सहस्रशः लक्षशः प्रत्ययाः जायन्ते च नश्यन्ति च। अत्यन्तचञ्चलस्य अस्य मनसः व्यापारान् निरोद्धुं वा गणयितुं वा न केनापि शक्यते। अपि तु एतेषां प्रत्ययानां साक्षिभूतं कूटस्थम् आत्मानम् प्रत्यभिज्ञातुं सर्वेणापि शक्येत। मनसि जायमानानां सुखदुःखे, भयाश्चर्ये, शोकमोहौ, रागद्वेषौ, कामक्रोधादीन् प्रत्ययान् निर्विकारतया प्रकाशमानं चैतन्यं तु एकमेव अस्ति खलु? अस्यैव वेदान्तेषु आत्मा, ब्रह्म इति नामधेयम्॥

मनसोऽपि मनस्त्वेन, मनसः विकारान् प्रकाशमानः, स्वतः अविकारी, मनःप्रत्ययविदूरः, नित्यशुद्धनित्यबुद्धनित्यमुक्तस्वरूपः आत्मा अहमेव इतिज्ञानमेव 'आत्मज्ञानं' भवति। अनेन ज्ञानेन अमृतत्वं मोक्षम् इहैव प्राप्नोति मुमुक्षुसाधकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रणवरहस्यविदे वेदान्तभास्कराय नमः॥

प्रणवो ह्यपरं ब्रह्म परं ब्रह्म तथैव च।
उपास्यश्च तथा ज्ञेयः इति **वेदान्तभास्करः**॥

प्रणवः अपरं ब्रह्म चेत् उपास्यः, परं ब्रह्म चेत् प्रणवः ज्ञेयः।

जून् २७

१७९. ओङ्कारस्य महत्त्वम्

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।

काठकोपनिषत् १-२-१६

एष ओङ्कार एव परं ब्रह्म अपरं च ब्रह्म भवति।

उपनिषत्सु ओङ्कारस्य उपासनं ज्ञानं च तत्र तत्र उपदिश्यते। ओङ्कारः अपरब्रह्मत्वेन उपास्यः, परब्रह्मत्वेन च ज्ञेयः इति उपदिश्यते। अकार उकार मकारात्मकम् ओङ्कारं सृष्टिस्थितिलयकरत्वेन अपरं ब्रह्म उपासीत। नैष्ठिकब्रह्मचारिणः तुरीयाश्रमिणः संन्यासिनश्च प्रणवोपासनतत्पराः भवेयुः। तेषां मरणानन्तरं ब्रह्मलोक प्राप्तिः फलं भवति, तत्र आत्मज्ञानं लब्ध्वा ते मुच्यन्ते॥

अथ उत्तमाधिकारिणः मुमुक्षवः जिज्ञासवश्चेत् ते तत्त्वविचारपराः सन्तः ओङ्कारं परब्रह्मत्वेन जानीयुः। अकार एव जाग्रदवस्था, उकार एव स्वप्नावस्था, मकार एव सुषुप्तावस्था च। अमात्रः अपादश्च ओङ्काराख्यः प्रणव एव परं ब्रह्म। वैश्वानर तैजस प्राज्ञाख्यान् त्रीनप्यात्मनः अतीत्य स्थितः तुरीय आत्मैव ओङ्कारः। ओङ्कार एव परं ब्रह्म, देशकालातीतः आत्मैव ओङ्कारः। एवज्ञानमेव सम्यग्दर्शनम्। सद्गुरुप्रसादात् एवम् अमात्रं परब्रह्मस्वरूपम् ओङ्कारम् आत्मत्वेन यो वेत्ति स मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मप्राप्तिसाधनविदे वेदान्तभास्कराय नमः॥

नचिकेताः स्वयं ब्रह्मज्ञानादेवाभवत् सदा।
ब्रह्मप्राप्तस्तथा सर्वः नूनं **वेदान्तभास्करः**॥

नचिकेताः ब्रह्मज्ञानादेव स्वयं सदा ब्रह्मप्राप्तः अभवत्। तथैव सर्वोऽपि मानवो ब्रह्मज्ञानात् मुक्तो भवेत्॥

जून् २८

१८०. नचिकेताः जीवन्मुक्तोऽभवत्

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्। ब्रह्मप्राप्तो विरजोऽभूत् विमृत्युः॥

काठकोपनिषत् २-३-१८

मृत्युदेवेन समुपदिष्टां ब्रह्मविद्यां योगविधानं च सम्यक् अवगम्य नचिकेताः आत्मज्ञानं प्राप्य, तेन पापरहितः सन् मुक्तोऽभवत् अमृतात्मा च अभवत्॥

वाजश्रवसः एकमात्रसुपुत्रः नचिकेताः पितृनिर्देशेन यमलोकं गतः। गमनसमये शोकमोहाविष्टः नचिकेताः, तत्र गत्वा, मृत्यूपदेशं श्रद्धया श्रुत्वा शोकातीतोऽभवत्। ब्रह्मविद्याचार्यः ब्रह्मनिष्ठश्च मृत्युदेवः अन्वर्थसद्गुरुः आसीत्, तथा योग्यः उत्तमश्च शिष्यः नचिकेताः अन्वर्थः जिज्ञासुः मुमुक्षुश्च आसीत्। अनयोः प्रश्नप्रतिवचनफलत्वेन ब्रह्मज्ञानोदयः अभवत्॥

मृत्युदेवात् ज्ञानोपदेशम् एकाग्रतया श्रुत्वा, मननिदिध्यासनं च कृत्वा नचिकेताः आत्मज्ञानं प्राप्तवान्। आत्मज्ञानेन शोकमोहसागरं तीर्त्वा नचिकेताः कृतकृत्यः, जीवन्मुक्तश्च अभवत्। एवमेव सर्वोऽपि मानवः आत्मज्ञानेन मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवयानरहस्यविदे वेदान्तभास्कराय नमः॥

देवयानगताः सर्वे ब्रह्मलोकं भजन्ति हि।
ब्रह्मणा सह ते मुक्ता नूनं **वेदान्तभास्करः**॥

देवयानमार्गगताः सर्वे उपासकाः ब्रह्मलोकं भजन्ते, ततः ब्रह्मणा सह ते तत्र नूनं मुक्ताः भवन्ति।

जून् २९

१८१. ईदृशाः न प्रत्यागच्छन्ति

पुरुषोऽमानवः, स एनान् ब्रह्म गमयति, एष देवपथः ब्रह्मपथः, एतेन प्रतिपद्यमानाः इमं मानवम् आवर्तं नावर्तन्ते नावर्तन्ते। छान्दोग्योपनिषत् ४-१५-५

अमानवः पुरुषः इमान् उपासकान् ब्रह्मलोकं गमयति, अयमेव देवयानमार्गः। अयमेव च ब्रह्ममार्गः। अनेन देवयानमार्गेण ये प्रयान्ति, ते इमं मानवं जन्म पुनः न प्रतिपद्यन्ते॥

नैष्ठिकब्रह्मचारिणां तथा संन्यासिनां सतां ब्रह्मोपासकानां साधकानाम् उपदिष्टोऽयं देवयानमार्गः। अत्र ब्रह्मशब्देन उपास्यम् अपरं ब्रह्म। ब्रह्मलोकस्थं हिरण्यगर्भं ये उपासते, तेषाम् एतद्देह-पतनानन्तरं प्राप्यः गतिप्रकारः अत्र उपदिश्यते। अमानवः पुरुषः एतानुपासकान् मरणानन्तरम् अपरस्य ब्रह्मणः समीपं नयति॥

शवसंस्कारेण कृतेन वा अकृतेन वा एतेषाम् उपासकानां ब्रह्मलोकगमने न कोऽपि विघ्नः सम्भवेत्। एतेषां मार्गः राजमार्गः, एतेषां गतिः उत्तरायणगतिः। एते क्रमेण ब्रह्मलोकं गत्वा तत्र ब्रह्मणा सह उषित्वा, तेनैव सह मुक्ताः भविष्यन्ति। तस्मात् न ते शरीरान्तरग्रहणाय प्रत्यावर्तन्ते। इयमेव हि विदेहमुक्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अभेदज्ञाननिष्ठाय वेदान्तभास्कराय नमः॥

पशुरेव हि देवानां कर्मोपासनतत्परः।
भेददर्शननिष्ठत्वात् अहो! **वेदान्तभास्करः**॥

केवलकर्मोपासनतत्परः, अहो! देवानां बलिपशुभूतः। यतो हि अयं भेदज्ञाने एव निमग्नः।

जून् ३०

१८२. एते हि बलिपशव एव !

अथ योऽन्यां देवताम् उपास्ते 'अन्योऽसौ अन्योऽहमस्मीति' न स वेद, यथा पशुः, एवं स देवानाम्।

बृहदारण्यकोपनिषत् १-४-१०

'देवता अन्या, अहम् अन्यः' इति मत्वा यः परिच्छिन्नामेव अनात्मभूतां देवताम् उपास्ते, सः परं ब्रह्म न वेत्ति। सः देवानां पशुरिव वर्तते॥

ब्रह्मज्ञानी भवति चेत् स स्वराट् भवति, सः अस्मात् संसारात् मुच्यते एव। आत्मज्ञानी न भवति चेत्, तथा केवलदेवतोपासननिरतश्चेत् तादृशः मन्दः संसारसागरनिमग्न एव। स जन्ममरणचक्रबद्धः बलिपशुसमान एव॥

यस्मात् देवाः परमस्वार्थिनः। मानवान् पशुत्वेन साधयित्वा देवताः स्वार्थसाधनं कुर्वन्ति। मानवेभ्यः धनं, सुवर्णं, वस्तुवाहनानि, पुत्रपौत्रांश्च दत्वा, देवताः स्वोपासकान् स्वाधीनान् कृत्वा स्वयं भोगमग्नाः भवितुमिच्छन्ति। आत्मज्ञानमार्गविमुखाः केवलदेवतोपासकाः अभ्युदयपराः देवताधीनाः मानवाः सर्वे देवताबलिपशवो भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जीवत्वरहस्यविदे वेदान्तभास्कराय नमः॥

जन्ममृत्युविहीनोऽसौ परमात्मा निरंशकः।
जीवरूपेण देहेऽस्मिन् विष्टो **वेदान्तभास्करः**॥

जन्ममृत्युविहीनः निरशकः असौ परमात्मा एव जीवरूपेण अस्मिन् देहे प्रविष्टोऽस्ति।

जुलै १

१८३. अत्र दृश्यमानोऽपि अयमेव

स एतमेव सीमानं विदार्य एतया द्वारा प्रापद्यत।

ऐतरेयोपनिषत् १-३-१२

आत्मा एतमेव सीमानं विदार्य एतया द्वारा इमं देहं प्राविशत्।

कार्यकरणसंघातमिमं सृष्ट्वा ततः परमात्मा ''कथमहम् इमं संघातं प्रविशानि?'' इति चिन्तितवान्। परमात्मा नाम स्वतन्त्रः महाराज इव। भूपतिः आत्मने महाप्रासादं निर्मापय्य राजद्वारेण प्रासादं सानन्दं प्रविशति खलु?

तथैव परमात्मा अपि इमं देहं सीम्ना प्राविशत् किल। परमात्मनि असति अस्य जडस्य देहस्य किं वा मौल्यम्? आत्माभावे अयं सङ्घातः देवविहीनदेवमन्दिरवत्, गुरुरहितमठवत्, राजविहीनराज्यवच्च जीर्णः नष्टो भवति। अतः 'कथमहं प्रविशानि' इति सः आलोचयत्। देहमिमं प्रवेष्टुं पादः सीमा च इति द्वारद्वयमस्ति। आत्मा हि प्रधानः मुख्यश्च, तस्मात् सीमानं भित्वा तद्द्वारा इमं देहं परमात्मा प्रविष्टवान्। अयमेव आत्मा अस्मिन् देहे उपाधिसम्बन्धेन जीवत्वेन संसारित्वेन च अवभासते। उपाधिसम्बन्धपरित्यागे अयं जीवः परमात्मैव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'ब्रह्मनदी'रहस्यविदे वेदान्तभास्कराय नमः॥

नदीरूपं परं ब्रह्म विश्वरूपात्मकं तथा।
स्थावरं जंगमं ब्रह्म सर्वं **वेदान्तभास्करः**॥

परं ब्रह्म नदीरूपेण स्थावरजङ्गमविश्वरूपेण च अवभासते।

जुलै २

१८४. ब्रह्मनदीवर्णनम्

पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्रवक्रां
पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमालाम्।
पञ्चावर्तां पञ्चदुःखौघवेगां
पञ्चाशद्भेदां पञ्चपर्वामधीमः॥ श्वेताश्वतरोपनिषत् १-५

नदीरूपः परमात्मा पञ्चस्रोतोरूपेण, पञ्चकारणभूतः। उग्रः वक्रश्च पञ्चप्राणोर्मिः, पञ्चज्ञानादिमूलभूतः, पञ्चावर्तः, पञ्चदुःखप्रवाहः, पञ्चाशद्भेदः, पञ्चपर्वात्मकश्च परमात्मा दृश्यते। एवं परमात्मानं ध्यायेत्॥

परमात्मा एव नदीरूपेणापि कल्प्यते। अस्याः नद्याः पञ्च ज्ञानेन्द्रियाण्येव स्रोतांसि, पञ्च शब्दादयो विषयाः योनिः। एषा नदी उग्रा च वक्रा च वर्तते। प्राणः, अपानः, व्यानः, उदानः, समानश्च इति पञ्च वीचयः भवन्ति। पञ्चानामपि ज्ञानानां मूलभूतं मन एव अस्याः परमात्मनद्याः मूलम्। शब्दस्पर्शरूपरसगंधा एव आवर्ताः; गर्भवासजन्मजरारोगमरणान्येव प्रवाहाः, पञ्चाशद्भेदवती इयं नदी। अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाख्यैः पञ्चपर्वभिः संयुक्ता एषा नदी। एवं नदीरूपेण दृश्यमानं वस्तु परं ब्रह्मैव। परमेव ब्रह्म नदीसमुद्रगिरिपर्वतादिरूपैः अवभासते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वप्रमाणागोचराय वेदान्तभास्कराय नमः ॥

'इदं' 'तदिति' नैव स्यात् विषयत्वेन सर्वथा।
सर्वात्मत्वात् परं ब्रह्म ब्रूते **वेदान्तभास्करः** ॥

'इदम्' इति वा 'तत्' इति वा विषयत्वेन सर्वथा परं ब्रह्म ज्ञातुं नैव शक्यते, सर्वात्मत्वात्।

जुलै ३

१८५. 'इदम्' इति ज्ञाते न तद् 'ब्रह्म'

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। केनोपनिषत् १-५
तदेव 'ब्रह्म' इति त्व विजानीहि, 'इदम्' इति उपास्यते चेत् न तद् परं ब्रह्म भवति।

उपनिषत्सु ब्रह्म उपास्यत्वेन ज्ञेयत्वेन च उपदिश्यते। उपासनविषयं चेत् 'उपास्यं' भवति, उपास्यं चेत् सोपाधिकं भवति। उपास्यं ब्रह्म सगुणं भवति। उपासकः, उपासनम्, उपास्यम् च इति त्रिपुटीसहितमेतत्। उपासनेन उपास्यदेवतासायुज्यमेव फलं, न तु मोक्षः ॥

ज्ञेयं ब्रह्म तु सर्वथा अविषयभूतम्। ज्ञेयं ब्रह्म निरुपाधिकं निरवयवं निर्विशेषं परिपूर्णं च भवति। इदमेव च परब्रह्मणः निजस्वरूपम्। ब्रह्मणि ज्ञातृज्ञेयज्ञानरूपा त्रिपुटिः न विद्यते। परमार्थतस्तु ब्रह्म 'ज्ञेय'मपि न भवति। ज्ञानस्य विषयश्चेत् 'ज्ञेयम्' भवेत्। कर्मणां वा उपासनानां वा ज्ञानस्य वा अविषयभूतं ब्रह्म कथं वा ज्ञेयत्वेन उपदिश्येत? ब्रह्म 'उपास्यं न भवति' इति वक्तुं 'ज्ञेयम्' इति उपनिषत्सु उपदिश्यते। एवमवगते हि सम्यग्दर्शनं भवति, अनेनैव सम्यग्दर्शनेन मोक्षप्राप्तिश्च ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओं धर्मब्रह्मभेदविदे वेदान्तभास्कराय नमः॥

धर्मानुष्ठानकर्तारः पुण्यलोकपरा जनाः।
ब्रह्मिष्ठो मोक्षमाप्नोति सत्यं **वेदान्तभास्करः**॥

धर्मानुष्ठानकर्तारो जनाः पुण्यलोकपराः भवन्ति। ब्रह्मिष्ठस्तु सत्यं मोक्षम् प्राप्नोति॥

जुलै ४

१८६. धर्मस्य त्रयः स्कन्धाः

त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचारी आचार्यकुलवासी तृतीयः अत्यन्तम् आत्मानम् आचार्यकुले अवसादयन्; सर्वे एते पुण्यलोका भवन्ति। ब्रह्मसंस्थो अमृतत्वमेति॥

छान्दोग्योपनिषत् २-२३-१

धर्मस्य त्रयः स्कधाः; यज्ञः, अध्ययनं दानम् इति प्रथमः स्कंधः; तप अनुष्ठानतत्परः वानप्रस्थः द्वितीयः स्कधः; नैष्ठिकब्रह्मचारी सन् गुरुकुलवासी गुरुसेवातत्परः ब्रह्मचारी तृतीयः स्कधः; एते त्रयोऽपि पुण्यान् लोकान् प्राप्नुवन्ति। ब्रह्मसस्थः ज्ञानी तु अमृतत्वमेव मोक्षमेव एति॥

एक एव धर्मः गृहस्थधर्मः, वानप्रस्थधर्मः, ब्रह्मचारिधर्मः इति त्रिधा विभक्तः। यजनयाजने, अध्ययन अध्यापने, दानप्रतिग्रहौ इति षट् गृहस्थधर्माः; शरीरस्य दण्डनम्, उपवासः मौनादीनि च वानप्रस्थस्य धर्माः; सद्गुरुसेवा, भिक्षा, ब्रह्मचर्यादीनि च ब्रह्मचारिणः धर्माः। एतेषां त्रयाणामपि पुण्यलोकप्राप्तिः फलं भवति। ब्रह्म-निष्ठस्य संन्यासिनः आत्मविदस्तु मोक्ष एव फलं लभ्यते। परिपूर्ण-ब्रह्मात्मविदः ब्रह्मिष्ठस्य जीवन्मुक्तिरेव फलम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अन्नकार्यविदे वेदान्तभास्कराय नमः॥

भुक्तमन्नं त्रिधा कार्यं मलमांसमनांसि च।
जाठराग्निसुपक्वं तु कुर्याद् **वेदान्तभास्करः**॥

भुक्तम् अन्नम् जाठराग्निसुपक्वं सत् मलमासमनांसि कुर्यात्।

जुलै ५

१८७. अन्नस्य त्रीणि कार्याणि

अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुः तत् पुरीषं भवति, यो मध्यमः तन्मांसं भवति, यो अणिष्ठः तन्मनः।

छान्दोग्योपनिषत् ६-५-१

अशितम् अन्न त्रेधा विभज्यते। अन्ने यः स्थविष्ठो धातुः तत् पुरीष भवति, यो मध्यमो धातुः तत् मांस भवति, यः अणिष्ठो धातुः तत् मनो भवति॥

''अन्नानुगुणा बुद्धिः'' इति हि प्रसिद्धम्? इममेव अर्थं अयं मन्त्रः उपदिशति। भुक्तः आहारः सर्वोऽपि जाठराग्निना पक्वः सन् त्रेधा परिणमते। स च स्थूलः, मध्यमः, सूक्ष्मः इति त्रेधा विभज्यते॥

भुक्तस्य अन्नस्य स्थूलो भागः मलं भवति। मलरूपेण स भागः शरीरात् बहिरागच्छति। मध्यमो धातुः रसरक्तमासमेदोऽस्थि मज्जावीर्यरूपेण परिणमते। अथ सूक्ष्मो धातुः नाडीद्वारेण हृदयं प्रविश्य तेन मनो भवति। शुद्धेन सात्त्विकेन हितमितेन आहारेण मनोऽपि शुद्धं भवति। तस्मात् साधकैः यथासाध्यं सात्त्विका एव आहाराः स्वीकार्याः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कार्यतत्त्वविदे वेदान्तभास्कराय नमः॥

कारणे विदिते सम्यक् तत्कार्यं ज्ञातमेव हि।
कार्यं तत् कारणाभिन्नं नूनं **वेदान्तभास्करः**॥

कारणे सम्यक् विदिते सति तत्कार्यं ज्ञातमेव। यस्मात् तत् कार्यं नूनं कारणात् अभिन्नम् एव॥

जुलै ६

१८८. कारणात् भिन्नं कार्यं नास्ति

यथा सोम्य एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्॥

छान्दोग्योपनिषत् ६-१-४

हे सोम्य, मृत्पिण्डेन एकेन ज्ञातेन सर्वं मृत्कार्यं यथा विदितं भवति, तथैव ब्रह्मणि एकस्मिन् विदिते ब्रह्मकार्यम् इदं जगत् सर्वमपि विदितं भवति। यतः विकारो नाम वाचारम्भणम्, नाममात्रम्, मृत्तिका इत्येव सत्यम्॥

छान्दोग्योपनिषदः अयं मन्त्रः 'बहुमुख्यः। अस्य मन्त्रस्य उपदेशं वेदान्तेषु ''मृद्घटदृष्टान्तः'' इति कथयन्ति विद्वांसः। मृत् उपादानं कारणम्, घटघटिकादयः मृत्कार्याणि॥

कारणभूतायां मृदि विदितायां सत्यां मृत्कार्यभूताः घटघटिकादयः सर्वेऽपि विदिता एव भवन्ति खलु? मृद एव घटः, घटिका—इत्यादीनि नामानि। न तु घटघटिकादीनि मृदं विहाय, मृदः भिन्नतया स्वतन्त्राणि सन्ति। कारणस्यैव रूपान्तरे सति कार्यमिति नाम भवति। कार्यं नाम केवलं नाममात्रम्, न तु तादृशं वस्तु कारणभिन्नतया सत्यतया वस्तुतः अस्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विश्वकारणतत्त्वविदे वेदान्तभास्कराय नमः॥

परस्माद् ब्रह्मणो यस्मात् जन्मस्थितिलयाः क्रमात्।
तदेव **ब्रह्म** जानीयात् इति **वेदान्तभास्करः**॥

यतः परस्मात् विश्वस्य जन्मस्थितिलयाः भवन्ति, तदेव **ब्रह्म** जानीयात्॥

जुलै ७

१८९. ब्रह्मणो लक्षणमिदम्

यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति॥

तैत्तिरीयोपनिषत् ३-१-३

इमानि भूतानि यतो जायन्ते, जातानि येन जीवन्ति, यदेव अभिसंविशन्ति प्रयन्ति, तदेव **ब्रह्म**, *तदेव विजिज्ञासस्व।*

उपनिषत्सु प्रतिपादितस्य तत्त्वस्य 'ब्रह्म' इति नाम। '**ब्रह्म**' नाम निरतिशयं निर्विशेषं महत् तत्त्वम् इत्यर्थः। अस्य परब्रह्मणः लक्षणं तैत्तिरीयोपनिषदः अयं मन्त्रः सुन्दरतया उपदिशति॥

समस्तम् इदम् विश्वं यस्माद् उत्पद्यते, येनैव जीवति, यस्मिन्नेव च लीयते तदेव ब्रह्म। एवं समस्तस्यापि जगतः सृष्टिस्थितिलय-कारणभूतं तत्त्वं वेदान्तेषु ब्रह्मशब्देन गीयते। सकलस्यास्य विश्वस्य ब्रह्म उपादानं निमित्तं च कारणं भवति। अतः ब्रह्म नैव कार्यं भवेत्। जगत्कारणत्वेन ब्रह्मण एव प्रतिपादितत्वात् कापिलसांख्य-दर्शने प्रतिपादितं प्रधानं वा वैशेषिकदर्शने प्रतिपादितः परमाणुर्वा जगतः कारणं नैव भवति इत्यभिप्रायः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनोमहत्त्वविदे वेदान्तभास्कराय नमः॥

विश्वे देवा ह्यनन्ताश्च मनसो वृत्तयस्तथा।
अनन्तलोकसंप्राप्तिः तेन **वेदान्तभास्करः**॥

विश्वे देवाः अनन्ताः, मनोवृत्तयश्च अनन्ताः। एवमुपासनेन अनन्तलोकावाप्तिरेव फलम् भवति।

जुलै ८

१९०. मनसो महिमा एषः

अनन्तं वै मनो अनन्ता विश्वे देवाः; अनन्तमेव स तेन लोकं जयति।

बृहदारण्यकोपनिषत् ३-१-९

मनः अनन्तम्, विश्वे देवाश्च अनन्ताः। एवमुपासनेन साधकः अनन्तानेव लोकान् जयति॥

परमात्मनः अनन्तसृष्टिषु मनोऽपि अन्यतमम्। मनो हि अद्भुतं वस्तु। मनसः शक्तिर्हि अद्भुता। इदं मनः अनन्तम्। इदं मनः सर्वव्यापि, सर्वशक्तं, सर्वान्तर्यामि च। अस्य मनसः असाध्यं नाम न किञ्चिदस्ति। मनसा एव सुखदुःखे, स्वर्गनरके, रागद्वेषौ, लाभनाशौ, साधुअसाधू, ज्ञानाज्ञाने, बन्धमोक्षौ च; मनसा एव कर्मोपासने। ''मनसि सति मार्गः'' इति हि प्रसिद्धिश्च॥

विश्वे देवाः अनन्ताः, मनश्च अनन्तम्। अनन्तान् देवान् अनन्तैः मनोभिः उपासते चेत् अनन्ता एव लोकाः प्राप्यन्ते। इदम् अनन्तं मनः भगवता मानवेभ्यः दत्ता श्रेष्ठा सम्पत्। अध्यात्मसाधनैः इदं मनः सुसंस्कृतं कुर्यात्। आत्मज्ञानप्राप्तिद्वारा अस्य मनसः सम्पूर्णसार्थक्यं यः लभते स एव धन्यः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संसारतरणोपायविदे वेदान्तभास्कराय नमः॥

विश्वस्य सारभूतं तत् परं ब्रह्म निरञ्जनम्।
जन्ममृत्युजरामुक्ताः ज्ञात्वा **वेदान्तभास्करः**॥

विश्वस्य सारभूत निरञ्जन तत् पर ब्रह्म ज्ञात्वा मानवाः जन्ममृत्युजरामुक्ताः भवन्ति।

जुलै ९

१९१. जन्मपरिहारोपायोऽयम्

अत्रान्तरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः। श्वेताश्वतरोपनिषत् १-७

प्रपञ्चकारणभूतं ब्रह्म आत्मत्वेन विदित्वा ब्रह्मज्ञानिनः परस्मिन् ब्रह्मणि लीनाः, ब्रह्मैव सम्पन्नाः सन्तः जन्मबन्धनात् प्रमुच्यन्ते॥

अस्य स्थूलप्रपञ्चस्य अन्तःस्थं सारभूतं ब्रह्म। अन्तरम् इति अन्तः इत्यर्थः। नामरूपक्रियात्मकतया स्थूलरूपेण दृश्यमानस्य अस्य विश्वस्य परब्रह्मैव सारभूतम्। शरीरेन्द्रियमनःप्राणेभ्योऽपि अन्तरतमं ब्रह्म। अत्र अन्तः इत्युक्ते घटान्तः तण्डुला इतिवत् न ग्राह्यम्। किन्तु घटस्य अन्तः मृद्वत्, हिमखण्डे जलवत् इत्यर्थः॥

अन्नमय प्राणमय मनोमय विज्ञानमय आनन्दमयाख्यान् पञ्चापि कोशान् संव्याप्य, पञ्चानामपि कोशानामन्तः विद्यमानं वस्तु ब्रह्मैव। इदं ब्रह्म आत्मत्वेन ये जानन्ति ते ब्रह्मज्ञानिनः। ब्रह्मविदः ब्रह्मैव भवन्ति। एषां पुनर्जन्मसम्बन्धः अस्ति किम्? एते जीवन्त एव ब्रह्मस्वरूपा भवन्ति। एते जन्ममरणससारचक्रम् अतिक्रान्ताः। एते ब्रह्मनिष्ठाः ब्रह्मैव सम्पन्नाः। आत्मज्ञानमेव जन्मपरिहारोपायः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमूर्षुस्वरूपविदे वेदान्तभास्कराय नमः॥

इन्द्रियाणि प्रपद्यन्ते मुमूर्षोः स्वस्वदेवताः।
न पश्यति शृणोत्येष नैव **वेदान्तभास्करः**॥

मुमूर्षोः इन्द्रियाणि स्वस्वदेवताः प्रतिपद्यन्ते। तदा मुमूर्षुः न किञ्चित् पश्यति, नैव किञ्चित् शृणोति॥

जुलै १०

१९२. मुमूर्षोः अवस्था

एकीभवति न पश्यति इत्याहुः, एकीभवति न जिघ्रति इत्याहुः....न विजानाति इत्याहुः।

बृहदारण्यकोपनिषत् ४-४-२

इन्द्रियम् लिङ्गात्मनि एकीभवति। तदा समीपस्थाः मुमूर्षुं दर्शयन्तः "अयं न पश्यति, न जिघ्रति, न विजानाति" इत्याहुः॥

मुमूर्षुर्नाम मरणसमीपस्थः। प्रारब्धकर्मफलानि अनुभूय अस्य जन्मनः, अस्य लोकस्य, अस्य देहस्य च सर्वान् व्यवहारान् परिसमाप्य आगामिजन्म प्राप्तुम्, आगामिदेहं प्राप्तुं सिद्धो हि मुमूर्षुर्नाम। अयं यदा प्राणं त्यजति तदा अस्य सर्वाण्यपि इन्द्रियाणि स्वानि स्वानि मूलस्थानानि प्रविशन्ति। तानि तानि इन्द्रियाणि आत्मनः तासु तासु कारणदेवतासु एकीभवन्ति॥

अत्र प्रमाणं तु अयं मन्त्रः। मुमूर्षोः इन्द्रियमनांसि तदा स्वस्व व्यापारेभ्यः शान्तानि भवन्ति। अत एव तस्य समीपस्थाः बान्धवाः तं पश्यन्तः "एषः नैव किञ्चित् पश्यति, नैव किञ्चित् जानाति" इति वदन्ति खलु? एषा एव मुमूर्षोः अवस्था!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं तपस्साराय वेदान्तभास्कराय नमः॥

तपसा ज्ञायते ब्रह्म तपसा ब्रह्म लभ्यते।
ऐकाग्र्यं मनसश्चैव तपो **वेदान्तभास्करः**॥

तपसैव ब्रह्मज्ञानं, ब्रह्मप्राप्तिश्च। इन्द्रियमनसोः ऐकाग्र्यमेव तपः॥

जुलै ११

१९३. साधकानां तप एव ब्रह्मास्त्रम्

सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम्।
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत् परम्॥

श्वेताश्वतरोपनिषत् १-१६

क्षीरे घृतमिव अस्मिन् विश्वे आत्मा सर्वव्यापकः। आत्मानम् विज्ञातुं तप एव साधनम्। आत्मा च ब्रह्म। मानवजन्मनः रहस्य सारभूतं लक्ष्यमिदम्॥

आत्मा कुत्रास्ति? सर्वत्राप्यस्ति। तर्हि किमर्थं न दृश्यते? तं द्रष्टुम् अस्माकं योग्यताभावात्। आत्मदर्शनयोग्यता तर्हि कथं सम्पादनीया? तपसा। तपसि सर्वाण्यपि साधनानि अन्तर्गतान्येव। अन्तःकरणस्य एकाग्रतायै, मनसः शुद्ध्यै, आत्मज्ञानयोग्यतायै क्रियमाणानि सर्वाण्यपि साधनानि **तपः**शब्देन गृह्यन्ते॥

विद्यमानस्यैव वस्तुनः तपसा प्राप्तिर्भवति। अस्य प्रकाशनाय एकः दृष्टान्तः। क्षीरे घृतम् अस्ति वा न वा? अस्ति। कस्मिन् भागे? सर्वत्रापि अस्ति। तथापि किमिति अस्माकं न दृश्यते? साधनाभावात्। तत्र क्षीरे दध्यातञ्चनं निक्षिप्य, दधि कृत्वा अनन्तरं तस्य मथनमेव तपः। एवमेव अत्रापि इन्द्रियमनसोः एकाग्रता एव तपः। तेन तपसा साधनेन आत्मदर्शनं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मनःशक्तिस्वरूपाय वेदान्तभास्कराय नमः॥

मनसा शक्यते ब्रह्म नैव ज्ञातुं कथंचन।
मनस्साक्षितया ज्ञेयम् इति **वेदान्तभास्करः**॥

ब्रह्म मनसा ज्ञातुं कथञ्चन नैव शक्यते। ब्रह्म मनस्साक्षितया ज्ञेयम्॥

जुलै १२

१९४. आत्माधीनम् मनः

यन्मनसा न मनुते येनाहुर्मनो मतम्।

केनोपनिषत् १-६

यत् मनसा न मनुते, येनैव मनः मतम् आहुः तदेव ब्रह्म।

भगवता मानवेभ्यः दत्ता श्रेष्ठा सम्पत् नाम **मनः**। मनो हि अद्भुतं करणम्। प्रत्यक्षप्रमाणानाम् अगोचराणि सूक्ष्माण्यपि वस्तूनि विजानीयात् इदं मनः। 'असाध्यम्' इति मनसः नास्त्येव। 'मनसि सति मार्गः', 'मनोऽनुसारी मार्गः' इति हि प्रसिद्धम्। लोकान्तरस्य जन्मान्तरस्य च विचारान्, धर्माधर्मविचारान् च मानवो मनसा विजानीयात्। सर्वथा, प्रपञ्चस्य सर्वेऽपि व्यवहाराः मनोविलास-मात्रमेव इत्युक्तेऽपि न असत्यमेतत्॥

अपि तु, अहो, आत्मानं विज्ञातुम् अस्य मनसः सामर्थ्यं नास्ति। अत्र द्वौ हेतू भवतः। आत्मा निर्गुणः इति प्रथमो हेतुः। गुणधर्मरहितमात्मानम् मनः जानीयाद्वा? आत्मा मन एव प्रकाशते इति द्वितीयो हेतुः। चिन्मात्रस्वरूपेण आत्मनैव हि इदं मनः प्रकाश्यते। जडं तु मनः स्वतः न किञ्चित् कुर्यात्। आत्मैव सूत्रधारः। आत्मनः अधीनतया एव मनः स्वव्यापारं करोति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आतिथ्यरहस्यविदे वेदान्तभास्कराय नमः॥

अतिथीनां तिरस्कारात् पुण्यनाशो भविष्यति।
तस्मादतिथिसत्कारः कार्यो **वेदान्तभास्करः**॥

अतिथीनाम् तिरस्कारात् पुण्यनाशो भविष्यति। तस्मात् अतिथि सत्कारः श्रद्धया कार्यः॥

जुलै १३

१९५. 'अतिथितिरस्कारेण' पुण्यहानिः

एतद् वृङ्क्ते पुरुषस्य अल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे। काठकोपनिषत् १-१-८

यस्य गृहस्थस्य गृहे भोजनम् अकृत्वा अतिथिः वसति, तस्य आथितेयस्य सर्वमपि पुण्यम् एषः ब्राह्मणो अतिथिः नाशयति॥

अनिरीक्षितः अनाहूतः यः स्वयमेव गृहम् आगच्छति तस्य 'अतिथिः' इति नामधेयम्। इमम् अतिथिम् 'महाविष्णु'भावनया सत्कुर्यात्। अतिथिसेवा गृहस्थाश्रमस्य मुख्यं कर्तव्यम्। अतिथिसेवया देवताः सन्तुष्टा भवन्ति। अयं भारतीयः सम्प्रदायः॥

इदानींतनकाले तु अतिथीनां दर्शनेनैव कोपः सञ्जायते। अतिथयो नाम अस्माकं जुगुप्सा जायेत। अतिथीनां सत्कारो न क्रियते इत्येव केवलं न, किं तु तेषां तिरस्कार एव क्रियते। एतत् सर्वथा अकार्यम्, अयं महापराधः। अतिथितिरस्कारः महापापमेव॥

मानवेन सप्रयत्नं सम्पादितः सर्वोऽपि पुण्यराशिः अतिथि-तिरस्कारेण नश्यति। पुण्यसम्पादनम् अतीव कष्टम्, अपि तु तस्य नाशनम् अतिसुलभम्। तस्मात् अतिथिसत्कारः सदा कर्तव्यः, अतिथितिरस्कारः न कदापि कर्तव्यः इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् इष्टापूर्तफलविदे वेदान्तभास्कराय नमः॥

इष्टापूर्तरता ये हि केवलं कर्मतत्पराः।
स्वर्गं गत्वा निवर्तन्ते नूनं **वेदान्तभास्करः**॥

ये जनाः इष्टापूर्तरताः, केवलं कर्मतत्पराः, ते स्वर्गं गत्वा तत्र फलमनुभूय ततो नूनं निवर्तन्ते।

जुलै १४

१९६. इष्टापूर्तयोः फलमेतावदेव

इष्टापूर्तं मन्यमाना वरिष्ठम् नान्यत् श्रेयो वेदयन्ते प्रमूढाः। नाकस्य पृष्ठे ते सुकृतेऽनु भूत्वा इमं लोकं हीनतरं वा विशन्ति॥

मुण्डकोपनिषत् १-२-१०

इष्टापूर्तमेव वरिष्ठं मन्यमानाः प्रमूढा जनाः आत्मज्ञानाख्यम् अन्यत् श्रेयः न जानन्ति। एते नाकस्य पृष्ठे सुकृतफलानि अनुभूय अनन्तरम् इमं भूलोकम् आगच्छन्ति, अथवा इतोऽपि हीनतरं लोकम् सर्पादितिर्यग्योनिम् प्रविशन्ति॥

अयं मन्त्रः केवलकर्ममार्गं धैर्येण निन्दति। 'न हि निन्दान्यायेन' अस्य मन्त्रस्य तात्पर्यं ग्राह्यम्। न हि कर्ममार्गं निंदितुमयं मन्त्रः आगतः, किन्तु मोक्षसाधनभूतं ज्ञानमार्गं स्तोतुम्॥

अग्निहोत्रादीनां श्रौतानां कर्मणां **इष्टम्** इति नाम, वापीकूप-तटाकादीनां स्मार्तानां कर्मणां **पूर्तम्** इति च नाम भवति। केवलम् इष्टापूर्तनिष्ठानां कर्मिणां स्वर्गलोकप्राप्तिः फलं भवति। तत्र स्वर्ग्यभोगान् अनुभूय ततो अवरोहन्ति। अनन्तरं मानवयोनौ वा श्वादितिर्यग्योनौ वा जायन्ते। सर्वथा तेषां पुनर्जन्मभयम् अस्त्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रणवार्थप्रकाशकाय वेदान्तभास्कराय नमः॥

ओङ्कारश्च परं ब्रह्म ओङ्कारो ह्यपरं तथा।
ओङ्कारश्च जगत् सर्वम् इति **वेदान्तभास्करः**॥

ओङ्कार एव परं ब्रह्म, ओङ्कार एव अपरं ब्रह्म। जगदिदं सर्वमपि ओङ्कार एव॥

जुलै १५

१९७. उभयमपि ओङ्कार एव

एतद्वै सत्यकाम, परं चापरं च ब्रह्म यदोङ्कारः।

प्रश्नोपनिषत् ५-२

हे शैब्य सत्यकाम, अयम् ओङ्कारः परं ब्रह्म अपरं ब्रह्म च भवति।

उपनिषत्सु ओङ्कारस्य महिमा नानारीत्या उपदिष्टोऽस्ति। प्रकृतायाम् अस्यां प्रश्नोपनिषदि पिप्पलादो महर्षिः ओङ्कारम् परब्रह्मत्वेन अपरब्रह्मत्वेन च उपदिशति। परं ब्रह्म नाम परिपूर्णम् अक्षरम्। इदमेव अत्र उपनिषदि सत्यमिति पुरुष इति च उपदिश्यते। धीराः ओङ्कारं नाशरहितम् अक्षरम् इति विज्ञाय मुच्यन्ते॥

अनुत्तमाधिकारिणां तु इदं ज्ञातुं न शक्यम्। अतः मन्द-मध्यमाधिकारिणाम् ओङ्कारः परब्रह्मणः प्रतीकत्वेन उपदिश्यते। महाविष्णोः शालग्राम इव परस्य ब्रह्मणः ओङ्कारः प्रतीकं भवति। परस्य ब्रह्मणः ओङ्कार आलम्बनभूतः। बहूनाम् आलम्बनानां मध्ये ओङ्कारः ब्रह्मणः समीपतमम् आलम्बनं भवति। परब्रह्मत्वे ज्ञेयमिति, अपरब्रह्मत्वे उपास्यमिति ओङ्कारस्वरूपं ज्ञातव्यम्। ओङ्कारोपासनेन ब्रह्मलोकं, ओङ्कारज्ञानेन मोक्षं च प्राप्नुयात् साधकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रमाणदौर्बल्यविदे वेदान्तभास्कराय नमः॥

प्रत्यक्षादिप्रमाणैर्वा तपसा कर्मणाऽपि वा।
द्रष्टुं न शक्यते ब्रह्म सत्यं **वेदान्तभास्करः**॥

प्रत्यक्षादिप्रमाणैर्वा तपसा वा कर्मणा वा ब्रह्म द्रष्टुं न शक्यते।

जुलै १६

१९८. चक्षुरगोचरोऽयम्

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः तपसा कर्मणा वा।

मुण्डकोपनिषत् ३-१-८

चक्षुषा वा वागिन्द्रियेण वा इतरैः इन्द्रियैर्वा तपसा वा कर्मणा वा प्रत्यगात्मानं द्रष्टुं न शक्यते।

अनेन चर्मचक्षुषा परब्रह्मतत्त्वं द्रष्टुं न शक्यते। चक्षुषः चक्षुर्भूतम् आत्मानं चक्षुषा द्रष्टुं शक्यते वा? नैव। रूपयुक्तान् पदार्थानेव चक्षुरिन्द्रियं पश्येत्। अरूपोऽयमात्मा। अतः नेत्राणि आत्मानं न पश्येयुः। तर्हि वागिन्द्रियेण आत्मानं ज्ञातुं शक्यते किम्? न शक्यते। यतः आत्मा निर्गुणः निर्धर्मकः॥

भवतु, इतरैः इन्द्रियैः आत्मा ज्ञायते वा? तदपि न शक्यते। सर्वथा अविषयभूतम् आत्मानं न केनापि इन्द्रियेण ज्ञातुं शक्यते। भवतु, उपवास व्रतानुष्ठान जपमौनादिना तपसा ज्ञातुं शक्यते वा? नैव शक्यते। अस्तु, अग्निहोत्रादिना श्रौतेन कर्मणा आत्मानं विज्ञातुं शक्यते वा? तेनापि न शक्यते। तर्हि, कथमात्मा ज्ञातुं शक्यते? इति चेत्। उच्यते। स्वतःसिद्धम् अस्माकं प्रत्यगात्मानं वेदान्तार्थ-विचारजनितया ब्रह्मविद्यया एव केवलया जानीयात्, उपायान्तरेण नैव शक्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गायत्रीमहिमविदे वेदान्तभास्कराय नमः॥

गायत्री वा इदं सर्वं यत् किञ्चित् सचराचरम्।
वेदशास्त्रपुराणादि सर्वं **वेदान्तभास्करः**॥

यत् किञ्चित् सचराचरम्, वेदशास्त्रपुराणादि च, इदं सर्वं गायत्री एव।

जुलै १७

१९९. सर्वमपि गायत्री एव

गायत्री वा इदं सर्वं भूतं यदिदं किञ्च। वाग्वै गायत्री वाग्वा इदं सर्वं भूतम्। गायति च त्रायते च॥

छान्दोग्योपनिषत् ३-१२-१

इदं सर्वं गायत्री एव। यद्यदस्ति तत् सर्वं गायत्री एव। वागेव गायत्री। सर्वं गायति इति, त्रायते इति च गायत्री॥

गायत्री इति छन्दः। षड्भिः अक्षरैः युक्ताः चत्वारः पादाः यस्मिन् विद्यन्ते तत् गायत्रीच्छन्दः इति कथ्यते। चतुर्विंशत्यक्षरैः युक्तमेतत् गायत्रीच्छन्दः। सर्वमिदं जगत् गायत्रीच्छन्द एव। सर्वोऽयं प्रपञ्चः नाममात्रः खलु? नाम, अभिधानम्, वाक्, वाचकम्, शब्दः—इत्येतानि पर्यायपदानि॥

अस्मिन् जगति विद्यमानानि सर्वाण्यपि वस्तूनि नामवन्ति। कार्यं हि सर्वं केवलं नाममात्रमेव। एकस्यैव वस्तुनः भिन्नानि भिन्नानि नामानि भवन्ति। नामानि भिन्नानि, पदार्थस्तु एक एव। वाचैव व्यवहाराः, वाचैव सुखदुःखे, वाचैव मानापमाने, वाचैव बन्धुबान्धवाः; सा वागेव अत्र 'गायत्री' इति उपदिश्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुरुषतत्त्वविदे वेदान्तभास्कराय नमः॥

पुरुष एवेदं सर्वं ह्यात्मानं मन्यते बुधः।
अध्यासं वारयत्येषः धीरो **वेदान्तभास्करः**॥

बुधः 'इदं सर्वं जगत् पुरुष एव' इति, 'स पुरुष एव अहम्' इति च आत्मानं मन्यते; अत एव एषः धीरः अध्यासं आत्मनः सकाशात् वारयति च।

जुलै १८

२००. अविद्याग्रन्थिनाशः

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थि विकिरतीह सोम्य॥

मुण्डकोपनिषत् २-१-१०

कर्माणि, तपश्च—इत्यादिरूपं विश्वं सर्वमपि परामृतः पुरुष एव। पुरुष एव परं ब्रह्म। इदं ब्रह्म गुहायां निहितमिति यो वेद, हे सोम्य, सः अविद्याग्रन्थिं विकिरति, नाशयति॥

सर्वोऽप्ययं प्रपञ्चः पुरुषादेव जायते, पुरुषेणैव जीवति, पुरुषे एव च लीयते; तस्मात् पुरुषात् भिन्नतया नैव विद्यते। इदं सर्वमपि विश्वं पुरुष एव। अत एव ''पुरुषे आत्मनि एकस्मिन् विदिते सर्वोऽप्ययं प्रपञ्चः विदितो भवति'' इति श्रुतिः ब्रवीति॥

अस्मिन् विश्वे प्राणः, मनः, इन्द्रियाणि, हिरण्यगर्भः, विराट्-पुरुषः, वेदाः, यज्ञाः, संवत्सरः, दक्षिणाः, लोकाः, देवताः, साध्याः, मनुष्याः, प्राणिनः, नक्षत्राणि, ग्रहाश्च अन्तर्भवन्ति। ईदृशस्य विश्वस्य कारणं पुरुषः। 'अहमेवास्मि अयं पुरुषः' इति विज्ञाते सति इहैव जीवन्नेव अविद्याग्रंथिः सम्पूर्णतया नश्यति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'ओङ्कार'व्याप्तिविदे वेदान्तभास्कराय नमः॥

'अ'कारादि 'क्ष'कारान्तं सर्वं वर्णात्मकं जगत्।
'ओं'कारेणैव संव्याप्तं ब्रूते **वेदान्तभास्करः**॥

'अ'कारादि 'क्ष'कारान्तं वर्णात्मक सर्वं जगत् 'ओं'कारेणैव सम्यक् व्याप्तं भवति।

जुलै १९

२०१. सर्वोऽपि वाक्प्रपञ्चः ओङ्कार एव

तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णानि, एवम् ओङ्कारेण सर्वा वाक् सन्तृण्णा। ओङ्कार एवेदं सर्वम्॥

छान्दोग्योपनिषत् २-२३-३

यथा तन्तुना सर्वाणि पर्णानि सन्तृण्णानि, संव्याप्तानि भवन्ति, एवमेव ओङ्कारेण सर्वाः वाचः सन्तृण्णाः भवन्ति। इदं सर्वमपि ओङ्कार एव॥

अश्वत्थपत्रेषु, न्यग्रोधपत्रेषु च अन्तः सूक्ष्माणि तन्तुरूपाणि विद्यन्ते खलु? ते तन्तवः सर्वाणि पत्राणि व्याप्नुवन्ति। पत्राणां पश्चात् पुरस्तात्, वामतः, दक्षिणतश्च तन्तव एव विद्यन्ते खलु? एवमेव सर्वा अपि वाचः ओङ्कारः व्याप्नोति॥

अक्षरवर्णमालायां विद्यमानानां सर्वेषामप्यक्षराणां व्यापकः ओङ्कारः। सकलस्यापि वाक्प्रपञ्चस्य ओङ्कार एव आधारभूतः। अभिधानप्रपञ्चं सर्वमपि संव्याप्य विद्यमानम् एकं श्रेष्ठमभिधानं नाम ओङ्कार एव। ओङ्कारे सकलोऽपि वाक्प्रपञ्चः अन्तर्भवति। वर्णमालायां विद्यमानानि सर्वाण्यपि अक्षराणि ओङ्कार एव। सर्वेषां वेदानां, उपनिषदां, शास्त्राणां, पुराणानां च सार एव ओङ्कारः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं संसारदुःखरहिताय वेदान्तभास्कराय नमः॥

आत्मज्ञानेन संसारदुःखनाशो न संशयः।
आत्मज्ञानेन मुक्तिश्च भवेद् **वेदान्तभास्करः**॥

आत्मज्ञानेन संसारदुःखनाशो भवति, आत्मज्ञानेन मुक्तिश्च भवेत्, अत्र संशयो नास्ति।

जुलै २०

२०२. आत्मज्ञानेन दुःखनिवृत्तिः

अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्।

कैवल्योपनिषत् २-२४

जन्मजरामरणदुःखसंसारसागरनाशकम् आत्मज्ञानम् अनेन प्राप्नोति।

आत्मज्ञानेन उदितेन किं प्रयोजनम्? इति अनेके पृच्छन्ति। तेषां मते धनं, धान्यं, पुत्राः, पौत्राः, कीर्तिः, अधिकारादीनि फलानि आत्मज्ञानेन प्राप्यन्ते वा? इति। न प्राप्यन्ते इत्येव प्रतिवचनम्। एतैः फलैः आत्मज्ञानस्य च न कोऽपि सम्बन्धो विद्यते। तर्हि आत्मज्ञानस्य फलं किम्? इति चेत्, अयं मन्त्रः उपदिशति उत्तरम्॥

संसारार्णवनाशनमेव ज्ञानस्य फलम्। संसारो नाम जन्म-जरादुःखमरणानां प्रवाहः। संसारः सागरेण उपमीयते। संसारः सागरादपि अगाधः, अनन्तः, भयङ्करः दुस्तरश्च भवति। अज्ञानेनैव कामकर्माणि जन्ममरणानि भवन्ति। ज्ञाने उदिते सति संसारसागरः शुष्को भवति। आत्मज्ञानस्य उदये सति दुःखरूपः संसार एव न विद्यते। आत्मज्ञानिनः पुनर्जन्म नास्त्येव। ज्ञानी सदा जन्ममरण-रहितसहजानन्दसागरे मग्नो हि भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नामरूपरहितात्मतत्त्वविदे वेदान्तभास्कराय नमः ॥

आत्मैवेदं पुरा सर्वं नामरूपविवर्जितः।
नित्यशुद्धो निर्विकारः इति **वेदान्तभास्करः**॥

इदं सर्वं विश्वं पुरा नामरूपविवर्जितः नित्यशुद्धः निर्विकारः आत्मैव आसीत्।

जुलै २१

२०३. तदा आत्मैव एकः आसीत्

आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किञ्चन मिषत्।
स ईक्षत लोकान्नु सृजा इति॥ ऐतरेयोपनिषत् १-१-१

इदं जगत् पुरा आत्मैव आसीत्। चञ्चलं किमपि अन्यत् नासीत्। 'अहम् इदानीं लोकान् सृजानि' इति आलोचनं कृत्वा आत्मा इदं सर्वम् असृजत॥

इदानीं अस्मत्पुरतः दृश्यमानमिदं विश्वं भिन्नभिन्नतया चित्रविचित्रतया अद्भुतमिव खलु? अस्यैव **व्याकृतप्रपञ्चः** इति नामधेयम्। वि = विविधम्, आ = समन्तात्, कृतम् = व्याकृतम्। नाम, रूपं, क्रिया, देशकालौ, कार्यं, कारणादिरूपेण दृश्यमानमिदं हि विश्वं कार्यमुच्यते। इदं कार्यं जगत् सृष्टेः पूर्वं नैव आसीत्। तदा विद्यमानं तत्त्वम् आत्मा एक एव। आत्मा एक एव तदा आसीत्। आत्मना सह न किञ्चिदासीत्॥

तर्हि कथमिदं द्वैतं जगत् इदानीं दृश्यते? इति चेत्, आत्मन एव आगतमिदं जगत्। चिन्मात्रः आत्मा 'लोकान् सृजानि' इतिकृत्वा स्वयमेव इदं विश्वं सृष्टवान्। आत्मैव स्वयमेव आत्मानमेव प्रपञ्चरूपेण सृजति। प्रपञ्चो नाम आत्मनः भिन्नतया नैव विद्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवादिदौर्बल्यविदे वेदान्तभास्कराय नमः॥

परतत्त्वस्वरूपे हि देवादीनां न निश्चयः।
प्रमाणागोचरं ब्रह्म नूनं **वेदान्तभास्करः**॥

परतत्त्वस्वरूपनिर्णये देवादीनामपि न निश्चयः। यतो हि परं ब्रह्म नूनं प्रमाणागोचरम्॥

जुलै २२

२०४. बुद्धेः अग्राह्यं ब्रह्म

देवैरत्रापि विचिकित्सितं पुरा।
न हि सुविज्ञेयम् अणुरेष धर्मः॥

काठकोपनिषत् १-१-२१

देवतानामपि परब्रह्मस्वरूपनिर्णये संशयो विद्यते। यस्मात् प्रत्यक्षादिप्रमाणैः परं तत्त्वं सम्यग् अवगन्तुं न शक्यते॥

उपनिषत्सु प्रतिपादितो ह्यात्मा औपनिषदः पुरुषः। अस्यैव परं ब्रह्म इत्यपि नाम भवति। अस्य आत्मनः नामरूपक्रियागुणधर्माः न विद्यन्ते। अतः इमम् आत्मानं तर्केण वा शास्त्रपांडित्येन वा विज्ञातुं नैव शक्यते॥

इन्द्रचन्द्रआदित्यादिदेवताभिश्च अयमात्मा अवगन्तुं न शक्यते। देवाः सर्वज्ञाः सर्वशक्ताश्च, सिद्धिसम्पन्नाः अद्भुता एव। तावन्मात्रेण देवैः परं ब्रह्म अधिगतमेव इति नियमो नास्ति। महामहा देवाधिदेवाश्च विचारं कृत्वा, चर्चां कृत्वा, विमृश्यापि परब्रह्मस्वरूपे अलब्धनिर्णयाः शान्ताः। किमु वक्तत्वं सामान्या मानवाः स्वबुद्धि-सामर्थ्येन आत्मानं न जानीयुरिति? अध्यारोपापवादसम्प्रदाय-विद्भ्यः श्रोत्रियब्रह्मनिष्ठेभ्यः सद्गुरुभ्य एव ब्रह्म अवगन्तव्यम्, न तु स्वबुद्ध्या॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अप्रमूढाय वेदान्तभास्कराय नमः॥

इष्टापूर्तं वरिष्ठं च मन्यन्ते नात्मवेदिनः॥
आत्मज्ञानविदूरत्वात् मूढा **वेदान्तभास्करः**॥

ये इष्टापूर्तं वरिष्ठं मन्यन्ते, ये न आत्मवेदिनः, ते मूढा एव। आत्मज्ञानरहितत्वात्॥

जुलै २३

२०५ प्रमूढा हीमे!

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यत् श्रेयो वेदयन्ते प्रमूढाः।

मुण्डकोपनिषत् १-२-१०

इष्टापूर्तं कर्मैव ये वरिष्ठं मन्यन्ते, इतो अन्यत् श्रेयः आत्मतत्त्वं ये न मन्यन्ते, ते प्रमूढाः॥

श्रौतानि स्मार्तानि इति शास्त्रीयकर्माणि द्वेधा विभक्तानि सन्ति। **इष्टम्** इति **श्रौतं** कर्म, **पूर्तम्** इति **स्मार्तं** कर्म उच्यते॥

अग्निहोत्रं तपः सत्यं वेदानां परिपालनम्।
आतिथ्यं वैश्वदेवं च 'इष्टम्' इत्यभिधीयते॥

अग्निहोत्रानुष्ठानम्, तपः, सत्यवचनम्, वेदाध्ययनम्, अध्यापनम्, आतिथ्यम्, वैश्वदेवं—च इतीदम् **इष्टम्** उच्यते॥

वापीकूपतटाकादिदेवतायतनानि च।
अन्नप्रदानमारामः 'पूर्तम्' इत्यभिधीयते॥

वापी, कूपः, तटाका, देवालयः, अन्नदानम्, आरामनिर्माणम् इत्येतत् **पूर्तम्** उच्यते॥

एतानि इष्टापूर्तकर्माण्येव वरिष्ठानि इति, मुक्तिरिति, जन्मसार्थकसाधनमिति च ये मन्यन्ते ते प्रमूढा एव भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विज्ञानमयरहस्यविदे वेदान्तभास्कराय नमः॥

विज्ञानं बुद्धिरेव स्यात् विज्ञानं सर्वसाधकम्।
विज्ञानं कुरुते कर्म सर्वं **वेदान्तभास्करः**॥

विज्ञानं नाम बुद्धिः, विज्ञानमेव सर्वसाधकम्, विज्ञानमेव सर्वं कर्म कुरुते।

जुलै २४

२०६. विज्ञानेन सर्वं साध्यम्

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते॥

तैत्तिरीयोपनिषत् २-५-१

विज्ञानमेव यज्ञं कुरुते, विज्ञानमेव कर्माणि तनुते। सर्वे देवाः विज्ञानमेव ज्येष्ठं ब्रह्म उपासते॥

पञ्चकोशानां मध्ये अयं विज्ञानमयः चतुर्थः। मनोमयात् आत्मनोऽपि अयं विज्ञानमयः आत्मा सूक्ष्मः व्यापकः। विज्ञानमिति बुद्धिः। विज्ञानोपाधिकः आत्मा विज्ञानमयः। विज्ञानं विना जीवस्य व्यवहार एव नास्ति। बुद्धिरेव हि मानवस्य सम्पत्? बुद्धिनाशे सति मानवः मृतप्राय एव॥

अस्य विज्ञानमयस्य महिमा अद्भुतः। विज्ञानमय एव स्वबुद्ध्या लौकिकानि वैदिकानि च कर्माणि कुरुते। बुद्ध्या हि बुद्धिमतो मनुष्यस्य मौल्यम्? बुद्ध्या सर्वं कर्म कुर्यात् मानवः। इदं विज्ञानमेव इन्द्रादिदेवाः सर्वे उपासते। इन्द्रियाणि सर्वाणि इमां बुद्धिमेव आश्रित्य जीवन्ति। इदं विज्ञानमेव ब्रह्मभावेन उपासते चेत् सः बुद्धिमान् भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मधुविद्यारहस्यज्ञाय वेदान्तभास्कराय नमः॥

आदित्यो वै देवमधु आदित्यो रस एव च।
जीवने रसमाप्नोति विद्वान् **वेदान्तभास्करः**॥

आदित्य एव देवमधु, आदित्य एव सर्वेषां रसः इति उपासते चेत्, सः जीवने रसम् आप्नोति।

जुलै २५

२०७. मधुविद्यारहस्यम्

असौ वा आदित्यो देवमधु, तस्य द्यौरेव तिरश्चीनवंशः, अन्तरिक्षमपूपः, मरीचयः पुत्राः॥

छान्दोग्योपनिषत् ३-१-१

असौ आदित्य एव देवमधु, तस्य द्युलोक एव तिरश्चीनः वशः। अन्तरिक्षमेव मध्वपूपः। किरणानि एव पुत्राः॥

छान्दोग्योपनिषदि 'मधुविद्या' उपदिष्टा अस्ति। मधु इति मधुकरघृतम्। अत्र मन्त्रे सूर्यमेव 'देवमधु' इति कल्पयन्ति। सूर्यं देवमधुत्वेन उपासीनस्य जीवनं सदा मधुवत् मधुरं भवति॥

अस्य सूर्यनाम्नो मधुनः द्युलोक एव तिरश्चीनः वंशः। द्युलोकः स्वर्गलोकः। स्वर्गलोकात् डोलायमान इव सूर्यः दृश्यते खलु? सूर्यः देवानां मोदम् आनन्दम् उत्पादयतीव दृश्यते इति 'देवमधु' इति कथ्यते। अन्तरिक्षमेव अपूपः। अन्तरिक्षे लग्न इव सूर्यो दृश्यते खलु? अन्तरिक्षम् अपूपः इव दृश्यते हि? सूर्यस्य किरणान्येव आपः। सूर्यः स्वकिरणैः जलम् आकर्षति खलु? एवं **मधुविद्यां** विजानतः जीवने सर्वत्र सदा मधुरं सुख लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सच्चिदानन्दकन्दाय वेदान्तभास्कराय नमः॥

भोक्त्रादिसाक्षिभूतोऽहं सच्चिदानन्दरूपकः।
ज्ञानिनो निश्चयो ह्येषः नूनं **वेदान्तभास्करः**॥

भोक्तृभोग्यभोगानां साक्षिभूतः सच्चिदानन्दस्वरूपः आत्मा अहमस्मि इति एषः ज्ञानिनो निश्चयः।

जुलै २६

२०८. ज्ञानी साक्षिनिष्ठः

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सनातनः॥

कैवल्योपनिषत् १-१८

त्रिषु धामसु भोग्यम्, भोक्ता, भोगः इति यद्यद् दृश्यते, तस्मात् विलक्षणः साक्षी अहं चिन्मात्रः सनातनश्च अस्मि इति जानाति आत्मवित्।

त्रीणि स्थानानि इति जाग्रत् स्वप्न सुषुप्तानि अवस्थात्रयम् इति कथ्यन्ते। एतानि त्रीणि स्थानानि विहाय चतुर्थं स्थानं न कोऽपि लोके दृष्टवान्। एतासु तिसृषु अवस्थासु दृश्यमानाः पदार्थाश्च त्रय एव। ते एव प्रमाता, प्रमाणं, प्रमेयश्च। एतेषां त्रिपुटी इति नाम॥

आत्मा नाम प्रत्यगात्मा एभ्यो विलक्षणः। आत्मा साक्षिभूतः। अस्य आत्मनः त्रिपुटिसम्बन्धो नास्ति। आत्मनः अवस्थात्रयलेपो नास्ति। आत्मा चैतन्यस्वरूपः। आत्मा देशकालातीतः। एषः प्रत्यगात्मा एव अहम् इति यो विजानाति सः आत्मज्ञानी। आत्मवत् आत्मविदपि नित्यशुद्धनित्यबुद्धनित्यमुक्तस्वरूप एव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं धीराधिधीराय वेदान्तभास्कराय नमः॥

आवृत्तचक्षुः धीरश्चेत् अमृतत्वं हि विन्दते।
प्रत्यगात्मावलोकेन सदा **वेदान्तभास्करः**॥

धीरः साधकः आवृत्तचक्षुः सन् सदा प्रत्यगात्मावलोकेन अमृतत्वं विन्दते।

जुलै २७

२०९. अयमेव धीरः

कश्चित् धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुः अमृतत्वम् इच्छन्।

काठकोपनिषत् २-१-१

आवृत्तचक्षुः सन् धीरो मुमुक्षुः अमृतत्वम् इच्छन् आत्मान पश्यति।

स्थूलपदार्थग्राहकैः इन्द्रियैः सूक्ष्मम् आत्मानं विज्ञातुं न शक्यते। तर्हि कथमात्मनो विज्ञानम्? इन्द्रियाणि विहाय आवृत्त चक्षुः सन् आत्मानं पश्येत्। इन्द्रियाणि प्रत्यङ्मुखानि कृत्वा अत्र चक्षुः इति नेत्रादीनि इन्द्रियाणि। बहिर्मुखैरिन्द्रियैः प्रत्यगात्मा विज्ञातुं न शक्यते॥

भवतु, तर्हि का गतिः। अन्तःकरणमेव साधकानां गतिः। अन्तःकरणं शुद्धं भवेत्। बाह्यविषयेभ्यः विमुखीकृत्य शुद्धेन मनसा शास्त्राचार्याणाम् उपदेशं शृणुयात्। मुमुक्षुसाधकाः इन्द्रियभोग-विरक्ताः सन्तः शमदम-उपरति-तितिक्षाश्रद्धासमाधानसाधनपराः भवेयुः। विवेकवैराग्यसम्पन्नाः सन्तः सद्गुरूपदेशम् एकाग्रतया श्रुत्वा मननिदिध्यासनं कुर्वन्ति चेत् तदा प्रत्यगात्मान जानन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परापरविद्याविभागविदे वेदान्तभास्कराय नमः॥

अपरा च परा चैव विद्या द्वेधा कृता बुधैः।
अविद्या चैव विद्या च नूनं **वेदान्तभास्करः**॥

अपरा विद्या अविद्या, परा विद्या ब्रह्मविद्या इति द्वेधा कृता।

जुलै २८

२१०. परा विद्या, अपरा विद्या च

द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च। मुण्डकोपनिषत् १-१-४

परा विद्या अपरा विद्या इति वेदितव्ये द्वे विद्ये भवतः इति ब्रह्मविदो वदन्ति।

ब्रह्मविद्याचार्येण अङ्गिरसा स्वशिष्याय शौनकाय उपदिष्टोऽयं सन्देशः। अत्र सन्देशे वेदान्तस्य महत्त्वम्, व्यापकता, विशिष्टता च सूच्यन्ते। अस्मिन् विशाले प्रपञ्चे शताधिकाः सहस्राधिकाः विद्याः सन्ति। यथा वेदविद्या, वेदान्तविद्या, तर्कः, व्याकरणम्, मीमांसा, ज्योतिषम्, अस्त्रम्, शस्त्रम्, वैद्यम्, हस्तसामुद्रिकम्, नक्षत्र-विद्याद्याः; अथ आधुनिकतान्त्रिकविद्याः, आभिः सह ब्रह्मविद्या, आत्मविद्या च। सर्वा अपि एताः विद्याः अत्र द्वेधा विभज्यन्ते। अनयोः द्वयोरेव विद्ययोः सर्वा अपि विद्याः अन्तर्भवन्ति॥

के ते द्वे विद्ये? इति चेत्। परा विद्या अपरा विद्या च। न परा अपरा, अश्रेष्ठा। अपरा नाम अवरा इत्यर्थः। अविद्यां नाशयितुम् असमर्था हि अपरा विद्या। परा विद्या तु श्रेष्ठा उत्तमा विद्या इत्यर्थः। परब्रह्मविद्या एव परा विद्या। मुक्त्यै साधनभूता विद्या एव परा विद्या। **ब्रह्मविद्या एका एव परा विद्या भवेत्**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदान्तकृते वेदान्तभास्कराय नमः॥

वेदवेदान्तवेदाङ्गैः वेद्योऽहं परमः पुमान्।
पुण्यपापविदूरोऽहं वेत्ति **वेदान्तभास्करः**॥

वेदवेदान्तवेदाङ्गैः वेद्यः परमः पुमान् अहमेव, अहं पुण्यपाप-विदूरश्च इति आत्मानं ज्ञानी विजानाति।

जुलै २९

२११. ब्रह्मज्ञानी नाम परब्रह्मैव

वेदैरनेकैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम्।
न पुण्यपापे मम, नास्ति नाशो
न जन्मदेहेन्द्रियबुद्धिरस्ति॥ कैवल्योपनिषत् १-२२

अनेकैः वेदैः वेद्यः परमः आत्मा अहमेव, वेदान्तसम्प्रदाय-प्रवर्तकः अहमेव, वेदार्थरहस्यवित् अहमेव; मम पुण्यपापे न भवतः, न जन्ममरणे मम स्तः, मम देहेन्द्रियबुद्धयः न सन्ति इत्येवं ज्ञानी आत्मानं विजानाति।

ब्रह्मज्ञानिनाम् अज्ञानिनां च सामान्यजनदृष्ट्या न कोऽपि भेदो दृश्यते। बाह्यदृष्ट्या, व्यावहारिकदृष्ट्या उभावपि समानौ। उभयो-रपि आहारविहारवागादिव्यवहाराः समाना एव। तर्हि ब्रह्मज्ञानिनः विशेषः कः? इति चेत्। अयं मन्त्रः उत्तरं वदति॥

परब्रह्मैव अहम्, नाहं देहेन्द्रियाणि, पुण्यपापसम्बन्धो नास्ति मम, जन्ममरणरहितोऽहम्; निर्गुणः निरुपाधिकः निरवयवः परमात्मैव अहमस्मि—इति निश्चयानुभवसम्पन्नो ज्ञानी, ब्रह्म-स्वरूपोऽयम् ब्रह्मनिष्ठोऽयम् ब्रह्मभूतोऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वर्ग्यानन्दरहस्यविदे वेदान्तभास्कराय नमः॥

श्रोत्रियः कामरहितः सर्वपापविवर्जितः।
दिव्यं सुखमवाप्नोति ह्यत्र **वेदान्तभास्करः**॥

यः श्रोत्रियः कामरहितः पापविवर्जितश्च भवति सः मानवः अत्रैव दिव्यान् आनन्दान् प्राप्नोति।

जुलै ३०

२१२. अत्रैव दिव्यानन्दप्राप्तिः

श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य॥

तैत्तिरीयोपनिषत् २-८-३

श्रोत्रियस्य अकामहतस्य साधकस्य प्रजापतिशतगुणः आनन्दः लभ्यते। परब्रह्मणः एकोऽंशः आनन्दोऽयम्। अयम् आनन्दः श्रोत्रियस्य अकामहतस्य साधकस्य प्राप्यते॥

अयं भागः 'आनन्दमीमांसा' इति कथ्यते। मानवानन्दात् आरभ्य शतगुणम् अधिकम् उत्तरोत्तरम् आनन्दाः उपदिश्यन्ते। देवानाम् आनन्दः, इन्द्रस्य आनन्दः, बृहस्पतेरानन्दः; प्रजापतेरानन्द-पर्यन्तं शतगुणम् आनन्दः अधिको भवति। इमान् आनन्दान् अत्रैव जन्मनि अनुभवितुम् इच्छति चेत् सः इमाम् योग्यतां सम्पादयेत्॥

१. **श्रोत्रियो** भवेत्। शास्त्रोक्तकर्मानुष्ठानतत्परो भवेत्।

२. **अकामहतो** भवेत्। नीचविषयभोगेभ्यः विरक्तः सन् तुच्छविषयभोगेभ्यः दूरस्थो भवेत्।

३. **अवृजिनो** भवेत्। शास्त्रनिषिद्धपापकर्मविदूरो भवेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ग्रहातिग्रहविदे वेदान्तभास्कराय नमः॥

अष्टौ ग्रहा हीन्द्रियाणि अष्टावतिग्रहास्तथा।
शब्दस्पर्शादयो ज्ञेयाः इति **वेदान्तभास्करः**॥

अष्टौ वागादीनि इन्द्रियाणि **ग्रहाः**, अष्टौ शब्दादयो विषयाः **अतिग्रहाः** भवन्ति।

जुलै ३१

२१३. अष्टौ ग्रहाः, अष्टौ अतिग्रहाः

जारत्कारवः आर्तभागः पप्रच्छ...कति ग्रहाः कत्यतिग्रहाः? इति। अष्टौ ग्रहाः, अष्टौ अतिग्रहा इति।

बृहदारण्यकोपनिषत् ३-२-१

जनकराजस्य विद्वत्सभायाम् अनेके विद्वांसः आसन्। तेषाम् अन्यतमः जारत्कारवः आर्तभागः। एषः याज्ञवल्क्यम् महर्षिम् पृष्टवान् "कति ग्रहाः? कति अतिग्रहाः?" इति। प्रत्युत्तरत्वेन याज्ञवल्क्यः वदति "अष्टौ ग्रहाः, अष्टौ अतिग्रहाः" इति॥

अत्र **ग्रहा** नाम इन्द्रियाणि, **अतिग्रहा** नाम विषयाः इत्यर्थः। गृह्णन्ति, ग्राहयन्ति इति **ग्रहाः**। इन्द्रियाणि जीवम् आत्मसकाशम् आकर्षन्ति इति **ग्रहाः** उच्यन्ते। अस्मान् इन्द्रियाणि स्वसमीपं गृह्णन्ति खलु? विषयास्तु इमानि **ग्रहाख्यानि** इन्द्रियाण्यपि स्वाभिमुखानि कुर्वन्ति इति **अतिग्रहाः** उच्यन्ते। प्रबलानि इन्द्रियाणि अतिप्रबलाः विषयाः आकर्षन्ति इति प्रसिद्धमेव। अज्ञाः इन्द्रियाणां विषयाणां च दासभूताः विषयभोगेषु मग्नाः सन्तः अनर्थपरम्पराः अनुभवन्ति। विवेकिनस्तु इन्द्रियाख्यान् **ग्रहान्** विषयाख्यान् **अतिग्रहान्** च स्वाधीनान् कृत्वा तेषामनधीनाः सन्तः **धीरा** विवेकिनः उच्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वर्गलोकतत्त्वविदे वेदान्तभास्कराय नमः॥

स्वर्गलोके न जात्वस्ति जरामरणजं भयम्।
कर्मोपासननिष्ठानाम् इति **वेदान्तभास्करः**॥

स्वर्गलोके जरामरणजं भयं न जातु अस्ति। स्वर्गलोकप्राप्तिस्तु कर्मोपासननिष्ठानां भवति॥

आगस्ट् १

२१४. स्वर्गलोके सुखभोगः

उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके।
काठकोपनिषत् १-१-१२

इह पुण्यकृत् मरणानन्तरं स्वर्गलोकं गत्वा तत्र अशनायां पिपासां च तीर्त्वा शोकरहितः सन् सुखम् अनुभवति।

स्वर्गलोकनरकलोकयोः 'लोकान्तरम्' इति नाम। न कश्चिदपि पुरुषः अस्मिन् लोके अनेन प्रत्यक्षप्रमाणेन स्वर्गनरकलोकान् द्रष्टुं समर्थो भवेत्। न च अनुमानप्रमाणेन लोकान्तरविचारान् ज्ञातुं समर्थः। तर्हि लोकान्तरविषये अस्माकं प्रमाणं किम्? शास्त्रमेव॥

कठोपनिषदः अयं मन्त्रः स्वर्गलोकविवरणं ददाति। स्वर्गलोकस्य देवलोकः इति नामान्तरम्। तत्र वसतां 'देवाः' इति नामधेयम्। तत्रस्थानां देवानां अशनाया वा पिपासा वा न विद्यते। तत्र स्वर्गलोके रोगादयो न भवन्ति। जरा, आयासः, दारिद्र्यम्, दुःखं, भयादिकं नास्ति। वाहनेभ्यः अपघातो वा दुर्मरणं वा तत्र स्वर्गे न सम्भवति। सकलेन्द्रियाणां तत्र दिव्याः सुखभोगाः समृद्धाः भवन्ति। अयं हि स्वर्गलोकस्य भोगः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'रहस्यनाम'विदे वेदान्तभास्कराय नमः॥

''सत्यस्य सत्य''मित्याहुः परं ब्रह्म निरंजनम्।
रहस्यं नामधेयं तत् विदुर्**वेदान्तभास्करः**॥

निरंजनं परं ब्रह्म ''सत्यस्य सत्यम्'' इति आहुः। एतत् ब्रह्मणः ''रहस्यं'' नामधेयम्॥

आगस्ट् २

२१५. आत्मनः 'रहस्यं' नामधेयम्

तस्योपनिषत् 'सत्यस्य सत्यम्' इति। प्राणा वै सत्यं तेषामेष सत्यम्॥ बृहदारण्यकोपनिषत् २-१-२०

'सत्यस्य सत्यम्' इति तस्य उपनिषत्। प्राणा एव सत्यम्, सत्यानां प्राणानामपि अयमात्मा सत्यम्॥

उपनिषत्सु आत्मा अनेकैः नामभिः कथितोऽस्ति। आत्मनः ईशः, साक्षी, सत्यम्, अक्षरम्, पुरुषः, अन्तर्यामी, ब्रह्म, विज्ञानम्, आनन्दः—इत्यादीनि अनेकानि नामानि उपनिषत्सु उपदिष्टानि॥

अस्मिन् प्रकृते मन्त्रे तु आत्मनः 'सत्यस्य सत्यम्' इति नाम उपदिष्टं दृश्यते। अयमात्मा 'सत्यस्य सत्यम्'। प्राणा एव हि **सत्यम्**। अत्र प्राणा इति इन्द्रियाणि मनश्च। इन्द्रियैः दृष्टं वस्तु सत्यं खलु? तस्मात् इन्द्रियमनोबुद्धयः **सत्य**शब्देन उच्यन्ते। एतेषाम् आस्पदभूतो हि अयमात्मा। इन्द्रियाणां चैतन्याधायकः आत्मा। एष आत्मैव नूनं 'सत्यम्'। आत्मन एव हि सर्वाणि इन्द्रियाणि स्वस्वव्यापारं कुर्वन्ति। आत्मचैतन्यनिमित्त एव हि सर्वकरण-व्यापारः? आत्मैव खलु इन्द्रियमनोबुद्धीनाम् आधारः? तस्मात् आत्मा 'सत्यस्य सत्यम्' इति कथ्यतेऽत्र। इदं हि आत्मनः रहस्यं नाम॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्गुरुकर्तव्यविदे वेदान्तभास्कराय नमः॥

श्रोत्रियो ब्रह्मनिष्ठश्च सद्गुरुः करुणामयः।
जिज्ञासवे ब्रह्मविद्यां ब्रूयात् **वेदान्तभास्करः**॥

करुणामयः श्रोत्रियो ब्रह्मनिष्ठश्च सद्गुरुः जिज्ञासवे ब्रह्मविद्या ब्रूयात्।

आगस्ट् ३

२१६. सद्गुरुकृपानुग्रहोऽयम्

येनाक्षरं पुरुषं वेद सत्यम् प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।

मुण्डकोपनिषत् १-२-१३

प्रशान्तचित्ताय शमान्विताय शिष्याय ब्रह्मनिष्ठः सद्गुरुः तां श्रेष्ठां ब्रह्मविद्यां प्रीत्या उपदिशति। ब्रह्मविद्यया शिष्यः अक्षरं सत्यं पुरुषं विज्ञाय कृतार्थो भवति॥

योग्याय शिष्याय करुणासागरः सद्गुरुः ब्रह्मतत्त्वम् उपदिशेत्। न, अवश्यमेव उपदिशति। ''स्वयमेव स्वतन्त्रः सन् ब्रह्मजिज्ञासां नैव कुर्यात्'' इति शिष्यस्य यथा नियमः, एवमेव ''आत्मानम् उपसन्नाय योग्याय शिष्याय जिज्ञासवे ब्रह्मतत्त्वम् उपदिशेत्'' इति ब्रह्मविद्याचार्यस्यापि शास्त्रनियमः एव इति भगवान् श्रीशंकरः ''**आचार्यस्यापि अयमेव नियमः यत् न्यायप्राप्तसच्छिष्य-निस्तारणम् अविद्यामहोदधेः**'' इति लिखति॥

योग्याय जिज्ञासुशिष्याय सद्गुरुः अक्षरस्वरूपम् उपदिशति। अक्षरं नाम नाशरहितं तत्त्वम्। इदमेव पुरुषशब्देनापि कथ्यते। अस्य विज्ञानमेव ब्रह्मज्ञानमिति उच्यते। इयमेव हि शिष्याणां सद्गुरुकृपानुग्रहनिमित्ता श्रेष्ठा सम्पत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पञ्चभूतात्मभूताय वेदान्तभास्कराय नमः॥

खानिलाद्यात्मकं विश्वं जायते ह्यात्मनः परात्।
आत्माभिन्नं सदा विश्वं ह्यात्मा **वेदान्तभास्करः**॥

आकाशवायुप्रमुखं विश्वमिदं परमात्मन एव जायते, इदं विश्वम् आत्माभिन्नम्, आत्मैव इत्यर्थः।

आगस्ट् ४

२१७. आत्मन एव पञ्चभूतोत्पत्तिः

तस्माद्वा एतस्मात् आत्मनः आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरुषः॥

तैत्तिरीयोपनिषत् २-१-२

सत्यज्ञानानन्तस्वरूपात् आत्मनः आकाशः सम्भूतः, आकाशात् वायुः उत्पन्नः, वायोः अग्निः, अग्नेः आपः उद्भूताः, अद्भ्यः पृथिवी सञ्जाता, पृथिव्याः ओषधयः, ओषधीभ्यो अन्नम्, अन्नाच्च पुरुषः सञ्जातः॥

'जगतः ब्रह्म कारणम्' इति वेदान्ताः उद्घोषयन्ति। सत्यज्ञानानन्तस्वरूपं हि ब्रह्म। इदं ब्रह्म न अस्मत्तः भिन्नं वस्तु। सर्वस्य जीवस्य स्वरूपमेव ब्रह्म। ब्रह्मैव अस्माकं प्रत्यगात्मा। अस्माकम् आत्मा एव ब्रह्म। अस्माकं स्वरूपभूतात् ब्रह्मण एव इदं समस्तं विश्वं जातं सत्, ब्रह्मण्येव विद्यमानं सत्, ब्रह्मण्येव लीयते च॥

अकाशादीनि पञ्चभूतानि ब्रह्मादयः पीपीलिकान्ताः समस्ताः चेतनप्राणिनश्च ब्रह्मण एव उत्पन्नाः। सर्वस्यापि जगतः ब्रह्मैव अभिन्नं निमित्तोपादानकारणम्। अतः कार्यभूतमिदं जगत् ब्रह्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गायत्रीरहस्यज्ञाय वेदान्तभास्कराय नमः॥

चतुष्पदा हि गायत्री षड्विधा चैव सा श्रुता।
सर्वच्छन्दःसारभूता श्रेष्ठा **वेदान्तभास्करः**॥

सा एषा गायत्री चतुष्पदा षड्विधा इति श्रुता, एषा श्रेष्ठा सर्वच्छन्दःसारभूता च।

आगस्ट् ५

२१८. गायत्रीमहिमा

सैषा चतुष्पदा षड्विधा गायत्री।

छान्दोग्योपनिषत् ३-१२-५

सा एषा गायत्री चतुष्पदा षड्विधा भवति।

गायत्री इति छन्दोनाम। प्रतिपादम् एकाक्षरम्, अक्षरद्वयम्, त्र्यक्षरम्, चतुरक्षरम्, पञ्चाक्षरम्, षडक्षरम् च—उक्ता, अत्युक्ता, मध्या, प्रतिष्ठा, सुप्रतिष्ठिता, गायत्री च—इति छन्दः कथ्यते। प्रकृते, प्रतिपादं षडक्षरा, चतुष्पदा च गायत्री इति उच्यते। 'चतुष्पदा गायत्री' इति प्रसिद्धा॥

इयं गायत्री 'षड्विधा' भवति। वाक्, भूतानि, पृथिवी, शरीरम्, हृदयं, प्राणः इति एतैः रूपैः विद्यमाना गायत्री षड्विधा भवति। षड्भिः अक्षरैः युक्ता च षड्विधा भवति गायत्री। सर्वथा अस्मिन् गायत्रीच्छन्दसि प्रतिपादं षट् अक्षराणि, चत्वारः पादाश्च भवन्ति। एवं चतुर्विंशत्यक्षरैः युक्ता गायत्री वेदेषु प्रसिद्धा अस्ति। गायत्री 'छन्दसां माता' इति प्रथितास्ति। एवं हि गायत्रीच्छन्दसः महिमानं विज्ञाय तदुपासनं कर्तव्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'नेति नेति'रहस्यविदे वेदान्तभास्कराय नमः॥

परस्य नेति नेतीति ह्यादेशो ब्रह्मणः श्रुतः।
नास्ति नास्त्येव नास्त्येव परो **वेदान्तभास्करः**॥

परस्य ब्रह्मणः आदेशः 'नेति नेति' इति श्रुतः। इमम् आदेशं विहाय ब्रह्म ज्ञापयितुम् अन्यो मार्गः नास्त्येव॥

आगस्ट् ६

२१९. 'नेति नेति' इत्येव गतिः

अथात आदेशो 'नेति नेति', न ह्येतस्मादिति नेति, अन्यत् परमस्ति।

बृहदारण्यकोपनिषत् २-३-६

अथ ब्रह्मणः आदेशः 'नेति नेति' इति। एतस्मात् आदेशात् अन्यः मार्गः नास्ति। अन्यः उपदेशक्रमो नास्ति॥

परं ब्रह्म ज्ञापयितुं वेदान्तदर्शनस्य बीजमन्त्रोऽयम्। 'नेति नेति' इति हि परब्रह्मोपदेशक्रमः। परिपूर्णत्वात् निरुपाधिकत्वात् सर्वविशेषणरहितत्वाच्च परं ब्रह्म' नेति नेति' क्रमं विहाय नान्येन मार्गेण विज्ञापयितुं शक्यते॥

परब्रह्मस्वरूपं विज्ञातुं 'नेति नेति' इत्येव मार्गः। न इति, न इति इतिक्रमेणैव ब्रह्म ज्ञापयेत्। 'न इति' इत्येतत् 'इति न' इति परिवर्तयेत्। इदं न ब्रह्म, एवं न ब्रह्म इत्येव उपदिशेत्। ब्रह्म न शुक्लम्, न कृष्णम्, न स्थूलम्, न अणु, न दीर्घम्, न ह्रस्वम्, न कारणम्, न च कार्यम् इत्येव जानीयात्। तर्हि ब्रह्म किं शून्यम्? इति चेत् तदा द्वितीयः 'नेति'कारः। न च ब्रह्म शून्यमपि भवति। एवं 'नेति नेति' इति अध्यारोप-अपवादक्रमेणैव परं ब्रह्म ज्ञापयेत्।

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अभिन्ननिमित्तोपादानविदे वेदान्तभास्कराय नमः ॥

चिदात्मकं परं ब्रह्म निमित्तं चैकमेव हि।
उपादानं कारणं च नान्यद् **वेदान्तभास्करः** ॥

चिदात्मकं परं ब्रह्मैव एकं जगतः उपादानं निमित्तं च कारणं भवति, नान्यत् प्रधानादि।

आगस्ट् ७

२२०. अभिन्ननिमित्तोपादानकारणम्

तदैक्षत बहु स्यां प्रजायेय इति।

छान्दोग्योपनिषत् ६-२-३

तद् ब्रह्म 'अहं बहु स्याम्' इति, 'अहं प्रजायेय' इति च ऐक्षत॥

'तत्' इति सत्स्वरूपं ब्रह्म। तत् एक्षत, ''अचिन्तयत्'' इत्युक्तत्वात् चिन्तनकर्तृ, आलोचनकर्तृ चिन्मात्रस्वरूपं ब्रह्मैव, न तु अचेतनं प्रधानम्। अचेतनस्य प्रधानस्य चिन्तनसामर्थ्यं नास्ति॥

भवतु, तद् ब्रह्म किमिति ऐक्षत? उच्यते। अहमेव प्रपञ्चो भवानि, अहमेव प्रपञ्चरूपेण जायेय इति अचिन्तयत्। न तु यथा कुलालः मृदा घटघटिकादीन् सृजै इति चिन्तयति तथा॥

कुलालः घटादीनां निमित्तं कारणम्, मृत्तिका तु उपादानं कारणम्। उभयं कारणं भिन्नभिन्नमेव। ब्रह्म तु एकमेव अस्य जगतः निमित्तं कारणम् उपादानं च। अस्यैव **अभिन्ननिमित्तोपादानसत्कार्यवादः** इति वेदान्तेषु नाम। अभिन्ननिमित्तोपादानकारणात् ब्रह्मणः जातं विश्वमिदं सर्वदा ब्रह्मस्वरूपमेव। कार्यकारणानन्यत्वन्यायेन ब्रह्माभिन्नमेवेदं जगत् इति विज्ञेयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओं ज्ञेयब्रह्मविदे वेदान्तभास्कराय नमः॥

ब्रह्मैव सर्वैर्विज्ञेयं प्रत्यगात्मस्थमव्ययम्।
नातः परं वेदितव्यं किञ्चित् **वेदान्तभास्करः**॥

प्रत्यगात्मस्थम् अव्ययं ब्रह्मैव आत्मत्वेन सर्वैः विज्ञेयम्। अतः परं वेदितव्यं किञ्चिदपि नास्ति॥

आगस्ट् ८

२२१. ब्रह्मैव परमं ज्ञेयम्

एतत् ज्ञेयं नित्यमेवात्मसंस्थम् नातः परं वेदितव्यं हि किञ्चित्।

श्वेताश्वतरोपनिषत् १-१२

नित्यमेव आत्मसंस्थं ब्रह्मैव सर्वैः ज्ञेयम्, अतः परं वेदितव्यं किञ्चिदपि नास्ति।

सर्वासां वेदोपनिषदां सारं सरळतया उपदिशति अयं मन्त्रः। "ब्रह्मैव सर्वैः विज्ञेयम्" इति हि सकलशास्त्राणां सन्देशः। 'ब्रह्मशब्दश्रवणमात्रेण अनेकेषां मनसि परोक्षभूता दूरस्था काचित् देवता इति कल्पना जायते। नैषा कल्पना साध्वी। ब्रह्म इति 'आत्मसंस्थम्'। आत्मनि सम्यक् स्थितम्—आत्मसंस्थम्। स्वस्मिन्नेव अवस्थितं स्वरूपभूतं ब्रह्म इत्यर्थः॥

परमार्थतस्तु ब्रह्म न आत्मनि स्थितम्। किं तु आत्मैव ब्रह्म। ब्रह्मैव उपाधिभिः जीवात्मरूपेण अवभासते। एतद् ब्रह्मैव साधकैः विज्ञेयम्। अनेन ज्ञानेनैव परमा शान्तिः, मुक्तिश्च लभ्यते। एतावति विज्ञाते इतोऽधिकं ज्ञातव्यं न किञ्चिदवशिष्यते। ज्ञातव्यं सर्वमपि एतावदेव। सकलशास्त्राणामपि सन्देशः अयमेव। ब्रह्मणि आत्मत्वेन ज्ञाते सति साधकः मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जीवितरहस्यविदे वेदान्तभास्कराय नमः॥

अतिदीर्घे जीवितेऽस्मिन् सुखी को वा भवेन्नरः।
नित्यदुःखस्वरूपत्वात् इति **वेदान्तभास्करः**॥

अतिदीर्घे अस्मिन् जीविते को वा नरः सुखी भवेत्? न कोऽपि। कुतः? जीवनस्य नित्यदुःखरूपत्वात्॥

आगस्ट् ९

२२२. अतिदीर्घे जीवितेऽपि एतावदेव

अतिदीर्घे जीविते को रमेत?

काठकोपनिषत् १-१-२८

बहुदीर्घकालपर्यन्तं जीवनमात्रेण को वा सन्तोषेण जीवेत्?

सर्वोऽपि पुरुषः दीर्घायुः भवितुम् इच्छति। देवालयादीन् गत्वा तत्र अष्टोत्तरशत सहस्रनाम पूजा अभिषेकादीन् कारयद्भिः भक्तैः देवतासंनिधौ क्रियमाणः सङ्कल्पो नाम "दीर्घायुरारोग्यऐश्वर्याभिवृद्ध्यर्थम्"—इत्येव। तथा शिष्यैः नमस्कृताः वृद्धाः, वेदपुरुषाः, "दीर्घायुष्मान् भव" इत्येव हि प्रप्रथमतया आशीर्वादं कुर्वन्ति। को वा अल्पायुर्भूत्वा अकाले मुमूर्षति? न कोऽपि॥

साध्वेव एतत् सर्वम्, अपि तु दीर्घायुर्विषये अयं काठकोपनिषन्मन्त्रः एकं सुन्दरं सन्देशम् उपदिशति। स च सन्देशो नाम "शतायुर्जीवनमात्रेण मनुष्यः किम् आनन्दी स्यात्? नैव" इति। कथं तर्हि आनन्दी स्यात्? तृप्त्या आनन्दः, विवेकेन आनन्दः, वैराग्येण आनन्दः, आत्मज्ञानेन आनन्दः, न तु केवलं विषयभोगजीवनमग्नमात्रेण। शताधिकसंवत्सरपर्यन्तं जीवनमात्रेण आनन्दी न स्यात् नरः। तावन्मात्रेण न सुखी भवेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं षोडशकलातीताय वेदान्तभास्कराय नमः॥

प्राणाद्या नामपर्यन्ताः कला जाता ह्यविद्यया।
आत्मनो लयमेष्यन्ति तस्मिन् **वेदान्तभास्करः**॥

अविद्यया एव प्राणाद्याः नामपर्यन्ताः षोडश कलाः आत्मनो जाताः, तस्मिन् आत्मन्येव लयम् एष्यन्ति।

आगस्ट् १०

२२३. षोडश कला एताः

स प्राणम् असृजत, प्राणात् श्रद्धां खं वायुः ज्योतिः आपः पृथिवी इन्द्रियं मनः। अन्नम्, अन्नात् वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु नाम च॥ प्रश्नोपनिषत् ६-४

सः पुरुषः प्राणम् असृजत, प्राणात् श्रद्धाम्, आकाशं, वायुम्, ज्योतिः, आपः, पृथिवीम्, इन्द्रियं, मनश्च असृजत। अन्नम् सृष्ट्वा, अन्नात् वीर्यम्, तपः, मन्त्रान्, कर्म, लोकान् सृष्ट्वा, लोकेषु नाम सृष्टवान्॥

परमात्मा स्वतः निष्कलः इति उपनिषदः प्रतिपादयन्ति। निष्कलो नाम षोडशकलासम्बन्धरहितः। कास्ताः षोडश कलाः? इति पृष्टे प्रश्नोपनिषत् दर्शयति। ताः षोडश कलास्तु एताः—

१) हिरण्यगर्भः **प्राणः**, सर्वप्राणिकरणात्मा अयम् २) **श्रद्धा**, शास्त्रीयधर्मानुष्ठानसमये अपेक्ष्यः धर्मः ३) आकाशः ४) वायुः ५) तेजः ६) आपः ७) भूमिः ८) ज्ञानेन्द्रिय कर्मेन्द्रियाणि ९) मनः १०) अन्नम् ११) वीर्यम् १२) तपः १३) मन्त्राः १४) अग्निहोत्राणि कर्माणि १५) स्वर्गादिलोकाः १६) नामानि। इत्येताः षोडश कलाः परस्मादेव ब्रह्मणो जायन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वापरहस्यविदे वेदान्तभास्कराय नमः॥

त्यक्तसर्वविशेषोऽसौ आत्मा स्वापे स्वयं प्रभुः।
अतीत्य मृत्युरूपाणि भाति **वेदान्तभास्करः**॥

स्वापे अयम् आत्मा त्यक्तसर्वविशेषः स्वयप्रभुः सन् मृत्युरूपाणि अतीत्य भाति।

आगस्ट् ११

२२४. अत्र न मृत्युरूपाणि सन्ति

स्वप्नो भूत्वा इमं लोकमतिक्रामति मृत्यो रूपाणि।

बृहदारण्यकोपनिषत् ४-३-७

आत्मैव स्वप्नो भूत्वा तत्र इमं लोकं मृत्युरूपाणि च अतिक्रामति।

जागरितात् आत्मा स्वप्नं प्रविशति। जागरितस्य सर्वान् शरीरेंद्रियादीन् उपाधीन् जागरिते एव विहाय आत्मा स्वयमेव स्वप्नो भवति। आत्मा एक एव सन्नपि स्वयमेव स्वप्नं निर्माय स्वयमेव स्वप्नो भवति। यतो हि जागरितात् न कञ्चिदपि अल्पं पदार्थं स्वप्नं प्रति यद्यपि न नयति, तथापि आत्मा स्वयमेव स्वमहिम्ना स्वप्नो भूत्वा तत्र स्वेष्टानि वस्तूनि सर्वाण्यपि सृजति खलु? न हि आत्मनः जाग्रतः स्वप्नस्य अथवा सुषुप्तेः सम्बन्धो विद्यते॥

स्वप्नात् सुषुप्तम् प्रविशन्नेव आत्मा सर्वाणि द्वैतवस्तूनि तत्रैव त्यक्त्वा स्वस्वरूपे वर्तते। सा सुषुप्तिरेव आत्मनः वासस्थानम्। तत्र आत्मा अविद्याकामकर्माणि अत्येति। क्रियाकारकफलानि च आत्मा सुषुप्तौ अत्येति। अत्र मृत्युर्नाम क्रियाकारकफलानि। देहेन्द्रियमनोबुद्धयो हि मृत्युः। एतानि आत्मा सुषुप्तौ अत्येति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परात्पराक्षरविदे वेदान्तभास्कराय नमः॥

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः।
सर्वेषां ह्यात्मभूतोऽसौ इति **वेदान्तभास्करः**॥

आत्मा अप्राणः, अमनाः, शुभ्रः, परतः अक्षरात् परः, सर्वेषाम् आत्मभूतः।

आगस्ट् १२

२२५. आत्मनो महिमा ह्येषः

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः।

मुण्डकोपनिषत् २-१-२

आत्मा अप्राणः, अमनाः, शुद्धः, परस्मात् अक्षरादपि परतरः।

उपनिषत्प्रतिपाद्यस्य आत्मनः स्वरूपम् अयं मन्त्रः सुन्दरतया वर्णयति। अन्तर्बहिश्च परिपूर्णोऽयमात्मा। **अप्राणः** आत्मा। प्राणसम्बन्धरहितः। आत्मनः प्राणो जायते, अतः प्राणस्य अधीनता आत्मनो नास्ति। प्राणे सति वा असति वा, तेन आत्मनो न किञ्चित् सम्भवति। तथा आत्मा **अमनाः** मनःसम्बन्धरहितः। आत्मन एव मनो जायते। आत्मनिमित्तं हि मनसोऽस्तित्वम्। मनःसाक्षिणः आत्मनः मनोऽधीनत्वम् नास्ति। मनश्च प्राणश्च अनात्मभूतौ एव॥

आत्मा **शुभ्रः**, पुण्यपापसम्बन्धरहितः। त्रिगुणसम्बन्धो वा देशकालसम्बन्धो वा आत्मनः अभावात् आत्मा नित्यशुद्धः। आत्मा हि अव्याकृतादपि सूक्ष्मतरः। कापिल**साङ्ख्यदर्शने प्रतिपादितं प्रधानं** सूक्ष्मं, परं च भवति। वेदान्तप्रतिपादितस्तु आत्मा एतस्मात् परात् सूक्ष्मात् प्रधानादपि परतरः, सूक्ष्मतरः। एष आत्मनो महिमा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कलाप्रलयरहस्यविदे वेदान्तभास्कराय नमः॥

नामरूपप्रहाणिः स्यात् कलाप्रलय एव च।
ब्रह्मात्मविद्यया नूनम् इति **वेदान्तभास्करः**॥

ब्रह्मात्मविद्यया नामरूपप्रहाणिः, तथा कलाप्रलयो भवति॥

आगस्ट् १३

२२६. ज्ञानेन नामरूपध्वंसः

भिद्येते चासां नामरूपे, पुरुष इत्येवं प्रोच्यते, स एषोऽकलो अमृतो भवति।

प्रश्नोपनिषत् ६-५

आसां कलानां नामरूपे भिद्येते, तदा पुरुष इत्येव प्रोच्यते। तदा पुरुषः अकलो भवति अमृतो भवति॥

पुरुषादेव जाताः षोडश कलाः पुरुषे एव लीयन्ते। इदं दर्शयितुम् अत्र प्रश्नोपनिषदि दृष्टान्तः दीयते। यथा—गंगा यमुना गोदावरीप्रमुखाः नद्यः नानादिग्भ्यः प्रवहन्त्यः समुद्रं प्रविशन्त्यः समुद्रे एकीभूय अनन्तरं समुद्रः इत्येव कथ्यन्ते, एवमेव आत्मनो जाताः सर्वा अपि कलाः अन्ते आत्मन्येव विलीयन्ते॥

सर्वा अपि कलाः आत्मन एव जायन्ते इति अविद्यावस्थाया-मेव उपदिश्यते, परमार्थदृष्ट्या तु सर्वा अपि कलाः आत्मैव भवन्ति। औपनिषदात्मज्ञानेन सर्वा अपि कलाः आत्मन्येव लीयन्ते। आत्मज्ञानादेव केवलात् आत्मन्येव कलाप्रलयो भवति॥

कलाकारणभूतं कलाश्रयभूतं निष्कलम् आत्मानं विवेकेन विज्ञाय नामरूपरहितं ब्रह्मैव प्राप्नोति साधकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भूतभव्यभवत्प्रभवे वेदान्तभास्कराय नमः॥

देशकालादिकं सर्वं देशकालादिवर्जितः।
ओङ्कारश्च परं ब्रह्म विद्यात् **वेदान्तभास्करः**॥

देशकालादिकं सर्वं विश्वं देशकालादिरहितः ओङ्कार एव, ओङ्कारस्तु ब्रह्मैव।

आगस्ट् १४

२२७. ओङ्कारो नाम ब्रह्मैव

भूतं भवद् भविष्यदिति सर्वमोङ्कार एव।

माण्डूक्योपनिषत् १

भूतं, वर्तमानं, भविष्यत् इति सर्वम् ओङ्कार एव।

कालदेशादिकं सर्वम् ओङ्कार एव। इयं माण्डूक्योपनिषत् 'ओङ्कारः ब्रह्मैव' इत्युपदिशति। न हि ओङ्कारो नाम केवलम् अकार उकार मकारात्मकं त्र्यक्षरं वर्णमात्रम्। किं तु परिपूर्णं ब्रह्मैव ओङ्कारः। ओङ्कारस्य ब्रह्मणश्च अत्र अभेदः उपदिश्यते। ओङ्कार एव ब्रह्म, ब्रह्मैव च ओङ्कारः॥

भूतं, भवत्, भविष्यत् इति कालत्रयम्; तत्र अत्र इति देशाः —इमौ कालदेशावपि ब्रह्मणः एव जातौ॥

यद्यपि देशकालौ सर्वप्रपञ्चव्यापकौ तथापि परं ब्रह्म न तौ स्पृशतः। त्रयः कालाः, सर्वे देशाः, सर्वाणि वस्तूनि च ब्रह्मणो जातानि, ब्रह्मण्येव लीयन्ते इति परमेव ब्रह्म। अभिधानाभिधेय विलक्षणः ओङ्कारः परब्रह्म। ओङ्कार एव ब्रह्म, ब्रह्मैव च ओङ्कारः। ओङ्कारो नाम देशकालनामरूपातीतं परं ब्रह्मैव। अमात्रः, अवर्णः, अनक्षरः अपादः ओङ्कारो ब्रह्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राप्तसर्वकामाय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानी भवेद् ब्रह्म स्वात्मस्थं ब्रह्म तत् परम्।
ब्रह्मज्ञानात् सर्वकामावाप्तिर्**वेदान्तभास्करः**॥

ब्रह्मज्ञानी परं ब्रह्म भवेत्। ब्रह्म च स्वात्मस्थमेव, ब्रह्मज्ञानात् सर्वकामावाप्तिर्भवति।

आगस्ट् १५

२२८. ज्ञानेन सर्वकामावाप्तिः

ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानम् अनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति॥

तैत्तिरीयोपनिषत् २-१-१

ब्रह्मवित् परं ब्रह्म आप्नोति। अयं मन्त्रः इदं विवृणोति। ब्रह्म, सत्यं ज्ञानम् अनन्तं च। परमे व्योम्नि गुहायां निहितं ब्रह्म यो वेद, सः सर्वान् कामान् सर्वज्ञेन ब्रह्मणा सह अश्नुते॥

बृंहति इति ब्रह्म। चिन्मात्रस्वरूपं परिपूर्णं तत्त्वमेव ब्रह्म। सत्यम् अविकारि ब्रह्म, ज्ञानं ज्ञप्तिमात्रं ब्रह्म, अनन्तम् अपरिच्छिन्नं च ब्रह्म। न कुत्रापि बहिः अस्मत्तः भिन्नतया देशान्तरे कालान्तरे वा ब्रह्म विद्यते। देशकालयोरेव कारणभूतं ब्रह्म देशकालपरिच्छिन्नं भवेद्वा? एवंभूतं ब्रह्म विदितवतः फलं ब्रह्मप्राप्तिरेव। ब्रह्मज्ञानेन ब्रह्मप्राप्तिः॥

इदं ब्रह्म अस्मासु गुहायां निहितमस्ति। परमार्थदृष्ट्या स्वयमेव ब्रह्म। परिपूर्णेन ब्रह्मणा सहैव ब्रह्मवित् सर्वान् कामान् अवाप्नोति। सर्वमेव जगत् ब्रह्मैव इति विजानतः ब्रह्मभिन्नतया प्राप्याः कामाः नैव विद्येरन् इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कामरहिताय वेदान्तभास्कराय नमः॥

कामात्मा कामरक्तश्च कामान् कामयते सदा।
कामभिर्जायते तत्र मूढो **वेदान्तभास्करः**॥

यः कामात्मा कामरक्तश्च सन् सदा कामान् कामयते, सः मूढः कामभिः (कामैः) तत्र तत्र जायते।

आगस्ट् १६

२२९. कामिनः कामा एव गतिः

कामान् यः कामयते मन्यमानः स कामभिः जायते तत्र तत्र। मुण्डकोपनिषत् ३-२-२

यः मानवः कामानेव चिन्तयन् कामानेव सदा कामयते, सः अविवेकी मरणानन्तर तैस्तैः कामभिः, कामैः जायते।

कामितया जीवन् कामी पुनः कामी एव जायेत। कामशब्दस्य 'काम्यन्ते इति कामाः' इति काम्यपदार्थाः, 'कामनं कामः' इति इच्छा च—अर्थो भवति। अविद्यानिमित्तः कामो भवति। अविद्यावतो हि अनात्मविषयाः कामाः भवन्ति। कामैः कर्माणि, कर्मभ्यः जन्मप्राप्तिः, ततः सुखदुःखसंसारः सन्ततो भवति॥

आत्मस्वरूपम् अजानतः अज्ञानिनः सदा अनात्मचिन्तनम्, विषयाभिध्यानं च। शब्दस्पर्शरूपरसगन्धविषयचिन्तनमेव अज्ञस्य कर्म। अयमेव कामो नाम। अस्मिन् कामे सति तावतैव अलम्। तेन सर्वानर्थप्राप्तिः। **'विषयाभिध्यानं सर्वानर्थमूलम्'** इति श्रीशंकरभगवत्पादानां सन्देशः गीताभाष्ये। कामचिन्तकस्य काममयस्य, कामारामस्य, कामकामस्य, कामात्मनः कामान् विहाय अर्थान्तरचिन्तनं नास्त्येव। कामिनः कामा एव गतिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्तसर्वपाशाय वेदान्तभास्कराय नमः॥

अविद्यया भोक्तृभावात् बध्यते बालिशस्सदा।
ज्ञात्वा देवं सर्वपाशैः मुक्तो **वेदान्तभास्करः**॥

बालिशो मानवः अविद्यया भोक्तृभावात् सदा बध्यते। देवं ज्ञात्वा सर्वपाशैः मुच्यते॥

आगस्ट् १७

२३०. ज्ञानेन पाशविमोचनम्

अनीशश्चात्मा बध्यते भोक्तृभावात्, ज्ञात्वा देवं मुच्यते सर्वपाशैः।

श्वेताश्वतरोपनिषत् १-८

जीवात्मा भोक्तृभावात् अविद्याधीनः सन् बध्यते, देवं ज्ञात्वा सर्वपाशैः प्रमुच्यते।

जीवः अनीशः सन् बद्धो भवति। ईशो नाम स्वतन्त्रः, स्वामी, प्रभुः, राजा। अनीशो नाम दासः, कृपणः, सेवकः, अधीनः— इत्यर्थः। आत्मानं कर्मफलभोक्तारं मत्वा जीवः देहेन्द्रियाभिमानवान् अविद्यया कर्मफलदासः सन् बध्यते॥

स एव जीवः देवं विजानाति चेत् तदा मुच्यते। देवो नाम साक्षी प्रत्यगात्मा। अकर्ता अभोक्ता च प्रत्यगात्मा देवः। स्वयं प्रत्यगात्मा देव एव, न तु कर्मफलतन्त्रः जीवः इतिज्ञानमेव हि विद्या नाम। एवंवित् सर्वपाशेभ्यो मुच्यते। पाशो नाम रज्जुः संसारबन्धनम्। पुण्यपापे एव पाशः, धर्माधर्मावेव संसारबन्धः। एतेभ्यो बन्धनेभ्यो मुच्यते। पुनः असौ न जायते इत्यर्थः। कृतकृत्यो भवति, धन्यो भवति इत्यर्थः। जीवन्मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वैराजपदतत्त्वविदे वेदान्तभास्कराय नमः॥

विराजं ब्रह्मजज्ञं तं भावयित्वाऽश्नुते सुखम्।
वैराजं पदमाप्नोति धीरो **वेदान्तभास्करः**॥

तं ब्रह्मजज्ञं विराट्पुरुषं भावयित्वा धीरः सुखम् अश्नुते। ततो वैराजं पदमवाप्नोति॥

आगस्ट् १८

२३१. हिरण्यगर्भोपासनफलम्

ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति।

काठकोपनिषत् १-१-१७

परमात्मजातम् ईड्यं देवं विदित्वा सम्पूज्य, उपास्य परमां शान्तिम् एति।

विराट्पुरुषः, प्रथमजः, हिरण्यगर्भः, ब्रह्मा—इत्यादयः शब्दाः उपनिषत्सु दृश्यन्ते। अयमेव 'अपरं ब्रह्म' इति च कथ्यते। अयं हि परस्मात् ब्रह्मणः जातः प्रप्रथमः प्राणी। अयमेव च समष्टिरूपः सर्वकरणोपाधिकः सूक्ष्मातिसूक्ष्मः सोपाधिकः आत्मा। एष एव ''चेतनभूता परा प्रकृतिः'' इति च कथ्यते॥

परं ब्रह्म निर्विशेषम्, अयं हिरण्यगर्भस्तु सविशेषः। सर्वप्राणिनाम् आत्मभूतोऽयम्। सर्वकर्माणि विहाय सदा विराट् पुरुषोपासनपराणां नैष्ठिकब्रह्मचारिणां तुरीयाश्रमिणां संन्यासिनां च मरणानन्तरं ब्रह्मलोकप्राप्तिः फलं भवति। तत्र ब्रह्मलोके ब्रह्मणा सह उषित्वा उपासकाः तत्रस्थान् सकलान् भोगान् अनुभवन्ति। तत्र आत्मज्ञाने जाते सति ते मुक्ता एव भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं चतुर्विधप्राणिविदे वेदान्तभास्कराय नमः॥

अण्डजं जारुजं चैव उद्भिज्जं स्वेदजं तथा।
प्रज्ञानेत्रं जगत् सर्वं ब्रह्म **वेदान्तभास्करः**॥

अण्डजं जारुजम् उद्भिज्जं तथा स्वेदजम्—इति प्राणिजातं सर्वं, जगत् सर्वं प्रज्ञानेत्रम्। सर्वं ब्रह्मैव॥

आगस्ट् १९

२३२. चतुर्विधाः प्राणिनः

अण्डजानि च जारुजानि च स्वेदजानि च उद्भिज्जानि च....तत् सर्वं प्रज्ञानेत्रम्। ऐतरेयोपनिषत् ३-१-३

अण्डजानि, जारुजानि, स्वेदजानि, उद्भिज्जानि च भूतानि। एतत् सर्वं प्रज्ञानेत्रम्॥

परमात्मन एव सर्वे प्राणिनः जायन्ते। ते च प्राणिनः स्थूलतया चतुर्विधाः विभक्ता भवन्ति॥ ते च—

अण्डजाः प्राणिनः = अण्डात् जाताः अण्डजाः। अण्डं भित्वा जायमानाः प्राणिनः। पक्षिणः सर्पाः पल्ल्यादयः **अण्डजाः**॥

जारुजाः प्राणिनः = जारुः इति जरायुः गर्भकोशः। मातृगर्भं प्रविश्य, तत्र उषित्वा योनिद्वारा जायमानाः—मनुष्याः, गजाः, उष्ट्राः, अश्वाः, गवादयः, प्राणिनः **जारुजाः**॥

स्वेदजाः प्राणिनः = मानवानां स्वेदात् उत्पद्यमानाः लूनाकीटादयः प्राणिनः **स्वेदजाः**॥

उद्भिज्जाः प्राणिनः = बीजानि उद्भिद्य जायमानाः वृक्षादयः। एवम् इमे चतुर्विधाः प्राणिनः एकस्मादेव परमात्मनो जायन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ''वेदान्तग्रह''तत्त्वविदे वेदान्तभास्कराय नमः॥

आदित्यादिग्रहाः प्रोक्ताः ज्योतिश्शास्त्रे नवैव च।
अष्टावेव तु वेदान्ते भिन्ना **वेदान्तभास्करः**॥

ज्योतिषे आदित्यादयः नवैव ग्रहाः, वेदान्ते तु तद्भिन्नाः प्राणादयः अष्टावेव ग्रहाः।

आगस्ट् २०

२३३. 'वेदान्ते' अष्टौ ग्रहा इमे

प्राणो वै ग्रहः, वाग्वै ग्रहः, जिह्वा वै ग्रहः, चक्षुर्वै ग्रहः, श्रोत्रं वै ग्रहः, मनो वै ग्रहः, हस्तौ वै ग्रहः, त्वग्वै ग्रहः।

बृहदारण्यकोपनिषत् ३-२-२

जारत्कारवेण आर्तभागेन पृष्टः याज्ञवल्क्यः उवाच। अष्टौ ग्रहाः इति। ते च—प्राणः, वाक्, जिह्वा, नेत्रम्, श्रोत्रम्, मनः, हस्तौ, त्वक् च ग्रहाः॥

अस्यां बृहदारण्यकोपनिषदि इंद्रियाणि 'ग्रहाः' इति, विषयाः 'अतिग्रहाः' इति च व्यपदिश्यन्ते। अष्टौ ग्रहाः, अष्टौ अतिग्रहाश्च भवन्ति। नेत्रम्, श्रोत्रम्, नासिका, जिह्वा, चर्म, वाक्, मनः, हस्तौ च इति अष्टौ इन्द्रियाणि अष्टौ ग्रहाः उच्यन्ते। शब्दादिविषयग्रहणात् इन्द्रियाणि **ग्रहाः**। इमे वेदान्तेषु अष्टौ **ग्रहाः**॥

एते इन्द्रियरूपाः अष्टौ ग्रहाः मानवान् स्वाभिमुखान् आकर्षन्ति। इन्द्रियाणाम् अनधीनः मनुष्य एव नास्ति इत्युक्ते नासाधु वचनम्। इन्द्रियाणां शक्तिसामर्थ्यम् अद्भुतम्। साधक-श्रेष्ठान्, तपस्विपुङ्गवानपि बलवन्ति इन्द्रियाणि स्वाधीनान् कुर्वन्ति। अत एव कारणात् इन्द्रियाणि ग्रहाः (गृण्हन्ति इति ग्रहाः) इति उच्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'ब्रह्म'शब्दरहस्यविदे वेदान्तभास्कराय नमः॥

ब्रह्मणे ब्रह्मणा चैव प्रत्ता विद्या महत्तमा।
'ब्रह्मविद्या' श्रुता तस्मात् इति **वेदान्तभास्करः**॥

परेण ब्रह्मणा अपरस्मै ब्रह्मणे प्रत्ता महत्तमा विद्या। तस्मात् **ब्रह्मविद्या** इति श्रुता॥

आगस्ट् २१

२३४. "ब्रह्मविद्या" नाम कोऽर्थः?

ब्रह्मा देवानां प्रथमः सम्बभूव
विश्वस्य कर्ता भुवनस्य गोप्ता।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्
अथर्वाय ज्येष्ठपुत्राय प्राह॥

मुण्डकोपनिषत् १-१-१

सर्वदेवानां प्रथमत्वेन ब्रह्मा आविर्बभूव। एषः विश्वस्य कर्ता, भुवनस्य गोप्ता। अयं ब्रह्मा सर्वविद्याप्रतिष्ठां ब्रह्मविद्यां ज्येष्ठपुत्राय अथर्वाय प्राह॥

मानवजन्मनः महत् लक्ष्यम् नाम मोक्ष एव। मोक्षस्य साधनं च ब्रह्मविद्या एव। ब्रह्मविद्यया समाना अन्या सम्पत् नास्त्येव। परस्माद् **ब्रह्मणः** आगता इति **ब्रह्मविद्या**। **ब्रह्मणा** अपरेण प्राप्तत्वात् **ब्रह्मविद्या**। **ब्रह्म**द्वारा प्रसृतत्वात् **ब्रह्मविद्या**। **परब्रह्म** अधिकृत्य प्रवृत्तत्वात् **ब्रह्मविद्या**। परा च असौ विद्या च इति च **ब्रह्मविद्या**। परब्रह्मविषया बृहत्तमतत्त्वविषया च **ब्रह्मविद्या**। एवं ब्रह्मविद्याचार्यैः स्वशिष्येभ्यः, विवेकिभिः जनकैः स्वपुत्रेभ्यश्च उपदिश्यमाना मुक्तिसाधनभूता **ब्रह्मविद्या**। सकलवेदशास्त्रपुराण-सारभूता च **ब्रह्मविद्या**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शिष्यानुग्रहकारकाय वेदान्तभास्कराय नमः॥

सर्वज्ञः सर्वशक्तश्च पातु मां सद्गुरुं तथा।
विद्यार्थी प्रार्थयेत् विद्यां प्राप्तुं **वेदान्तभास्करः**॥

'सर्वज्ञः सर्वशक्तः परमात्मा मां तथा सद्गुरुम् अवतु' इति विद्यां प्राप्तुं विद्यार्थी परमात्मानं प्रार्थयेत्।

आगस्ट् २२

२३५. शिष्यस्य प्रार्थना

तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥

तैत्तिरीयोपनिषत् १-१

तद् ब्रह्म माम् अवतु। तद् ब्रह्म वक्तारम् आचार्यम् अवतु। अवतु माम्। अवतु वक्तारम्॥

पाठप्रवचनस्य प्रारम्भे पठितव्योऽयं मन्त्रः। भगवति शिष्येण क्रियमाणा प्रार्थना इयम्। शिष्यो हि स्वयं कृतार्थो बुभूषते। आचार्यस्तु स्वयं कृतार्थ एव। सद्गुरुभ्यः वेदान्तसन्देशान् श्रुत्वा तेन आत्मज्ञानं लब्ध्वा मोक्षं प्रेप्सुः साधकः शिष्यः खलु?

उपनिषत्सु प्रतिपादितस्य तत्त्वस्य 'ब्रह्म' इति नाम। ब्रह्म सर्वज्ञं सर्वशक्तं च इति वर्णयन्ति। इदं ब्रह्म अस्माकं प्रत्यगात्मस्वरूपभूतम्। परब्रह्मस्वरूपजिज्ञासुं मां ब्रह्म पालयतु, ज्ञानिनं सद्गुरुं च पालयतु इति शिष्यः प्रार्थयते। मम ज्ञानोदयपर्यन्तमपि आवाम् उभावपि अन्योन्यं सन्तोषिणौ यथा स्याव तथा आवाम् उभावपि भगवान् परिपालयतु इत्यर्थः। ईश्वरानुग्रहादेव खलु मुमुक्षोः सद्गुरुलाभः, सद्गुरुकृपया ब्रह्मज्ञानप्राप्तिश्च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं निर्गुणसगुणरहस्यविदे वेदान्तभास्कराय नमः॥

निर्गुणो निर्विशेषोऽपि गुणैः सर्वैर्विभाव्यते।
उपासकानां कार्यार्थम् आत्मा **वेदान्तभास्करः**॥

आत्मा स्वतः निर्गुणो निर्विशेषोऽपि उपासकानां कार्यार्थं सर्वैः गुणैः विशिष्ट इव विभाव्यते।

आगस्ट् २३

२३६. आत्मनः गुणाः इमे

मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदम् अभ्यात्तः अवाकी अनादरः। इति ह स्म आह शाण्डिल्यः शाण्डिल्यः॥

छान्दोग्योपनिषत् ३-१४-२

आत्मा मनोमयः, प्राणशरीरः, भारूपः, सत्यसंकल्पः, आकाशात्मा, सर्वकर्मा, सर्वकामः, सर्वगन्धः, सर्वरसः; आत्मा इदं सर्वम् अभ्यात्तः। आत्मा अवाकी अनादरः इति उपासीत। इति शाण्डिल्यः महर्षिः आह॥

उपर्युक्तसकलगुणैः युक्तः आत्मा इति परमात्मानम् श्रद्धया उपासकः उपासीत। मन एव आत्मनः प्रधानभूत उपाधिः। मनोद्वारेणैव आत्मनः दर्शनं भवेत्। मनश्च आत्मनः समीपतमम्। तस्माद् आत्मा मनोमयः। एवमेव प्राणोपाधिकत्वात् आत्मा प्राणशरीरश्च भवति। अयमात्मा चैतन्यस्वरूपः, सत्यसङ्कल्पश्च। अयमात्मा आकाशवत् सूक्ष्म इति आकाशात्मा। सर्वकामः, सर्वकर्मा, सर्वगन्धः, सर्वरसः, सर्वव्यापकश्चात्मा वागादीन्द्रियरहितत्वात् आत्मा अवाकी। क्रियारहितश्च आत्मा। एवमात्मा उपास्यः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं समदर्शनवते वेदान्तभास्कराय नमः॥

देवानां च ऋषीणां च मानवानां तथैव च।
आत्मज्ञानं तथा मोक्षः समो **वेदान्तभास्करः**॥

देवानाम् ऋषीणां मानवानां च आत्मज्ञानमोक्षौ समानौ।

आगस्ट् २४

२३७. अस्माकमपि लभ्यम्

तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्। तथा ऋषीणां, तथा मनुष्याणाम्।

बृहदारण्यकोपनिषत् १-४-१०

देवानां मध्ये यो यो ब्रह्म प्रत्यबुद्ध्यत, स एव ब्रह्म अभवत्। तथा ऋषीणां मध्ये, मनुष्याणां मध्ये यःकश्चिदपि ''अहं ब्रह्मास्मि'' इति जानाति, सः सर्वोऽपि ब्रह्मैव भवति॥

ब्रह्मात्मज्ञानं वा ब्रह्मात्मभावो वा न केवलं प्राचीनकालस्य, प्राचीनमहर्षीणां, महतां देवानां वा सम्बद्धो विशेषः। किं तु सर्वेषामपि। ब्रह्मणः सर्वेषामात्मत्वात् इदानीमपि यः कश्चिदपि तद् ब्रह्म आत्मत्वेन विज्ञाय सर्वात्मभावम् आप्नुयात्॥

वेदान्तेषु उपदिष्टं तादृशं प्राचीनतमं ब्रह्मात्मज्ञानम् अस्मादृशानामपि लभ्यं वा? अर्वाचीनानां दुर्बलानाम् अस्माकमपि सर्वात्मभावरूपः मोक्षः लभ्यते वा? इति संशयः सर्वथा नोपपद्येत। अल्पसामर्थ्यानामप्यस्माकमपि आत्मनः ब्रह्मस्वरूपत्वात् इदानीमपि आत्मज्ञानं सर्वेषामपि लभ्यमेव। परिपूर्णस्य ब्रह्मणः सर्वेषामपि समतया आत्मत्वात्। सूर्यप्रकाशवत्, अग्न्यौष्ण्यवच्च मोक्षस्य सर्वसमत्वात् अस्माभिरपि मोक्षः विद्यया प्राप्यत एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मृत्युभीतिरहिताय वेदान्तभास्कराय नमः॥

भयादग्न्यादयो देवाः यस्य कर्माणि कुर्वते।
तदेव ब्रह्म जानीयात् आत्मा **वेदान्तभास्करः**॥

यस्य भयात् अग्न्यादयो देवाः स्वीयानि कर्माणि कुर्वते, तदेव ब्रह्म अस्माकम् आत्मा इति जानीयात्।

आगस्ट् २५

२३८. मृत्योरपि भयमस्ति

भयादस्याग्निस्तपति भयात् तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥

काठकोपनिषत् २-३-३

अस्य परमात्मनः भयादेव अग्निः तपति, सूर्यः तपति। अस्य आत्मनः भयादेव इन्द्रश्च वायुश्च स्वव्यापारं कुरुतः। अत्र क्रम-सङ्ख्यया पञ्चमः मृत्युरपि अस्य भयादेव प्राणिनां प्राणं हरति॥

अग्नि सूर्य इन्द्र वायु मृत्यु देवतानां वेदपुराणेषु अद्भुतं स्थानं श्रेष्ठां योग्यतां च वर्णयन्ति। एतासां देवतानां सामर्थ्यं वेदेषु विस्तरतः वर्ण्यते। एतासां देवतानाम् आराधनेन मानवानां विशेष फलानि च भवन्त्येव। एतासां देवतानाम् अणिमाद्याः अष्टौ सिद्धयः, तथा निग्रहानुग्रहादिसामर्थ्यानि च नूनं भवन्ति॥

सर्वमप्येतत् सत्यमेव, तथापि नैव ते देवाः स्वतन्त्राः। नैव तेषाम् अधिकारः शाश्वतः। नैव ते परं ब्रह्म भवितुम् अर्हन्ति। सूर्यादयः स्वस्वकार्याणि साधु सम्यक् कुर्वन्ति खलु? कुतः? भगवतो भयात्। भगवानेव एषां दाता धाता च। सः मृत्योरपि मृत्युः। अतः यमस्यापि परमात्मभयम् अस्त्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं देवतात्मविदे वेदान्तभास्कराय नमः॥

विघ्नं कर्तुं समर्था न ज्ञानिनो देवतादयः।
तासामप्यात्मभूतत्वात् इति **वेदान्तभास्करः**॥

आत्मज्ञानिनः विघ्नं कर्तुं देवतादयः न समर्थाः। ज्ञानी हि तासां देवतानामपि आत्मभूतः॥

आगस्ट् २६

२३९. ज्ञानिनः न देवा अपि विघ्नं कुर्युः

तस्य ह न देवाश्च नाभूत्यै ईशते। आत्मा ह्येषां स भवति॥

बृहदारण्यकोपनिषत् १-४-१०

देवा अपि तस्य ज्ञानिनः विघ्न कर्तुं न ईशते। यतः एषाम् देवाना सः ज्ञानी आत्मा भवति॥

लब्धब्रह्मात्मज्ञानश्चेत् सः मुच्येत वा न वा? इति संशयो नास्ति। ज्ञानी चेत् स सर्वात्मा भवत्येव। मुक्त एव। ज्ञानस्य मुक्तेश्च अविनाभावसम्बन्धः। एकेन ज्ञानिना भाव्यम्, अपि तु तेन ज्ञानेन सः सर्वात्मा सन् मुच्येत वा न वा इति संशयो न युक्तः॥

भवतु, अत्र कश्चित् संशयो जायेत। तद्यथा, मानवाः दुर्बलाः, देवास्तु बलिष्ठाः। देवाः अणिमादिसिद्धिमन्तः, निग्रहानुग्रह-समर्थाश्च। तादृशा देवाः अस्य ब्रह्मज्ञानिनः मोक्षं प्राप्तुं विघ्नं कुर्युः खलु? इति चेत्। न। नैष संशयो न्याय्यः। यतः ब्रह्मज्ञानी देवतानामपि आत्मभूतः, तस्मात् देवा अपि अस्य विघ्न नैव कुर्युः। यतो हि सर्वात्मभूतस्य आत्मज्ञानिनः शत्रवो नैव भवन्ति। न हि स्वयमेव स्वस्य विघ्नं कुर्यात्।

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विश्वाधारविदे वेदान्तभास्कराय नमः॥

क्षराक्षरात्मकं विश्वं व्यक्ताव्यक्तात्मकं जगत्।
बिभर्ति भगवान् ईशः इति **वेदान्तभास्करः**॥

क्षराक्षरात्मकं विश्वं तथा व्यक्ताव्यक्तात्मकं जगत् भगवान् ईशः बिभर्ति।

आगस्ट् २७

२४०. ईश्वर एव जगदाधारभूतः

संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः।

श्वेताश्वतरोपनिषत् १-८

परस्परसंयुक्तं, क्षराक्षरात्मकं व्यक्ताव्यक्तात्मकम् इद विश्वम् ईशः भरते, बिभर्ति।

इदं जगत् परस्परं संयुक्तं खलु? मानवाः अन्योन्यं प्रीत्या संयुक्ताश्चेत् तदेव खलु जगत् नाम? देवतानां मानवानां च परस्पर सम्बन्धः, जीवानाम् ईश्वराणां च अन्योन्यसम्बन्धो विद्यते। क्षरम् अक्षरम् इति इदं जगत् द्वेधा विभक्तम्। क्षरं नाम नश्वरम्, अनित्यम् व्याकृतं जगत्; अक्षरं नाम नाशरहितम्, नित्यम्, अव्याकृतं जगत्। व्यक्तं नाम प्रमाणगोचरं नामरूपयुक्तं स्थूलं जगत्; अव्यक्तं नाम प्रमाणागोचरं जगतो मूलभूतं बीजम्॥

एतादृशप्रपञ्चस्य धर्ता एव परमात्मा। अयमेव **ईश्वरः** इत्यपि कथ्यते। समस्तस्यापि विश्वस्य सारः परमात्मा। इदं जगत् ईशादेव जनित्वा, तस्मिन्नेव स्थित्वा तत्रैव लीयते। आत्मा तु क्षरात् अक्षराच्च विलक्षणः। ईश्वराभावे विश्वाभावः। सर्वशक्तः अयं परमात्मा एव सर्वेषामप्यस्माकं स्वरूपभूतोऽस्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं चर्चारहस्यविदे वेदान्तभास्कराय नमः॥

विमोक्षायैव चर्चा च विमोक्षाय गुरुस्तथा।
विमोक्षायैव विद्या च नूनं **वेदान्तभास्करः**॥

चर्चा विमोक्षायैव, तथा गुरुः नूनं विमोक्षायैव, विद्या च विमोक्षायैव भवति।

आगस्ट् २८

२४१. चर्चा विमोक्षायैव

अत ऊर्ध्वं विमोक्षायैव ब्रूहि इति।

बृहदारण्यकोपनिषत् ४-३-१५

अस्मादूर्ध्वं विमोक्षायैव ब्रूहि इति जनको याज्ञवल्क्यम् उवाच।

याज्ञवल्क्यात् महर्षेः स्वप्रश्नानां युक्तानि प्रतिवचनानि लब्ध्वा जनको राजर्षिः प्रतिपर्यायं 'गवां सहस्रं ते ददामि' इति वदन् तथैव सहस्रं गाः तस्मै गुरवे दत्तवान्। तावता प्रतिवचनेन असन्तुष्टः जनको राजर्षिः पुनः पुनः ''अत ऊर्ध्वं विमोक्षायैव ब्रूहि'' इति याज्ञवल्क्यं महर्षिं पृच्छति। जनकः एतां विमोक्षप्रयोजनां प्रार्थनां स्वगुरौ त्रिवारं करोति॥

विमोक्षो नाम विवेकेन मोक्षः। मोक्षो नाम बन्धनात् मुक्तिरेव। साधनानि कृत्वा साध्यफलावाप्तिरेव बन्धनम्। जन्ममरणचक्रमेव बन्धनम्, कृत्वा फलप्राप्तिरेव बन्धनम्, सुखदुःखमोहा एव बन्धनम्, क्रियाकारकफलान्येव संसारः। अस्मात् ससारबन्धनात् मोचनमेव मुक्तिर्नाम। वेदान्तेषु क्रियमाणा चर्चा, तत्त्ववादः विमोक्षायैव। शिष्याणां प्रश्नाः सद्गुरूणाम् उत्तराणि च विमोक्षायैव भवन्ति। सर्वाणि शास्त्राणि च विमोक्षायैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विज्ञातिस्वरूपाय वेदान्तभास्कराय नमः॥

विज्ञातेर्विक्रिया नास्ति विज्ञातॄणां स्वरूपतः।
विज्ञातिं ब्रह्म जानीयात् इति **वेदान्तभास्करः**॥

विज्ञातेः विक्रिया नास्ति, विज्ञातेः विज्ञातॄणां स्वरूपत्वात्। सा विज्ञातिरेव ब्रह्म इति जानीयात्॥

आगस्ट् २९

२४२. विज्ञातिरेव ब्रह्म

न हि विज्ञातुर्विज्ञातेः विपरिलोपो विद्यते, अविनाशित्वात्।

बृहदारण्यकोपनिषत् ४-३-३०

विज्ञातुः विज्ञातेः विपरिलोपो न हि विद्यते। अविनाशित्वात्॥

विजानाति इति **विज्ञाता**, नाम ज्ञाता। **विज्ञाति**र्नाम विज्ञानम्। विज्ञाता, प्रमाता, द्रष्टा—इति पर्यायपदानि। प्रमाणानि स्वीकृत्य प्रमेयान् यः विजानाति असौ प्रमाता एव **विज्ञाता** भवति। नेत्राभ्यां रूपाणि पश्यति, श्रोत्राभ्यां शब्दान् श्रुणोति। एवमेव इन्द्रियैः तान् तान् विषयान् यः विषयीकरोति स एव **प्रमाता** भवति। अस्मिन् प्रमातरि विक्रिया सम्भवति॥

अपि तु, अस्य प्रमातुरपि स्वरूपभूता या प्रमितिः **विज्ञाति**रस्ति तस्याः नाशो नास्ति। विज्ञातुः मूलमेव **विज्ञातिः**। शुद्धा अविक्रिया चितिरेव **विज्ञातिः**। **विज्ञानं विज्ञप्तिः** इति विज्ञातेरेव नामान्तरे। परिशुद्धा परिपूर्णा ज्ञप्तिरेव विज्ञप्तिर्नाम। अस्याः विज्ञप्तेः नाशो नाम सर्वथा नास्त्येव। एषा एव विज्ञातिः साक्षी इत्यपि उच्यते। विज्ञातृविज्ञानविज्ञेयान् या साक्षितया प्रकाशयति सा एव **विज्ञातिः**। निर्विकारा विज्ञातिरेव ब्रह्म॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'प्रपत्ति'कलानिपुणाय वेदान्तभास्कराय नमः॥

मुमुक्षुर्वै परं ब्रह्म सर्वबुद्धिप्रकाशकम्।
शरणं प्रतिपद्येत भक्त्या **वेदान्तभास्करः**॥

मुमुक्षुसाधकः सर्वबुद्धिप्रकाशकं परं ब्रह्म भक्त्या शरणं प्रतिपद्येत॥

आगस्ट् ३०

२४३. मुमुक्षवे प्रपत्तिः अवश्यकी

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये॥

श्वेताश्वतरोपनिषत् ६-१८

यः परमात्मा पूर्वं ब्रह्माणं विदधाति, यश्च ततः तस्मै सर्वान् वेदान् प्रहिणोति, यश्च मुमुक्षुबुद्धिं प्रकाशयति, तं परमेश्वरम् अहं शरणं प्रपद्ये॥

प्रत्यहं **वेदान्तभाष्यपाठस्य** प्रारंभे अस्य मन्त्रस्य पठन-सम्प्रदायो विद्यते। हिरण्यगर्भोः ब्रह्मा एव भगवतः प्रप्रथमा सृष्टिः। अत एव तस्य ब्रह्मणः **प्रथमजः** इति नाम। विराट्पुरुषोऽपि अयमेव। अस्मिन् भगवान् वेदान् प्रकाशयति। अयमेव परमात्मा अस्मास्वपि वसन् अस्माकं बुद्धिवृत्तीः प्रचोदयति। वेदवेदान्तानां भगवानेव प्रथमाचार्यः। आत्मविद्यास्वरूपम् आत्मविद्याचार्यम् आत्मविद्याप्रकाशम् ईश्वरं भक्त्या आराध्य, ईश्वरमेव प्रपद्यमानस्य आश्रयमाणस्य जिज्ञासोः मुमुक्षोः आत्मज्ञानं मोक्षश्च नूनं लभ्यते एव। तस्मात् मुमुक्षुसाधकः ईश्वरं भक्त्या शरणं व्रजेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विदिताविदितविदूराय वेदान्तभास्कराय नमः॥

व्याकृतात् विपरीतं च ह्यव्याकृतविलक्षणम्।
क्षराक्षरविदूरं स्यात् ब्रह्म **वेदान्तभास्करः**॥

ब्रह्म व्याकृतात् विपरीतम्, अव्याकृताच्च विलक्षणम्। ब्रह्म क्षराक्षरविदूरं स्यात्॥

आगस्ट् ३१

२४४. विदिताविदितविलक्षणं ब्रह्म

अन्यदेव तद्विदितादथो अविदितादधि।
केनोपनिषत् १-४

विदितात् अविदिताच्च विलक्षणं ब्रह्म।

वेदान्तेषु परं ब्रह्म उपदिश्यते। परब्रह्मविदमेव ब्रह्मज्ञानिनं वदन्ति। परं ब्रह्मैव सकलजीविनामपि आत्मभूतम्, परमेव ब्रह्म समस्तप्रपञ्चस्यापि उपादानं निमित्तकारणं च इति उपनिषत्सु पौनः पुन्येन उपदिश्यते॥

अस्तु, अस्य परब्रह्मणः स्वरूपं कीदृशम्? इति पृष्टे अयं मन्त्रः सुन्दरतया ब्रह्मस्वरूपम् उपदिशति। इदं विश्वं **विदितम् अविदितम्** इति द्वेधा विभज्यते। **विदितं** नाम नामरूपाभ्यां विविक्तं, प्रमाणगोचरं कार्यं जगत्। इदमेव क्षरम् व्यक्तम् व्याकृतम् स्थूलम् कार्यम् इति च व्यपदिश्यते। **अविदितं** तु नामरूपयोः बीजस्थितिः। इदमेव अक्षरम्, अव्यक्तम्, अव्याकृतम्, सूक्ष्मम्, कारणम् इति च कथ्यते। एतद् द्वयमपि संयुज्य प्रपञ्चः, विश्वम्, जगत् इति शास्त्रेषु उच्यते। अस्य विश्वस्य कारणभूतं ब्रह्म विदिताविदिताभ्यां विलक्षणम्। इदमेव अक्षरम्, पुरुषः, सत्यम् इति च गीयते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं दृष्टिद्रष्टृतत्त्वविदे वेदान्तभास्कराय नमः॥

दृष्टेर्द्रष्टा मतेर्मन्ता श्रुतेः श्रोता चिदात्मकः।
निर्विशेषो निर्विकारो ह्यात्मा **वेदान्तभास्करः**॥

दृष्टेर्द्रष्टा मतेः मन्ता श्रुतेः श्रोता चिदात्मकः आत्मा निर्विशेषः निर्विकारश्च भवति।

सेप्टेम्बर् १

२४५. दर्शनस्य द्रष्टायम्

न दृष्टेर्द्रष्टारं पश्येः, न श्रुतेः श्रोतारं शृणुयाः, न मतेर्मन्तारं मन्वीथाः, न विज्ञातेः विज्ञातारं विजानीयाः।

बृहदारण्यकोपनिषत् ३-४-२

दृष्टेः द्रष्टारं न त्वं पश्येः, श्रुतेः श्रोतारं त्वं न शृणुयाः, मतेः मन्तारं त्वं न मन्वीथाः, विज्ञातेर्विज्ञातारं त्वं न विजानीयाः।

उषस्तचाक्रायणप्रश्नस्य प्रतिवचनत्वेन याज्ञवल्क्येन उक्तमेतद् वचः। आत्मानम् लक्षयित्वा 'अयमात्मा' इति विशेषेण ब्रूहि इति चाक्रायणेन पृष्टः भगवान् याज्ञवल्क्यः एवम् उवाच, न हि आत्मा नाम धेनुवत् अश्ववत् कश्चित् सविशेषः पदार्थः, येन आत्मानम् अधिकृत्य एवम् एवम् आत्मा इति वक्तुम् आत्मा शक्येत। अपि तु न आत्मा सविशेषं वस्तु॥

कथं तर्हि आत्मा अस्ति? सर्वेन्द्रियाणि संव्याप्य इन्द्रियाणामपि इन्द्रियभूतः। ईदृशमात्मानम् इन्द्रियैः विज्ञातुं नैव शक्यते। नेत्रैः रूपाणि द्रष्टुं शक्यन्ते, न तु नेत्रद्रष्टारमात्मानं नेत्रैः द्रष्टुं शक्यते। श्रोत्राणामात्मभूतम् आत्मानम् श्रोत्रैः श्रोतुं न शक्यते। मनसोऽपि साक्षिभूतम् आत्मानं मनसा मन्तुं न शक्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रेयःप्रेयस्तत्त्वविदे वेदान्तभास्कराय नमः॥

श्रेयसा मोक्षमाप्नोति प्रेयसा भोगमश्नुते।
श्रेय एव भजेत् धीरः तस्माद् **वेदान्तभास्करः**॥

श्रेयोमार्गेण मोक्षम् आप्नोति, प्रेयोमार्गेण भोगमश्नुते। तस्माद् धीरः श्रेय एव भजेत्॥

सेप्टेम्बर् २

२४६. श्रेयसो वैभवम्

अन्यत् श्रेयो अन्यत् उतैव प्रेयः। काठकोपनिषत् १-२-१

श्रेयोमार्गः अन्यः, प्रेयोमार्गश्च अन्यः।

उपनिषत्सु **श्रेयः, प्रेयः** इति पुनः पुनः उच्यते। **श्रेयः** इति **मोक्षः, प्रेयः** इति **अभ्युदयः** इत्यर्थः। इष्टफलप्राप्तिः अनिष्टफल-परिहारश्च प्रेयोमार्गस्य लक्षणम्। पत्नीपुत्रधनकीर्तिसम्पदः, स्वर्ग-लोकः, वैकुंठलोकः, ब्रह्मलोकोऽपि **प्रेयः** इत्येव कथ्यते। एतत् सर्वं फलम् अनित्यमेव॥

श्रेयो नाम **अमृतत्वम्**। श्रेयस एव मोक्षः मुक्तिः इति नामान्तरे। आत्मज्ञानेन प्राप्यमाणं फलमिति वेदान्तेषु उपदिश्यमानं फलं नाम मुक्तिरेव। न हि मुक्तिर्नाम कर्मभ्यः प्राप्यमाणं फलम्। वेदान्तवाक्यार्थविचारेण आत्मानं विज्ञाय तदनन्तरमेव प्राप्यं फलं नाम मोक्ष एव। मोक्षो नाम सर्वदुःखातीतसहजानंदस्थितिरेव। कर्मोपासनफलवत् न अनुमेयो मोक्षः, न च मरणानन्तरं प्राप्यः। किं तु मुक्तिर्हि अत्रैव अनुभवारूढं फलम्। उपनिषत्सु प्रतिपादिता मुक्तिः स्वतःसिद्धा। विवेकिना साधकेन नित्यं श्रेयः प्राप्तुं प्रयत्नः करणीयः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदप्रतिपाद्यतत्त्वविदे वेदान्तभास्कराय नमः॥

अविज्ञाते परे तत्त्वे वेददेवादिपूजिते।
किं फलं वेदशास्त्रस्याधीत्या **वेदान्तभास्करः**॥

वेददेवादिपूजिते परे तत्त्वे अविज्ञाते सति वेदशास्त्रस्य केवलया अधीत्या किं फलम्?

सेप्टेम्बर् ३

२४७. केवलवेदाध्ययनेन किं फलम्?

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तं न वेद किम् ऋचा करिष्यति
य इत्तद्विदुः त इमे समासते॥ श्वेताश्वतरोपनिषत् ४-८

यस्मिन् परमे व्योम्नि अक्षरे वेदाः प्रतिष्ठिताः, सर्वे देवाश्च प्रतिष्ठिताः सन्ति, तं परमात्मान यः मूढः न जानाति, स केवलेन शुष्केण वेदाध्ययनेन किं करिष्यति? ये तद् ब्रह्म स्वात्मत्वेन विदुः ते सन्तृप्ताः सन्तः अमृता भवन्ति।

सर्वे वेदाः, सर्वे देवाश्च परस्मादेव आत्मनः जाताः सन्तः परमात्मन्येव प्रतिष्ठिताः सन्ति। परं ब्रह्मैव समस्तस्यापि विश्वस्य आस्पदभूतं कूटस्थं तत्त्वम्। सर्वाणि वेदवेदान्तशास्त्रपुराणानि तमेव परमात्मानं प्रतिपादयन्ति। परब्रह्मणः विज्ञानमेव परमं लक्ष्यम्॥

परं ब्रह्म अविज्ञाय सकलवेदशास्त्रपारङ्गतश्चेत् तावन्मात्रेण किं प्रयोजनम्? अधीता वेदा एव अनर्थज्ञं तम् अज्ञं तिरस्कुर्वन्ति। परमात्मानं विज्ञायैव मानवः अमृतात्मा भवति। शास्त्राध्ययनस्य ब्रह्मज्ञानमेव परमं प्रयोजनम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कर्मफलसम्बन्धविदे वेदान्तभास्कराय नमः॥

कृतानां कर्मणां सम्यक् शास्त्रोक्तविधिपूर्वकम्।
फलं सत्यं भवत्येव नूनं **वेदान्तभास्करः**॥

शास्त्रोक्तविधिपूर्वकं कृतानां कर्मणां फलं नूनं भवत्येव।

सेप्टेम्बर् ४

२४८. कर्मफलानि नियतानि

तदेतत् सत्यम्। मन्त्रेषु कर्माणि कवयो यान्यपश्यन्, तानि त्रेतायां बहुधा सन्ततानि॥ मुण्डकोपनिषत् १-२-१

कर्म सत्यम्, कवयः मन्त्रेषु यानि कर्माणि अपश्यन्, तानि कर्माणि त्रेतायां बहुधा सन्ततानि।

वेदमन्त्रेषु कर्माणि विहितानि। अत्र कर्माणि इति प्रधानतया अग्निहोत्रादीनि। एतेषु कर्मसु विधिवत् श्रद्धया अनुष्ठितेषु सत्सु अवश्यमेव तानि तानि फलानि निश्चितानि भवन्त्येव। सम्यगनुष्ठितानां कर्मणां नियतानि फलानि भवन्त्येव इतिहेतुना कर्माणि **'सत्यम्'** इति उच्यन्ते। **'एकान्तपुरुषार्थसाधनत्वात्'** इति भगवत्पादीयं शाङ्करं भाष्यम्॥

वैदिकानि इमानि कर्माणि त्रेतायां विहितानि। त्रेतायाम् इति ऋग्वेद, यजुर्वेद, सामवेदेषु सन्ततानि इत्यर्थः। ऋग्वेदस्य होतरि, यजुर्वेदस्य अध्वर्यौ, तथा सामवेदस्य उद्गातरि वैदिकानि कर्माणि सन्ततानि। अथवा **'त्रेतायुगे'** इत्यपि अर्थो ग्राह्यः। **कृतयुगे** ध्यानम्, **त्रेतायुगे** वैदिकानि यज्ञादीनि कर्माणि, **द्वापरयुगे** अर्चनम्, **कलियुगे** नामसंकीर्तनम् च सुप्रसिद्धं खलु? सर्वथापि तु कर्मणां फलानि नियतानि॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्तिमार्गरहस्यविदे वेदान्तभास्कराय नमः॥

अविदित्वा परं ब्रह्म ह्यात्मत्वेन न मुच्यते।
ज्ञानादेव भवेन्मुक्तिः इति **वेदान्तभास्करः**॥

परं ब्रह्म आत्मत्वेन न जानाति चेत् सः नैव मुच्यते, यतः ज्ञानादेव मुक्तिः भवेत्, नान्यथा।

सेप्टेम्बर् ५

२४९. मार्गान्तरं नास्त्येव

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति॥

श्वेताश्वतरोपनिषत् ६-२०

मानवाः आकाशं यदा चर्मवत् वेष्टितुं समर्थाः भवेयुः, तदा ब्रह्म अविज्ञायापि मुक्ताः भवेयुः।

आत्मज्ञानेन किमस्माकम्? किं ज्ञानादेव मुक्तिः प्राप्येत? ज्ञानात् भिन्नानि जपध्यानपूजापारायणहोमदानादीनि अनेकानि साधनानि सन्ति खलु? एतैरपि साधनैः साक्षादेव मुक्तिं लब्ध्वा संसारबन्धनात् मानवाः मुच्येरन् खलु? इति चेत्॥

अस्य प्रश्नस्य साक्षात् प्रतिवचनं तु 'नैव शक्यते' इति। "**ज्ञानादेव मुच्यते, नान्यथा**" इति इममर्थं सुन्दरदृष्टान्तेन दर्शयति अयं मन्त्रः। आकाशं चर्मवत्, कटवत्, वर्तुळाकारेण वेष्टितुं यदि शक्येत, तदा आत्मज्ञानं विनापि साधनान्तरैः मानवाः मुच्येरन्। एतदुक्तं भवति, यथा आकाशं कटवत् वेष्टितुं न शक्यते, तथैव आत्मानम् अविदित्वा, आत्मज्ञानं विना साधनान्तरैः मुक्तिः नैव प्राप्यते इत्यभिप्रायः। आत्मज्ञानादेव मुक्तिः इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वान्तरात्मविदे वेदान्तभास्कराय नमः॥

सर्वेषामन्तरात्मायं सर्वोपाधिविवर्जितः।
नित्यशुद्धस्वरूपोऽयम् इति **वेदान्तभास्करः**॥

अयमात्मा सर्वेषाम् अन्तरात्मा, सर्वोपाधिविवर्जितः, नित्यशुद्ध-स्वरूपश्च।

सेप्टेम्बर् ६

२५०. आत्मानं विहाय सर्वम् आर्तमेव

एष ते आत्मा सर्वान्तरः, अतोऽन्यदार्तम्।

बृहदारण्यकोपनिषत् ३-४-२

एष एव ते आत्मा, एष एव सर्वान्तरः, एतस्माद् आत्मनः अन्यत् सर्वम् आर्तमेव।

याज्ञवल्क्यमहर्षेः सिंहगर्जनमेतत्। अस्मिन् मन्त्रे आत्मनः स्वरूपम् महिमा च वर्णितोऽस्ति। आप्नोति इति आत्मा, सर्वेषु वस्तुषु परिपूर्णः इत्यर्थः। **आत्मा** नाम सर्वस्यापि सारभूतः, सर्वस्यापि **आन्तरः**, सर्वस्यापि व्यापकः मूलभूतः कारणभूतः इत्यर्थः। अयमेव सर्वान्तरभूतः। सर्वप्रमाणानामपि आत्मभूत-मेनमात्मानं न केनापि प्रमाणेन विषयीकर्तुं शक्यते। अयमात्मा एव सत्यम्, अयमेव आनन्दस्वरूपः, अयमेव च परमार्थभूतः॥

इमम् आत्मानं विहाय अन्यत् सर्वमपि आर्तमेव। आर्तं नाम अनित्यम्, विनाशि इत्यर्थः। आत्मा एक एव अविनाशी अविकारी सत्यस्वरूपः। देशकालयोरपि कारणभूतस्य आत्मनः कुतो वा नाशः? देशकालपरिच्छिन्नानाम् अनात्मवस्तूनाम् अस्तित्वं कुतो वा कथं वा भवेत्? सर्वाणि अनात्मवस्तूनि दुःखस्वरूपाण्येव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मन्दबुद्धिविपरीताय वेदान्तभास्कराय नमः॥

मूढः प्रेयसि वर्तेत बालोऽसौ अल्पबुद्धिमान्।
आत्मज्ञानविहीनत्वात् इति **वेदान्तभास्करः**॥

यः मूढः प्रेयसि वर्तेत असौ अल्पबुद्धिमान् बाल एव। आत्मज्ञानविहीनत्वात्॥

सेप्टेम्बर् ७

२५१. मन्दा एते

प्रेयो मन्दो योगक्षेमाद् वृणीते। काठकोपनिषत् १-२-२

मन्दः योगक्षेमार्थं प्रेय एव वृणीते।

लोके मनुष्यान् 'बालाः' 'वृद्धाः' (बुद्धिमन्तः) इति द्वेधा विभजन्ति। दशवर्षपर्यन्तान् 'बालाः' इति, दशोत्तरसंवत्सर-परिमितान् मानवान् 'बुद्धिमन्तः' इति च वयं कथयामः। अप्रबुद्ध-बुद्धिमन्तः, अपर्याप्तविचारवन्तः, विवेकचिन्तनशक्तिरहिता एव बाला उच्यन्ते। विवेकविचारसामर्थ्यवन्तः वृद्धाः इति कथ्यन्ते। चाकोलेट्, केक्, बिस्कत्, ब्रेड्, बन् इत्यादयः बालानां प्रियाः भवन्ति। न तु स्वर्णहारः, धनम्, निवेशनम्, गृहादिसम्पदः इष्टा भवन्ति। यदा एते एव बाला वर्धमानाः बुद्धिमन्तो भवन्ति तदा एतेषामेव सैकल्, स्कूटर्, टि. वि., कार्, प्रमुखाः सर्वेऽपि पदार्थाः अपेक्ष्यन्ते। यतो हि एते इदानीं बुद्धिमन्तः॥

एवमेव वेदान्तेऽपि साधकाः 'मन्दाः', 'धीराः' इति विभज्यन्ते। एते यद्यपि साधका एव तथापि मन्दसाधकाः केचित्, धीरसाधकाः केचित्। अनित्यफलप्रेप्सवो मन्दाः। एते एव बालाः मूढाः, अविवेकिनः, कृपणाश्च इति उच्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'अनुदर्शन'वते वेदान्तभास्कराय नमः॥

तेषामेव परा शान्तिः तेषामेव परं सुखम्।
आत्मानमनुपश्यन्ति ये वै **वेदान्तभास्करः**॥

शास्त्राचार्योपदेशम् अनु अनुभवेन ये आत्मानं पश्यन्ति, तेषामेव पारा शान्तिः; तेषामेव परं सुखम्।

सेप्टेम्बर् ८

२५२. 'अनुदर्शन'स्य फलमिदम्

तमात्मस्थं येऽनुपश्यन्ति धीराः। तेषां सुखं शाश्वतं नेतरेषाम्॥ श्वेताश्वतरोपनिषत् ६-१२

स्वस्मिन् एव स्थितम् आत्मानं ये अनुभवेन पश्यन्ति, तेषां धीराणामेव शाश्वतं सुखं, शाश्वती शान्तिः, न तु इतरेषाम्॥

प्रत्यगात्मा नाम प्रत्यक् आत्मा स्वस्मिन्नेव विद्यमानः आत्मा। स्वस्मिन्नेव विद्यमानमपि आत्मानं वयं न जानीमः। सामान्यतः वयं सर्वेऽपि स्वस्मिन् रक्तमांसअस्थिमज्जादीनेव पश्यामः, शरीरेन्द्रियमनःप्राणादींश्च पश्यामः। नैव तु आत्मानं पश्यामः। चैतन्यस्वरूपः आत्मा तु असंसारी सन् स्वस्मिन् एव विद्यते॥

एनम् आत्मानं चक्षुर्भ्यां द्रष्टुं न शक्यते। स्वस्मिन्नेव विद्यमानमपि आत्मानमेनम् अज्ञानिनः न विजानीयुः। कथं तर्हि आत्मानं पश्येयुः साधकाः? '**अनुदर्शनेन**' इति अयं मन्त्रः उपदिशति। इन्द्रियैः प्रत्यक्षप्रमाणैः आत्मानं द्रष्टुं न शक्यते। अनुभवम् अनुसृत्य आत्मा द्रष्टव्यः। शास्त्रम् अनु, गुरूपदेशं च अनु (शास्त्राचार्योपदेशम् अनुसृत्य) श्रवणं कृत्वा श्रवणानुगुण्येन तथैव आत्मानम् अनुभवे पश्येत्। स एव धीरः। तस्यैव शाश्वतं सुखं लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अपराविद्यावैशाल्यविदे वेदान्तभास्कराय नमः॥

सवेदः शब्दराशिर्यः साङ्गोपाङ्गश्च यो मतः।
अपरेयमविद्यैव विद्या **वेदान्तभास्करः**॥

अङ्गोपाङ्गसहितो वेदसहितः यः शब्दराशिः सा इयम् अपरा विद्या, अविद्यैव। नूनम् एषा अपरा विद्या, अविद्या एव इत्यर्थः॥

सेप्टेम्बर् ९

२५३. इत्येषा अपरा विद्या

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदो अथर्ववेदः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम् इति।

मुण्डकोपनिषत् १-१-५

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, शिक्षा, कल्पः, व्याकरणं, निरुक्तम्, छन्दः, ज्योतिषम् इत्येषा अपरा विद्या॥

सम्प्रदायमनुसृत्य अस्य मन्त्रस्य अर्थोऽवगन्तव्यः। नो चेत् अपार्थ एव भवति। शाङ्करभाष्यम् अनुसृत्य सम्यगर्थो ज्ञातव्यः। चत्वारो वेदाः, षडङ्गानि च भारतीयसंस्कृतौ परमपवित्रत्वेन प्रसिद्धानि। **अपौरुषेयान्** वेदान् तथा **आर्षप्रासादिक**ग्रंथरूपाणि शिक्षादीनि षडङ्गानि च—**अपरा विद्या** इति अयं मन्त्रः धैर्येण उद्घोषयति। तत् कस्मिन्नर्थे? इति पश्याम॥

ऋग्वेदो वा यजुर्वेदो वा केवलं शब्दराशिः खलु? शिक्षादीनि षडप्यङ्गानि शब्दराशिरेव। सर्वोऽपि केवलः शब्दराशिरयम् अनात्मविषयक एव इति अपरा विद्या एव भवति। तस्मादेव च इदं सर्वम्, अविद्या एव। 'वेदाः त्रैगुण्यविषया एव' इति गीताचार्योऽपि शब्दराशिभूतान् वेदान् 'त्रिगुणात्मकाः' इति वदति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् एषणात्रयविदूराय वेदान्तभास्कराय नमः॥

एषणात्रयनिर्मुक्ताः वेदान्तार्थपरायणाः।
शान्ताः संन्यासिनो लब्धज्ञाना **वेदान्तभास्करः**॥

एषणात्रयनिर्मुक्ताः वेदान्तार्थपरायणाः शान्ताः संन्यासिनः लब्धज्ञाना भवन्ति।

सेप्टेम्बर् १०

२५४. एते एव यतयः

एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति। बृहदारण्यकोपनिषत् ३-५-१

तम् एतम् आत्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाः वित्तैषणायाः लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति।

गृहस्थेन 'तिस्रः आशाः एष्टव्याः' इति वेदेषु उच्यते। अस्यैव **'एषणात्रयम्'** इति नाम। ताश्च तिस्रः एषणाः पुत्रैषणा, वित्तैषणा, लोकैषणा च। एषणात्रयाकांक्षिणो हि अज्ञानिनः संसारिणः। गृहस्थाश्रमं प्रविश्य पुत्रान् उत्पाद्य आत्मनः वंशवृक्षं वर्धयित्वा अस्मिन् मानुषे लोके ख्यातबुभूषा एव **पुत्रैषणा**। कर्माणि कृत्वा अधिकां सम्पदम् प्राप्तुम् इच्छा एव **वित्तैषणा**। अग्निहोत्रं, यज्ञयागादीनि च अनुष्ठाय मरणानन्तरं स्वर्गलोकप्रेप्सा एव **लोकैषणा**॥

एषणात्रयसंन्यासं कृत्वा प्रत्यगात्मानं ज्ञातुं ये यतन्ते, ज्ञात्वा ये कृतार्थाः भवितुम् इच्छन्ति ते एव धीराः। एते एषणात्रयं त्यक्त्वा, संन्यासिनो भूत्वा, वेदान्तवाक्यार्थविचारपराः सन्तः ज्ञानिनो मुच्यन्ते। एते एव यतयः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं क्षराक्षरविलक्षणविदे वेदान्तभास्कराय नमः॥

एक एव परो ह्यात्मा क्षराक्षरविभेदतः।
इति सञ्जानतां मायाहानि**र्वेदान्तभास्करः**॥

एक एव परो ह्यात्मा क्षराक्षरविभेदतः अवभासते इति सञ्जानतां मायाहानिर्भवति।

सेप्टेम्बर् ११

२५५. अनेन मायानिवृत्तिः

क्षरं प्रधानम् अमृताक्षरं हरः
क्षरात्मानौ ईशते देव एकः।
तस्याभिध्यानात् योजनात् तत्त्वभावात्
भूयश्चान्ते विश्वमायानिवृत्तिः॥

श्वेताश्वतरोपनिषत् १-१०

प्रधानं क्षरम्, हरस्तु अमृतः अक्षरश्च। परमात्मा एक एव क्षरं प्रधानम्, जीवात्मानं च ईशते। तस्य परमात्मनः अभिध्यानात्, तस्य योगात्, तस्य ज्ञानात्, अन्ते मायायाः निवृत्तिर्भवति॥

कापिलसाङ्ख्यदर्शने प्रतिपादितं परमं तत्त्वं नाम **प्रधानम्**। इदमेव मूलप्रकृतिः इत्यपि कथ्यते। वेदान्तदर्शनानुसारेण इदं प्रधानम् अचेतनम्, क्षरम्, अनित्यं च। जीवात्मा संसारी सन् सुखदुःखानि अनुभवति। साङ्ख्याः जीवान् अनेकान् मन्यन्ते॥

वेदान्तेषु प्रधानं जीवाश्च अनात्मभूता एव। एतयोः द्वयोरपि ईशिता ईश्वरः। एष एव मुमुक्षुभिः ध्येयः। एष एव विचारार्हः; अस्य मननेन जीवोऽपि ईश्वर एव भवति। ईश्वरात्मैक्यज्ञानेन माया नश्यति। तदा जीवात्मा मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं क्षीणकर्मणे वेदान्तभास्कराय नमः॥

आत्मज्ञाने समुत्पन्ने अविद्याकामभेदनम्।
सर्वसंशीतिविच्छेदः सत्यं **वेदान्तभास्करः**॥

आत्मज्ञाने समुत्पन्ने सति अविद्याकामनाशः, सर्वसशयनाशश्च भवति।

सेप्टेम्बर् १२

२५६. ज्ञानेन त्रीणि फलानि

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥

मुण्डकोपनिषत् २-२-९

तस्मिन् परावरे आत्मनि विज्ञाते सति, हृदयस्य ग्रन्थिः भिद्यते, सर्वसंशयाः छिद्यन्ते, अस्य सर्वकर्माणि क्षीयन्ते च।

फलयुगोऽयम्। सर्वस्यापि कर्मणः किं फलम्? प्रयोजनं किम्? इति पृच्छन्ति। तथैव आत्मज्ञानेन प्रयोजनं किम्? इति चेत्, त्रीणि फलानि भवन्ति इति श्रुतिः घोषयति। अयं परावरः कारणकार्यरूपः आत्मा अहमेव इति ईदृशेन आत्मज्ञानेन त्रीणि फलानि भवन्ति॥

हृदयस्य मनसः ग्रन्थिः भिद्यते। अविद्यानिमित्ताः ग्रन्थिवत् सुबद्धाः कामाः सम्पूर्णतया नश्यन्ति। अनन्तरं न कोऽपि संशयः अस्य ज्ञानिनः अवशिष्यते। आत्मानं निस्संशयं विदितवतः संशयाः विनिवर्तन्ते। तथा कर्मदाह एव तृतीयं फलम्। पुनर्जन्मनः कारणभूतानि कर्माणि सर्वथा भस्मीक्रियन्ते। ज्ञातं वा ज्ञानस्य फलत्रयम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं रसानन्दपरायणाय वेदान्तभास्कराय नमः॥

आनन्दरस एवायम् ह्यात्मा भवति सर्वथा।
प्रमाणागोचरोऽप्येषः सत्यं **वेदान्तभास्करः**॥

प्रमाणागोचरोऽपि एषः आत्मा सर्वथा आनन्दरस एव।

सेप्टेम्बर् १३

२५७. आत्मा आनन्दरसः

रसो वै सः। रसं ह्येवायं लब्ध्वा आनन्दी भवति॥

तैत्तिरीयोपनिषत् २-७-२

सः एषः आत्मा रसः, अयं जीवः आत्मानन्दरसं लब्ध्वा एव हि आनन्दी भवति।

प्रत्यक्षादिप्रमाणागोचरोऽपि आत्मा 'नास्ति' इति न मन्तव्यम्। इन्द्रियाणामपि प्रत्यगात्मभूतम् एतं परमात्मानम् इन्द्रियैः द्रष्टुं नैव शक्यते। तर्हि सः परमात्मा 'अस्ति' इत्यत्र प्रमाणं किम्? अस्माकम् अनुभव एव प्रमाणम्। तत् कथम्? इति चेत्॥

आत्मा रसस्वरूपः। रसो नाम आनन्दः। आनन्दस्वरूप एव आत्मा। अयम् आनन्दस्वरूपः आत्मैव सर्वस्यापि जीवस्य आनंदित्वे कारणम्। सर्वः प्राणी सर्वथा जीवितुम् इच्छति खलु? किं कारणम्? रसस्वरूपस्य ब्रह्मणः एतेषां प्रत्यगात्मत्वात्॥

''तपस्विनः बाह्यसुखसाधनरहिता अपि अनीहाः निरेषणाः ब्राह्मणाः बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसः'' इति शाङ्करं भाष्यम्। कथं ते तपस्विनः सानन्दाः सदा? आनन्दरसस्वरूपस्य ब्रह्मणः तेषां स्वरूपत्वात्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आप्तकामाय वेदान्तभास्कराय नमः॥

आत्मज्ञानफले मोक्षे सर्वकर्मफलाप्ययः।
आत्मकामो ह्याप्तकामो ज्ञानी **वेदान्तभास्करः**॥

आत्मज्ञानफले मोक्षे सर्वकर्मफलानि अन्तर्गतानि भवन्ति। ज्ञानी आत्मकामः आप्तकामो भवति॥

सेप्टेम्बर् १४

२५८. पश्यत, ज्ञानस्य फलम्!

यथा कृताय विजिताय अधरेयाः संयन्ति, एवमेनम् सर्वं तदभिसमेति। छान्दोग्योपनिषत् ४-१-४

यथा विजिते कृते अधरेयाः सङ्ख्याः अन्तर्यन्ति, एवमेव आत्मज्ञानस्य फले मोक्षे सर्वेषां कर्मोपासनानां सर्वाणि फलानि अभिसयन्ति।

ज्ञानिपुङ्गवेन रैक्वेन प्रोक्तमेतद् वचः। रैक्वो नाम कश्चित् सामान्यमनुष्यः यः शकटस्य अधस्तात् उपदिश्य पिटकं कण्डूयमानः आसीत्। परमार्थतस्तु सः सर्वात्मभावसम्पन्नः पूर्णज्ञानी एव। सः मोक्षमहिमानम् एवं वदति॥

द्यूतक्रीडानियमानुसारेण कृत, त्रेता, द्वापर, कलिः इति चतस्रः सङ्ख्या भवन्ति। तासु सङ्ख्यासु **कृत**सङ्ख्यायां विजितायां सत्याम् इतराः सर्वा अपि सङ्ख्याः ४ + ३ + २ + १ = १० जिता एव यथा भवन्ति, एवमेव परमात्मज्ञानवतः आत्मज्ञानिनः सर्वासां प्रजानां सर्वाणि पुण्यकर्मफलानि पूर्णानि भवन्ति। सर्वात्मभावसम्पन्नस्य आत्मज्ञानिनः प्राप्यं फलमेव नावशिष्यते। मोक्षे सर्वकर्मोपासनफलान्तर्भावः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुत्वरहस्यविदे वेदान्तभास्कराय नमः॥

सद्गुरुप्रीतिपात्रं चेत् नरो भवितुमिच्छति।
मुमुक्षुरेव धीरः स्यात् नूनं **वेदान्तभास्करः**॥

नरः सद्गुरुप्रीतिपात्रं बुभूषति चेत्, तदा सः धीरो मुमुक्षुरेव स्यात्।

सेप्टेम्बर् १५

२५९. अयं हि पतिपत्न्योः आदर्शः

प्रिया बत अरे नः सती प्रियं भाषसे, एहि आस्स्व व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्व इति।

बृहदारण्यकोपनिषत् २-४-४

अरे मैत्रेयि, त्वं मम इदानीम् अत्यन्त प्रीतिपात्रम् असि, यतः मम प्रियमेव त्वं वदसि। आगच्छ सामीप्यं मम। उपविश, तुभ्यम् अह वदामि। उपदेशं कुर्वतः मम वचः निदिध्यासस्व॥

याज्ञवल्क्यो महर्षिः स्वीयां प्रियपत्नीं मैत्रेयीम् इदमाह वचः। मैत्रेयी याज्ञवल्क्यं प्रति एवं प्रार्थयते ''अहम् अमृतत्वमेव अपेक्षे, आत्मज्ञानमेव अहम् अर्थये, अमृतत्वस्य असाधनभूतां लौकिकीं सम्पदम् अहं न कामये; भवानेव मह्यम् आत्मज्ञानोपदेशं करोतु''। एतद्वचः श्रुत्वा याज्ञवल्क्यमहर्षिः मैत्रेयीं स्वपत्नीमिदं मन्त्रगतं वचनम् अवदत्॥

पतये पत्नी अत्यन्तं प्रिया कदा भवति। यदा मुमुक्षुर्भवति तदा। आत्मज्ञानप्रेप्सुः यदा भवति पत्नी तदैव खलु सा भर्त्रे अधिकं प्रिया भवति? ब्रह्मिष्ठेन भर्त्रा स्वप्रियायै पत्न्यै प्रदेया सम्पत् नाम आत्मज्ञानमेव, अमृतत्वमेव। पश्यत! भारतीयभव्यदिव्यपरंपरायां पतिपत्न्योः अन्योन्यता, प्रीतिविश्वासः, आदर्शश्च कथमस्ति!!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सत्कार्यवादप्रतिपादकाय वेदान्तभास्कराय नमः ॥

सत एव हि सत् कार्यम् असतो नैव किञ्चन।
सद्रूपं हि जगत् सर्वं कार्यं **वेदान्तभास्करः** ॥

सत् कार्यम् एतत् सत एव भवति, असतः नैव किञ्चन जायते। अतः इदं सर्वं कार्यं सद्रूपमेव॥

सेप्टेम्बर् १६

२६०. सत्कार्यवादो नाम अयमेव

कथमसतः सज्जायेत इति। सत्त्वेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम्। छान्दोग्योपनिषत् ६-२-२

असतो हि कथं सत् वस्तु जायेत? हे सोम्य, इदं जगत् अग्रे एकमेव अद्वितीयं सदेव आसीत्॥

जगत्सृष्टिविषये **असत्कार्यवादः सत्कार्यवादश्च** इति द्वौ पक्षौ स्तः। **सत्कार्यवादः** सांख्यवेदान्तदर्शनयोः प्रतिपादितः। **असत्कार्यवादस्तु** वैशेषिकदर्शने प्रतिपाद्यते॥

सत्कार्यवादो नाम विद्यमानस्यैव कारणस्य कार्यरूपेण अवभासः। इदानीं नामरूपाभ्यां भिन्नविभिन्नतया दृश्यमानमिदं जगत् सृष्टेः पूर्वं ब्रह्मस्वरूपेणैव आसीत्। एवं पुरा विद्यमानमेव ब्रह्म इदानीं प्रपञ्चरूपेण अवभासते॥

असतः अविद्यमानाद्वस्तुनः, सद्वस्तु सन् पदार्थः कथं जायेत? न कथंचिदपि जायेत इत्यर्थः। युक्त्या वा श्रुत्या वा असद्वादः न समर्थ्येत। तस्मात् असद्वादः असारः। इदं जगत् पुरा एकमेव अद्वितीयं ब्रह्मैव आसीत्। इदानीमपि ब्रह्मैव अस्ति। न कदापि ब्रह्मभिन्नतया इदं जगदस्ति इत्यभिप्रायः॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ओं परिपूर्णात्मविदे वेदान्तभास्कराय नमः॥

यश्चास्मिन् पुरुषे देवः तथाऽऽदित्ये प्रकाशके।
एक एव परात्माऽसौ ब्रह्म **वेदान्तभास्करः**॥

अस्मिन् पुरुषे तथा प्रकाशके आदित्ये एक एव पर आत्मा अस्ति, असावेव ब्रह्म।

सेप्टेम्बर् १७

२६१. अत्रापि तत्रापि ब्रह्म एकमेव

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः॥

तैत्तिरीयोपनिषत् ३-१०-६

अस्मिन् पुरुषे यः आत्मा अस्ति, आदित्ये च यः आत्मा अस्ति सः एक एव।

उपाधिषु उच्चनीचभावः भवेत्, उपहितं तत्त्वं तु एकमेव भवति। शर्करया निर्मिताः मधुराः पदार्थाः भिन्नभिन्नैः नामरूपाकारैः अवभासन्ते। मैसूरपाक्, जामून्, लाडु, जिलेबि इत्याद्याः खाद्याः नामरूपैः परस्परं भिन्नाः। अपि तु सर्वेष्वपि एतेषु खाद्येषु समाना सारभूता शर्करा एव, माधुर्यमेव। माधुर्ये भेदो नास्ति॥

एवमेव आत्मा एक एव, उपाधिषु उच्चनीचभावो दृश्येत। अस्मिन् पुरुषे मनुष्ये; पुरुषो नाम क्रिमिकीटादिः जीवः इत्यपि भवेत्; तस्मिन्। तथा आदित्ये सूर्ये हिरण्यगर्भे। अस्मिन् सामान्ये मनुष्ये तथा अतिश्रेष्ठे आदित्ये। द्वयोरपि उपाध्योः विद्यमानः आत्मा तु समः, एकः निर्विशेषः, परिपूर्णश्च। निरुपाधिकः निरवयवश्च आत्मा अहमेवेति यो विजानाति स एव ब्रह्मज्ञानीति कथ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परंज्योतिर्विदे वेदान्तभास्कराय नमः॥

आदित्येऽस्तंगते चंद्रे ह्यग्नौ चास्तंगते तथा।
आत्मैवास्य परं ज्योतिः सत्यं **वेदान्तभास्करः**॥

आदित्ये अस्तंगते, चंद्रे अग्नौ च अस्तंगते सति अस्य पुरुषस्य आत्मा एव सत्यं परं ज्योतिः।

सेप्टेम्बर् १८

२६२. आत्मैव परं ज्योतिः

अस्तमिते आदित्ये याज्ञवल्क्य, चंद्रमसि अस्तमिते, शान्ते अग्नौ, शान्तायां वाचि, किंज्योतिरेवायं पुरुष इति। आत्मैवास्य ज्योतिर्भवति इति होवाच भगवान् याज्ञवल्क्यः॥

बृहदारण्यकोपनिषत् ४-३-७

भगवन् याज्ञवल्क्य, आदित्ये अस्तमिते सति, चंद्रमसि अस्तमिते, अग्नौ शान्ते सति, वागिंद्रिये च शान्ते सति अस्य पुरुषस्य किं ज्योतिर्भवति? ब्रूहि, इति जनकेन राज्ञा पृष्टः भगवान् याज्ञवल्क्यः "आत्मैव अस्य ज्योतिर्भवति" इति उवाच॥

अहःकाले सूर्यः ज्योतिः, रात्रौ तु चंद्र अग्नि वागिंद्रियाणि ज्योतिर्भवन्ति। सत्यमेतत्॥

अपि तु एतेषां बाह्यानां ज्योतिषामभावे सति आत्मा एव परं ज्योतिः। आत्मना एव ज्योतिषा सर्वाणि इंद्रियाणि मनांसि च स्वस्वव्यापारं कुर्वन्ति। जडानाम् इन्द्रियाणाम् आत्मचैतन्य-शक्तिरेव मूलकारणम्। परं ज्योतिरात्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

ओं विधूतक्लेशाय वेदान्तभास्कराय नमः॥

सर्वपाशापहानिः स्यात् आत्मज्ञानप्रभावतः।
जन्ममृत्युप्रहाणिश्च ततो **वेदान्तभास्करः**॥

आत्मज्ञानप्रभावेण आत्मविदः सर्वपाशापहानिः, ततः जन्ममृत्युप्रहाणिश्च भवति।

सेप्टेम्बर् १९

२६३. ज्ञानेन पाशक्लेशहानिः

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैः जन्ममृत्युप्रहाणिः। श्वेताश्वतरोपनिषत् १-११

देवं ज्ञात्वा सर्वबन्धनानां नाशः, क्लेशानां नाशे सति जन्ममृत्युनाशः।

पाशो नाम रज्जुः, गुणः, बन्धनम्। अज्ञस्य जीवस्य सर्वतः शतं, सहस्रं बन्धनानि विद्यन्ते। जन्मबन्धः, कर्मबन्धः, जराबन्धः, दुःखबन्धः, रोगबन्धः, मरणबन्धः इति सर्वमपि बन्धनमेव। नागपाशवत् एते बन्धाः उग्राः क्रूराश्च भवन्ति॥

आत्मज्ञानमात्रेण हि एतेषां नागपाशानां ध्वंसः। आत्मज्ञानरूपया गारुडमंत्रशक्त्या जन्मजरादुःखमरणरूपाणां नागपाशानां मूलसहितो नाशो भवति। गाढान्धकारस्य सूर्यप्रकाशः एक एव रामबाणः खलु?

अविद्या अस्मिता रागः द्वेषः अभिनिवेशश्च इति पञ्चक्लेशाः मानवानां दुःखानि कुर्वन्ति। आत्मज्ञानेन पाशनाशः, क्लेशनिवृत्तिः, जन्ममरणसंसारचक्रस्य प्रध्वंसः। किं गरुडस्य सर्पेभ्यो भयमस्ति? नैव। आत्मज्ञानिनः पाशक्लेशादिसंसारभयं नैवास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जन्मान्तरगतिविदे वेदान्तभास्कराय नमः॥

प्राज्ञेन ह्यात्मना जीवः ह्यन्वारूढः प्रयास्यति।
जन्मान्तरगतिं प्राप्तुम् दीनो **वेदान्तभास्करः**॥

कर्माधीनः दीनो जीवः प्राज्ञेन आत्मना अन्वारूढः सन्, मृतः जन्मान्तरगतिं प्राप्तुं प्रयास्यति।

सेप्टेम्बर् २०

२६४. दीनस्य जन्मान्तरप्राप्तिः

अयं शारीर आत्मा प्राज्ञेनात्मना अन्वारूढः उत्सर्जन् याति।

बृहदारण्यकोपनिषत् ४-३-३५

अयं शारीरः आत्मा प्राज्ञेन आत्मना अन्वारूढः उत्सर्जन्, इमं देहं विहाय देहान्तरस्वीकाराय याति॥

शारीरात्मा नाम जीवात्मा। अयम् अस्मिन् जन्मनि सकलान् भोगान् भुक्त्वा ततः इमान् देहादीन् अत्रैव त्यक्त्वा जन्मान्तरं प्रविशति। सर्वानपि उपाधीन् अत्रैव विहाय अयं जीवः प्राज्ञेन आत्मना अन्वारूढः सन् देहान्तराय प्रयाति॥

जीवात्मनः देहान्तरं जन्मान्तरं च वर्तते। तत्र गत्वा जीवः पुनः फलानि अनुभवति। इतः निर्गतो जीवः परमात्मना अधिष्ठितः सन् देहान्तरं प्राप्नोति। प्राज्ञात्मा नाम स्वयंज्योतिःस्वरूपः परमात्मा। तस्य अनुग्रहादेव जीवात्मनः लोकान्तरगतिर्भवति। जीवस्य उत्क्रान्तिकाले सर्वाणि इन्द्रियाणि इमं देहं विहाय गच्छन्ति। तदा जीवः सङ्कटमनुभवन् वेपमानः प्रयास्यति। मरणमात्रेण नासौ जीवः कृतार्थो भवेत्। देहान्तरं प्राप्य तत्रापि कर्मफलानि अनुभवेदेव एषः जीवः। अविद्याफलमिदम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जन्मादिषड्भावरहिताय वेदान्तभास्कराय नमः॥

आत्मा न जायते नैव म्रियते च कदाचन।
षड्भावविक्रियातीतः ह्यात्मा **वेदान्तभास्करः**॥

आत्मा कदाचनापि न जायते, नैव म्रियते च। यतो हि आत्मा षड्भावविक्रियारहितः॥

सेप्टेम्बर् २१

२६५. आत्मनः नैजं स्वरूपमिदम्

न जायते म्रियते वा विपश्चित्। काठकोपनिषत् १-२-१८
आत्मा न जायते, न च म्रियते।

उपनिषत्सु उपदिष्टस्य आत्मनः स्वरूपं सम्यग् ज्ञातव्यम्। देहेन्द्रियमनआदिभ्यः उपाधिभ्यः विलक्षणम् आत्मानम् उपदिशन्ति वेदान्ताः। अयमेव प्रत्यगात्मा इति कथ्यते। वेदान्तान् विहाय इतराणि सर्वाण्यपि दर्शनानि तथा मतानि आत्मानं संसारिणं जीवमेव वदन्ति। देहादीनां धर्मान् आत्मन्येव वयम् अविद्यया आरोपयामः। देहे जाते अहमेव जातः इति, देहे मृते अहमेव मृतः इति सर्वोऽपि अज्ञः मन्यते। नैतद् आत्मनः नैजं स्वरूपम्। सा एषा अविद्या॥

अस्तु। तर्हि, वेदान्तेषु आत्मनः स्वरूपं किम्? आत्मा न शरीरम्, अतः आत्मनः न जन्ममरणे भवतः। नात्मा प्राणः, अतः नात्मनः अशनायापिपासे। नात्मा चित्तम्, अतः नात्मनः शोकमोहौ स्तः। नात्मा अहङ्कारः, अतः तस्य बन्धमोक्षौ न स्तः। आत्मा नित्यशुद्ध नित्यबुद्ध नित्यमुक्त स्वरूपः। आत्मा अजः, अजरः, अमरः, अमृतः। आत्मा सच्चिदानन्दस्वरूपः। आत्मा अकर्तृ अभोक्तृस्वरूपः। इदमेव आत्मनः निजस्वरूपम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मलोकरहस्यज्ञाय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानेन या मुक्तिः ब्रह्मलोक इतीरितः।
परानन्दः परा शान्तिः मुक्तिर्**वेदान्तभास्करः**॥

ब्रह्मज्ञानेन या मुक्तिः लभ्यते, स एव ब्रह्मलोक इति कथ्यते। एष एव परमानन्दः, एषा एव परा शान्तिः॥

सेप्टेम्बर् २२

२६६. मुक्तिरेव ब्रह्मलोकः

अथ एष एव परम आनन्दः, एष ब्रह्मलोकः सम्राट्, इति होवाच याज्ञवल्क्यः। बृहदारण्यकोपनिषत् ४-३-३३

अथ एष एव परमानन्दः, एष एव ब्रह्मलोकः, हे सम्राट्, इति याज्ञवल्क्यः जनकं प्रति अवदत्॥

आनन्दमीमांसायाम् इदं वाक्यम् अन्तिमम्। आत्मज्ञानेन लभ्यस्य ब्रह्मानन्दस्य महिमानं एषः मंत्रः उपदिशति। महाराजस्य आनन्दं प्रथमत्वेन स्वीकृत्य अनन्तरं शतगुण अधिक आनन्दः वर्ण्यते अस्मिन् प्रकरणे॥

श्रोत्रियेण अवृजिनेन अकामहतेन ब्रह्मज्ञानिना प्राप्यमाणः ब्रह्मानन्दः परमः। अयमेव आनन्दः मोक्षः इत्यपि कथ्यते। न हि मोक्षो नाम कर्मफलवत् उत्पाद्यः। न च कर्मफलेष्विव मोक्षे तारतम्यं सम्भवति। न च ज्ञानफलं मोक्षः कर्मफलवत् मरणानन्तरं लोकान्तरे जन्मान्तरे स्वर्गवत् प्राप्यं फलम्, किं तु मोक्षो नाम ब्रह्मलोकः। **ब्रह्मैव लोकः ब्रह्मलोकः**, न तु ब्रह्मणो हिरण्यगर्भस्य विराट्-पुरुषस्य लोकः। अयम् ब्रह्मानन्दः ब्रह्मलोकः परिमाणातीतः। परं ब्रह्मैव ज्ञानिनां लोकः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रणवरहस्यविदे वेदान्तभास्कराय नमः॥

प्रणवोपासनात् धीरः आत्मानं देवमन्तिकात्।
जानीयात् मुक्तिमाप्नोति नूनं **वेदान्तभास्करः**॥

प्रणवोपासनात् धीरः साधकः स्वात्मानं देवं ज्ञात्वा नूनं मुक्तिम् आप्नोति।

सेप्टेम्बर् २३

२६७. ध्यानेन ईश्वरदर्शनम्

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ध्याननिर्मथनाभ्यासात् देवं पश्येन्निगूढवत्॥

श्वेताश्वतरोपनिषत् १-१४

साधकः स्वदेहमेव अरणिं कृत्वा प्रणवं च उत्तरारणिं कृत्वा ध्यानानुष्ठानाभ्यासात् निगूढम् देवं पश्येत्।

अग्नेः उत्पादनं कृत्वा तेन अग्निना यज्ञयागादीनि अनुष्ठीयन्ते खलु? एवमेव अत्रापि आत्मदर्शनार्थं साधनम् उपदिष्टमस्ति। अधस्तात् अरणिः अधरारणिः, ऊर्ध्वम् अरणिः उत्तरारणिः। अस्माकं देह एव अधरारणिः। अत्र देहो नाम अन्तर्हृदयम् अथवा मनोऽन्तर्वर्ती अहङ्कारः। अथ ओङ्कार एव उत्तरारणिः। अस्य मथनं कार्यम्॥

अहङ्कारप्रणवयोः सङ्घर्ष एव ध्यानम्। अहङ्कारे ओङ्कारं संयोज्य ध्यानकरणात् आत्मनः ज्ञानम् उत्पद्यते। अयमात्मा अग्निरिव देदीप्यते। ध्यानेन अस्य आत्मनः ज्ञानम् उत्पद्यते। एवम् ओङ्कारोपासनेन अन्तरात्मा द्रष्टुं शक्यते, दृष्ट्वा च अन्तरात्मानं साधकः कृतार्थो भवेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापविदूराय वेदान्तभास्कराय नमः॥

वर्जितः पुण्यपापाभ्यां सर्वदुःखविवर्जितः।
स्वरूपस्थः तदात्मासौ सुप्तौ **वेदान्तभास्करः**॥

असौ आत्मा सुषुप्तौ पुण्यपापविवर्जितः, सुखदुःखविवर्जितश्च सन् स्वरूपस्थो भवति॥

सेप्टेम्बर् २४

२६८. शोकरहितं स्थानमिदम्

अनन्वागतं पुण्येन अनन्वागतं पापेन, तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति। बृहदारण्यकोपनिषत् ४-३-२२

आत्मा तदा सुषुप्ते पुण्येन अनन्वागतः, पापेन च अनन्वागतः। यस्मात् आत्मा तत्र हृदयस्य सर्वान् शोकान् तीर्णो भवति॥

अयं मन्त्रो वर्णयति सुषुप्तिस्वरूपम्। सुषुप्तिकाले पुण्यसम्बन्धो वा पापलेपो वा आत्मनो नास्ति। जाग्रत्स्वप्नयोः पुण्यपापलेपः आत्मनः अस्त्येव। अनिच्छन्नपि अयं जीवः पुण्यानि वा पापानि वा नूनं करोत्येव। पुण्येन सुखं, पापेन दुःखं च फलं गंगाप्रवाहवत् सततं भवत्येव॥

सुषुप्तौ तु ईदृशस्य पुण्यस्य वा पापस्य वा सम्बन्धः नतरां सम्भवति। तत्र आत्मा उभेऽपि पुण्यपापे अतीत्य तिष्ठति। सुषुप्तिर्नाम पुण्यपापरहिता स्वाभाविकी स्थितिः। कर्तृत्वभोक्तृत्वसद्भावे पुण्यपापयोर्भावः। उपाधिसद्भावे कर्तृत्वभोक्तृत्वभावः। सुषुप्तौ तु उपाधीनामेव अभावः। अतः सुषुप्तौ शोको वा मोहो वा नैव सम्भवति। सुषुप्तं नाम शोकमोहरहितं शान्तं शिवं स्थानम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सुषुप्तिरहस्यविदे वेदान्तभास्कराय नमः॥

सुषुप्तिकाले जीवोऽयं त्यक्तबाह्यपरिग्रहः।
स्वरूपं प्रतिपन्नोऽभूत् परं **वेदान्तभास्करः**॥

सुषुप्तिकाले अयं जीवः त्यक्तबाह्यपरिग्रहः सन् परं स्वरूपं प्रतिपन्नः अस्ति।

सेप्टेम्बर् २५

२६९. सुषुप्तौ अयं स्वस्वरूपस्थ एव

यत्रैतत् पुरुषः स्वपिति नाम, सता सोम्य तदा सम्पन्नो भवति।

छान्दोग्योपनिषत् ६-८-१

यदा अयं जीवः 'स्वपिति' इति कथ्यते, तदा, हे सोम्य अयं सत्स्वरूपे स्वात्मनि सम्पन्नो भवति।

संस्कृतभाषायां 'स्वपिति' इति क्रियापदम् अस्ति। 'स्वपिति' इति 'निद्रां करोति' इत्यर्थः। सुप्तं जीवं दृष्ट्वा इतरे जनाः 'अयं स्वपिति' इति वदन्ति। 'स्वम् अपीतो भवति इति 'स्वपिति' इत्युच्यते। स्वापकाले जीवात्मा सर्वसंसारबन्धनरहितो भवति खलु?

तर्हि सुप्तः पुरुषः तदा निद्राकाले कुत्र वर्तते? कथं वर्तते? कस्मिन् सम्पन्नो भवति? इत्यादीनां प्रश्नानाम् उत्तराणि वदति अयं मन्त्रः। सुषुप्तिकाले जीवः सता सम्पन्नो भवति। 'सत्' इति 'शुद्धा सत्ता' इत्यर्थः। सुषुप्तः मानवः तदा सर्वान् बाह्यान् सासारिक धर्मान् त्यक्त्वा स्वस्वरूपे एव वर्तते। इदमेव अस्य नैज स्वरूपम् परमार्थस्वरूपं च। सत् चित् आनन्दः एव अस्य स्वरूपम्। सुषुप्तौ स्वस्मिन् सत्स्वरूपे एव एषः जीवः सम्पद्यते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अमृतत्वमार्गविदे वेदान्तभास्कराय नमः॥

आत्मज्ञानं वदेद्धीरः मुक्तिमार्गं विचक्षणः।
शिष्यानुग्रहकर्ता चेत् गुरुर्**वेदान्तभास्करः**॥

शिष्यानुग्रहकर्ता चेत् धीरः विचक्षणः गुरुः शिष्येभ्यः आत्मज्ञानमेव मुक्तिमार्गं वदेत्।

सेप्टेम्बर् २६

२७०. एताः भारतीयस्त्रीरत्नानि !

येन अहं न अमृता स्याम्, किमहं तेन कुर्याम्। यदेव भगवान् वेद तदेव मे ब्रूहि इति॥ बृहदारण्यकोपनिषत् २-४-३

अहं येन धनेन अमृता न स्याम्, तेन किं कुर्याम्? अमृतत्वसाधनम् इति यदेव भगवान् जानाति, तदेव मे भवान् ब्रवीतु।

मैत्रेयी इदं वचः वदति। एषा याज्ञवल्क्यमहर्षेः प्रिया पत्नी। ''सकलसौभाग्यसम्पद्भिरपि सम्पूर्णाभिः अमृतत्वं न लभ्यते'' इति याज्ञवल्क्येन उक्तं वाक्यं श्रुत्वा बुद्धिमती मुमुक्षुः मैत्रेयी स्वभर्तारं याज्ञवल्क्यं महर्षिं प्रति इदं वचः ब्रवीति॥

मुक्तिरेव मानवजन्मनः परं लक्ष्यं इति सिद्धे सति मुक्ति साधनभूता आत्मविद्या एव मया प्रार्थ्यते, न तु इतराः भोगसम्पदः मुक्तेः असाधनभूताः इति उक्त्वा विषयभोगान् सा तिरस्करोति। इयमेव खलु भारतीया संस्कृतिः? अयमेव भारतीयसंस्कृतेः महिमा नाम। दम्पत्योः कीदृशः समानः संस्कारः! कीदृशः आदर्शः! मैत्रेयीगार्गीप्रभृतयः एता हि अस्मदीयभारतराष्ट्रस्य स्त्रियो नाम। अहो! भारतीयस्त्रीरत्नानि इमाः।

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ ओम् अन्तर्यामिणे वेदान्तभास्कराय नमः॥

सर्वेन्द्रियेषु सन्तिष्ठन् सर्वेन्द्रियविवर्जितः।
सर्वेन्द्रियात्मा सारोऽन्तर्यामी **वेदान्तभास्करः**॥

सर्वेन्द्रियेषु तिष्ठन्नपि स्वयं सर्वेन्द्रियविवर्जितः, सर्वेन्द्रियाणां सारभूतः आत्मा एव **अन्तर्यामी**।

सेप्टेम्बर् २७

२७१. अन्तर्यामी नाम अयमेव

यः सर्वेषु भूतेषु तिष्ठन्, यः प्राणे तिष्ठन्, यो वाचि तिष्ठन्, यश्चक्षुषि तिष्ठन्, यः श्रोत्रे तिष्ठन्, यो मनसि तिष्ठन्, यः त्वचि तिष्ठन्, यो विज्ञाने तिष्ठन्, यो रेतसि तिष्ठन्, अन्तरो यमयति, एष ते आत्मा अन्तर्यामी अमृतः।

बृहदारण्यकोपनिषत् ३-७-१५–२३

यः सर्वेषु भूतेषु, प्राणे, वाचि, चक्षुषि, श्रोत्रे, मनसि, त्वचि, विज्ञाने, रेतसि च तिष्ठन् अन्तरो यमयति, एष ते आत्मा अन्तर्यामी, एषः अमृतः।

अयं मन्त्रः अन्तर्यामिणः आत्मनः स्वरूपं दर्शयति। 'अन्तः यमयति' इति अन्तर्यामी। यः आत्मा अन्तस्तिष्ठन् सर्वान् पदार्थान् नियमयति सः 'अन्तर्यामी' इति कथ्यते॥

सर्वेषां भूतानां, सर्वेषां प्राणिनाम् अन्तरेव तिष्ठन् यः एतानि भूतानि क्रियाशीलानि करोति सं एव आत्मा 'अन्तर्यामी' भवति। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्च संव्याप्य तेषां चैतन्याधायकः आत्मा अन्तर्यामी। सर्वमेव विश्वं संव्याप्य विद्यमानोऽयम् आत्मा परमार्थतः परमात्मैव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ध्यानपरायणाय वेदान्तभास्कराय नमः॥

विद्यमानस्य देवस्य सर्वभूतनिवासिनः।
ध्यानात् ज्ञानोदयः सत्यमिति **वेदान्तभास्करः**॥

सर्वभूतनिवासिनः, स्वतस्सिद्धस्य सतः देवस्य ध्यानात् ज्ञानोदयः सत्यं भवति।

सेप्टेम्बर् २८

२७२. ध्यानस्य फलमिदम् !

वह्नेर्यथा योनिगतस्य मूर्तिः
न दृश्यते नैव च लिङ्गनाशः।
स भूय एवेन्धनयोनिगृह्यः
तद्वोभयं वै प्रणवेन देहे॥ श्वेताश्वतरोपनिषत् १-१३

काष्ठे विद्यमानोऽपि अग्निः यथा न दृश्यते, अदृश्यमानत्वेन हेतुना 'नास्ति' इति च यथा वक्तुं न शक्यते, मथनकाले तु यथा आविर्भवति; एवमेव शरीरान्तः विद्यमानस्यैव आत्मनः आविर्भावः प्रणवोपासनेन भवति।

काष्ठे विद्यमानोऽपि अग्निः न बहिः दृश्यते, तावन्मात्रेण अग्निर्नास्ति' इति वक्तुं शक्यते वा? नैव। अव्यक्तरूपेण विद्यमानस्यैव अग्नेः आविर्भावः मथनाद् भवति खलु?

एवमेव विद्यमानस्यैव प्रत्यगात्मनः ज्ञापनमेव वेदान्तानां विशेषः। न हि अविद्यमानम् आत्मानं वेदान्ताः प्रदर्शयेयुः, न च साधकाः वयं पश्येम। किं तु स्वरूपभूतस्यैव प्रत्यगात्मनः दर्शनाय ओङ्कारोपासनं कर्तव्यम्, प्रणवोपासनेन हि प्रत्यगात्मनः अनुभवो जायते। ओङ्कारध्यानस्य फलमिदम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मानुभवनिष्ठाय वेदान्तभास्कराय नमः॥

ब्रह्मानुभवयुक्तेन गुरुणा बोधिते स्वयम्।
सुबोध्यं परतत्त्वं स्यात् नूनं **वेदान्तभास्करः**॥

स्वयं ब्रह्मानुभवयुक्तेन सद्गुरुणा बोधिते सति परतत्त्व नूनं सुबोध्यं स्यात्।

सेप्टेम्बर् २९

२७३. अन्वर्था आचार्या हीमे

प्रोक्ता अन्येनैव सुज्ञानाय प्रेष्ठ।

काठकोपनिषत् १-२-९

हे प्रीतिपात्रभूत नचिकेतः, ब्रह्मिष्ठेन आचार्येण उपदिष्टे सति अयमात्मा सुलभतया ज्ञायते।

ब्रह्मनिष्ठस्य ब्रह्मविद्याचार्यस्य मृत्युदेवस्य सन्देशोऽयम्। यः आचार्यः शिष्येभ्यः परब्रह्मतत्त्वम् उपदिशति स यदि केवलं कलाशालासु अधीतशास्त्रः शुष्कपण्डितः शालोपाध्यायः भवति, तावता तस्य उपदेशेन अनादेः अविद्यायाः नाशो न भवति, न च मुक्तिर्लभ्यते। इदानीं तु ईदृशाः एव शुष्कपण्डिताः आचार्याः सर्वत्रापि दरीदृश्यन्ते। न च ते स्वयं ब्रह्मज्ञानिनः, तेषाम् वेदान्तोपदेशेन श्रोतृणां ब्रह्मज्ञानं च नोदेति॥

ब्रह्मविद्याचार्येण ब्रह्मज्ञानिवरेण्येन भाव्यम्। स्वयं ब्रह्मनिष्ठः ब्रह्मानुभवनिष्ठश्चेत् तस्योपदेशेन शिष्याणाम् आत्मज्ञानम् उदेति। सम्प्रदायविदः, वेदान्तरहस्यविदः परब्रह्मनिष्ठाश्च सद्गुरवः लौकिक गुरुभ्यः विलक्षणा भवन्ति। एतेषां सम्यग्दर्शिनाम् आत्मनिष्ठानाम् सद्गुरूणामेव उपदेशः कार्यक्षमो भवति, नेतरेषाम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं दुःखरहिताय वेदान्तभास्कराय नमः॥

आत्मकामम् आप्तकामम् अकामं कामवर्जितम्।
शोकमोहविदूरं तत् सुप्तिर्**वेदान्तभास्करः**॥

सुषुप्तिर्नाम आत्मकामम् आप्तकामम् अकामं कामवर्जितं शोकमोहरहितं स्थानम्।

सेप्टेम्बर् ३०

२७४. सुषुप्तेः महिमा एषः

तद्वा अस्य एतत् आप्तकामम्, आत्मकामम् अकामं रूपं शोकान्तरम्। बृहदारण्यकोपनिषत् ४-३-२१

इदमेव अस्य आप्तकामम् आत्मकामम् अकामं रूपम्। इदं सुषुप्तिस्थानं शोकरहितम्॥

सुषुप्तौ आत्मा कामकर्मरहितः स्वस्थो भवति। जागरिते आत्मा कामहतः कामदासः काममयः सन् दुःखसागरे निमग्नो भवति। कामाभावे जागरिते व्यवहाराभावः। काममयत्वमेव जीवस्य जीवत्वम्॥

गाढनिद्रायां तु कामसम्बन्धाभावः। सुषुप्तिस्वरूपम् अयं मन्त्रः सुन्दरतया सुलभतया वर्णयति। सुषुप्तिर्नाम आप्तकामम् आत्मकामम् अकामं स्थानम्। आप्तसर्वकामः आत्मकामः काम-रहितश्च तत्र भवति। सुषुप्तिर्हि शोकान्तरम्, शोकवर्जितम् स्थानम्। दुःखसम्बन्धरहितम् आनन्दस्वरूपं तत्। अविद्यायां सत्यां ततः कामकर्माणि, सुखदुःखानि शोकमोहादीनि च भवन्ति। सुषुप्तौ तु अविद्यादिदोषाः न भवन्ति। सहजानन्दस्वरूपमेव हि सुषुप्तिर्नाम। एष एव सुषुप्तेर्महिमा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं साक्षितत्त्वविदे वेदान्तभास्कराय नमः॥

एक एव परो देवः सर्वभूतगुहाशयः।
कर्माध्यक्षो निर्गुणश्च साक्षी **वेदान्तभास्करः**॥

सर्वभूतगुहाशयः कर्माध्यक्षोऽपि निर्गुणः साक्षी देव एव एकः परमात्मा।

अक्टोबर् १

२७५. साक्षिणः स्वरूपमिदम् !

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च॥

श्वेताश्वतरोपनिषत् ६-११

परमात्मा अद्वितीयः स्वयंप्रकाशः सन् सर्वभूतेषु गूढः। अयं सर्वव्यापकः सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासश्च। अयमेवात्मा साक्षी चिन्मात्रः केवलो निर्गुणश्च भवति॥

अयं मन्त्रः सुप्रसिद्धः। **अध्यारोपापवादप्रक्रियाम्** अनुसृत्य अयं मन्त्रः परब्रह्मणः परमार्थस्वरूपं प्रतिपादयति। परमात्मा एकः, अद्वितीयः। अयं सर्वभूतेषु वसति। सर्वव्यापकोऽपि आत्मा अयम् कर्माध्यक्षः। सर्वप्राणिनां सर्वकर्मणां तत्तत्फलानां च साक्षिभूतोऽयम् आत्मा। सर्वे प्राणिनः स्वस्वस्वभावसंस्कारानुगुण्येन पुण्यपाप-कर्माणि कुर्वन्ति। तथैव तादृशानि फलानि च प्राप्य भुञ्जते। आत्मा तु सर्वस्याप्यस्य केवलं साक्षिभूतः। आत्मा स्वयं निर्गुणः, निर्विशेषः केवलः अद्वितीयश्च भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परमास्तिकपुङ्गवाय वेदान्तभास्कराय नमः॥

नास्तिको नाशमेवैति लोकान्तरनिरासकृत्।
जायते म्रियते चैव सत्यं **वेदान्तभास्करः**॥

लोकान्तराविश्वासी परमनास्तिको नाशमेति, तादृशो नास्तिकः पुनः पुनः जायते म्रियते च।

अक्टोबर् २

२७६. यमदेवस्य जागरणघंटा

अयं लोको, नास्ति पर इति मानी पुनः पुनः वशमापद्यते मे। काठकोपनिषत् १-२-६

यो मूढः प्रत्यक्षप्रमाणमात्रगोचरं लोकं सत्यं मन्यते, प्रत्यक्षागोचरं लोकान्तरं नास्तीति वादं करोति तादृशो दुरभिमानी मानवः पुनः पुनः ममैव अतिथिर्भवति।

लोकान्तराधिपतेः धर्माधिपतेः यमधर्मराजस्य जागरण-वचनमिदम्, ये मानवाः नास्तिकाः सन्तः धर्मबाह्याः सन्तः, वेदवाक्यानि निन्दन्तः, लोकान्तरजन्मान्तरविषये श्रद्धारहिताः, केवलम् उदरपोषणनिरताः, स्वेच्छाविहारिणः सन्तः पशुपक्षिवत् जीवनं यापयन्ति, तेषां पौनःपुन्येन जन्ममरणानि अवश्यं भवन्त्येव॥

प्रत्यक्षप्रमाणागोचरौ अपि धर्माधर्मौ वेदप्रमाणतो सिद्ध्यतः। प्रत्यक्षप्रमाणागोचराण्यपि लोकान्तरजन्मान्तराणि भवन्त्येव इति वेदप्रामाण्यात् श्रद्धेयमेव। एतद्देहभिन्नतया जीवात्मा अस्ति इत्यपि अवश्यम् अभ्युपगन्तव्यमेव। पुण्यकर्मभ्यः सुखानि, पापेभ्यः दुःखानि च मानवः अनुभवति इति वेदशास्त्राणि उपदिशन्ति। सर्वथा मानवेन आस्तिकेन भाव्यम् इति यमस्य उपदेशः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ध्यानक्रमविदे वेदान्तभास्कराय नमः॥

शुचौ देशे समासीनः प्रशान्ते दोषवर्जिते।
जितेन्द्रियमना ब्रह्म ध्यायेत् **वेदान्तभास्करः**॥

प्रशान्ते दोषरहिते शुद्धे देशे आसीनः साधकः इंद्रियाणि मनश्च समाहृत्य परं ब्रह्म चिन्तयेत्।

अक्टोबर् ३

२७७. ध्यानोचितो देशः

समे शुचौ शर्करावह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः।
मनोऽनुकूले न तु चक्षुपीडने
गुहानिवाताश्रयणे प्रयोजयेत्॥ श्वेताश्वतरोपनिषत् २-१०

समे, शुद्धे, शर्कराग्निपुलिनकंटकादिरहिते, शब्दजलगृहादि-वर्जिते, मानसानुकूले, नेत्रपीडारहिते, अधिकवायुरहिते गुहादि-स्थले साधकः ध्यायन् आत्मनः मनः प्रत्यगात्मनि स्थापयेत्।

ध्यानचिकीर्षोः साधकस्य अनुकूलं शान्तं स्थानम् अत्र उपदिष्टमस्ति। ध्यानोचितो देशः ध्यायतः साधकस्य मनसि उत्तमं फलं ददाति। जनसंसदि कृतं ध्यानम् कथम्? आश्रमे कृतं ध्यानम् कथम्? भवतु। तत् ध्यानस्थानं कथं भवेत्? इति उच्यते॥

ध्यानस्थानं समं भवेत्। नात्युच्चं नातिनीचं भवेत्। तत्र ध्यानदेशे शर्कराः (चूर्णपाषाणाः), कंटकानि, सर्पवृश्चिकादयः, व्याघ्रसिंहादयः न भवेयुः। असंस्कृतानां जनानां संसत् न तत्र भवेत्। ध्यानदेशः शान्तः शुद्धः एकान्तश्चेत् तत्र देशे मनः सुलभतया स्वयमपि शान्तं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परविद्याप्रभावविदे वेदान्तभास्कराय नमः॥

आत्मत्वेन परं ब्रह्म जन्ममृत्युविवर्जितम्।
विज्ञायते यया विद्या **परा वेदान्तभास्करः**॥

जन्ममरणवर्जितं परं ब्रह्मैव आत्मत्वेन यया विद्यया विज्ञायते सा **परा** विद्या।

अक्टोबर् ४

२७८. परस्याः विद्यायाः प्रभावोऽयम्

अथ परा, यया तदक्षरमधिगम्यते।

मुण्डकोपनिषत् १-१-६

*यया तदक्षरम् अधिगम्यते सा **परा** विद्या अथ उच्यते।*

मुण्डकोपनिषदि सर्वा अपि विद्याः परा अपरा इति विभज्य अत्र प्रकृते मन्त्रे परस्याः विद्यायाः स्वरूपं प्रदर्श्यते। **परा** इति श्रेष्ठा, उत्कृष्टा, प्रकृष्टा, प्रशस्ता इत्यर्थः। अत्यन्तश्रेष्ठायाः मंगळ-भूतायाः विद्याया एव परा विद्या इति नामधेयम्। का वा ईदृशी परा विद्या भवेत्? इति चेत्। अयं मन्त्रः पराविद्यास्वरूपं दर्शयति॥

यया विद्यया ''अक्षरस्य'' स्वरूपम् अधिगम्यते सा एव **परा विद्या**। अक्षरं नाम (न क्षरति इति) नाशरहितं ब्रह्म। जन्मरहितत्वात् नाशरहितम्, देशकालातीतं परं ब्रह्म **अक्षरम्** इति कथ्यते। समस्तस्यापि विश्वस्य जन्मस्थितिलयकारणं तत्त्वम् **अक्षरम्**। या विद्या इदम् अक्षरम् प्रतिपादयति सा एव पराविद्या। अतः **पर ब्रह्मविद्या** एव एका **परा विद्या** भवति। सर्वप्राणिनाम् आत्मभूतम् **निर्गुणं** सर्वप्रमाणागोचरं जगदास्पदभूतम् अक्षरं परया एव विद्यया ज्ञायते नान्यथा। ज्ञातो वा परस्याः विद्यायाः प्रभावः?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ''तत्त्वमसि''रहस्यविदे वेदान्तभास्कराय नमः॥

आत्मैवेदं जगत् सर्वं चेतनाचेतनात्मकम्।
आत्मैवायं परो जीवः नूनं **वेदान्तभास्करः**॥

इदं चेतनाचेतनात्मकं सर्वं जगत् आत्मैव। अयं जीवः नूनं पर आत्मैव॥

अक्टोबर् ५

२७९. ''तत्त्वमसि'' महावाक्यम्!

स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा 'तत्त्वमसि' श्वेतकेतो। छान्दोग्योपनिषत् ६-८-७

सः अयमात्मा अणिमा। अस्य समस्तस्यापि जगतः अयम् आत्मैव सारभूतः। अयमात्मैव सत्यम्। स एव आत्मा सर्वेषाम् आत्मभूतः। हे श्वेतकेतो, तदेव ब्रह्म त्वमसि॥

अस्मिन् मन्त्रे ''तत्त्वमसि'' इति महावाक्यं दृश्यते। सामवेदस्य सारभूतमिदं ''**तत्त्वमसि**'' **महावाक्यम्**। ऋग्वेदीय **ऐतरेयोपनिषदः** सारत्वेन **प्रज्ञानं ब्रह्म**; यजुर्वेदीय **बृहदारण्यकोपनिषदः** सारत्वेन **अहं ब्रह्मास्मि**; सामवेदीय **छान्दोग्योपनिषदः** सारत्वेन ''**तत्त्वमसि**''; तथा अथर्ववेदीय **माण्डूक्योपनिषदः** सारत्वेन ''**अयमात्मा ब्रह्म**''! एवं चतसृषु उपनिषत्सु चत्वारो मन्त्राः **महावाक्यत्वेन** सुप्रसिद्धाः सन्ति॥

''सत् चित् आनन्द स्वरूपं ब्रह्मैवासि त्वम्'' इति एतानि **महावाक्यानि** प्रतिपादयन्ति। जीवस्य संसारित्वं जीवत्वम् अविद्याकल्पितम्, आविद्यकम्। ब्रह्मात्मत्वं स्वाभाविकम् इति इमानि महावाक्यानि प्रतिपादयन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कारणतत्त्वविदे वेदान्तभास्कराय नमः॥

निमित्तं कारणं ब्रह्म चोपादानं तथैव च।
ब्रह्माभिन्नं जगत् सर्वं नूनं **वेदान्तभास्करः**॥

ब्रह्मैव अस्य जगतः निमित्तम् उपादानकारणं च। तस्मात् इदं जगत् नूनं ब्रह्मैव, ब्रह्माभिन्नमेव॥

अक्टोबर् ६

२८०. अभिन्ननिमित्तोपादानकारणम्

सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत॥

तैत्तिरीयोपनिषत् २-६-४

स आत्मा अकामयत 'अहं बहु स्याम्, अहमेव प्रजायेय' इति। सः तपः अकरोत्। सः तपः तप्त्वा इदं सर्वम् असृजत्॥

सृष्टिप्रक्रियायाम् अयं मन्त्रः बहुमुख्यः। वेदान्तेषु ब्रह्मैव अस्य जगतः उपादानकारणं निमित्तकारणं च। इदं विश्वं ब्रह्मणः जातं, ब्रह्मणि विद्यमानं, ब्रह्मण्येव विलीयते। अतः इदं जगत् परमार्थतः ब्रह्माभिन्नं सत् ब्रह्मैव॥

''अहमेव विश्वं स्याम्'' इति हि सः परमात्मा कामितवान्, न तु ''अहं विश्वं सृजानि'' इति। एतस्य वादस्य वेदान्तेषु **अभिन्ननिमित्तोपादानमायासत्कार्यवादः** इति नामधेयं भवति। साङ्ख्यादिदर्शनेषु अयं वादो नाङ्गीकृतः। अत एव तानि मिथ्यादर्शनानि भवन्ति। घटस्य कुलालो निमित्तं कारणम्, मृत् उपादानं कारणम्। अस्य जगतस्तु सर्वज्ञं सर्वशक्तं ब्रह्मैव निमित्तकारणम् उपादानकारणं च। अयमेव वेदान्तेषु विशेषः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सुषुप्तितत्त्वविदे वेदान्तभास्कराय नमः॥

कामकर्मात्मकं सर्वं द्वैतं जागरिते मतम्।
सुषुप्ते नास्ति तत् सर्वं ब्रूते **वेदान्तभास्करः**॥
जागरिते एव कामकर्मात्मकं सर्वं द्वैतम्। सुषुप्ते तु तत् नास्ति॥

अक्टोबर् ७

२८१. सुषुप्तेः महिमा !

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्।

माण्डूक्योपनिषत् ५

जीवः यदा यत्र न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति तदेव हि सुषुप्तं नाम॥

वेदान्तेषु 'अवस्थात्रयम्' अधिकृत्य सुविस्तारं विचारः क्रियते। अवस्थात्रयं नाम जाग्रत्, स्वप्नः, सुषुप्तिः इति एताः तिस्रो अवस्थाः। अस्यां माण्डूक्योपनिषदि अवस्थात्रयविचारद्वारा अवस्थारहितस्य आत्मनः स्वरूपं प्रतिपाद्यते॥

अस्मिन् मन्त्रे सुषुप्तिस्वरूपम् उपदिश्यते। सुतरां सुप्तिः = सुषुप्तिः, गाढनिद्रा। जाग्रत्स्वप्नयोः यथा अनात्मविषयकाः कामा भवन्ति तथा अस्यां निद्रायां न कोऽपि कामो विद्यते। निद्रावस्थायाम् इष्टानिष्टौ वा अविद्याकामकर्माणि वा न हि विद्यन्ते। न च द्वैतदर्शनात्मकः स्वप्नो निद्रायां भवति। सुषुप्तिः सर्वेषां समाना। जातिवर्णाश्रमभेदान्, देशकालादिभेदान् च अतीत्य सुषुप्तौ सर्वेऽपि मानवाः समत्वेन ब्रह्मस्वरूपा एव। सुषुप्तेर्महिमा अयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नित्यतृप्ताय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानी सदा धीरः रोगग्रस्तोऽपि निर्धनः।
नित्यानन्दस्वरूपत्वात् शान्तो **वेदान्तभास्करः**॥

रोगग्रस्तोऽपि निर्धनोऽपि ब्रह्मज्ञानी सदा शान्तः धीर एव भवति। नित्यानन्दस्वरूपत्वात्॥

अक्टोबर् ८

२८२. नैते क्रय्या भवन्ति

तमु ह परः प्रत्युवाच अह हारे त्वा शूद्र तवैव सह गोभिरस्तु इति।

छान्दोग्योपनिषत् ४-२-३

तं जानश्रुतिनामानं राजानं प्रति सः ज्ञानिपुङ्गवः रैक्वः एवम् उवाच। अह रे शूद्र, गोभिः युक्ता सर्वापि सम्पत् तवैव भवतु, मम तु न किञ्चिदप्यस्तु॥

दारिद्र्ययुक्तेन कंडूयमानेन शकटस्य अधस्तात् उपविष्टेन, अपि तु ब्रह्मज्ञानिपुङ्गवेन **रैक्व**नाम्ना धीरेण उक्तमेतद्वचनम्। कं प्रति? जानश्रुतिनामानं राजानं प्रति। कः संदर्भः? चक्रवर्ती जानश्रुतिः यदा स्वसम्पत्प्रदानेन एनं ब्रह्मज्ञानिनं सन्तोषयितुं प्रायतत तदा। रे शूद्र, तवैव गोभिरस्तु इति॥

ब्रह्मज्ञानिनः लौकिक्या दृष्ट्या यद्यपि दरिद्राः, रोगिष्ठाः, कुरूपिणः, भिक्षुकाश्च भवेयुः तथापि एते ब्रह्मनिष्ठाः आप्तकामाः, अकामाश्च। 'न कर्मणा न प्रजया धनेन' इतिमन्त्रस्य मूलपुरुषा हीमे! लौकिकसम्पत्त्या न मेयाः। न च धनेन क्रय्या एते। केवलं गुरुभक्तिसमधिगम्याः गुरुभक्तितोषयितव्या एते ब्रह्मज्ञानिनः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सर्वज्ञत्वमहत्त्वविदे वेदान्तभास्कराय नमः॥

आत्मज्ञानेन सर्वज्ञः भवत्येव न संशयः।
जगत् सर्वं भवेत् ज्ञातं तेन **वेदान्तभास्करः**॥

आत्मज्ञानेन मानवः सर्वज्ञो भवत्येव। आत्मज्ञानेन जगत् सर्वं ज्ञातं भवति, न संशयः।

अक्टोबर् ९

२८३. आत्मज्ञानस्य महिमा !

आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितम्। बृहदारण्यकोपनिषत् २-४-५

अरे मैत्रेयि, आत्मनो दर्शनेन श्रवणेन मननेन तथा विज्ञानेन इदं सर्वं विश्वं विदितं भवति॥

आत्मा नाम प्रत्यगात्मा। आत्मा नाम अत्र परं ब्रह्म। आत्मा नाम समस्तस्यापि जगतः कारणभूतं परं तत्त्वम्। आत्मैव जगद्रूपेण अवभासते। तस्मात् आत्मनि सम्यक् ज्ञाते सति सर्वोऽप्ययं प्रपञ्चः ज्ञातप्राय एव। मूलकारणे विज्ञाते तत्कार्यं सर्वमपि विज्ञातमेव खलु भवति?

जगत्कारणभूते आत्मनि विज्ञाते सति तत्कार्यभूतः प्रपञ्चः विज्ञातो भवति। आत्मनि श्रुते सर्वमपि जगत् श्रुतं भवति। सद्गुरोः सकाशात् आत्मनि श्रुते तथा मते निदिध्यासिते सति विश्वमिदं सर्वमपि विज्ञातं भवति। मृदि विदितायां तत्कार्यं सर्वमपि ज्ञातं भवति हि? समस्तस्यापि प्रपञ्चस्य कारणभूते परमात्मनि एकस्मिन् विज्ञाते सति तद्भिन्नतया प्रपञ्चो नाम पदार्थो नावशिष्यते एव इत्यर्थः। अयं हि आत्मज्ञानस्य महिमा!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'त्रय'रहस्यज्ञाय वेदान्तभास्कराय नमः॥

जीवेश्वरप्रधानानि ब्रह्मैव परमार्थतः।
इति सञ्जानतां मुक्तिः इति **वेदान्तभास्करः**॥

एकमेव ब्रह्म जीवः, ईश्वरः, प्रधानं च इतित्रयरूपेण अवभासते इति सम्यक् जानतां मुक्तिः।

अक्टोबर् १०

२८४. एतत् 'त्रय'मपि ब्रह्मैव

ज्ञाज्ञौ द्वावजौ ईशनीशौ
अजा ह्येका भोक्तृभोग्यार्थयुक्ता।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता
त्रयं यदा विन्दते ब्रह्ममेतत्॥ श्वेताश्वतरोपनिषत् १-९

सर्वज्ञः ईशः, अज्ञः जीवः, उभौ अपि एतौ अजौ एव। जीव-भोगकरिणी प्रकृतिरपि अजा एव। आत्मा अनन्तः विश्वरूपः अकर्ता च भवति। एतत् त्रयमपि ब्रह्मैव इति ज्ञात्वा कृतकृत्यो भवति॥

ज्ञः, अज्ञः, प्रकृतिरिति, त्रयमपि परमार्थतः परमेव ब्रह्म। 'ज्ञः' इति सर्वज्ञः ईश्वरः; 'अज्ञः' इति असर्वज्ञः जीवः; प्रकृतिस्तु जडा सर्वशक्तिः। ईश्वरस्य जीवानां प्रकृतेश्च नियंतृ सूक्ष्मतत्त्वं किञ्चित् तत्त्वं विद्यते। तदेव ब्रह्म इति जानीयात्॥

परमार्थदृष्ट्या तु ईश्वरः जीवाः प्रकृतिश्च इत्येतत् त्रयमपि अजम् एकमेवाद्वितीयं ब्रह्मैव। एकमेव ब्रह्म सर्वज्ञेश्वररूपेण, अल्पज्ञ जीवरूपेण अचेतनप्रकृतिरूपेण च त्रेधा अवभासते। एवं यो जानाति स एव ब्रह्मज्ञानी भवति। सः कृतार्थः सन् मुक्तो भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'पूर्ण'स्वरूपविदे वेदान्तभास्कराय नमः॥

तत् पूर्णं परमं ब्रह्म ह्येतत् पूर्णं जगत् परम्।
व्यक्ताव्यक्तात्मकं पूर्णं विश्वं **वेदान्तभास्करः**॥

तत् परमं ब्रह्म पूर्णम्, एतत् जगत् अपि पूर्णं ब्रह्म, व्यक्ताव्यक्तात्मकं विश्वमपि पूर्णं ब्रह्मैव।

अक्टोबर् ११

२८५. सर्वमपि विश्वं पूर्णं ब्रह्मैव !

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णम् उदच्यते। पूर्णस्य पूर्णम् आदाय पूर्णमेव अवशिष्यते॥

बृहदारण्यकोपनिषत् ५-१-१

तत् पूर्णम्, इदं पूर्णम्, पूर्णात् पूर्णम् उद्भूतम्। पूर्णस्य पूर्णम् आदाय पूर्णमेव अवशिष्यते॥

अयं हि सुप्रसिद्धो जनप्रियश्च मन्त्रः। अत्रमन्त्रे **पूर्ण**शब्दः सप्तकृत्वः आम्नातः। परिपूर्णे परब्रह्मणि भेदा वा अंशा वा तारतम्याणि वा नैव विद्यन्ते इति सुन्दरतया सरळतया च अयं मन्त्रः उद्घोषयति। आकाशवत् निरवयवं सर्वव्यापकं च ब्रह्म परिपूर्णमेव खलु?

सोपाधिकतया दृश्यमानमिदं जगत् अपि पूर्णमेव। महाकाशः पूर्णः, घटाकाशोऽपि पूर्णः। पूर्णे ब्रह्मणि महत् अल्पम् इति भेदो नावकल्पते। पूर्णात् ब्रह्मणः आगतं सर्वमपि पूर्णमेव ब्रह्म। इदं जगदपि पूर्णमेव। अणुरेणुतृणकाष्ठादि सर्वमपि पूर्णं ब्रह्मैव। अविद्याकल्पितेषु उपाधिष्वेव तारतम्यं दृश्यते न तु पूर्णे ब्रह्मणि। एवंविद्वानेव ब्रह्मज्ञानी। सोऽपि पूर्णं ब्रह्मैव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कर्तृत्वबुद्धिरहिताय वेदान्तभास्कराय नमः॥

ज्ञानिनो नैव लेपः स्यात् मातापितृवधादपि।
अध्यासरहितत्वाद्धि स्वल्पो **वेदान्तभास्करः**॥

मातापितृवधादपि ज्ञानिनो नैव स्वल्पोऽपि लेपः स्यात्, अध्यासरहितत्वात्।

अक्टोबर् १२

२८६. मातृवधादपि अस्य नैव पापलेपः

न मातृवधेन, न पितृवधेन, न स्तेयेन, न भ्रूणहत्या पापमस्य भवति।

कौषीतकिब्राह्मणोपनिषत् ३-१

अस्य ब्रह्मात्मज्ञानिनः मातृहत्यया वा पितृवधेन वा सुवर्णस्तेयेन वा शिशुहत्यया वा नैव किञ्चिदपि पापं भवति।

सत्सम्प्रदायविद्भ्यः एव ज्ञानिभ्यः सद्गुरुभ्यः वेदान्त-वाक्यानाम् अर्थः विज्ञातव्यः इति दर्शयितुम् अयं मन्त्रः उदाहरण-भूतोऽस्ति। अस्य मन्त्रस्य अर्थः अविद्यया अन्यथैव विपरीततया अनेकैः गृहीतोऽस्ति। कस्तर्हि उचितोऽर्थः? इति, उच्यते॥

कदाचित् ब्रह्मज्ञानिना पापकर्माणि कृतान्यपि चेत् तेन पापकर्मणा न तस्य पापफललेपोऽस्ति। यतः ब्रह्मज्ञानिनः देहाद्यध्यासो वा कर्तृत्वबुद्धिर्वा नैव सम्भवति। सर्वं हि अग्निर्दहति। काष्ठं वा संन्यासिनं वा शवं वा शिशुं वा समानतया दहतः अग्नेः पापम् अस्ति किम्? नैवास्ति। कर्तृत्वाभावात्। तथैव अध्यासरहितस्य परिपूर्णब्रह्मज्ञानिनः पुण्यपापकर्मणां लेपः स्वप्नेऽपि सम्भावयितुं न शक्यते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्तपाशाय वेदान्तभास्कराय नमः॥

आत्मज्ञानात् सर्वपाशविच्छेदो नान्यथा भवेत्।
जन्ममृत्युजराहीनः आत्मा **वेदान्तभास्करः**॥

आत्मज्ञानादेव सर्वपापविच्छेदो भवति, नान्यथा। आत्मा च जन्ममृत्युजराहीनः॥

अक्टोबर् १३

२८७. ज्ञानोदये सति पापविमोचनम्

अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥

श्वेताश्वतरोपनिषत् २-१५

अजं ध्रुवम् सर्वदोषरहितं देवं ज्ञात्वा सर्वपाशेभ्यो मुच्यते।

अयम् एकः प्रसिद्धो मन्त्रः। देवं विज्ञाय सर्वबन्धनेभ्यो मुक्तिः। कोऽसौ देवः? इन्द्रो वा विष्णुर्वा सूर्यो वा अर्यमा वा एष देवः? नतमोऽपि एषाम् अत्र देवः विवक्षितः प्रतिपादितो वा। तर्हि मुक्तिसाधनभूतं देवज्ञानं कीदृशम्? अत्र देवो नाम अद्वितीयं परिपूर्णं निर्गुणं परमेव ब्रह्म, नान्यः॥

स देवः न अस्मत् भिन्नः। अयं देवः न 'असौ' दूरस्थः, किन्तु 'एषः' देवोऽयम्। 'देवः' इत्युक्ते सामान्येन रामः, कृष्णः, गणपतिः, शिवः, लक्ष्मीः इत्याद्यैव अस्माकं कल्पना। ता देवताः परोक्षभूताः। वेदान्तप्रतिपाद्यस्तु देवः अस्माकं प्रत्यगात्मभूत एव। एषः अजः जन्मरहितः, ध्रुवः नाशरहितः। उपाधिदोषविदूरोऽयम् परो देवः। इमम् आत्मत्वेन विदित्वा तादृशः ब्रह्मवित् सर्वपाशेभ्यो मुच्यते। अस्य पुनः जन्म वा संसारबन्धो वा नास्तीत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रवणमहत्त्वविदे वेदान्तभास्कराय नमः॥

मनुष्याणां सहस्रेषु कश्चित् श्रवणतत्परः।
तेषामेको ब्रह्मवित् स्यात् इति **वेदान्तभास्करः**॥

मनुष्याणां सहस्रेषु कश्चित् श्रवणतत्परो भवेत्, तेषां मध्ये एको ब्रह्मवित् स्यात्।

अक्टोबर् १४

२८८. शृण्वन्तोऽपि एते न जानन्ति

शृण्वन्तोऽपि बहवो यं न विद्युः। काठकोपनिषत् १-२-७

वेदान्तेषु प्रतिपादितं प्रत्यगात्मतत्त्वं सद्गुरुभ्यः शृण्वन्तोऽपि अनेके एनं प्रत्यगात्मानं सम्यक् न जानीयुः।

सामान्यतः अस्मिन् काले सर्वेऽपि मानवाः विषयभोगनिरताः इन्द्रियलोलुपाः सन्तः कालं यापयन्ति। तत्रापि केचित् कर्माणि उपासनानि च श्रद्धया कुर्वन्तः, तेन जनप्रियतां सम्पादयन्तः तत्र तत्र लभ्येरन्। अपि तु वेदान्तवाक्यार्थश्रवणं कुर्वन्तः वेदान्तविचारं च कुर्वाणाः जिज्ञासुजनाः दुर्लभा एव भवन्ति। उपनिषदां सन्देशान् बोधयन्तः उपन्यासकाश्च अल्पीयांस एव भवन्ति। यद्यपि तादृशाः उपन्यासकाः आत्मविचारम् उपदिशन्ति, तथापि तादृशं विचारं श्रद्धया तत्पराः सन्तः शृण्वन्त एव जनाः न दृश्यन्ते॥

मनोरंजनतया वेदान्तान् शृण्वन्तः जनाः यद्यपि दृश्यन्ते तथापि श्रुतार्थं मननिदिध्यासनद्वारा अनुभवे पश्यन्तः उत्तमाधिकारिणः दुर्लभा एव भवन्ति। प्रत्यक्षप्रमाणागोचरं परिशुद्धमात्मानं विज्ञातुं कष्टमेव भवेत्। विवेक वैराग्य शमादि मुमुक्षुत्व साधनसम्पन्नैः साधकैः आत्मज्ञानं श्रवणद्वारा लभ्येत॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं लोकपरीक्षाविचक्षणाय वेदान्तभास्कराय नमः॥

सर्वान् लोकान् परीक्ष्यैव त्यक्तबाह्यार्थसाधनः।
अकृतं मोक्षमिच्छेच्च धीरो **वेदान्तभास्करः**॥

धीरः साधकः सर्वान् लोकान् परीक्ष्य त्यक्तबाह्यार्थसाधनः सन् अकृतं मोक्षम् इच्छेत्॥

अक्टोबर् १५

२८९. मुमुक्षवे बीजमंत्रोपदेशोऽयम्

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणः निर्वेदमायात् नास्ति अकृतः कृतेन।

मुण्डकोपनिषत् १-२-१२

कर्मचितान् लोकान् परीक्ष्य तत्त्वजिज्ञासुः स्वर्गादिलोकेभ्यः विरक्तो भवेत्। केवलकर्मभ्यः मोक्षः न प्राप्यते इति विवेकिना जिज्ञासुना सदा अनुसन्धातव्यम्॥

मुमुक्षुसाधकेभ्यः हितोपदेशं करोति अयं मन्त्रः। वैराग्यमेव आत्मज्ञानस्य प्रधानं द्वारम्। वैराग्यहीनस्य आत्मज्ञानं नैव लभ्यते। न हि वैराग्यं नाम केवलं विषयभोगत्यागः। पत्नी पुत्र धन गृहादित्यागमात्रेण वैराग्यं प्राप्तमिति न मन्तव्यम्। न हि ब्रह्मजिज्ञासां विना वस्तुत्यागमात्रं वैराग्यम्॥

किं तु, विवेकेन विषयभोगस्य असारताज्ञानमेव वैराग्यम्। कृत्वा प्राप्तिः सर्वापि अनित्या एव। एवं विचारेण विवेकेन यो जानाति स एव ब्रह्मविद्यां प्राप्तुं समर्थो भवति। ''केवलकर्मभिः मुक्तिर्न लभ्यते'' इत्येव हि मुमुक्षोः बीजमन्त्रः। एवं ज्ञात्वा विरक्तस्यैव आत्मज्ञानमहासौधे प्रवेशः, नेतरस्य॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अकार्पण्यविदे वेदान्तभास्कराय नमः॥

यः प्रयाति परं ब्रह्म मन्दभाक् कृपणः स्मृतः।
अज्ञात्वा जायते मूढः पुनर्**वेदान्तभास्करः**॥

यः मन्दभाक् परं ब्रह्म अज्ञात्वा प्रयाति सः **कृपणः** स्मृतः। स मूढः पुनः पुनः जायते म्रियते च॥

अक्टोबर् १६

२९०. अयं हि कृपणः!

यो वा एतदक्षरं गार्गि अविदित्वा अस्मात् लोकात् प्रैति स कृपणः। बृहदारण्यकोपनिषत् ३-८-१०

*हे गार्गि, एतद् **अक्षरम्** अविदित्वा यः अस्मात् लोकात् प्रैति स **कृपणः**।*

कृपणो नाम लोभी, कृपणो नाम मूढः, कृपणो नाम वराकः, कृपणो नाम अज्ञः, अविवेकी, बालः मूढः—इत्यर्थः। लोके सामान्यतः अनक्षरस्थं **कृपणः** इति वदन्ति। धनी सन्नपि सत्पात्रे यः दानं न करोति तं जनाः **कृपणः** इति मन्यन्ते। व्यवहारे अकुशलम् **अज्ञं** वदन्ति। परप्रयोजनाय यः सदा खरवत् कर्मतत्परः तं **वराकं** वदन्ति लौकिकाः॥

वेदान्तेषु पुनः नैवम्। **अक्षरं** विज्ञातुं सामर्थ्यवानपि मानवः यः न जानाति, न च अवगन्तुं प्रयत्नमेव करोति तं '**कृपणं**' वदन्ति। परिपूर्णं परतत्त्वम् अजानन् सदा केवलव्यवहारनिमग्नः सन् तावतैव सन्तृप्तः सन् यदा कदा वा यो म्रियते सः नूनमपि **कृपणः** खलु? स्वसम्पादितं सर्वमपि धनम् अत्रैव विहाय आत्मानं च अविदित्वा रिक्तहस्तः यो गच्छति नासौ **कृपणः** किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गुरुदक्षिणास्वरूपविदे वेदान्तभास्कराय नमः॥

गुरवे ज्ञानदात्रे हि शिष्यो भक्त्या समर्पयेत्।
धनं धान्यं च वस्त्रादि सर्वं **वेदान्तभास्करः**॥

ज्ञानदात्रे गुरवे शिष्यः भक्त्या धनं धान्यं वस्त्रादि च सर्वं यथासामर्थ्यं समर्पयेत्।

अक्टोबर् १७

२९१. गुरुभक्तेः परा काष्ठा !

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः।

बृहदारण्यकोपनिषत् ४-१-२६

गजसदृशानां गवां सहस्रं ददामि इति याज्ञवल्क्यमहर्षये जनको राजर्षिः विदेहाधिपतिः उवाच।

अत्र याज्ञवल्क्यमहर्षिः गुरुः, जनकमहाराजः शिष्यः। गुरुः दरिद्रः, शिष्यः चक्रवर्ती उदारी च। शिष्यो जनकः न केवलं तत्त्वजिज्ञासुः गुरुभक्तश्च, किन्तु उदारी च। स्वप्रश्नानां याज्ञवल्क्य गुरोः सकाशात् लब्धप्रतिवचनः जनकः प्रतिपर्यायमपि 'गुरुदक्षिणा'त्वेन ''सहस्रं धेनूनां ददामि'' इति संकल्प्य तथैव दत्तवान्॥

गुरुभ्यः दक्षिणात्वेन यस्मिन् कस्मिन् वस्तुनि दत्तेऽपि तत् सार्थकमेव। स्वसपदानुगुण्येन गुरुदक्षिणां समर्पयेत् शिष्यः। अत्र जनकराजः धनी चक्रवर्ती। स्वसंपदानुगुण्येन गुरुदक्षिणां गुरवे याज्ञवल्क्याय भक्त्या समर्पयति। एतद्धि गुरुभक्तेः निदर्शनं नाम? गुरुभक्तेः इयं हि परा काष्ठा? ब्रह्मविद्योपदेशकाय सद्गुरवे समृद्धं सर्वं दत्तमपि अल्पमेव। सद्गुरवे दत्तं सर्वम् अनन्तमेव भवति। न हि सद्गुरवे अदेयं नाम वस्तु एव नास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्माभिन्नाय सद्गुरवे वेदान्तभास्कराय नमः॥

गुरुणा ब्रह्मनिष्ठेन ब्रह्माभिन्नेन बोधिते।
सम्यग्ज्ञानं भवेदेव श्रोतुर्**वेदान्तभास्करः**॥

ब्रह्मनिष्ठेन ब्रह्माभिन्नेन गुरुणा ब्रह्मणि बोधिते सति श्रोतुः सम्यग्ज्ञानं भवत्येव।

अक्टोबर् १८

२९२. अयमेव समर्थः सद्गुरुः

अनन्यप्रोक्ते गतिरत्र नास्ति। काठकोपनिषत् १-२-८

अनन्येन गुरुणा अनन्यभूते आत्मनि अनन्यतया प्रोक्ते सति तत्र गतिर्नास्ति॥

आत्मतत्त्वम् अधिकृत्य उपदेष्टृणाम् आचार्याणां न्यूनता नास्ति अस्मिन् काले, वेदान्तान् अध्येतुं ग्रन्थानां न्यूनता नास्ति, उपन्यासश्रोतृणां जिज्ञासूनां च न्यूनता नास्ति। सत्यमेतत्। अपि तु प्रवचनकर्तृणाम् आचार्याणां वा श्रोतृणां शिष्याणां वा ब्रह्मात्मज्ञानं न प्राप्तम्। न च प्राप्यते। कुतः? उभयोरपि शुष्कशास्त्रपाण्डित्यमात्रं विद्यते, न तु मुमुक्षुत्वम्। केवलेन शुष्कपाण्डित्येन आत्मज्ञानं नोदेति। किन्तु पूजाख्यातिलाभगौरवाणि लभ्येरन्॥

भवतु, शिष्याणाम् आत्मज्ञाननिष्ठाप्राप्त्यै कथं तर्हि गुरुणा भाव्यम्? उपदेष्ट्रा आचार्येण अनन्येन भाव्यम्। अनन्यो नाम अभिन्नः इत्यर्थः। कस्मात् अभिन्नः? परस्माद् ब्रह्मणः। ब्रह्मविद्याचार्येण सद्गुरुणा स्वतः ब्रह्मनिष्ठेन ब्रह्मस्वरूपेण सता शिष्येभ्यः परब्रह्मस्वरूपे उपदिष्टे सत्येव सः उपदेशः अविद्यानिरसनसमर्थः फलकारी भवति। अयमेव समर्थः सद्गुरुः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्ब्रह्मतत्त्वविदे वेदान्तभास्कराय नमः॥

अस्तीति ब्रह्म जानीयात् प्रत्यगात्मतया परम्।
सन्तमेनं ततः प्राहुः प्राज्ञा **वेदान्तभास्करः**॥

प्रत्यगात्मतया परं ब्रह्म 'अस्ति' इति जानीयात्। ततः एनं प्राज्ञाः 'सन्तं' प्राहुः॥

अक्टोबर् १९

२९३. परं ब्रह्म अस्त्येव

असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद् वेद। सन्तमेनं ततो विदुरिति॥

तैत्तिरीयोपनिषत् २-६-१

ब्रह्म 'असत्' इति वेद चेत् सः असन् एव भवति। ब्रह्म 'अस्ति' इति वेद चेत् ततः एनं सन्त विदुः इति॥

परं ब्रह्म 'नास्ति' इति केचिद् वदन्ति, 'अस्ति' इति च अपरे वदन्ति। तयोः कतरत् मतं साधु? इति चेत्। 'अस्ति' इति वदतामेव पक्षः श्रेयान्। ब्रह्म आत्मनः अभिन्नम्, स्वस्वरूपमेव ब्रह्म। तस्मात् 'ब्रह्म अस्ति' इत्युक्ते 'अहम् अस्मि' इत्येवार्थः। एवंविदं ज्ञानिनः 'सन्तम्' आहुः। सन्तं नाम सत्पुरुषम् इत्यर्थः। अस्ति इति सन्, परमार्थतो विद्यमानः इत्यर्थः॥

यस्तु 'ब्रह्म नास्ति' इति वादं करोति तादृशः 'असन्' एव भवति। स्वस्वरूपभूतमेव ब्रह्म नास्ति इति वदन् मूढ एव। तादृशः स मनुष्यः 'असन्' एव भवति इत्यर्थः। तादृशं पुरुषं ज्ञानिनः 'असत्पुरुषः' इत्येव कथयन्ति। तस्मात् विवेकी मुमुक्षुः 'अस्ति' इत्येव ब्रह्म जानीयात् इति तात्पर्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पाशमुक्तिकलाविदे वेदान्तभास्कराय नमः॥

साङ्ख्यमार्गेण चात्मानं योगमार्गेण वा तथा।
सर्वपाशविनिर्मुक्तः ज्ञात्वा **वेदान्तभास्करः**॥

साङ्ख्यमार्गेण वा योगमार्गेण वा आत्मान ज्ञात्वा नरः सर्वपाश-विनिर्मुक्तो भवति।

अक्टोबर् २०

२९४. ज्ञानेन पाशप्रध्वंसः!

तत्कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः।

श्वेताश्वतरोपनिषत् ६-१३

जगत्कारणभूतं साङ्ख्ययोगाधिगम्यं तं देवं ज्ञात्वा सर्वपाशैः मुच्यते।

आत्मानं विज्ञातुं वेदवेदान्तेषु मार्गद्वयम् उपदिष्टं दृश्यते। **साङ्ख्यमार्गः योगमार्गश्च** इति द्वौ मार्गौ। **साङ्ख्यं** नाम विचारमार्गः, ज्ञानमार्गः। वस्तुतन्त्रज्ञानरूपः राजमार्गोऽयम्। वेदान्तवाक्य श्रवणमननिदिध्यासनरूपमार्गोऽयम्। अपरो **योग**-मार्गः। ध्यानमार्गोऽयम्। कर्तृतंत्ररूपः सुलभमार्गोऽयम्। मार्गद्वय-मप्येतत् आत्मज्ञानद्वारा मुक्तिसाधनं भवति॥

एवम् आत्मनि विज्ञाते सति ज्ञातुः किं फलम्? सर्वपाश-विमोचनम्। आत्मज्ञानबलेन सर्वपाशैः प्रमुच्यते साधकः। बंधनमेव पाशाः। सुखदुःखे, रागद्वेषौ, लाभालाभौ, जन्ममरणे, प्रियाप्रिये— इत्यादयः पाशाः। रज्जुपाशवत् एते पाशाः संसारिणो जीवान् दुःखात्मके संसारचक्रे सम्यक् बध्नन्ति। एते सर्वेऽपि पाशाः आत्मज्ञानेन छिद्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रत्यक्प्रवणपराय वेदान्तभास्कराय नमः॥

इन्द्रियाणि पराञ्च्येव तैरात्मानं न वीक्षते।
इन्द्रियाणां च साक्षित्वात् इति **वेदान्तभास्करः**॥

इन्द्रियाणि पराञ्चि एव भवन्ति। अतः तैः आत्मानं न कोऽपि वीक्षेत। कुतः? आत्मनः इन्द्रियसाक्षित्वात्॥

अक्टोबर् २१

२९५. इन्द्रियाणां स्वभावः

पराञ्चि खानि व्यतृणत् स्वयम्भूः, तस्मात् पराङ् पश्यति नान्तरात्मन्। काठकोपनिषत् २-१-१

परमेश्वरः इन्द्रियाणि पराङ्मुखान्येव सृष्टवानस्ति। तस्मादेव हेतोः सर्वः पुरुषः परागेव पश्यति, न तु अन्तरात्मानम्॥

आत्मा न इन्द्रियग्राह्यः, सूक्ष्मत्वात्। बहिर्मुखानि इन्द्रियाणि, केवलानि स्थूलानि वस्तूनि गृह्णन्ति। कुत एतत्? इन्द्रियाणां सृष्टिरेव एवम्, तेषां रचना एव एवमस्ति, इन्द्रियाणां स्वभाव एव एषः॥

तस्मात् नेत्र-श्रोत्र-घ्राण-जिह्वा-चर्माख्यानि पञ्च ज्ञानेन्द्रियाणि इमानि, बाह्यानि रूपशब्दवासनारसस्पर्शाख्यानि वस्तूनि जानन्ति। एतानि वस्तूनि स्थूलाः पदार्था भवन्ति। स्थूलान् पदार्थान् विज्ञातुम् इन्द्रियाणि समर्थानि भवेयुः, न तु इन्द्रियैः आत्मानं द्रष्टुं शक्यते। बहिर्मुखानाम् इद्रियाणां स्वभाव एव एषः। तस्मात्, पराग्भूतानि इन्द्रियाणि विहाय धीरैः अध्यात्मसाधकैः सुसंस्कृतेन अन्तरिन्द्रियेण अन्तःकरणेन आत्मानं ज्ञातुं प्रयतितव्यम्। शास्त्राचार्योपदेशश्रवणेन विचारेण विवेकेन आत्मा विज्ञातव्यः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अक्षरस्वरूपविदे वेदान्तभास्कराय नमः॥

अक्षरं परमं सत्यं निर्गुणं रूपवर्जितम्।
ज्ञायते सा यया विद्या 'परा' **वेदान्तभास्करः**॥

परमं सत्यं निर्गुणं रूपवर्जितम् अक्षरं यया विद्यया ज्ञायते सा **परा विद्या**॥

अक्टोबर् २२

२९६. अक्षरस्य स्वरूपम्

यत् तदद्रेश्यम् अग्राह्यम् अगोत्रम् अवर्णम् अचक्षुःश्रोत्रम् तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः॥ मुण्डकोपनिषत् १-१-६

अद्रेश्यम्, अग्राह्यम्, अगोत्रम्, अवर्णम्, अचक्षुःश्रोत्रम्, अपाणिपादम्, नित्यम्, विभुम्, सर्वगतम्, सुसूक्ष्मम्, अव्ययम्, जगत्कारणभूतं यत् तदेव अक्षरम्। इदम् अक्षरं धीराः सर्वत्र पश्यन्ति॥

उपनिषत्सु प्रतिपादितस्य **अक्षरस्य** स्वरूपं धैर्येण उपदिशति अयं मन्त्रः। पुराणेषु उपदिष्टानां देवतानां शरीरेंद्रियाणि पत्नीपुत्रादयश्च विद्यन्ते, न तु वेदान्तप्रतिपाद्यस्य परस्य ब्रह्मणः। वेदान्तेषु **अक्षरम्** इत्येव तु कथ्यते ब्रह्म॥

इदम् **अक्षरम्** इन्द्रियप्रमाणागोचरं कर्मेन्द्रियाविषयं च भवति। एतदक्षरम् अगोत्रम्। अकार्यम् अकारणं च **अक्षरम्**। इन्द्रियरहितम् अन्तःकरणरहितं च **अक्षरम्**। व्यापकं सर्वगतं सुसूक्ष्मम् अव्ययं च **अक्षरम्**। आत्मत्वेन एददक्षरं ये जानन्ति ते एव ज्ञानिनः। ते एव ब्रह्मनिष्ठाः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रियात्मरहस्यविदे वेदान्तभास्कराय नमः॥

आत्मार्थं पुत्रमित्रादि जगत् सर्वं भवेन्नृणाम्।
सर्वेषां प्रिय एव स्यात् आत्मा **वेदान्तभास्करः**॥

पुत्रमित्रादि सर्वं वस्तु नृणाम् आत्मार्थमेव। आत्मा एव सर्वेषां प्रियः स्यात्॥

अक्टोबर् २३

२९७. जगत् सर्वमपि आत्मार्थमेव

न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति।

बृहदारण्यकोपनिषत् २-४-५

अरे मैत्रेयि, अस्मिन् प्रपञ्चे न किञ्चित् वस्तु स्वस्य सुखाय अस्माकं प्रियं भवति। आत्मनः कामायैव हि सर्वं प्रियं भवति॥

सर्वः पुरुषः अनेकान् पदार्थान् कामयते प्रीणाति च। पतिः भार्यां, पत्नी भर्तारं, पितरौ स्वपुत्रान्, पुत्राश्च स्वपितरौ प्रीणन्ति इति लोके वयं पश्यामः। एवमेव मानवाः गृहक्षेत्रादीन् सेवकान् समीपस्थान् वाहनयानादीनि च प्रीणन्ति इति सर्वत्र पश्यामः॥

एतान् पदार्थान् वयम् अस्माकं सुखायैव प्रीणामः, न तु तेषां पदार्थानां सुखाय। पतिर्हि आत्मसुखायैव पत्नीं प्रीणाति। यदि कदाचित् तस्याः पत्न्याः आत्मनः दुःखमेव भवेदिति जानाति, तदा तां पत्नीं सः दूरीकरोति खलु? सर्वथापि अयं प्रपञ्चः आत्मार्थ एव इति निर्णीयते। कोऽयमात्मा? इति वेदान्ताः विचार्य उपदिशन्ति। सर्वेषामपि आनन्दस्वरूपभूत एवायमात्मा॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं कारणत्वरहस्यविदे वेदान्तभास्कराय नमः॥

उपादानं निमित्तं च जगतो ब्रह्म कारणम्।
ब्रह्माभिन्नं जगत् सर्वम् इति **वेदान्तभास्करः**॥

ब्रह्म जगतः उपादानं निमित्तं च कारणं भवति। तस्मात् सर्वं जगत् ब्रह्माभिन्नमेव॥

अक्टोबर् २४

२९८. उभयविधकारणमपि ब्रह्मैव

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्याम् ओषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाऽक्षरात् सम्भवतीह विश्वम्॥

मुण्डकोपनिषत् १-१-७

यथा ऊर्णनाभिः स्वयमेव स्वस्मादेव तन्तून् सृष्ट्वा अनन्तरं स्वस्मिन्नेव उपसहरति, यथा च पृथिव्याम् ओषधिवनस्पतयः सम्भवन्ति, यथा च जीवतः पुरुषात् केशलोमानि जायन्ते, एवमेव परस्मात् अक्षरात् इदं विश्वं सम्भवति॥

''अक्षरात् इदं विश्वं सम्भवति'' इतिसन्देशं सुन्दरतया दृष्टान्तत्रयेण अयं मन्त्रः प्रतिपादयति। तद्यथा—

लूताकीटः उपादानकारणान्तरम् अनपेक्ष्य स्वयमेव तन्तून् सृष्ट्वा ततः स्वस्मिन्नेव यथा उपसंहरति, तथैव परमात्मा स्वयमेक एव अस्य विश्वस्य **उपादानं निमित्तं च** कारणम्। भूमेः जाताः ओषधयः भूमावेव यथा लीयन्ते, तथैव ब्रह्मणः जातमिदं जगत् ब्रह्मण्येव लीयते। जीवतः मनुष्यात् यथा केशलोमादीनि जायन्ते तद्वदेव चिन्मात्राद् ब्रह्मणः जगदिदं जायते इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अभयब्रह्मविदे वेदान्तभास्कराय नमः॥

ज्ञानादेवाभयप्राप्तिः ज्ञानादेव परं सुखम्।
ज्ञानमेव हि मोक्षः स्यात् इति **वेदान्तभास्करः**॥

ज्ञानादेव अभयप्राप्तिः ज्ञानादेव परं सुखम्; ज्ञानमेव हि मोक्षः॥

अक्टोबर् २५

२९९. ज्ञानमेव मुक्तिः

अभयं वै जनक प्राप्तोसि इति होवाच भगवान् याज्ञवल्क्यः।

बृहदारण्यकोपनिषत् ४-२-४

हे जनकराज, त्वम् इदानीम् अभयं प्राप्तवानसि इति भगवान् याज्ञवल्क्यः उवाच।

जनकराजः याज्ञवल्क्यात् आत्मतत्त्वं सम्यक् विज्ञातवान्, तथा च याज्ञवल्क्याय स्वगुरवे श्रद्धाभक्तितः गुरुदक्षिणां समृद्धां ददाति जनकराजः। इदानीं जनकस्य मनसि आत्मतत्त्वस्वरूपविषये नास्ति संशयः। जनकस्य प्रसन्नं मुखारविन्दं पश्यतः गुरोः याज्ञवल्क्यस्य महान् आनन्दः सञ्जातः। तदा गुरुः स्वशिष्यं प्रति ''हे जनक, त्वम् इदानीम् अभये ब्रह्मणि प्रतिष्ठितोऽसि'' इति सन्तोषेण उक्तवान्॥

''अभयप्राप्ति''र्नाम ''ब्रह्मनिष्ठता'' इत्यर्थः। अद्वितीयं परं ब्रह्मैव हि **अभयं** नाम। ब्रह्मज्ञानेन ब्रह्मप्राप्तिः, अभयज्ञानेन अभयप्राप्तिः। परमार्थतस्तु अभयज्ञानमेव ब्रह्मप्राप्तिः। वेदान्तेषु ब्रह्मज्ञानमेव ब्रह्मप्राप्तिः। **ज्ञानमेव हि मुक्तिः**। अज्ञानेन भयम्, सुज्ञानेन अभयम्। सद्गुरूपदेशश्रवणेन ब्रह्मज्ञानं मुक्तिश्च लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं तपोमूर्तये वेदान्तभास्कराय नमः॥

अनभिव्यक्तरूपस्य ह्यात्मनोऽविद्यया सतः।
सत्येन तपसा चैव व्यक्तिर्**वेदान्तभास्करः**॥

अविद्यया अनभिव्यक्तरूपस्य, सत एव आत्मनः व्यक्तिः सत्येन तपसा च भवति।

अक्टोबर् २६

३००. तपसा आत्मदर्शनम्

तिलेषु तैलं दधनीव सर्पिः
आपः स्रोतस्सु अरणीषु चाग्निः।
एवमात्मा आत्मनि गृह्यतेऽसौ
सत्येनैनं तपसा योऽनुपश्यति॥

श्वेताश्वतरोपनिषत् १-१५

तिलेषु तैलमिव, दध्नि सर्पिरिव, स्रोतस्सु आप इव, अरणीषु अग्निरिव, आत्मनि असौ आत्मा सत्येन तपसा च गृह्यते।

स्वस्मिन्नेव विद्यमानमात्मानं द्रष्टुं साधकेन क्रियमाणं साधनं नाम सत्यवचनं तपश्च। सत्यं नाम सर्वथा अनृतवर्जनम्। तपो नाम इन्द्रियनिग्रहः आत्मचिन्तनं च। नैजस्वरूपानुचिन्तनमेव अत्र तपः। एताभ्यां साधनाभ्याम् आत्मनो दर्शनं भवति॥

एतत्प्रतिपादनाय दृष्टान्तचतुष्टयम् दीयते। तैलम्, सर्पिः, जलम्, अग्निश्च दृष्टान्ताः। तिलेषु पिंडितेषु तैलम्, दध्नि मथिते सर्पिः, भूम्यां दीर्घं खनितायां जलम्, काष्ठे घर्षिते अग्निः यथा आविर्भवन्ति, तथैव आत्मस्वरूपमननरूपेण तपसा आत्मनि चिन्तिते सति आत्मदर्शनं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदशास्त्रतात्पर्यविदे वेदान्तभास्कराय नमः॥

वेदाध्ययनमात्रेण श्रुतसामर्थ्यमेधया।
नात्मा ज्ञातुं परः शक्यः नूनं **वेदान्तभास्करः**॥

वेदाध्ययनमात्रेण वा श्रुतसामर्थ्यमेधया वा परः आत्मा नूनं ज्ञातुं न शक्यः।

अक्टोबर् २७

३०१. एतावन्मात्रेण न ज्ञानोदयः

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।

काठकोपनिषत् १-२-२३

अयमात्मा प्रवचनेन न लभ्यः, मेधया न लभ्यः, बहुना श्रुतेनापि न लभ्यः।

बुद्धिसामर्थ्येन मेधाशक्तिबलेन च अयं प्रचण्डमानवः, भूमिपर्वतसमुद्रसूर्यचन्द्रनक्षत्रादीनां रहस्यानि अन्विष्यन् यशस्वी भवति। वेदशास्त्रपुराणानाम् अध्ययनेन योगानुष्ठानस्य बलेन च जन्मान्तरलोकान्तरविचारान् अयं बुद्धिमान् मानवः विजानाति। अष्टसिद्धीश्च अयं तपसा प्राप्नुयात्॥

अस्तु, सन्तोषः। चतुर्वेदाध्ययनमात्रेण नात्मा ज्ञातो भवति। केषाञ्चित् विदुषां मेधासामर्थ्यं समृद्धं भवति। एकधा पठितं श्रुतं वा विषयम् आमरणं स्मरन्ति केचन पण्डिताः। एतेषाम् ''एकसन्धिग्राहिणः'' इति नामधेयम्। एतेनापि बलेन आत्मानं ज्ञातुं न शक्यते। अपरे पुनः तर्कमीमांसा-व्याकरण-ज्यौतिष्यागमादि-शास्त्रप्रवीणाः सन्तः प्रवचनपटवो भवन्ति। तावता किं वा फलम्? नैतेनापि बलेन आत्मानं ते विजानीयुः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अन्तर्यामिस्वरूपाय वेदान्तभास्कराय नमः॥

पृथिव्यामन्तरे तिष्ठन् पृथिवीदोषवर्जितः।
अन्तर्यामी स एवात्मा तस्या **वेदान्तभास्करः**॥

यः पृथिव्याम् अन्तरे तिष्ठन्, पृथिवीदोषवर्जितः, पृथिव्याः य आत्मा स एव अन्तर्यामी।

अक्टोबर् २८

३०२. अन्तर्यामिणः पञ्च महिमानः

यः पृथिव्यां तिष्ठन्, पृथिव्याः अन्तरः, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति, एष ते आत्मा अन्तर्यामी अमृतः।

बृहदारण्यकोपनिषत् ३-७-३

*यः पृथिव्यां तिष्ठन्, पृथिव्याः अन्तरः, यं पृथिवी न वेद, यस्य पृथिवी शरीरम्, यः पृथिवीम् अन्तरो यमयति, एष ते आत्मा **अन्तर्यामी** अमृतः।*

अस्मिन् मन्त्रे अत्यन्तं सुन्दरतया **अन्तर्यामिणः** पञ्च लक्षणानि उपदिष्टानि सन्ति। तानि च—

१. पृथिव्याः आधारत्वेन स्थितः **अन्तर्यामी**

२. पृथिव्याः अन्तः निहितः **अन्तर्यामी**

३. पृथिव्याः अगोचरभूतः **अन्तर्यामी**

४. पृथिवीशरीरः **अन्तर्यामी**

५. पृथिव्याः नियन्ता **अन्तर्यामी**

एवमेव पञ्चापि भूतानि, सकलानपि प्राणिनः संव्याप्य तेषां नियन्ता यः स एव आत्मा "**अन्तर्यामी**" भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विधिवत्कर्मफलविदे वेदान्तभास्कराय नमः॥

विधिहीनं कालहीनं कुरुते कर्म मन्दधीः।
स्वयं हन्ति हिनस्तीति परान् **वेदान्तभास्करः**॥

यः मन्दधीः विधिहीन कालहीनं च कर्म कुरुते, सः स्वयम् आत्मान हन्ति परान् च हिनस्ति।

अक्टोबर् २९

३०३. अविधिकर्माणि भयङ्कराणि !

आसप्तमान् तस्य लोकान् हिनस्ति।

मुण्डकोपनिषत् १-२-३

अविधिकर्माणि कुर्वन् आत्मनः आसप्तमान् लोकान् हिनस्ति॥

शास्त्रेषु गृहस्थस्य नित्याग्निहोत्रं विहितम् अस्ति। गृहस्थेन प्रतिदिनम् अवश्यं कर्तव्यमेव अग्निहोत्रं कर्म। अग्निहोत्रेण प्रत्यहं सम्यक् अनुष्ठितेन अनुष्ठातुः मरणानन्तरं स्वर्गलोकप्राप्तिरेव भवति। यथाशास्त्रम् सम्यक् अननुष्ठितेन तु अग्निहोत्रेण कर्मणा न केवलं अग्निहोत्रिणः यजमानस्य अनिष्टमेव फलं भवति इति, किं तु सः पूर्वापरान् स्वान् सप्त लोकान् हिनस्ति, नरकान् लोकान् गमयति च। अविधिकर्मणां फलमिदम्॥

शास्त्रीयकर्मभिः शास्त्रोक्तविधानेन श्रद्धया अनुष्ठीयमानैः यजमानस्य इष्टानि फलानि भवन्ति। यथाविधि अननुष्ठीयमानैस्तु तैरेव कर्मभिः न केवलम् इष्ट फलं न भवतीति, किं तु विरुद्धान्येव फलानि भवन्ति। अविधिना कर्म कुर्वाणो मानवः प्रपितामह पितामहपितॄन् पुत्रपौत्रप्रपौत्रान् आत्मानं च नरके पातयति। तस्मात् **अविधिकर्माणि भयङ्कराणि भवन्ति** इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आकाशकारणविदे वेदान्तभास्कराय नमः॥

यस्मिन् आकाश ओतश्च प्रोतश्च परमे पदे।
अक्षरं तद्विजानीयात् इति **वेदान्तभास्करः**॥

यस्मिन् परमे पदे आकाशः ओतश्च प्रोतश्च तदेव परम् **अक्षरं** विजानीयात्॥

अक्टोबर् ३०

३०४. देशकालातीतम् अक्षरम् !

अस्मिन्नु खलु अक्षरे गार्गि आकाशः ओतश्च प्रोतश्च।

बृहदारण्यकोपनिषत् ३-८-११

हे गार्गि, अस्मिन् एव खलु अक्षरे आकाशः ओतश्च प्रोतश्च।

आकाशो नाम प्रधानादपि सूक्ष्मतरम् अव्याकृततत्त्वम्। त्रिगुणात्मकं प्रधानमेव सूक्ष्मं तत्त्वम्। अव्याकृताकाशं तु प्रधानस्यापि कारणभूतं तत्त्वम्। नामरूपरहितम् इन्द्रियागोचरम्, सूक्ष्मातिसूक्ष्मम् आकाशम्, अव्याकृतम्, बीजम्, अव्यक्तम्, सुप्तिः इत्यादिशब्दैः अभिधीयते। अनुमानगम्यं, शास्त्रगम्यं चैतत्। नैव त्वनुभवगम्यम्। इदमेव हि **अव्याकृताकाशम्** नाम॥

एतादृशाव्याकृतस्यापि कारणभूतम् **अक्षरं** कथं भवेत्? न क्षरतीति अक्षरं परं ब्रह्म। अक्षरे एव खलु इदम् अव्याकृताकाशम् ओतं प्रोतं च। न हि अक्षरं विहाय अव्याकृताकाशं जीवितुम् अर्हति। अक्षराधीनमेव तु अव्याकृताकाशस्य अस्तित्वम्। चिन्मात्रस्वरूपम् अक्षरमेव हि सर्वव्यापि चराचरात्मकस्य विश्वस्य आधारभूतम् आस्पदभूतं चास्ति। देशकालयोरपि कारणभूतम् **इदमक्षरम्**। एतत्प्रतिपादनायैव सर्वशास्त्रप्रवृत्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुमुक्षुजनतारकाय वेदान्तभास्कराय नमः॥

गुरुरेव पिता माता गुरुरेव परः शिवः।
यस्तारयति संसारात् इति **वेदान्तभास्करः**॥

यः शिष्यान् संसारात् तारयति तादृशः गुरुरेव पिता माता, स एव परः शिवश्च॥

अक्टोबर् ३१

३०५. ब्रह्मविद्यागुरुरेव पिता

ते तमर्चयन्तः, त्वं हि नः पिता योऽस्माकम् अविद्यायाः परं पारं तारयसीति। प्रश्नोपनिषत् ६-८

शिष्याः तं पिप्पलादमहर्षिम् अर्चयन्तः ''त्वमेव नः पिताऽसि, यतो हि अस्माकं ब्रह्मविद्याम् उपदिश्य, अस्मान् अविद्या-सागरात् परं तारं तारयसि'' इति स्तुत्वा नमस्कारं कृतवन्तः॥

वेदोपनिषत्सु गुरुशिष्यसम्बन्धः सुन्दरतया निरूपितोऽस्ति। गुरौ शिष्याणां भक्ति शिष्येषु गुरुवात्सल्यं च वयमत्र पश्यामः॥

प्रकृते मन्त्रे, सुकेशाभारद्वाजादयः षट् शिष्याः भक्त्या पिप्पलादमहर्षिम् उपसन्नाः सन्तः सद्गुरुं नमस्कृत्य ''परब्रह्मविद्यां कृपया उपदिशतु भवान्'' इति प्रार्थितवन्तः। तथैव आत्मज्ञानोप-देशेन आत्मानं कृतार्थान् कृतवन्तं सद्गुरुं ते शिष्याः कृतज्ञता भक्त्यानमस्कृतवन्तः। एवं कृतार्थाः सन्तः शिष्याः स्वगुरुं ''त्वमेव नः पिता, माता, सर्वमपि त्वमेव; अस्मान् अविद्यासागरात् तारयित्वा कृतार्थान् कृतवानसि, अतः तुभ्यमस्माकम् कृतज्ञताभक्तिपूर्वकाः अनन्ताः प्रणामाः'' इति वन्दन्ते। अयमेव खलु भारतीयसंस्कृतौ सुन्दरः गुरुशिष्यसम्बन्धः?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं साक्षात्साधनरहस्यविदे वेदान्तभास्कराय नमः॥

श्रवणं मननं चैव निदिध्यासनमेव च।
आत्मनो मुक्तिमार्गः स्यात् साक्षात् **वेदान्तभास्करः**॥

आत्मनः श्रवणं मननं निदिध्यासनं च साक्षात् मुक्तिमार्गः स्यात्।

नवेम्बर् १

३०६. साक्षात् मोक्षसाधनानि इमानि

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

बृहदारण्यकोपनिषत् २-४-५

अरे मैत्रेयि, आत्मा एव द्रष्टव्यः। आत्मा एव श्रोतव्यो मन्तव्यो निदिध्यासितव्यः॥

अत्यन्तप्रसिद्धो मन्त्रोऽयम् अत्यन्तमुख्यश्च जिज्ञासूनाम्। आत्मा एव ज्ञातव्यः इति उपदिशति अयं मन्त्रः। आत्मज्ञानादेव मुक्तिः, आत्मज्ञानादेव अविद्यानिवृत्तिश्च। अतः विवेकिना आत्मज्ञानमेव संपादनीयम्॥

अस्तु, आत्मज्ञानप्राप्त्यै साधकैः किं कर्तव्यम्? श्रवण मनन निदिध्यासनानि कर्तव्यानि। श्रवण मनन निदिध्यासनानि आत्मज्ञानस्य साक्षात् साधनानि भवन्ति। **श्रवणं** नाम सद्गुरोः वेदान्त सन्देशानां श्रद्धया श्रवणक्रिया। **मननं** नाम श्रुतस्यैव युक्त्या अनुसन्धानम्। **निदिध्यासनं** नाम तस्यैव पुनः अनुभवे स्थापनम्, अनुभवे पर्यवसानं च। एतानि त्रीण्यपि साधनानि आत्मज्ञानप्राप्त्यै प्रधानानि भवन्ति। अतः श्रवणमननिदिध्यासनैः साधनैः उत्तम जिज्ञासूनाम् आत्मज्ञानम् अस्मिन्नेव जन्मनि लभ्यते। तस्मात् आत्मज्ञानलाभाय साक्षात्साधनानि एतानि भवन्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परिपूर्णब्रह्मविदे वेदान्तभास्कराय नमः॥

चिदेकमेव सद्ब्रह्म ह्यद्वितीयं परं पुरा।
इदानीमपि तत् ब्रह्म पूर्णं **वेदान्तभास्करः**॥

चिद्रूप सद्रूपम् एकमेव अद्वितीयंपरं ब्रह्म पुरा आसीत्, इदानीमपि तदेव पूर्णं ब्रह्म वर्तते।

नवेम्बर् २

३०७. तदापि अद्यापि एकमेव ब्रह्म

सदेव सोम्य इदमग्र आसीत् एकमेव अद्वितीयम्।

छान्दोग्योपनिषत् ६-२-१

हे सोम्य, श्वेतकेतो, इदं जगत् अग्रे एकमेव अद्वितीयं सदेव ब्रह्म आसीत्।

न शून्यात् इदं जगत् उत्पन्नम्। किं तु सतः जातमिदं विश्वम्। 'सत्' नाम 'अस्तिता' इत्यर्थः। सत एव नामान्तरं ''ब्रह्म''। ब्रह्मैव अग्रे आसीत्। ब्रह्म च एकमेव अद्वितीयम्। अद्वितीयं नाम द्वितीयरहितम्। परब्रह्मणा सह न किञ्चिदन्यत् आसीत् इत्यर्थः॥

सत्स्वरूपे परस्मिन् ब्रह्मणि सजातीयभेदो वा विजातीयभेदो वा स्वगतभेदो वा नैवास्ति। ब्रह्मैव एकमेव आसीत्, अद्वितीयम् आसीत्, ब्रह्म परिपूर्णमासीत्। परमार्थतस्तु इदानीमपि तद्ब्रह्म परिपूर्णमेवास्ति। परस्मिन् ब्रह्मणि तु न कोऽपि विशेषोऽस्ति। एकस्वरूप एव समुद्रः वीचयः, तरङ्गाः, फेनानि, बुद्बुदाः इति यथा व्यवह्रियते; तथैव एकमेव परं ब्रह्म जगत् इति अज्ञानिभिः व्यपदिश्यते। विद्यमानं तु परं ब्रह्म एकमेव। अज्ञानेनैव तु ब्रह्मणि नामरूपाणि विद्यमानानीव दृश्यन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'अक्षर'लक्षणविदे वेदान्तभास्कराय नमः॥

अस्थूलममलं ब्रह्म शब्दस्पर्शादिवर्जितम्।
अनिन्द्रियं ह्यक्षरं तत् नूनं **वेदान्तभास्करः**॥

यत् अस्थूलं निर्मलं शब्दस्पर्शादिवर्जितम् अनिन्द्रियं ब्रह्म नूनं तदेव "**अक्षरम्**"।

नवेम्बर् ३

३०८. 'अक्षर'स्य लक्षणम्

अस्थूलम् अनणु, अह्रस्वम् अदीर्घम्, अलोहितम्, अस्नेहम्, अच्छायम्, अतमः, अवायु, अनाकाशम्, असङ्गम्, अरसम्, अगन्धम्, अचक्षुष्कम्, अश्रोत्रम्, अवाक्, अमनः, अतेजस्कम्, अप्राणम्, अमुखम्, अमात्रम्, अनन्तरम्, अबाह्यम्। बृहदारण्यकोपनिषत् ३-८-८

*याज्ञवल्क्यस्य उपदेशोऽयम्। **अक्षरस्य** स्वरूपम् उपदिशति अयं मन्त्रः। अक्षरं न स्थूलम्, न अणु, न ह्रस्वम्, न दीर्घम्, न लोहितम्; स्नेहरहितम्, न छायम्, न तमः; वायुरहितम्, आकाशरहितम्, सङ्गरहितम्, रसरहितम्, गन्धरहितम्, नेत्ररहितम्, श्रोतृरहितम्, वागिन्द्रियरहितम्, मनोरहितम्, तेजोरहितम्, प्राणरहितम्, मुखरहितम्, मात्रारहितम्, अन्तररहितम्, बाह्यरहितं च॥*

अयमेकः प्रसिद्धो मन्त्रः। उपनिषत्सु प्रतिपादितस्य परस्य ब्रह्मणः स्वरूपं बहुसुन्दरतया प्रतिपादयति अयं मन्त्रः। आत्मैव अक्षरम्, अक्षरमेव च परं ब्रह्म। ब्रह्मैव आत्मा। तदेतदक्षरं सकलोपाधिविवर्जितं भवति। इन्द्रियरहितं पञ्चभूतसम्बन्धरहितं निरुपाधिकं तत्त्वम् **अक्षरम्**। एतद्यो वेत्ति स एव आत्मज्ञानी भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं स्वयंज्योतिःस्वरूपाय वेदान्तभास्कराय नमः॥

स्वयंज्योतिः परो ह्यात्मा स्वप्ने सर्वं स्वयं सदा।
बाह्यकारकहीनोऽपि भवेद् **वेदान्तभास्करः**॥

परो ह्यात्मा बाह्यकारकहीनोऽपि स्वयमेव स्वप्ने स्वयं-ज्योतिस्स्वरूपः सन् सर्वमपि भवेत्।

नवेम्बर् ४

३०९. आत्मा स्वयंज्योतिः

अत्रायं पुरुषः स्वयंज्योतिर्भवति।

बृहदारण्यकोपनिषत् ४-३-९

अत्र स्वप्ने अयम् आत्मा पुरुषः स्वयज्योतिर्भवति।

आत्मा स्वप्नकाले स्वयंज्योतिः भवति। स्वयंज्योतिर्नाम स्वयंप्रकाशस्वरूपः। अनितरसहायः सन् आत्मा स्वयमेव सर्वमपि भवति खलु? यद्यपि आत्मा सदा स्वतः स्वरूपेण ज्योतिस्स्वरूप एव तथापि तत् स्वरूपम् अस्माकं स्वप्ने विशेषतो अनुभूयते। आत्मा तु जागरिते स्वप्ने सुषुप्तौ च सर्वदा स्वयज्योतिःस्वरूप एव भवति। अपि तु स्पष्टतया एतादृशानुभवो जागरिते नास्माकं गोचरो भवति। यतो हि जागरिते इन्द्रियाणि अन्तःकरणं च कार्याणि कुर्वन्ति। आत्मा अपि तैः सह सहत इव दृश्यते॥

स्वप्ने तु आत्मा एक एव भवति। तत्र इन्द्रियमनोबुद्धयः नैव विद्यन्ते। तथापि आत्मा एक एव स्वयमेव सर्वं भूत्वा सर्वं प्रकाश-यति खलु? अयं स्वप्नानुभवः सार्वत्रिकः सार्वजनीनश्च। आत्मनः इमं स्वयंमहिमानं स्वप्ने द्रष्टुं सर्वेणामपि शक्यते। परमार्थदृष्ट्या तु त्रिष्वपि स्थानेषु आत्मा स्वयंज्योतिःस्वरूप एव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्राह्मणपुङ्गवाय वेदान्तभास्कराय नमः॥

ब्रह्मज्ञानेन पाण्डित्यं लब्ध्वा बाल्यं च तत्त्ववित्।
ब्राह्मणो ब्रह्मनिष्ठश्च नूनं **वेदान्तभास्करः**॥

तत्त्ववित् ब्रह्मज्ञानेन पाण्डित्यं बाल्यं च लब्ध्वा ब्रह्मनिष्ठः ब्राह्मणश्च नूनं भवति।

नवेम्बर् ५

३१०. अयमेव अन्वर्थब्राह्मणः

तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्य अथ मुनिः, अमौनं च मौनं च निर्विद्य अथ ब्राह्मणः॥ बृहदारण्यकोपनिषत् ३-५-१

*तस्मात् साधकः ब्राह्मणः **पाण्डित्यं** निर्विद्य बाल्येन स्थातुम् इच्छेत्। बाल्यं च पाण्डित्यं च निर्विद्य अथ **मुनिः**। **अमौनं** च **मौनं** च निर्विद्य अथ **ब्राह्मणो** भवति॥*

साधको जिज्ञासुः सद्गुरुभ्यो वेदान्तवाक्यार्थविचारं कुर्वन् पाण्डित्यं सम्पादयेत्। अत्र पाण्डित्यं नाम आत्मज्ञानमेव। आत्मज्ञानमेकमेव हि परमार्थतः पाण्डित्यम्। देहादिभ्यः विलक्षणः असंसारी आत्मैवाहमस्मि इति दृढनिश्चयो हि **पाण्डित्यम्**। अनेन पाण्डित्येन सहजं विद्याबलं जायते। कामकर्मपाशैः अनाकृष्टं हि बलमेव अत्र **बलं** भवति। इदं बलं ब्रह्मविद्यया एव प्राप्यते॥

ततः **अमौनं** नाम पाण्डित्यबाल्ये। **मौनं** नाम अनात्मवस्तु तिरस्कारं च निर्विद्य सः कृतार्थ एव भवति। एतादृश एव **अन्वर्थ ब्राह्मणः**। ब्रह्मज्ञानी एव निजब्राह्मणः। ब्रह्मज्ञानेन सर्वैरपि मानवैः सम्पाद्यमिदं ब्राह्मण्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं यज्ञादिफलस्वरूपविदे वेदान्तभास्कराय नमः॥

यज्ञयागादयो ह्येते ह्यनित्यफलदायकाः।
नैव मोक्षकरा नूनम् इति **वेदान्तभास्करः**॥

एते यज्ञयागादयः अनित्यफलदायकाः। न त्वेव इमे मोक्षकरा भवन्ति॥

नवेम्बर् ६

३११. अदृढाः प्लवाः एते

प्लवा ह्येते अदृढा यज्ञरूपाः। मुण्डकोपनिषत् १-२-७

यज्ञयागादिकर्मरूपाः एते प्लवाः अदृढाः।

अस्मिन् जन्मजरामरणरूपे संसारसागरे पतिताः मानवाः। अस्मात् सागरात् आत्मानम् तारयितुं दृढाः प्लवा एव अपेक्षिताः। स प्लवो नाम आत्मज्ञानमेव। वेदान्तोपदिष्टेन आत्मज्ञानमात्रेणैव अस्मात् दुःखरूपात् संसारात् ऊर्ध्वम् आगत्य मोक्षं प्राप्य मानवः कृतार्थो भवेत्। आत्मज्ञानविहीनः सन् केवलकर्मोपासननिष्ठश्चेत् तावता संसारसागरं नूनमपि नैवासौ तरेत्॥

इयं मुण्डकश्रुतिः यज्ञयागादीनि कर्माणि ''अदृढाः प्लवाः'' इति उद्घोषयति। केवलकर्मभिः अभ्युदयफलानि लभ्येरन्, न तु मुक्तिः लभ्येत। फलप्राप्त्यर्थं हि सर्वे मानवाः सर्वाणि कर्माणि कुर्वते। केवलकर्मनिष्ठस्य विवेको वा वैराग्यं वा नैव लभ्यते। दूरत एव तत्त्वविचारः। अस्य आत्मज्ञानं वा मोक्षो वा लभ्यते किम्? नैव, नैव। मानवेन विवेकिना विचारपरेण भाव्यम्, ततः आत्मज्ञानप्राप्त्यर्थं मानवेन धीरेण भाव्यम् इत्याशयः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं यज्ञहोमादितत्त्वविदे वेदान्तभास्कराय नमः॥

योऽविदित्वा परं ब्रह्म कुरुते कर्म पुष्कलम्।
अनन्तं न भवत्येव ह्यल्पं **वेदान्तभास्करः**॥

परं ब्रह्म अविदित्वा यः पुष्कलं कर्म कुरुते तस्य तेन अनन्तं फलं नैव भवति, अल्पमेव फलं भवति।

नवेम्बर् ७

३१२. कर्मफलानि सर्वाण्यपि अनित्यान्येव

यो वा एतदक्षरं गार्गि अविदित्वा अस्मिन् लोके जुहोति यजते...अन्तवदेव अस्य तद्भवति।

बृहदारण्यकोपनिषत् ३-८-१०

हे गार्गि, एतदक्षरम् अविदित्वा यो मानवः, अस्मिन् लोके जुहोति, यजते वा तत् तस्य अन्तवदेव भवति।

आत्मैव **अक्षरम्**, अविनाशि परब्रह्मैव **अक्षरम्**। एतादृश आत्मविदेव आत्मज्ञानी भवति। एतस्माद् आत्मज्ञानादेव संसारनिवृत्तिः मुक्तिप्राप्तिश्च। एतमात्मानं विदित्वैव मानवजन्म सार्थकं भवति, नान्यथा। आत्मज्ञानम् एकं विहाय सर्वस्मिन् इतरस्मिन् वस्तूनि ज्ञाते, कृते, प्राप्तेऽपि तत् सर्वम् अनित्यमेव॥

आत्मज्ञानम् अप्राप्य केवलं देवताराधनतत्परमात्रेण कृतार्थो न भवति। शास्त्रोक्तैः होमहवनयज्ञयागदानतपआदिभिः साधनैः यथाविधि अनुष्ठितैरपि, तावन्मात्रेण मुक्तिः प्राप्यते किम्? नैव प्राप्यते। शास्त्रीयकर्मभिः समनुष्ठितैः तानि तानि फलानि लभ्येरन्। तानि कर्मफलानि तु अन्तवन्ति, अनित्यान्येव भवन्ति इत्येतत् ज्ञानिपुङ्गवस्य याज्ञवल्क्यमहर्षेः धीरोद्गारः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'अध्यात्मयोग'रहस्यविदे वेदान्तभास्कराय नमः॥

इन्द्रियाणि मनस्येवं मनश्च प्रत्यगात्मनि।
अध्यात्मयोगमार्गेण प्राप्यो **वेदान्तभास्करः**॥

इन्द्रियाणि मनसि, तथा मनश्च प्रत्यगात्मनि विलाप्य **अध्यात्मयोग**मार्गेण आत्मा प्राप्यः।

नवेम्बर् ८

३१३. 'अध्यात्मयोग' फलमिदम्।

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।

काठकोपनिषत् १-२-१२

स्वयप्रकाशम् आत्मानम् अध्यात्मयोगेन विदित्वा, धीरः सन् हर्षशोकौ जहाति।

प्रतिपुरुषं जन्मप्रभृति मरणपर्यन्तं सुखदुःखानुभवः पौनःपुन्येन भवत्येव। इष्टप्राप्तौ सुखम्, अनिष्टप्राप्तौ दुःखम्। अयं सार्वत्रिकः सार्वजनीनः सहजः अपरिहार्यश्च महारोगः। सुखानन्तरं दुःखम्, दुःखानन्तरं सुखम्। एवं सुखदुःखप्रवाहापतितो जन्तुरेव नास्ति। सर्वेऽपि प्राणिनः सुखदुःखभाजो भवन्ति॥

तर्हि ईदृशानां सुखदुःखानाम् अन्तो नाम नास्त्येव किम्? अस्त्येव अन्तः। कथम्? आत्मज्ञानेन। आत्मानम् विवेकेन सम्यक् ज्ञात्वा सद्य एव सुखदुःखानां सम्बन्धः, जन्ममरणानां च प्रवाहः शान्तो भवति। आत्मा कथं ज्ञातव्यः? अध्यात्मयोगेन। **अध्यात्मयोगो** नाम अविद्याकल्पितात् अनात्मभूतात् देहादेः आत्मानं विविच्य विवेकेन अन्तरन्तः प्रवेशः। एवम् अध्यात्मयोगेन आत्मज्ञानं लभ्यते। आत्मज्ञानेन सुखदुःखानि दूरीक्रियन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विश्वकारणविदे वेदान्तभास्कराय नमः॥

चराचरात्मभूतानि चेतनाचेतनानि च।
सन्मूलान्येव सर्वाणि सदा **वेदान्तभास्करः**॥

चराचरात्मकानि चेतनाचेतनानि च सर्वाणि भूतानि सदा सन्मूलान्येव भवन्ति।

नवेम्बर् ९

३१४. सर्वस्यापि विश्वस्य ब्रह्मैव कारणम्

सन्मूलाः सोम्य इमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः।

छान्दोग्योपनिषत् ६-८-४

हे सोम्य, श्वेतकेतो, इमाः सर्वाः प्रजाः सन्मूलाः, सदायतनाः, सत्प्रतिष्ठाश्च।

छान्दोग्योपनिषदि प्रसिद्धोऽयं मन्त्रः। पित्रा उद्दालकेन स्वप्रियपुत्रं श्वेतकेतुं प्रति उपदिष्टोऽयम् मन्त्रः। सर्वासाम् उपनिषदां सन्देशसारभूतोऽयं मन्त्रः। वेदान्तदर्शनस्य विशेषं महत्त्वं प्रतिपादयति मन्त्रराजोऽयम्॥

इमाः सर्वाः प्रजाः सत एव आगताः। अत्र प्रजा इति न केवलं मनुष्याः, किंतु सर्वेऽपि प्राणिनः। स्थावरजङ्गमात्मकाः इमे सर्वेऽपि प्राणिनः सद्रूपात् ब्रह्मण एव जाताः, ब्रह्मण्येव जीवन्तः, अन्ते ब्रह्मण्येव लीयन्ते च। इदं जगत् सदा सद्रूपमेव ब्रह्म॥

घटाकाशो महाकाशादेव आगत्य, महाकाशे एव स्थित्वा, महाकाशे एव लीयते च। उत्पत्तिस्थितिलयकालेषु घटाकाशः महाकाश एव यथा, एवमेव जगदिदं सर्वं ब्रह्मैव। सद्रूपं ब्रह्म विहाय प्राणिनो वा जगद्वा नैव सन्ति। इयानेव सर्ववेदान्तानां सन्देशसारः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'अदृष्टद्रष्टृ'विदे वेदान्तभास्कराय नमः॥

अदृष्टोऽपि परो ह्यात्मा द्रष्टृश्रोत्रादिरूपतः।
इत्यात्मानं विजानाति धीरो **वेदान्तभास्करः**॥

परो ह्यात्मा स्वयम् अदृष्टोऽपि द्रष्टा, अश्रुतोऽपि श्रोता—इत्यादि रूपेण अस्ति इति आत्मान यो विजानाति असौ धीरः।

नवेम्बर् १०

३१५. अदृष्टो द्रष्टा

अदृष्टो द्रष्टा, अश्रुतः श्रोता, अमतो मन्ता, अविज्ञातो विज्ञाता। बृहदारण्यकोपनिषत् ३-७-२३

आत्मा अदृष्टोऽपि द्रष्टा, अश्रुतोऽपि श्रोता, अमतोऽपि मन्ता, अविज्ञातोऽपि विज्ञाता अस्ति।

आत्मानम् परस्परविरुद्धतया उपदिशतीव अयं मन्त्रो दृश्यते। तथा नास्ति। जागरूकतया अस्य मन्त्रस्य अर्थो अनुसन्धेयः। आत्मा अदृष्टः, अपि तु द्रष्टा। तथा अश्रुतः, अपि तु श्रोता। अमतः, अपि तु मन्ता। अविज्ञातोऽयमात्मा, अपि तु विज्ञाता॥

दृष्टो नाम इन्द्रियैर्वा इतरप्रमाणैर्वा ग्राह्यः इत्यर्थः। अदृष्टो नाम न दृष्टः। **द्रष्टा** नाम पश्यति इति। आत्मा यद्यपि चक्षुषा न गृह्यते, तथापि स्वयमेव चक्षुरवभासकः इत्यर्थः। श्रोत्रेण यद्यपि न विषयीक्रियते आत्मा तथापि श्रोत्रावभासकः इत्यर्थः। मनसा वा बुद्ध्या वा न विषयीक्रियते आत्मा, आत्मैव मनोबुद्धि-साक्षिभूतः। न केनापि प्रमाणेन विषयीक्रियमाणोऽप्यात्मा स्वयं सर्वकरणावभासकः प्रत्यगात्मा सन् अमृतोऽयम् इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं श्रौततर्करहस्यविदे वेदान्तभास्कराय नमः॥

केवलं शुष्कतर्केण ब्रह्मज्ञानस्य नोदयः।
प्रत्यगात्मस्वरूपत्वात् इति **वेदान्तभास्करः**॥

केवलेन शुष्कतर्केण ब्रह्मज्ञानस्य नोदयः। ब्रह्मणः प्रत्यगात्मस्वरूपत्वात्॥

नवेम्बर् ११

३१६. शुष्कतर्कस्य नावकाशोऽत्र

नैषा तर्केण मतिरापनेया। काठकोपनिषत् १-२-९

एषा ब्रह्मात्मविद्या तर्केण न आपनेया।

मनुष्यो अतीव बुद्धिमान् महामेधावी च। स्वबुद्धिसामर्थ्येन अयं प्रचण्डमानवः सर्वं साधयेत्, सर्वं कुर्यात्। तर्कबलेन मानवः सत्यम् अनृतं साधयेत्, अनृतं च सत्यं साधयेत्। शुष्कतर्केण अयं मानवः आत्मनः स्वार्थं सर्वं यथेष्टं साधयेत्॥

अपि तु शुष्केण तर्केण नायं मानवः आत्मविद्यां प्राप्नुयात्। बाह्यानि अनात्मवस्तूनि विवेकबुद्ध्या गृह्णीयात्। प्रत्यगात्मानम् अवगन्तुं तु चित्तशुद्धिरपेक्ष्यते। चित्तशुद्धिप्राप्त्यै शमः दमः उपरतिः, तितिक्षा, श्रद्धा, समाधानं च साधनानि भवन्ति। एतैर्हि साधनैः अन्तःकरणं शुद्धं भवति। शुद्धे परिपक्वे च अन्तःकरणे आत्मनः स्वरूपम् अवभासते। इन्द्रियमनोबुद्धिप्रकाशकम् प्रत्यगात्मानम् अनुभवेनैव जानीयात्, नासौ आत्मा तु केवलेन शास्त्रपाण्डित्येन ज्ञातुं शक्यते। अनुभवानुसारिणः श्रौततर्कस्य साहाय्येन सद्गुरूपदेशस्य अर्थम् अवगच्छेत्। सद्गुरूपदेशं विहाय केवलेन शुष्कतर्केण आत्मा विज्ञातुं नैव शक्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सद्गुरुवल्लभाय वेदान्तभास्कराय नमः॥

ब्रह्मतत्त्वविजिज्ञासुः श्रद्धाभक्तिसमन्वितः।
सद्गुरुं ब्रह्मनिष्ठं च श्रयेत् **वेदान्तभास्करः**॥

ब्रह्मतत्त्वविजिज्ञासुः साधकः श्रद्धाभक्तिसमन्वितः सन् ब्रह्मनिष्ठं सद्गुरुं श्रयेत्।

नवेम्बर् १२

३१७. जिज्ञासोः सद्गुरुरेव गतिः

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। मुण्डकोपनिषत् १-२-१२

तद् परं ब्रह्म विज्ञातुम् मुमुक्षुः जिज्ञासुः श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुमेव भक्त्या उपगच्छेत्।

परब्रह्मणः तत्त्वं ज्ञातुम् इच्छुः साधकः ''जिज्ञासुः'' भवति। तत्त्वजिज्ञासायाः फलम् आत्मज्ञानमेव। ज्ञानफलमेव मोक्षः। सर्वथाऽपि तु कर्ममार्गात् विरक्तेन मुमुक्षुसाधकेन अवश्यमेव कर्तव्यं साधनं नाम ''ब्रह्मजिज्ञासा''॥

ब्रह्मजिज्ञासां कर्तुमेव साधकः सद्गुरुम् उपसर्पेत्। जिज्ञासुः स्वयमेव स्वतंत्रतया ब्रह्मजिज्ञासां न कुर्यात्, **''शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं नैव कुर्यात्''** इति मुमुक्षून् बोधयन्ति भगवत्पादाचार्याः। अतः सद्गुरूपाश्रयणम् आवश्यकमेव॥

भवतु, तादृशाः सद्गुरवः के? कथं ते वर्तेरन्? इति चेत्, ''श्रोत्रियं ब्रह्मनिष्ठम्'' इति श्रुतिः उपदिशति। वेदान्तशास्त्रतात्पर्याभिज्ञो हि **श्रोत्रियः**, ब्रह्मैवाहमस्मीति अनुभवेन विज्ञाय ब्रह्मप्रतिष्ठश्च **ब्रह्मनिष्ठः**। ईदृशः सद्गुरुरेव जिज्ञासोः गतिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भीतिहेतुब्रह्मविदे वेदान्तभास्कराय नमः॥

यस्य भीत्या सदा देवाः वायुसूर्येन्द्रमृत्यवः।
स्वकार्यं कुर्वते तद्धि ब्रह्म **वेदान्तभास्करः**॥

वायुसूर्येन्द्रमृत्यवः देवाः यस्य भीत्या सदा स्वकार्यं कुर्वते तदेव हि ब्रह्म।

नवेम्बर् १३

३१८. भयहेतुरेव ब्रह्म !

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति॥

तैत्तिरीयोपनिषत् २-८-१

अस्य परमात्मनः भयादेव वायुः पवते, अस्य भयादेव सूर्यः उदेति, अस्य भयादेव अग्निः इन्द्रश्च आत्मनः कार्याणि कुरुतः। मृत्युश्च परमात्मनः भयादेव सदा स्वव्यापारं कर्तुं धावति॥

देवानामपि भयमस्ति, देवा अपि मानववत् स्वस्वकार्याणि कुर्वन्ति। देवानामपि आत्मभूतः परमात्मा। परमात्मा स्वतंत्रः। परमात्मनः अनुग्रहादेव सर्वेऽपि प्राणिनः स्वस्वकर्माणि नियतं कुर्वन्ति॥

प्रकृते तु, वायुः सदा पवते, सूर्यः विश्रमरहितः सततं प्रपञ्चं प्रकाशयति, अग्निः सततं दहति, इन्द्रः आत्मनः कर्तव्यं श्रद्धया करोति, तथा मृत्युदेवोऽपि आत्मनः कर्तव्यं कर्म सदा कुर्वन् धावति। भगवतः भयमेव हि एतस्य सर्वस्यापि कार्यस्य हेतुः। परमात्माधीनतया एव हि एते सर्वे देवाः स्वकर्मनिरताः सन्ति। सर्वेषां भयहेतुरपि स्वयं निर्भयं सर्वेषामपि प्रत्यगात्मभूतं ब्रह्म॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं "नान्योऽतोऽस्ति" विदे वेदान्तभास्कराय नमः॥

आत्मैव द्रष्टा श्रोता च नान्योऽतोऽस्ति शरीरकः।
अमृतोऽयमार्तमन्यत् नूनं **वेदांतभास्करः**॥

आत्मैव द्रष्टा श्रोता च; अस्मादात्मनःअन्यः शारीरो नाम नास्ति। अयमात्मा अमृतः; अन्यत् सर्वम् नूनम् आर्तमेव॥

नवेम्बर् १४

३१९. आत्मैव निजो द्रष्टा !

नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता। एष ते आत्मा अन्तर्यामी अमृतः, अतोऽन्यदार्तम्।

बृहदारण्यकोपनिषत् ३-७-२३

*अस्मादात्मनः अन्यः द्रष्टा नास्ति, अस्मात् अन्यः श्रोता नास्ति, अतोऽन्यः मन्ता नास्ति, अतोऽन्यः विज्ञाता नास्ति। एष एव ते अन्तर्यामी आत्मा, अमृतः। अतोऽन्यद् **आर्तम्**॥*

आत्मनो भिन्नम् अन्यं जीवात्मान निषेधति अयं मन्त्रः। अत्र आत्मा नाम प्रत्यगात्मा चिन्मात्रस्वरूपः। आत्मा तु एक एव। आत्मा नाम परमार्थस्वरूप एव। **आप्नोति इति आत्मा**॥

अयमेव आत्मा नेत्रोपाधिना द्रष्टा, श्रोत्रोपाधिना श्रोता, मन उपाधिना मन्ता, बुद्ध्युपाधिना विज्ञाता भवति। अयमेव अन्तर्यामी, अयमेव सर्वेषां प्राणिनाम् आत्मा। द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ, वक्तृ—आदिजीवरूपेण दृश्यमानः आत्मा अयमेव। इममेकं प्रत्यगात्मानं विहाय अन्यत् सर्वमपि आर्तम्। आर्तं नाम अनित्यम्, असत्यम्, दुःखमेव इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'औपनिषदपुरुष'विदे वेदान्तभास्कराय नमः॥

निर्गुणो निर्विकारश्च पूर्णश्चोपनिषत्सु यः।
स औपनिषदात्मायं ज्ञेयो **वेदान्तभास्करः**॥

निर्गुणो निर्विकारश्च यः पूर्णः आत्मा उपनिषत्सु उपदिष्टः स एव **औपनिषदः** आत्मा इति ज्ञेयः।

नवेम्बर् १५

३२०. अयमेव 'औपनिषदः' आत्मा

तं त्वा 'औपनिषदं' पुरुषं पृच्छामि।

बृहदारण्यकोपनिषत् ३-९-२६

''तम् औपनिषदं पुरुषं ब्रूहि'' इति अहं त्वां पृच्छामि।

वेदान्तप्रतिपादितस्य आत्मनः **औपनिषदः पुरुषः** इति नामधेयम्। **उपनिषत्सु प्रतिपादितः आत्मा औपनिषदः**। उपनिषत्सु वेदान्तेष्वेव प्रतिबोधितः आत्मा **औपनिषदः पुरुषः**। न कुत्राप्यन्यत्र अयमुपदिश्यते। पुराणेषु उपदिष्टाः देवताः **पौराणिक देवताः** इति कथ्यन्ते। इन्द्र चन्द्र मित्र वरुणार्यमाद्याः देवाः पौराणिकाः भवन्ति। नैते ''**औपनिषदः पुरुषः**'' भवन्ति। पौराणिक देवताः अनात्मभूताः सोपाधिकाः संसारिस्वरूपा एव। औपनिषदः पुरुषः पुनः? अयं निरुपाधिकः पुरुषः परिपूर्णं परं ब्रह्म। अयमेव असंसारी आत्मा॥

औपनिषदः पुरुषः निरुपाधिकः निर्विशेषः निरवयवः असंसारी प्रत्यगात्मा परब्रह्मस्वरूपः। नाम रूप क्रियासम्बन्धरहितः देशकालरहितः परिपूर्णः प्रत्यगात्मैव **औपनिषदः पुरुषः**। औपनिषदात्मज्ञानादेव मुक्तिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सम्प्रदायविदे वेदान्तभास्कराय नमः॥

बुद्धिचातुर्ययुक्तेन बोधिते जायते न हि।
सम्प्रदायविहीनेन ज्ञानं **वेदान्तभास्करः**॥

सम्प्रदायविहीनेन बुद्धिचातुर्ययुक्तेन पण्डितेन बोधिते सति आत्मज्ञानं नैव जायते।

नवेम्बर् १६

३२१. ईदृशो, वेदान्ताचार्यो न भवेत्

न नरेणावरेण प्रोक्तः एषः सुविज्ञेयो बहुधा चिन्त्यमानः।

काठकोपनिषत् १-२-८

अवरेण नरेण प्रोक्तः एष आत्मा सुविज्ञेयो न भवति। यतः अयम् आत्मा अनेकवादिभिः अनेकधा चिन्त्यमानः अस्ति॥

''आत्मैव ब्रह्म, ब्रह्मैव आत्मा, अस्माकं पारमार्थिकं स्वरूपमेव ब्रह्म; जीवाः नैव परमार्थतः संसारिणः; सर्वेऽपि जीवाः तत्त्वतः अजम् अजरम् अमृतं ब्रह्मैव'' इति उपनिषदः उद्घोषयन्ति। उपनिषदाम् ईदृशान् सन्देशान् स्वयमेव पुस्तकपठनद्वारा अवगन्तुं न शक्यते। अत एव सद्गुरून् उपगम्य, सद्गुरुभ्य एव वेदान्तसन्देशार्थान् विजानीयात् साधकः॥

भवतु, तादृशाः सद्गुरवः के? ब्रह्मनिष्ठाः आचार्याः। विश्वविख्यातः सन् प्रवचनपटुरपि च सन् सकलशास्त्रप्रवीणश्च सन्नपि आत्मज्ञानी न भवेत् चेत्, तादृशः ब्रह्मविद्याचार्यो नैव भवेत्। वेदान्तसम्प्रदायवित् ब्रह्मनिष्ठश्चेत् तादृशः एव सद्गुरुः भवेत्। अन्यथा केवलपुस्तकमस्तकविद्यासम्पन्नः प्रवचनपटुः केवल शुष्कपण्डितः वेदान्ताचार्यो नैव भवेत्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं त्रयस्त्रिंशत्देवविदे वेदान्तभास्कराय नमः॥

आदित्या वसवो रुद्राः इन्द्रश्चैव प्रजापतिः।
त्रयस्त्रिंशत् देवगणाः ब्रह्म **वेदान्तभास्करः**॥

द्वादश आदित्याः, अष्टौ वसवः, एकादश रुद्राः, इन्द्रः, प्रजापतिश्च—इति त्रयस्त्रिंशत् देवगणा अपि ब्रह्मैव।

नवेम्बर् १७

३२२. त्रयस्त्रिंशद्देवताः

अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, ते एकत्रिंशत् ; इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशत् इति।

बृहदारण्यकोपनिषत् ३-९-२

अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, इति एते एकत्रिंशत्, इन्द्रश्च प्रजापतिश्च—एवं त्रयस्त्रिंशत् देवा अपि ब्रह्मैव।

त्रयस्त्रिंशत् कोटिः देवताः इति लोके सामान्यतः वदन्ति। एकैकापि देवता एकस्याः कोटेः प्रतिनिधिभूतास्ति। अस्तु, ताः त्रयस्त्रिंशत् देवताः काः? इति चेत् उपदिशत्ययं मन्त्रः॥

१. **अष्टौ वसवः**:—धरः, ध्रुवः, सोमः, अहः, अनिलः, अनलः, प्रत्यूषः, प्रभासश्चेति॥

२. **एकादश रुद्राः**:—हरः, बहुरूपः, त्र्यम्बकः, अपराजितः, वृषाकपिः, शम्भुः, कपर्दिः, रैवतः, मृगव्याधः, शर्वः, कपालिश्चेति॥

३. **द्वादश आदित्याः**:—धाता, मित्रः, अर्यमा, शक्रः, वरुणः, अंशः, भगः, विवस्वान्, पूषा, सविता, त्वष्टा, विष्णुश्चेति॥

एते त्रयो गणदेवाः। इन्द्रः प्रजापतिश्चेति त्रयस्त्रिंशत् देवाः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वीतशोकाय वेदान्तभास्कराय नमः॥

अकर्तारम् अभोक्तारम् आत्मानं मन्यते सुधीः।
वीतशोको भवत्येषः धिया **वेदान्तभास्करः**॥

आत्मानम् अकर्तारम् अभोक्तारम् यदा मन्यते सुधीः तदैव एषः वीतशोको भवति।

नवेम्बर् १८

३२३. इदानीं वीतशोकोऽयम्

जुष्टं यदा पश्यत्यन्यमीशम् अस्य महिमानमिति वीतशोकः।

मुण्डकोपनिषत् ३-१-२

संसारिव्यतिरिक्तं योगिजुष्टम् ईश्वरम्, आत्मनः महिमानं च यदा जिज्ञासुः पश्यति सः सद्य एव शोकरहितो भवति।

जीवात्मनः जन्मजन्मान्तरेभ्यः शोकमोहाः प्रवाहवत् भवन्त्येव। अत एव अस्य संसारस्य **शोकमोहसागरः** इति नाम। अस्मिन् मग्नस्य जीवात्मनः अस्मात् संसारात् तरणोपायः एव न दृश्यते। अस्मिन् मन्त्रे तु संसारसागरतरणोपायमार्गः उपदिश्यते॥

मुमुक्षुणा जीवत्वरहितस्य असंसारिणः ईश्वरस्य स्वरूपं विवेकेन ज्ञातव्यम्। न हि ईश्वरो नाम अत्यन्तम् आत्मनो भिन्नः। स्वस्य स्वरूपमेव सः। एकस्यैव आत्मनः रूपद्वयं दृश्यते। अविद्याकल्पितोपाधिसम्बन्धात् दृश्यमानं जीवरूपम् एकम्, उपाधिरहितं प्रत्यगात्मस्वरूपं च अपरम्। इदमेव च ईश्वरस्य स्वरूपम्, इदमेव जीवस्य परमार्थस्वरूपम्। जन्ममरणराहित्यमेव हि आत्मनः महिमा ! एतद्विदः शोकमोहसम्बन्धः सम्भवति किम्?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं जरामरणवर्जिताय वेदान्तभास्कराय नमः॥

स्वर्गलोके सदा मोदः जरामरणवर्जितः।
आमोदश्च प्रमोदश्च नूनं **वेदान्तभास्करः**॥

स्वर्गलोके जरामरणवर्जितः मोदः, आमोदः प्रमोदश्च सदा नूनं भवति।

नवेम्बर् १९

३२४. स्वर्गलोकस्य सुखम् इदम्

शोकातिगो मोदते स्वर्गलोके।

काठकोपनिषत् १-१-१८

अग्निहोत्री मरणानन्तरम् स्वर्गलोके शोकातिगो मोदते॥

मानवानां वासस्थानभूतो लोको **मर्त्यलोकः** अथवा **भूलोकः**। **दुःखलोकः** इति च नामान्तरम् अस्य। अत्र लोके दुःखान्येव अधिकानि भवन्ति॥

स्वर्गलोकस्तु सुखस्थानम्। **देवलोकः** इति च नामान्तरमस्य। न हि अयं स्वर्गो लोकः तावता सुलभेन लभ्यः। अस्मिन् मनुष्यलोके द्विजत्वेन जाताः, तत्रापि शुद्धब्राह्मणाः सन्तः, वेदाध्ययनसम्पन्नाः अग्निहोत्रादीनि शास्त्रीयकर्माणि यथाविधि कुर्वन्त एव मरणानन्तरं **स्वर्गलोकं** प्राप्नुयुः। पुण्यलोकोऽसौ भवति। स्वर्गलोके अप्सरस्त्रियः, कल्पवृक्षः, कामधेनुः, चिन्तामणिश्च इत्येते पदार्था भवन्ति। अत्र मनुष्यलोके यथा जरादुःखानि भवन्ति न तथा तत्र दुःखसम्भवः। शरीरजाः रोगाश्च तत्र स्वर्गे न भवन्ति। स्वर्गलोके सकलभोगसम्पदः भवन्ति। तत्र देवानां सङ्कल्पसिद्धिर्भवति। अपि तु अयं स्वर्गलोकोऽपि अनित्य एव। नायं मोक्षः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् एषणात्रयरहस्यविदे वेदान्तभास्कराय नमः॥

एक एवानलः कामः एषणात्रयनामतः।
संसारहेतुभूतोऽयम् इति **वेदान्तभास्करः**॥

एक एव अनलः कामः **एषणा**त्रयरूपेण नूनं ससारहेतुभूतः।

नवेम्बर् २०

३२५. त्रयमपि एकमेव

या ह्येव पुत्रैषणा सा वित्तैषणा, या वित्तैषणा सा लोकैषणा, उभे ह्येते एषणे एव भवतः।

बृहदारण्यकोपनिषत् ३-५-१

या पुत्रैषणा सा एव वित्तैषणा, या वित्तैषणा सा एव लोकैषणा। उभे ह्येते एषणे एव भवतः॥

पुत्रैषणा नाम पुत्रं प्राप्तुम् इच्छा। **वित्तैषणा** नाम धनं प्राप्तुम् आशा। **लोकैषणा** नाम स्वर्गलोकं जेतुं कामः। सर्वथापि त्रिस्रोऽपि एषणाः कामा एव। एषणा, कामः, आशा इति पर्यायपदानि। प्राप्तुम् इच्छा—इत्यर्थः॥

इच्छायाः कारणम् अविद्या एव। अविद्यया एव हि कामानाम् उदयः। अविद्यारहितस्य कुतो वा कामानाम् अवकाशः? केषु विषयेषु कामाः? निवृत्ताविद्यस्य कामानामपि निवृत्तिरेव। तस्मात् अविद्यावत एव कामाः, कामविलासाः। अविद्यावतां संसारिणां मध्ये केषाञ्चित् पत्नीपुत्रेषु कामः, केषाञ्चित् वाहनख्यात्यादिषु कामः, अपरेषां पुण्यसम्पादने कामः, इतरेषां केषाञ्चित् स्वर्गादि-लोकेषु कामः। सर्वथापि सर्वमपि काम एव। अविद्या एव हि कामानां मूलम्। अविद्याभावे कामाभावः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् ईश्वरानुग्रहपात्राय वेदान्तभास्कराय नमः॥

ईश्वरानुग्रहादेव पुंसां ज्ञानफलोदयः।
ईश्वरानुग्रहादेव मुक्तिर्वेदान्तभास्करः॥

ईश्वरानुग्रहादेव पुंसां ज्ञानफलोदयः, ईश्वरानुग्रहादेव पुसां मुक्तिर्भवति।

नवेम्बर् २१

३२६. ईश्वरानुग्रहस्य फलमिदम्!

जुष्टस्ततस्तेन अमृतत्वमेति।

श्वेताश्वतरोपनिषत् १-६

ईश्वरेण अनुगृहीतः जीवः अमृतत्वम् एति।

जीवात्मा अविद्यया पुनः पुनः जायमानः म्रियमाणश्च सुख-दुःखानि अनुभवन् दुःखी भवति। अहम् अन्यः ईश्वरः अन्यः इति भेदज्ञानमेव अविद्या। अविचारदशायाम् एषा अविद्या अनादिः अनन्ता सहजा इव च दृश्यते। आत्मतत्त्वविचारमात्रेण च इयम् अविद्या अपगच्छति॥

आत्मतत्त्वविचारः तावता सुलभेन कर्तुं शक्यते वा? नैव। ईश्वरानुग्रहादेव अस्माकम् आत्मतत्त्वविचारे प्रवेशो लभ्येत। ईश्वरानुग्रहादेव मानवस्य अध्यात्मविचारमार्गे प्रवृत्तिः स्यात्। ईश्वरानुग्रहादेव अस्माकं वेदान्तार्थप्रतिपत्तिर्भवेत्। ब्रह्मात्मविज्ञाने जाते सति अविद्या अपगता भवति। अविद्यानाशे सति जीवस्य संसारित्वमपि नष्टमेव भवति। ततोऽमृतत्वं मोक्षं प्राप्नोति। तस्मात् अध्यात्मसाधकैः प्रप्रथमतः ईश्वराराधनेन ईश्वरानुग्रहपात्रता सम्पादनीया। तस्माद् ईश्वराराधनं कर्तव्यमेव मुमुक्षुभिः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणतत्त्वविदे वेदान्तभास्कराय नमः॥

आत्मनो जायते प्राणो मनः सर्वेन्द्रियाणि च।
आत्मैवेदं जगत् सर्वं नूनं **वेदान्तभास्करः**॥

आत्मनः प्राणो जायते, मनः सर्वेन्द्रियाणि च जायन्ते। अतः जगत् सर्वमपि नूनम् आत्मैव॥

नवेम्बर् २२

३२७. आत्मन एव प्राणस्य उत्पत्तिः

एतस्मात् जायते प्राणो मनः सर्वेन्द्रियाणि च।

मुण्डकोपनिषत् २-१-३

एतस्मादेव आत्मनः प्राणः मनः सर्वेन्द्रियाणि च जायन्ते।

आत्मनः महिमानं व्यापकत्वं च उपदिशति अयं मन्त्रः। आत्मनः एव प्राणो जायते। अत्र प्राणो नाम आध्यात्मिकः **मुख्यः प्राणः**, स एव आधिदैविकः समष्टिकरणात्मा **हिरण्यगर्भः**। अयमेव आधिभौतिको **वायुः**। आत्मनो जातं सर्वमपि कार्यं परमार्थतः अनृतमेव भवति। कार्यं सर्वं वाचारम्भणमात्रमेव ''वाचारम्भणं विकारो नामधेयम्'' इति छान्दोग्योपनिषत् धैर्येण उद्घोषयति॥

मनश्च आत्मन एव जायते। अत्र मनः इति हिरण्यगर्भस्य समष्टिबुद्धिरुच्यते। सकलप्राणिनां व्यष्टिबुद्धिश्च अत्र गृह्येत। मनः, बुद्धिः, चित्तम्, अहङ्कारः इति चतसृभिः वृत्तिभिः अवभासमानम् अन्तःकरणमेव अत्र 'मनः'शब्देन कथ्यते। ईदृश मनोऽपि आत्मन एव कार्यम्। तथा ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च आत्मन एव जायन्ते। आत्मा तु प्राणात्, मनसः, इन्द्रियेभ्यश्चअत्यन्तसूक्ष्मः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं परब्रह्मतत्त्वविदे वेदान्तभास्कराय नमः॥

यस्मिन् एतत् जगत् सर्वं स्थावरं जङ्गमं तथा।
ओतं प्रोतं च तद् ब्रह्म परं **वेदान्तभास्करः**॥

स्थावरं जङ्गमं जगत् यस्मिन् ओतं च प्रोतं च तदेव परं ब्रह्म।

नवेम्बर् २३

३२८. परब्रह्मणः लक्षणम्

अथ हैनं गार्गी वाचक्नवी पप्रच्छ, याज्ञवल्क्येति होवाच, यदिदं सर्वं कस्मिन्नु खलु ओतं प्रोतं च?

बृहदारण्यकोपनिषत् ३-६-१

अथ, वाचक्नवी गार्गी पप्रच्छ, ''भो याज्ञवल्क्य, इदं सर्वं कस्मिन् ओतं प्रोतं च'' इति।

अस्माकं भारतीयसंस्कृतौ स्त्रीणां कीदृशम् उत्तमं स्थानमस्ति! भारतीयसम्प्रदाये कीदृश्यः श्रेष्ठाः स्त्रियः सन्ति! इति एतस्माद् मन्त्राद् ज्ञायते। गार्गी नाम एका स्त्री। नैषा केवलं सामान्या स्त्री। किन्तु एषा वाचक्नवी, परब्रह्मविषये विचारवादकरणे समर्था आसीत्। वाचक्नोः पुत्री एषा गार्गी भारतीयानां सर्वासामपि स्त्रीणाम् आदर्शभूता योषित्। एषा याज्ञवल्क्यं प्रति एवं पृष्टवती—

''भो याज्ञवल्क्य, इदं सर्वमपि विश्वं कस्मिन् ओतं प्रोतं चास्ति''? इदं विश्वं नाम सर्वमपि आध्यात्मिकम् आधिभौतिकं तथा आधिदैविकं जगत् इत्यर्थः। अयं सर्वोऽपि प्रपञ्चः कस्मिन् प्रतिष्ठितः? सकलदेवाधिदेवानामपि आस्पदभूतम् आधारभूतं तत्त्वं किम्? इति प्रश्नस्य आशयः। यस्मिन् इदं जगत् प्रतिष्ठितं तदेव परं ब्रह्म इति याज्ञवल्क्यस्य प्रतिवचनम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं षोडशकलपुरुषविदे वेदान्तभास्कराय नमः॥

यस्मात् षोडश जायन्ते लयमेष्यन्ति यत्र च।
पुरुषोऽसौ कला ज्ञेयः स्वस्मिन् **वेदान्तभास्करः**॥

षोडश कलाः यस्माद् पुरुषात् जायन्ते, यत्र लयम् एष्यन्ति, असौ पुरुषः स्वस्मिन् एव विज्ञेयः॥

नवेम्बर् २४

३२९. अस्मास्वेव कलापुरुषोऽस्ति

इहैवान्तःशरीरे सोम्य, स पुरुषः, यस्मिन्नेताः षोडश कलाः प्रभवन्तीति। प्रश्नोपनिषत् ६-२

हे सोम्य, सुकेशाभारद्वाज, यस्मिन् एताः षोडश कलाः प्रभवन्ति, सः पुरुषः इहैव अन्तःशरीरे अस्ति।

आत्मनः **षोडशकलपुरुषः** इति नामधेयम्, अयं षोडशकलपुरुषः अस्मास्वेव निहितोऽस्ति। अस्मादेव पुरुषात् षोडशकलाः प्रभवन्ति, अस्मिन्नेव विद्यन्ते, जीवन्ति, अन्ते च पुरुषे एव लीयन्ते। षोडशानामपि कलानां कारणभूतः सः पुरुषः आत्मैव इति यो विजानाति स एव धीरः॥

भवतु ताः षोडश कलाः काः? इति चेत् उच्यते। प्राणः, श्रद्धा, आकाशः, वायुः, तेजः, आपः, पृथिवी, इंद्रियाणि, मनः, अन्नम्, वीर्यम्, तपः, वेदाः, कर्माणि, लोकाः, नामानि च—इति षोडश कलाः। एतासां षोडशानाम् अपि कलानां कारणभूतः कलानाम् आधारभूतः सन्, स्वयं तु षोडशकलाभ्योऽपि विलक्षणः सच्चिदानन्दस्वरूपः आत्मैव इति जानीयात्। इदमेव हि आत्मज्ञानं नाम। ब्रह्मविद्या च इयमेव। एषैव अक्षरविद्या, अध्यात्मविद्या च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अवस्थात्रयसाक्षिणे वेदान्तभास्कराय नमः॥

सच्चिदानन्दमात्मानम् ह्यवस्थात्रयसाक्षिणम्।
ज्ञात्वा तं शोकमत्येति नूनं **वेदान्तभास्करः**॥

सच्चिदानन्दम् अवस्थात्रयसाक्षिणम् आत्मानं ज्ञात्वा शोकमत्येति।

नवेम्बर् २५

३३०. ज्ञात्वा विशोको भवति !

स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥

काठकोपनिषत् २-१-४

यस्य सान्निध्येन स्वप्नान्तं च जागरितान्तं च पश्यति मानवः तं महान्तं विभुम् आत्मानं मत्वा धीरो न शोचति।

''मत्वा धीरो न शोचति'' इत्येषः सकलवेदान्तानां सन्देशसारः। 'पल्लवी'त्वेन इदं वाक्यं भवति। ज्ञात्वा धीरः, प्राप्य दीनः, कृत्वा मन्दः—इत्यर्थः। ज्ञात्वा धीरो भवति। किं ज्ञात्वा? आत्मानं ज्ञात्वा। आत्मनः ज्ञानं नाम किम्? इति चेत् उच्यते॥

आत्मा नाम जागरितं स्वप्नं सुषुप्तिं च प्रकाशयन् चिन्मात्रस्वरूपः। स्वयम् अविक्रियः सन् विकारिणं सकलमपि प्रपञ्चं भासयन् आत्मैव अहमस्मीति जानन् धीरो भवति॥

आत्मा महान्, आत्मा विभुः, आत्मा अविकारी। आत्मा जागरितं, स्वप्नं, सुषुप्तं च साक्षित्वेन प्रकाशयति। एवंवित् नूनमपि धीर एव खलु? एवंविदः शोकमोहौ किं स्तः? नैव। अनात्मभूतान् देहेन्द्रियादीन् आत्मत्वेन विजानतः अज्ञस्यैव हि सदा शोकमोहसंसारबन्धनम्, न तु आत्मस्वरूपविदः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्रशास्तृतत्त्वविदे वेदान्तभास्कराय नमः॥

सूर्यचन्द्रादयो देवाः प्रकाशनपराः सदा।
यस्य प्रशासने भान्ति ब्रह्म **वेदान्तभास्करः**॥

सूर्यचंद्रादयो देवाः यस्य प्रशासने भान्ति तदेव ब्रह्म जानीयात्।

नवेम्बर् २६

३३१. अक्षरस्य महिमा ह्येषः!

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः। बृहदारण्यकोपनिषत् ३-८-९

हे गार्गि, अक्षरस्य प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठतः।

अक्षरस्य महिमानम् अयं मन्त्रः उपदिशति। **अक्षर**मिति, न क्षरति इति। नाशरहितं परब्रह्मतत्त्वम्। देशकालाभ्याम् अपरिच्छिन्नः परमेश्वर एव **अक्षरम्**। समस्तस्यापि विश्वस्य जन्मस्थितिलयकारणभूतं परतत्त्वम् **अक्षरम्** इति कथ्यते। नामरूपक्रियारहितं परिपूर्णं तत्त्वम् **अक्षरम्**॥

अस्य अक्षरस्य प्रशासने एव ग्रहनक्षत्रादयः स्वव्यापारान् कुर्वन्ति। सूर्यश्च चन्द्रमाश्च अस्य अक्षरस्य शासने एव जीवतः। सूर्यो नाम किं सामान्या देवता? ग्रहराजो हि सूर्यः? सूर्यो नाम प्रकाशदेवता! सूर्यो नाम विश्वप्रकाशिका मङ्गळदेवता! जगद्वन्द्यदेवो हि सूर्यः! यदि एकस्मिन् दिने सूर्यो नोदेति न च प्रकाशयति, तदा सर्वमन्धकारमयं जगत्। अथ चन्द्रनारायणः अयमपि मङ्गळदेव एव। अक्षराधीनौ एव सोमसूर्यौ स्वव्यापारं कुरुतः। अक्षरमेव सूर्यस्यापि सूर्यः। ज्ञातो वा अक्षरस्य महिमा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विषयपराङ्मुखाय वेदान्तभास्कराय नमः॥

शब्दादयो हि विषयाः दुःखरूपा भयप्रदाः।
मृत्युरेव फलं तत्र नूनं **वेदान्तभास्करः**॥

शब्दादयो विषयाः दुःखरूपाः भयप्रदाश्च। तत्र फलं तु नूनं मृत्युरेव॥

नवेम्बर् २७

३३२. बाला एवैते

पराचः कामान् अनुयन्ति बालाः। ते मृत्योर्यन्ति विततस्य पाशम्॥ काठकोपनिषत् २-१-२

बहिर्मुखान् एव भोगान् अनुसृत्य गच्छन्तो बालकाः तत्र विततस्य मृत्योः पाशम् यन्ति।

स्वस्मिन्नेव विद्यमानं स्वाभाविकमानन्दम् अजानन् सर्वो मनुष्यः बाह्यविषयेष्वेव निरतः। बाह्यविषयप्रवृत्तिर्हि मानवानां सहजो दोषः। अस्मात् सुखं लभ्येत, तस्माद आनन्दः प्राप्येत इति भ्रान्त्या सर्वेऽपि मानवाः सर्वदापि विषयसङ्ग्रहे विषयभोगेषु च निरताः। ईदृशान् अविवेकिनः अयं मन्त्रः "बालाः" इति व्यपदिशति। बालाः नाम अज्ञाः, अविवेकिनः, मन्दाः,मूढाः, मूर्खाः इत्यर्थः॥

मात्रा दत्तानि खाद्यानि मधुरभक्ष्यादीनि तिरस्कृत्य, गृहाद् बहिरागत्य, पथिषु धावित्वा तत्र वाहनादिषु संलग्नाः अपघातहताः सन्तः यथा बालाः दुःखभाजो भवन्ति, एवमेव वयोवृद्धा अपि बालस्वभावा एव अज्ञाः बाह्यान् कामान् अनुवर्तमानाः तत्र आनन्दम् अलब्ध्वा दुःखमेव अनुभवन्ति। आत्माज्ञानिनो बाला एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अक्षरतत्त्वविदे वेदान्तभास्कराय नमः॥

अक्षरस्य परिज्ञानात् सर्वज्ञत्वं प्रपद्यते।
सर्वात्मकत्वं प्राप्नोति सत्यं **वेदान्तभास्करः**॥

अक्षरस्य परिज्ञानात् मानवः सर्वज्ञत्वं प्रपद्यते, सर्वात्मकत्वं च सत्यं प्राप्नोति।

नवेम्बर् २८

३३३. 'अक्षर'ज्ञानात् सर्वज्ञत्वम्

तदक्षरं वेदयते यस्तु सौम्य, स सर्वज्ञः सर्वमेवाविवेश इति।

प्रश्नोपनिषत् ४-११

हे सौम्य, सौर्यायणिगार्ग्य, यस्तु नरः तदक्षरं वेदयते सः सर्वज्ञो भूत्वा सर्वमपि स्वयमेव भवति।

'अक्षरं' नाम नाशरहितं परब्रह्मतत्त्वम्। अक्षरमेव अस्माकं निजस्वरूपम्। ब्रह्मादिपिपीलिकापर्यन्तानां सकलप्राणिनां निज-स्वरूपमेतदक्षरम्। अक्षरतत्त्वजिज्ञासोः साधकस्य मनः परिशुद्धं परिपक्वं च भवेत्। विवेकः, वैराग्यं, शमादयः, मुमुक्षुत्वं च— इत्येवंरूपैः चतुर्भिः साधनैः सम्पन्नेन भाव्यं तत्त्वजिज्ञासुना। एतादृशेन मुमुक्षुणा साधकेनैव हि अक्षरस्वरूपम् अधिगम्यते॥

मनोबुद्धिचित्ताहंकाराणां विज्ञानात्मनां च आधारभूतम् अक्षरमेव। अक्षरादेव विश्वमिदं जातम्, अक्षरे एव स्थितं सत्, अक्षरे एव लीयते। अक्षरमेवाहमिति यो जानाति सः सर्वोऽपि भवति। ज्ञानात् पूर्वमपि सर्वज्ञः सर्वश्च सन् अपि, अविद्यया स्वयम् असर्वज्ञ इव आसीत्। अपि तु इदानीम् विद्योदयेन अविद्यायाः निवृत्तत्वात् स्वयं सर्वज्ञः सर्वश्च भूत्वा अक्षरमेवाहस्मीति विजानाति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं विधूतपुण्यपापाय वेदान्तभास्कराय नमः॥

यदा वेत्ति परं ब्रह्म ह्यात्मत्वेन मुनिस्तदा।
पुण्यपापविनिर्मुक्तः भवेत् **वेदान्तभास्करः**॥

मुनिः परं ब्रह्म आत्मत्वेन यदा वेत्ति, तदा पुण्यपापविनिर्मुक्तो भवेत्।

नवेम्बर् २९

३३४. ज्ञानेन पुण्यपापयोः प्रध्वंसः!

तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।

मुण्डकोपनिषत् ३-१-३

विद्वान् तदा पुण्यपापे विधूय निरञ्जनः परमं साम्यम् उपैति।

जीवात्मनः पुण्यपापे बन्धकभूते। पत्नीं, पुत्रं, गृहं, धनं, धान्यं, कीर्तिं, मानापमाने, अन्नं, जलं च यथाकथञ्चित् साधकः त्यजेत्। अपि तु अहो! पुण्यपापे न कथञ्चिदपि एषः त्यजेत्। अयं साधकः पुण्यपापे स्वयं परिहरेत्, नैव तु ते पुण्यपापे इमं साधकं त्यजेताम्। पुण्यपापयोः सम्बन्धः अस्य रक्तगतः। न हि। अस्थिगतोऽस्ति! पुण्यपापाभ्यामेव अस्य बन्धनप्राप्तिः। पुण्यपाप-विमोचनं न सुलभम्। न च सर्वथा असाध्यमेव। अस्त्यत्र सुलभोपायः। स एव आत्मज्ञानाख्यो राजमार्गः॥

विवेकविज्ञानेन आत्मनः नैजस्वरूपे अवगते सति पुण्यपापे विधूते भवतः। अविद्ययैव हि पुण्यपापाख्यसर्पपीडा। आत्मज्ञानाख्य गरुडदर्शनमात्रेणैव पुण्यपापयोः परिहारः। पुण्यपापे भस्मीभवतः। पुण्यपापात्यय एव परमसाम्यस्यस्थितिः जीवन्मुक्तिश्च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'नाम'रहस्यविदे वेदान्तभास्कराय नमः॥

नाम्नो नित्यस्य नाशोऽस्ति नैव लोके कदाचन।
नाम ब्रह्मेत्युपासीत धीरो **वेदान्तभास्करः**॥

नित्यस्य नाम्नो, लोके कदाचन नाशो नास्ति। अतो धीरो 'नाम ब्रह्म' इति उपासीत॥

नवेम्बर् ३०

३३५. नाम्नो महिमा त्वेषः

यत्रायं पुरुषो म्रियते किमेनं न जहाति इति, नामेति।

बृहदारण्यकोपनिषत् ३-२-१२

यदा पुरुषो म्रियते तदा एनं किं न जहाति? इति। नाम इति।

जारत्कारवः आर्तभागः याज्ञवल्क्यं पप्रच्छ ''यदा अयं पुरुषो म्रियते, तदा एनम् अत्यजत् किम् अनुसरति?'' इति। शरीरं मृत्वा गच्छति, भस्मीभवति अथवा मृदि सम्पद्यते। इन्द्रियाणि मनश्च नश्यन्ति। किं तत् तर्हि यत् अनश्यत् अनुवर्तते?

'नाम' अनुसरति इति याज्ञवल्क्यः प्रतिवदति। नामैव नामधेयम्। मनुष्ये मृतेऽपि तस्य 'नाम' तु अमृतं सत् अनुवर्तते एव। अभिधेयस्यैव नाशः, न तु अभिधानस्य नाशः। अभिधानं नित्यम्, अभिधेयं तु अनित्यम्। नाम अनन्तं ब्रह्मापि अनन्तम्। तस्मात् 'नाम ब्रह्म' इति उपासीनस्य अनन्तफलानि भवन्ति। विश्वे देवा अनन्ताः, नामानि च अनन्तानि। तस्मात् नामानि विश्वेदेवत्वेन उपासीत। नामनामिनोर्मध्ये नाम नित्यम्। नामी तु अनित्यः। तस्मात् नामैव ब्रह्म। अयं नाम्नो महिमा ज्ञातो वा?

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आनन्दमयात्मतत्त्वविदे वेदान्तभास्कराय नमः॥

विज्ञानमय आत्मायं बुद्ध्युपाधिक उच्यते।
आनन्दमय आत्मा तु परो **वेदान्तभास्करः**॥

बुद्ध्युपाधिकः अयम् आत्मा विज्ञानमयः उच्यते। ततोऽपि परः आनन्दमयः आत्मा भवति॥

डिसेम्बर् १

३३६. अयमेव, आनन्दमयः आत्मा

तस्माद्वा एतस्मात् विज्ञानमयात्। अन्योन्तर आत्मा आनन्दमयः। तेनैष पूर्णः॥ तैत्तिरीयोपनिषत् २-५-३

तस्माद् एतस्माद् विज्ञानमयादात्मनः अन्यः अन्तरतरः आत्मा आनन्दमयः। तेनैव एषः पूर्णः॥

अन्नमय प्राणमय मनोमय विज्ञानमय आनन्दमयाख्यान् पञ्च आत्मनः अनुवदति एषा उपनिषत्। "**पञ्चकोशाः**" इति व्यपदिश्यन्ते एते। पूर्वस्मात् पूर्वस्मात् आत्मनः उत्तरोत्तरः आत्मा सूक्ष्मः व्यापकः अन्तरतरश्च भवति॥

प्रकृते तु, विज्ञानमयः आत्मा बुद्धिमयः। विज्ञानमयः आत्मा मनोमयस्याप्यात्मनः प्रत्यगात्मभूतः। अस्माद् विज्ञानमयादप्यात्मनः सूक्ष्मतरो हि आनन्दमयात्मा। सकलकर्मणांफलं नाम आनन्द एव। आनन्दप्रचुरोऽयमानन्दमयः आत्मा पूर्वेषां चतुर्णामपि कोशानामात्मभूतः। सत्यमेवैतत्। अपि तु अयमानन्दमयोऽप्यात्मा अनात्मैव। यतो हि आनन्दमयः आत्मा पञ्चकोशेषु अन्यतम एव। परं ब्रह्मैव तु प्रत्यगात्मभूतम्। पञ्चकोशविलक्षणः प्रत्यगात्मा एव परिशुद्धः परिपूर्णश्च आत्मा भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सदात्मज्ञाननिष्ठाय वेदान्तभास्कराय नमः॥

आत्मध्यानपरो नित्यम् बाह्यचिन्तनवर्जितः।
विवेकी प्राप्नुते मोक्षं नित्यं **वेदान्तभास्करः**॥

बाह्यचिन्तनवर्जितः नित्यम् आत्मध्यानपरो विवेकी मोक्षमश्नुते।

डिसेम्बर् २

३३७. मुक्तिसेतुः अयम् !

तमेवैकं जानथ आत्मानम्, अन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः। मुण्डकोपनिषत् २-२-५

तमात्मानम् एकमेव जानथ, अन्याः वाचो विमुञ्चथ, एष एव अमृतस्य सेतुः॥

एष मन्त्रः अध्यात्मसाधकानां **पथ्यम्** उपदिशति। आयुर्वेदशास्त्रे आरोग्यप्राप्त्यर्थं **पथ्यम्** उपदिश्यते खलु? पथ्यस्य द्वे मुखे, कर्तव्यं मुखम् एकम्, त्याज्यं मुखम् अपरम्। एवमेव वेदान्ते अपि साधकानां मन्तव्यं त्यक्तव्यं च इति साधनद्वयम् उपदिश्यते। ईदृशम् आध्यात्मिकं पथ्यम् अनुसरतां साधकानाम् आत्मज्ञानं सुनिश्चितं नूनं जायते॥

किं तत् पथ्यम्? प्रथमतः आत्मा एव विज्ञातव्यः। अवस्थात्रयव्यापकम् अद्वितीयम् आत्मानमेव साधकः अनुपश्येत्। आत्मन एव इदं विश्वम् जातम् इत्येतत् विवेकेन जानीयात्। द्वितीयतः सर्वान् अनात्मनः त्यजेत्। अपराविद्यासम्बद्धान् सर्वानपि अनात्मविचारान् त्यजेत्। अनेन क्रमेण आत्मज्ञानोदयो भवति। आत्मविज्ञानात् अमृतत्वं मोक्षः लभ्यते। एवम् अनात्मविषय-चिन्तनत्यागपूर्वकम् आत्मज्ञानं मुक्तिसेतुरिव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शान्तात्मस्वरूपविदे वेदान्तभास्कराय नमः॥

मनोरूपाणि कुर्वीत वागादीनीन्द्रियाण्यपि।
मनः सूत्रे च तं शान्ते धीरो **वेदान्तभास्करः**॥

धीरो वागादीनि इन्द्रियाणि मनोरूपाण्येव कुर्यात्। मनश्च सूत्रात्मनि, सूत्रात्मानं च शान्ते आत्मनि संयच्छेत्॥

डिसेम्बर् ३

३३८. अध्यात्मयोगस्य रहस्यमिदम्!

यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेत् ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत्, तद्यच्छेत् शान्त आत्मनि॥

काठकोपनिषत् १-३-१३

साधकः वागिन्द्रियं मनसि उपसंहरेत्। तन्मनः महति आत्मनि नियच्छेत्। तं महान्तमात्मानं शान्ते आत्मनि उपसंहरेत्॥

देहेन्द्रियमनोबुद्धीः प्रत्यगात्मनि उपसंहरेत्। ईदृशः **अध्यात्मयोगः** उपदिष्टोऽत्र। इदं शरीरम् अचेतनम्, पञ्चभूतकार्यं च। इन्द्रियैरेव अयं देहः सर्वथा व्याप्तः। इन्द्रियैरेव हि देहस्य अस्तित्वम्? तानि सर्वाणीन्द्रियाणि मनअधीनानि भवन्ति। मनसि सत्येव शरीरस्य इन्द्रियाणां च अस्तित्वम्। मनसः अभावे सर्वं निरर्थकमेव। इदं च मनः बुद्धितन्त्रम्। बुद्धिअधीनतया एव मनः स्वव्यापारं करोति। मनसः स्वतन्त्रास्तित्वं नास्ति। बुद्धितन्त्रमेव मनः एषा व्यष्टिरूपा बुद्धिरपि समष्टिबुद्धिरूपस्य हिरण्यगर्भस्य अंश एव। सः हिरण्यगर्भश्च प्रत्यगात्मनः आविर्भाव एव। 'स प्रत्यगात्मा अहमेव' इति विवेकपुरस्सरम् अनुचिन्तनमेव अध्यात्मयोगस्य रहस्यम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मोहरहिताय वेदान्तभास्कराय नमः॥

अविद्याकल्पितं देहं ह्यात्मानं परिगृह्य वै।
शोकमोहनिमग्नोऽसौ मन्दो **वेदान्तभास्करः**॥

अविद्याकल्पितं देहमेव आत्मानं परिगृह्य असौ मन्दः शोकमोहसागरनिमग्नोऽस्ति।

डिसेम्बर् ४

३३९. जीवात्मनः कीदृशी दुःस्थितिः!

समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः।

मुण्डकोपनिषत् ३-१-२

समाने वृक्षे निमग्नः पुरुषः मुह्यमानः अनीशया शोचति।

जीवस्य दुःखमयीं स्थितिम् अयं मन्त्रः अतिसुन्दरतया दर्शयति। जीवात्मपरमात्मानौ उभावपि अस्मिन्नेव समाने शरीरे वृक्षे वसतः। परमात्मा निर्लिप्तत्वात् असंसारी सन् साक्षिरूपेण वर्तते। जीवात्मा तु अनीशया अविद्यया शोकसागरनिमग्नः॥

'अनीशा' नाम दीनभावः। अविद्याकृता दैन्यस्थितिरेव हि 'अनीशा' नाम। तद्यथा—अहं रुग्णः, अहं दुर्बलः, अहं वृद्धः, मम न कोऽप्यस्ति सहायकः, अहम् एकाकी किं वा कुर्याम्? मम ईदृशी स्थितिः आगता खलु? अहो! न कोऽपि मां पश्यति—इत्यादिभावना एव अनीशा। देहात्मज्ञानमेव अनीशायाः हेतुः। '**देहात्मभावम् आपन्नः**' इति शाङ्करं भाष्यम्। '**अविद्याकाम-कर्मफलरागादिगुरुभाराक्रान्तः**' इति च श्रीशङ्करभगवत्पादाचार्याणां विवेचनम्!! अनीशया मुह्यमानः जीवोऽयं सर्वदा शोकसागरनिमग्नः। इयमेव **जीवस्य** दुःस्थितिर्नाम!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् आत्मज्योतिर्विदे वेदान्तभास्कराय नमः॥

आत्मैवास्य परं ज्योतिः सूर्यचन्द्रादयो न हि।
आत्मनैव क्रियाः सर्वाः इति **वेदान्तभास्करः**॥

आत्मैव अस्य जीवस्य परं ज्योतिः, न तु सूर्यचन्द्रादयः। आत्मनैव सर्वाः क्रिया भवन्ति॥

डिसेम्बर् ५

३४०. आत्मैव नूनं ज्योतिः

आत्मैव अस्य ज्योतिर्भवतीति, आत्मनैव अयं ज्योतिषा आस्ते पल्ययते कर्म कुरुते विपल्येतीति।

बृहदारण्यकोपनिषत् ४-३-६

आत्मैव अस्य जीवस्य ज्योतिः भवति। आत्मना एव ज्योतिषा अयं जीवः आस्ते, पल्ययते, कर्म कुरुते, विपल्येति॥

ज्योतिर्ब्राह्मणे अयमेको मन्त्रः। अस्य जीवात्मनः ज्योतिः कः? इति जनकेन पृष्टः याज्ञवल्क्यः 'सूर्य एव ज्योतिः' इति उपदिदेश। 'सूर्ये अस्तमिते सति किं ज्योतिः?' चन्द्रः। चन्द्रमसि अस्तमिते? अग्निः। अग्नेरप्यभावे किं ज्योतिः? वाक्। वाचि शान्तायां किं ज्योतिः? इति जनकप्रश्नस्य उत्तरत्वेन याज्ञवल्क्यः इमं मन्त्रम् उपदिदेश॥

आत्मैव प्रकाशः, आत्मैव ज्योतिः। सुषुप्ते नैव बाह्यानि ज्योतींषि विद्यन्ते, न च इन्द्रियमनांसि तत्र विद्यन्ते। आत्मा तु अस्त्येव तत्रापि। आत्मचैतन्यज्योतिषा एव अयं कार्यकरणसङ्घातः स्वव्यापारं करोति। सूर्याचन्द्रमसोः अग्निनक्षत्रादीनामपि आत्मैव ज्योतिः। अयमात्मा एव अस्माकं पारमार्थिकं स्वरूपम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मचर्यनिष्ठाय वेदान्तभास्कराय नमः॥

सत्येन तपसा चैव शास्त्रज्ञानबलेन च।
ब्रह्मचर्येण लभ्योऽयम् आत्मा **वेदान्तभास्करः**॥

सत्येन तपसा शास्त्रज्ञानबलेन ब्रह्मचर्येण च अयम् आत्मा लभ्यः।

डिसेम्बर् ६

३४१. ज्ञानप्राप्त्यै साधनानि इमानि

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।

मुण्डकोपनिषत् ३-१-५

सत्येन तपसा सम्यग्ज्ञानेन नित्यं ब्रह्मचर्येण च एष आत्मा लभ्यः।

आत्मज्ञानप्राप्त्यै साधनानि च उपनिषत्सु उपदिष्टानि सन्ति। ज्ञानप्राप्त्यै अन्तःकरणशुद्धिः अत्यन्तमुख्या। मनसि शुद्धे सति आत्मज्ञानप्राप्तिमार्गः सुलभो भवति॥

अस्तु, चित्तशुद्ध्यर्थं किं कर्तव्यम्? इति चेत्। उच्यते। सत्यवचनम्, इन्द्रियनिग्रहः, विवेकज्ञानम्, ब्रह्मचर्यं च अनुष्ठातव्यम्। सत्यं नाम अनृतवर्जनम्। अनृतवचनं कष्टमेव, यतः पौर्वापर्यालोचनेनैव विचार्य, विमृश्य अनृतं वक्तव्यं भवति। एकम् अनृतं वक्तुं, तत्पूर्वभावितया तद् अनृतवचनम् समर्थयितुं, दश अनृतानि चिन्तयित्वा योजनीयानि भवन्ति। अनृतवचनानां जनानाम् आत्मज्ञानप्राप्तिर्वा? आत्मज्ञानस्य गन्धोऽपि नास्ति। इन्द्रियनिग्रहः, सद्गुरुसेवा, ब्रह्मचर्यादीनि चित्तशुद्धिसाधनानि भवन्ति। आत्मज्ञानप्राप्त्यै चित्तशुद्धिः अपेक्ष्यते एव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नानात्वदर्शनरहिताय वेदान्तभास्कराय नमः॥

अद्वये ब्रह्मतत्त्वे हि यस्तु भेदं प्रपश्यति।
मृत्योः स मृत्युमाप्नोति सत्यं **वेदान्तभास्करः**॥

अद्वये ब्रह्मणि यः भेदं सत्यं प्रपश्यति, सः मृत्योः मृत्युम् आप्नोति।

डिसेम्बर् ७

३४२. भेददर्शनेन कीदृशो अनर्थः?

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।

काठकोपनिषत् २-१-१०

इह परिपूर्णे आत्मनि यः नाना इव पश्यति सः मन्दः मृत्योः उपरि मृत्युम् आप्नोति।

आत्मा परिशुद्धः परिपूर्णः अद्वितीयः अखंडचिन्मात्रश्च। अस्मिन् आत्मनि कश्चिदपि विभागो नास्ति, कश्चिदपि भेदो नास्ति। एवंविदेव आत्मज्ञानी। एवंविदः जन्म वा मरणं वा नास्ति, जन्मान्तरं तु नास्त्येव॥

एवम् आत्मानम् अजानन्, जाति-वर्ण-आश्रम-नामरूप-गोत्रादीन् भेदान् आत्मन्यपि यः सत्यं पश्यति सः अज्ञः, सः मन्दः। अस्य अज्ञानस्य फलं किम्? इति चेत्, मृत्योः उपरि मृत्युप्राप्तिरेव फलं भवति। पुनः पुनः जन्ममरणसंसारचक्रे गृहीतः दुःखी भवति। नाना '**इव**' पश्यति इति 'इव'शब्दं प्रयुङ्क्ते अयं मन्त्रः। 'इव' इति सत्यमिव दृश्यते इत्यर्थः। परमार्थतस्तु अविद्याकालेऽपि आत्मनि भेदो नास्त्येव। अवभासनदशायामपि भेदो नास्ति इत्यर्थः। भेददर्शनं तु मिथ्यादर्शनमेव। भेददर्शनेन अनर्था जायन्ते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पराक्षरस्वरूपविदे वेदान्तभास्कराय नमः॥

एष द्रष्टा च कर्ता च संसारी जीवसञ्ज्ञकः।
परमेवाक्षरं ब्रह्म नूनं **वेदान्तभास्करः**॥

द्रष्टा कर्ता च जीवसञ्ज्ञकः एषः संसारी नूनं परमेव ब्रह्म अक्षरम्।

डिसेम्बर् ८

३४३. आत्मा एक एव, नामानि अनेकानि

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। स परेऽक्षरे आत्मनि सम्प्रतिष्ठते॥

प्रश्नोपनिषत् ४-९

एष एव एक आत्मा द्रष्टा, स्प्रष्टा, श्रोता, घ्राता, रसयिता, मन्ता, बोद्धा, कर्ता, विज्ञानात्मा पुरुषः। सः पुरुषः परे अक्षरे आत्मनि सम्प्रतिष्ठते॥

अद्वितीयः परमात्मा एव उपाधिभेदेन नानारूपेण अवभासते। जीवात्मरूपेण दृश्यमानोऽपि अयं परमात्मा एव। न हि जीवात्मा परमात्मा इति परमार्थत एव द्वौ आत्मानौ स्तः। आत्मा एक एव, नामरूपोपाधयस्तु भिन्नविभिन्नाः॥

एक एव आकाशः घटाकाशः, करकाकाशः, महाकाश इव; एक एव कार्पासो नानाविधवस्त्ररूपेण इव; एकमेव सुवर्णम् अङ्गुळीयकम्, चूडामणिः, केयूरम्, कुण्डलम्, हार इव यथा दृश्यते; एवमेव एक एव आत्मा कर्ता, द्रष्टा, गन्ता, श्रोता इत्यादिरूपेण अवभासते। उपाधिभेदेनैव आत्मनः नानानामानि नाना रूपाणि च। परमार्थतस्तु इदं सर्वम् आत्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मविद्वरिष्ठाय वेदान्तभास्कराय नमः॥

आत्मन्येव रतिर्यस्य न तु बाह्येषु वस्तुषु।
आत्मनिष्ठो ब्रह्मनिष्ठः ज्ञानी **वेदान्तभास्करः**॥

यस्य आत्मन्येव रतिः, न तु बाह्येषु वस्तुषु, स एव आत्मनिष्ठः, ब्रह्मनिष्ठः, ज्ञानी च॥

डिसेम्बर् ९

३४४. एषः ब्रह्मविद्वरिष्ठः!

आत्मक्रीडः आत्मरतिः क्रियावान् एष ब्रह्मविदां वरिष्ठः।

मुण्डकोपनिषत् ३-१-४

आत्मक्रीडः आत्मरतिः आत्मक्रिय एव ब्रह्मविदां वरिष्ठः॥

ब्रह्मज्ञानी नाम कः? सः द्वैतव्यवहारं अस्मद्वदेव करोति वा न वा? इति अनेके पृच्छन्ति। ईदृशानां प्रश्नानां प्रतिवचनं ददाति अयं मन्त्रः॥

आत्मक्रीडः आत्मरतिः आत्मक्रियश्च यः असौ एव ज्ञानिपुङ्गवः। एतानि त्रीण्यपि लक्षणानि स्वानुभवगम्यान्येव। आत्मज्ञानी अपि अज्ञानिवदेव सर्वव्यवहारान् यद्यपि करोति, तथापि सर्वे ते व्यवहाराः केवलम् आभासमात्रा एव, नाटकमात्रा एव, चेष्टामात्रा एव भवन्ति। अज्ञानिनां तु सत्या भवन्ति। इयानेव विशेषः॥

ज्ञानी नाम आत्मक्रीडः आत्मरतिश्च भवति। न हि ज्ञानिनः अनात्मवस्तुषु आसक्तिर्वा रतिर्वा सम्भवेत्। आनन्दस्वरूपस्यैव सतः आत्मज्ञानिनः सुखाभासे आसक्तिः भवेद्वा? सदा अमृतमेव पिबतः सामुद्रं जलं पातुम् इच्छा भवेद्वा? परमार्थतस्तु आत्मनः भिन्नतया द्वैतप्रपञ्चो नाम ज्ञानिनः नैवास्ति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शुष्कपांडित्यविदूराय वेदान्तभास्कराय नमः॥

वेदाध्ययनमात्रेण शास्त्रार्थज्ञानमात्रतः।
नरो जानाति नात्मानम् परं **वेदान्तभास्करः**॥
वेदाध्ययनमात्रेण शास्त्रार्थज्ञानमात्रतः नरः आत्मानं न जानाति।

डिसेम्बर् १०

३४५. आत्मा न शुष्कबुद्धिगम्यः

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।

मुण्डकोपनिषत् ३-२-३

अयम् आत्मा प्रवचनेन न लभ्यः, मेधया न लभ्यः, बहुना श्रुतेनापि न लभ्यः।

साधकेषु केचित् अधीतशास्त्राः, अपरे प्रवचनपटवः, अन्ये तु केचित् महामेधाविनो भवन्ति। वयं ज्ञानिनः इति एते मन्यन्ते। एतादृशेभ्यः शुष्कपण्डितेभ्यः अयं मन्त्रः जागरणसन्देशम् उपदिशति ''नैतेन कतमेनापि आत्मा ज्ञातुं शक्यते'' इति॥

प्रवचनं नाम बाहुल्येन वेदशास्त्राध्ययनम्। चतुर्णामपि वेदानाम्, अनेकेषां शास्त्राणाम्, अष्टादशपुराणानाम् अध्ययन-सामर्थ्यं हि प्रवचनं नाम। नैतत् सुलभसाध्यम्! अत्यन्तकष्टकरमेव साधनमेतत्। भवतु नाम, नैतावता केवलेन आत्मज्ञानं लभ्यते। अथ मेधासामर्थ्यम्! एकदा पठितानां ग्रन्थानाम् अर्थधारणं हि मेधा। इदमपि अद्भुतमेव। अपि तु नानेनापि आत्मज्ञानोदयः। बहुना श्रुतेनापि, शास्त्रप्रवचनैः केवलैः श्रूयमाणैरपि आत्मज्ञानं नोदेति। शमदमादिसाधनसम्पन्नैरेव मुमुक्षुभिः आत्मा विज्ञातुं शक्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् अन्तर्यामिरहस्यज्ञाय वेदान्तभास्कराय नमः॥

पञ्चभूतेषु संतिष्ठन् पञ्चभूतविलक्षणः।
पञ्चभूतात्मसारोऽन्तर्यामी **वेदान्तभास्करः**॥

पञ्चभूतेषु संतिष्ठन् अपि पञ्चभूतविलक्षणः पञ्चभूतात्मा, पञ्चभूतसारः यः स एव अन्तर्यामी॥

डिसेम्बर् ११

३४६. अन्तर्यामिणः स्वरूपम्

योऽप्सु तिष्ठन्, योऽग्नौ तिष्ठन्, योऽन्तरिक्षे तिष्ठन्, यो वायौ तिष्ठन्, यो दिवि तिष्ठन्, यः आदित्ये तिष्ठन्, यो दिक्षु तिष्ठन्, यश्चन्द्रमसि तिष्ठन्, यस्तारके तिष्ठन्, यः आकाशे तिष्ठन्, यस्तमसि तिष्ठन्, यस्तेजसि तिष्ठन्, ...अन्तरो यमयति, एष ते आत्मा अन्तर्यामी अमृतः।

बृहदारण्यकोपनिषत् ३-७-४ तः १४

*यः अप्सु तिष्ठन्, अग्नौ तिष्ठन्, अन्तरिक्षे तिष्ठन्, यः वायौ तिष्ठन्, दिवि तिष्ठन्, आदित्ये तिष्ठन्, दिक्षु तिष्ठन्, यः चन्द्रमसि तिष्ठन्, तारके तिष्ठन्, आकाशे तिष्ठन्, यः तमसि तिष्ठन्, तेजसि तिष्ठन्, अन्तरः सन् सर्वान् यमयति एषः ते आत्मा **अन्तर्यामी** अमृतः॥*

अन्तर्यामिस्वरूपस्य आत्मनः लक्षणम् अत्यन्तं सुन्दरतया अयं मन्त्रः उपदिशति। योऽसौ आत्मा आकाशादिपञ्चभूतानि, भूरादिसकललोकान्, सूर्यचन्द्रनक्षत्रादीनि च स्वाधीनानि कुर्वन् स्वसामर्थ्येन यमयन्, तेषामन्तरो वसति, स एव **अन्तर्यामी**। प्रमाणागोचरः आत्मा ह्ययम्। परं ब्रह्मैव अन्तर्यामी इति कथ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं सूर्यचन्द्रादिविभासकाय वेदान्तभास्कराय नमः॥

सूर्यतारादयो देवाः यन्न भान्ति स्वतेजसा।
यत् स्वयं भाति तान् सर्वान् ब्रह्म **वेदान्तभास्करः**॥

सूर्यतारादयो देवाः स्वतेजसा यत् न भान्ति, यत् स्वयंप्रकाशं सत्, तान् सर्वान् भाति तदेव ब्रह्म॥

डिसेम्बर् १२

३४७. सूर्यादीनामपि अशक्यमेव

न तत्र सूर्यो भाति न चन्द्रतारकम्
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति॥

काठकोपनिषत् २-२-१५

तद् ब्रह्म सूर्यो न भाति, चन्द्रतारकं न भाति, इमाः विद्युतो न भान्ति, अयम् अग्निस्तु तं कथ भाति? स्वयभान्तं तमेव आत्मान अनुसृत्य सर्वं भाति। तस्यैव भासा इद सर्वं विभाति।

प्रभाते सूर्यः, रात्रौ तु चन्द्रनक्षत्रादयः इमं प्रपञ्चम् प्रकाशयन्ति इति खलु वय सर्वेऽपि जानीमः। नेदं मतं साधु भवति। सूर्यादीनामपि आत्मत्वेन चैतन्यात्मकः प्रकाशकः अन्यः अस्ति। तम् आत्मानं सूर्यो वा चन्द्रनक्षत्राण्यादीनि वा नैव प्रकाशयेयुः॥

आत्मा तु स्वयं चिन्मात्रः, स्वयंप्रकाशः सन् सर्वानपि अवभासयति। अग्निना तप्तं हि अयःपिण्डं अन्यान् दहति प्रकाशयति च। न तु स्वतः अयःपिण्डस्य दहनप्रकाशनसामर्थ्यम् अस्ति। तथैव चिन्मात्रस्वरूप एव आत्मा सर्वमिदम् अवभासयति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओम् 'अद्वैत'ब्रह्मविदे वेदान्तभास्कराय नमः॥

अद्वैतः परमो ह्यात्मा अद्वैतं ब्रह्म निर्गुणम्।
अद्वैतं जगदेतच्च नूनं **वेदान्तभास्करः**॥

परमात्मा अद्वैतः, निर्गुणं ब्रह्म अद्वैतम्, एतत् जगच्च अद्वैतमेव॥

डिसेम्बर् १३

३४८. 'वेदान्ते'षु 'अद्वैतम्'

सलिल एको द्रष्टा अद्वैतो भवति, एष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्यः।

बृहदारण्यकोपनिषत् ४-३-३२

सलिलवत् आत्मा द्रष्टा सन् अद्वैतः। हे सम्राट्, एष एव ब्रह्मलोकः, इति एनं जनकं राजानम् अनुशशास याज्ञवल्क्यः॥

अस्मिन् मन्त्रे '**अद्वैत**'शब्दः श्रूयते। 'अद्वैतः' इति आत्मनो विशेषणम्। **अद्वैत**स्वरूपो हि आत्मा। न हि अद्वैतं नाम मतं वा सिद्धान्तो वा भवितुमर्हति। जलवत् आत्मा एकस्वरूपः। तोयं सर्वत्रापि एकस्वरूपमेव। स्वभावेन शुद्धमेव सलिलं नाम। आत्मा अपि सलिलवत् अत्यन्तशुद्धः निर्मलश्च। उपाधिसम्बन्धादेव हि सलिले मलिनता सम्भवति। एवमेव नित्यशुद्धे अद्वैते आत्मनि अविद्यया द्वैतम् इव अवभासते॥

अयमात्मा अभयः अमृतः **अद्वैत**श्च। सुषुप्तात्मनः स्वरूपम् अस्मिन् मन्त्रे उपदिश्यते। गाढनिद्रायां हि निरुपाधिकं स्वाभाविकं स्वरूपं विद्यते। अयमेव ब्रह्मलोकः। सुषुप्तिरेव अत्र ब्रह्मलोकः। ब्रह्मैव लोकः ब्रह्मलोकः। अस्मिन्नेवार्थे सुषुप्तिः ब्रह्मलोको भवति। जनकाय चक्रवर्तिने याज्ञवल्क्यस्य महर्षेः उपदेशोऽयम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राणापानादिसाक्षिणे वेदान्तभास्कराय नमः॥

प्राणापानावस्वतन्त्रौ आत्माधीनौ सदैव हि।
आत्मनैव हि तौ स्याताम् इति **वेदान्तभास्करः**॥

प्राणापानौ अस्वतन्त्रौ, सदापि आत्माधीनौ एव एतौ। यतः तौ आत्मना एव स्याताम्॥

डिसेम्बर् १४

३४९. प्राणापानावपि अस्वतन्त्रावेव

न प्राणेन नापानेन मर्त्यो जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ॥

काठकोपनिषत् २-२-५

प्राणेन वा अपानेन वा न कश्चन प्राणी जीवति। किं तु यस्मिन् एतौ प्राणापानौ प्रतिष्ठितौ स्तः, तेनैवात्मना सर्वे जीवन्ति॥

"प्राणापानाभ्यां वयं जीवामः इति, प्राणे निर्गते सति वयं म्रियामहे" इति च सर्वे जानन्ति। तस्मादेव कारणात् प्राणमेव आत्मानं मन्यन्ते सर्वे॥

नैषा साध्वी मतिः। यतो हि प्राणापानव्यानोदानसमाना वा इन्द्रियमनोबुद्धयो वा न स्वतन्त्राः। प्राणादयः सर्वेऽपि शरीरे संहताः सन्तः आत्मने, आत्मार्थं, आत्मनः सान्निध्ये व्याप्रियन्ते। अयमात्मा तु असंहतः सच्चिदानन्दस्वरूपः पारमार्थिकस्वरूपश्च। तेन आत्मना निमित्तभूतेनैव एतेषां प्राणादीनाम् अस्तिता। आत्मनैव प्राणादयो जीवन्ति। अयमेव प्रत्यगात्मा। एतमेव आत्मत्वेन यो विजानाति स एव धीरः, एष एव च ब्रह्मवित्। अयम् आत्मा अजः, अजरः, अमरः, अमृतः अभयः, अद्वयश्च॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गुहाहितात्मविदे वेदान्तभास्कराय नमः॥

स्वरूपं ब्रह्मनिष्ठानां दूरस्थं ह्यविवेकिनाम्।
प्रत्यगात्मस्वरूपं हि ब्रह्म **वेदान्तभास्करः**॥

प्रत्यगात्मस्वरूपं ब्रह्म ब्रह्मनिष्ठानां स्वरूपमेव, अविवेकिना तु दूरस्थमेव भाति॥

डिसेम्बर् १५

३५०. अतिदूरस्थम् अतिसमीपस्थं च

दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम्।

मुण्डकोपनिषत् ३-१-७

ब्रह्म दूरादपि दूरस्थमेव अज्ञानाम्, तथा विवेकिनाम् अन्तिके च। सम्यक् पश्यत्सु इहैव गुहाया निहित ब्रह्म॥

परमात्मा समीपे अस्ति वा दूरे वा? इतिप्रश्नस्य प्रतिवचनम् 'दूरे च अन्तिके चास्ति' इति। परमात्मानम् आत्मनः भिन्नभूतं कञ्चित् पदार्थं मन्यमानानां परमात्मा नाम ग्रहनक्षत्रादिभ्योऽपि अत्यन्तं दूरस्थ एव। अज्ञानादेव अविवेकिनः एवं मन्यन्ते॥

सम्यक् विजानतां तु ब्रह्म समीपस्थम् एव। न हि समीपे ब्रह्म भवति। किन्तु स्वस्मिन्नेव ब्रह्म भवति। नैतदपि साधु, स्वयमेव ब्रह्मस्वरूप एव। आकाशः अस्माकं दूरे वा समीपे वा? आकाशं कराभ्यां स्प्रष्टुं प्रयत्नं कुर्वतः आकाशः दूरे भवति, सुदूरे, अतिदूरे, दूरातिदूरे भवति; किन्तु आकाशो नाम किम्? इति विचारे कृते आकाशः समीपतम एव भवति। सर्वव्यापकः निरवयवः खलु आकाशः? आकाशस्यापि कारणभूतः, अन्तश्च बहिश्च विद्यमानः आत्मैव। आत्मस्वरूपवित् आत्मैव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं निर्भयात्मविदे वेदान्तभास्कराय नमः॥

महामत्स्यो यथा नद्यां स्वप्नजागरिते तथा।
निर्भयः सञ्चरत्येषः आत्मा **वेदान्तभास्करः**॥

नद्या महामत्स्यः निर्भयः सन् यथा सञ्चरति तथैव आत्मा स्वप्न जागरितयोः निर्भयः सञ्चरति॥

डिसेम्बर् १६

३५१. उभयत्रापि आत्मा निर्भयः

एवमेवायं पुरुषः एतौ उभौ अनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च। बृहदारण्यकोपनिषत् ४-३-१८

यथा महामत्स्यः, एवमेव अय पुरुषः स्वप्नान्त च बुद्धान्तं च एतौ उभौ अनुसञ्चरति॥

यथा महामत्स्यः नद्याम् पूर्वस्मात् तटात् पश्चिमं, पश्चिमाच्च तटात् पूर्वं तटं सहजतया निर्भयः सञ्चरति, एवमेव आत्मा अपि आयासं विना निर्भयः सन् जागरितात् स्वप्नम्, स्वप्नाच्च जागरितं सञ्चरति। अवस्थासम्बन्धरहितः असङ्गः आत्मा भवति॥

जागरितस्वप्नावस्थे परस्परविलक्षणे भवतः। जागरिते सति स्वप्नो नास्ति, स्वप्ने सति जागरितं नास्ति। जागरितोपाधयः स्वप्ने न सन्ति, स्वप्नस्थाः पदार्थाः अत्र जागरिते न भवन्ति। आत्मा तु निरायासः जागरितस्वप्नयोः उभयोरपि अवस्थयोः सञ्चरति। न केनापि स्थानेन सम्बद्धः अवस्थाद्वयप्रकाशकः स्वयमात्मा असङ्ग एव भवति। जाग्रदवस्थावतः आत्मनः स्वप्नसम्बन्धो नास्ति, स्वप्नं पश्यतः जागरितावस्थासङ्गश्च नास्ति। आत्मा तु सदा जागरित-स्वप्नोपाधिसम्बन्धरहित एव असङ्गः परिशुद्ध एव अवतिष्ठते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नित्यशान्तिस्वरूपाय वेदान्तभास्कराय नमः॥

शान्तिस्तेषां सुखं तेषां नैव तेषां भयं क्वचित्।
सत्स्वरूपात्मनिष्ठानाम् इति **वेदान्तभास्करः**॥

सदात्मस्वरूपनिष्ठानां तेषां परा शान्तिः, तेषामेव परं सुखम्; तेषां नैव क्वचिदपि कदाचिदपि भयं भवति॥

डिसेम्बर् १७

३५२. तेषामेव नित्यं सुखम्

तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां सुखं शाश्वतं नेतरेषाम्।
काठकोपनिषत् २-२-१२

स्वात्मस्थमेव तम् आत्मानं ये धीराः अनुपश्यन्ति तेषामेव शाश्वतं सुखम्, न तु इतरेषाम्॥

सर्वेणापि पुरुषेण नियततया अपेक्ष्यं फलं नाम **सुखम्**। अपि तु नैकेनापि पुरुषेण एकान्ततया प्राप्यमाणं फलं नाम **सुखमेव**। नैकेनापि नरेण अपेक्ष्यमाणम् अनिष्टफलं नाम **दुःख**मेव, सर्वेणापि अनुभूयमानं फलं नाम **दुःख**मेव। सर्वेषामस्माकं नित्यजीवने प्रतिक्षणमपि दृश्यमानो अनुभवोऽयम्॥

अस्तु तर्हि, सुखलाभाय किं कर्तव्यम्? इति चेत्, अत्रास्ति मृत्युदेवस्य दिव्यमङ्गळसन्देशः। स च 'आत्मानं विज्ञाय शाश्वतः आनन्दः' इति एष एव। आत्मा नाम कः? देहेन्द्रियादिभ्यः अन्तरतमो ह्यात्मा। नाशरहितः परिपूर्णस्वरूपः आत्मैव नः स्वरूपम्॥

अस्य आत्मनः ज्ञानं कथम्? शास्त्राचार्योपदेशम् अनुसृत्य, वेदान्तसन्देशान् अनुसृत्य आत्मनि विज्ञाते स्वयमेव प्रत्यगात्मा इति विज्ञायते। तदा दुःखनिवृत्तौ परमानन्दप्राप्तिर्भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं प्राज्ञात्मविदे वेदान्तभास्कराय नमः॥

सुषुप्तौ सम्परिष्वक्तः ह्यात्मना प्राज्ञरूपिणा।
न बाह्यं नान्तरं चापि वेद **वेदान्तभास्करः**॥

सुषुप्तौ प्राज्ञरूपिणा आत्मना सम्परिष्वक्तः सन् अयं जीवः बाह्यं न किञ्चन वेद, आन्तरमपि न किञ्चन वेद॥

डिसेम्बर् १८

३५३. प्राज्ञात्मसहवासफलम्

अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। बृहदारण्यकोपनिषत् ४-३-२१

प्राज्ञेन आत्मना सम्परिष्वक्तः सन् अयं पुरुषः न बाह्य किञ्चन वस्तु पश्यति, नान्तरं च किञ्चिदपि पश्यति॥

सुषुप्तिकाले च अयं जीवात्मा प्राज्ञात्मना सम्पन्नः एकीभवति। जागरितोपाधिना **वैश्वानरः**, स्वप्नोपाधिना **तैजसः**, सुषुप्त्युपाधिना **प्राज्ञश्च** एक एव आत्मा अवभासते। सुषुप्तस्य आत्मनः **प्राज्ञः** इति नामधेयं भवति। प्रकर्षेण जानाति इति प्रज्ञः, प्रज्ञ एव च **प्राज्ञः**। चिन्मात्रस्वरूपस्य आत्मनः **प्राज्ञः** इति नाम भवति॥

जीवः सुषुप्तौ प्राज्ञेन आत्मना सह एकीभवति। तदा अयं त्यक्तजागरितसम्बन्धः, त्यक्तस्वप्नसम्बन्धश्च भवति। अत एव तत्र अयमात्मा स्वस्मात् भिन्नं न किञ्चिदपि जानाति। केवलचिन्मात्रः सन् आत्मा स्वयम् अद्वितीयस्वरूपो भवति। तत्र इष्टानिष्टे पुण्यपापे अतीत्य प्रत्यगात्मनि सहजस्वरूपे एव वर्तते। सुषुप्तेः आनन्दोऽयम्। प्राज्ञात्मसहवासफलमिदम् !!

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं गूढात्मविदे वेदान्तभास्कराय नमः॥

सर्वभूतेषु गूढोऽपि ह्यात्मा नैव हि गृह्यते।
सम्प्रदायविदा ग्राह्यः इति **वेदान्तभास्करः**॥

आत्मा सर्वभूतेषु गूढोऽपि न अवरेण नरेण विज्ञायते, सम्प्रदायविदा आचार्येणैव ग्राह्यः।

डिसेम्बर् १९

३५४. स्वान्तःस्थमपि न जानीमः!

एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥

काठकोपनिषत् १-३-१२

एष आत्मा सर्वेषु भूतेषु गूढोऽपि न अज्ञानिनां प्रकाशते, अपि तु सूक्ष्मदर्शिभिः अग्र्यया सूक्ष्मया बुद्ध्या आत्मा गृह्यते॥

अनेके साधकाः परमात्मदर्शनेच्छया उग्रं तीव्रं तपश्चरन्ति। तपःप्रभावेण च तेषां संकल्पशक्तिः, वाक्छक्तिः, जनाकर्षण धनाकर्षणशक्तयश्च सुलभा भवेयुः। नैताः सिद्धयः आत्मज्ञानम् उत्पादयन्ति। न चैतत् आत्मदर्शनं भवति। नैते तपस्विनः आत्मविदः। यतो हि स्वात्मस्थमपि आत्मानं नैते जानीयुः॥

तर्हि कथमात्मदर्शनम्? सूक्ष्मया बुद्ध्या प्रत्यगात्म-स्वरूपभूतया, सार्वत्रिकपरिपूर्णानुभवरूपया, अतीन्द्रियरूपया। शास्त्राचार्याणाम् उपदेशं श्रुत्वा, तस्य अर्थं मत्वा, ततो निदिध्यासनं कृत्वा ततो मनः सुसंस्कृतं भवति एकाग्रं च भवति। तदा मनसोऽपि साक्षिभूतः प्रत्यगात्मैव स्वयम् इति निश्चयज्ञानं जायते। इदमेव तु आत्मज्ञानं नाम। अनेनैव ज्ञानेन हि मुक्तिर्लभ्यते॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं यतिवरिष्ठाय वेदान्तभास्कराय नमः॥

इहैवान्तःशरीरे हि देहसम्बन्धवर्जितः।
दृश्यते यतिभिः शुभ्रः साक्षी **वेदान्तभास्करः**॥

देहसम्बन्धवर्जितः शुभ्रः साक्षी आत्मा इहैव अन्तःशरीरे यतिभिः दृश्यते॥

डिसेम्बर् २०

३५५. एते एव यतिपुङ्गवाः

अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः। मुण्डकोपनिषत् ३-१-५

ज्योतिर्मयः शुभ्रः आत्मा शरीरे अन्तः वर्तते। इममात्मानम् क्षीणदोषाः यतयः पश्यन्ति॥

आप्नोति इति आत्मा, सर्वव्यापकः परिपूर्णः परमात्मा। आत्मशब्दस्य निर्वचनमेतत् **यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावः तस्मादात्मेति कीर्त्यते॥**

सर्वम् आप्नोति इत्यात्मा, सर्वमपि आत्मसामीप्यम् आदत्ते इत्यात्मा, सर्वान् विषयान् जीवरूपेण अत्ति इति च आत्मा। सर्वस्मिन्नपि वस्तुनि यः ओतप्रोतत्वेन वसति स एव **आत्मा**। सर्वव्यापकमपि इमम् आत्मानं प्रप्रथमं जिज्ञासुः स्वस्मिन्नेव पश्येत्। मनसः साक्षिभूतमात्मानं स्वस्मिन्नेव, जानीयात्॥

देहे एव विद्यमानोऽप्यात्मा देहदोषविवर्जितः। आत्मा तु नित्यचैतन्यस्वरूप एव। सर्वव्यापकोऽपि आकाशः असङ्गतया दोषरहित एव। आत्मा अपि शुद्धस्वरूप एव। ईदृशम् आत्मानं साधकाः यतयः एव सम्यक् पश्येयुः। एते एव यतिपुंगवाः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मूलावासविदे वेदान्तभास्कराय नमः॥

सुषुप्तिः कामकर्मादिसर्वदोषविवर्जितम्।
निर्भयम् ह्यात्मनः स्थानम् इति **वेदान्तभास्करः**॥

कामकर्मादिसर्वदोषविवर्जितं शान्तं निर्भयम् आत्मनः स्थानं नाम सुषुप्तिरेव॥

डिसेम्बर् २१

३५६. आत्मनः मूलस्थानमेतत्

अयं पुरुषः एतस्मै अन्ताय धावति, यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति।

बृहदारण्यकोपनिषत् ४-३-१९

यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, एतस्मै अन्ताय अयं पुरुषो धावति॥

सुषुप्तिं वर्णयति अयं मन्त्रः। अयं जीवात्मा जागरिते भोगान् भुक्त्वा, अटित्वा, आयस्तः सन् आयासपरिहारार्थं सुषुप्तस्थानम् आगच्छति। अत्र निरायासः स्वस्थः सन् तापत्रयरहितः आनन्दी भवति। सुषुप्तौ अविद्याकामकर्मसम्बन्धरहितः स्वस्थो भवति॥

अत्रैकः प्रसिद्धो दृष्टान्तः। पक्षिदृष्टान्तः। खगः आकाशे अटित्वा आयस्तः आयासपरिहारार्थं स्वनीडमेव रात्रौ प्रविशति खलु? एवमेव आत्मा अपि आत्मनः आनन्दस्वरूपस्थानं सुषुप्तम् प्रविशति। तत्र स्वमूलस्थाने आनन्दी भवति। जाग्रत्स्वप्नयोः देहाद्युपाध्यध्यासेन सुखदुःखानि अनुभवन् आयासभारपूर्णो भवति। सुषुप्तौ तु स्वस्वरूपे स्थितः आनन्दी भवति। सुषुप्तिर्नाम आत्मनः आयासवर्जितं वासस्थानम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं व्याहृतिमहत्त्वविदे वेदान्तभास्कराय नमः॥

भूर्भुवस्सुवरित्येताः तिस्रो व्याहृतयः श्रुताः।
चतुर्थी 'मह' इत्येषा सिद्धा **वेदान्तभास्करः**॥

भूः, भुवः, सुवः इति—एताः तिस्रः व्याहृतयः श्रुताः। 'महः' इति एषा चतुर्थी व्याहृतिः सिद्धा। सा एषा ब्रह्मैव॥

डिसेम्बर् २२

३५७. चतसृणां व्याहृतीनां महिमा

भूर्भुवःसुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति। तद् ब्रह्म। स आत्मा॥ तैत्तिरीयोपनिषत् १-५

भूः, भुवः, सुवः इति एताः तिस्रो व्याहृतयः प्रसिद्धाः। महाचमसस्य पुत्रः माहाचमस्यः चतुर्थीं ''महः'' इत्येता व्याहृतिं दृष्टवान्। सा व्याहृतिरेव ब्रह्म, स एव च आत्मा॥

उपनिषत्सु व्याहृत्युपासनानि उपदिष्टानि। भूः भुवः सुवः इति त्रिस्रो व्याहृतयः। **भूः** इति समस्तोऽपि भूलोकः, **भुवः** इति अन्तरिक्षलोकः, **सुवः** इति स्वर्गलोकः इति उपासीत। यस्मात् भूः भुवः सुवः इत्येताभिः तिसृभिः व्याहृतिभिः भूर्लोकभुवर्लोक-सुवर्लोकाः व्यापृता भवन्ति॥

एताभ्यः तिसृभ्योऽपि विलक्षणतया चतुर्थीं '**महः**' इति व्याहृतिं माहाचमस्यः महर्षिः अपश्यत्। इय '**महः**' इति व्याहृतिः एव आदित्यः, अयमेव चन्द्रमाः, इदमेव च ब्रह्म, अयमेव आत्मा। एवं चतसृणामपि व्याहृतीनामुपासनात् सकलदेवतानाम् अनुग्रहः एव फलं भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं 'ध्यायतीव'रहस्यविदे वेदान्तभास्कराय नमः॥

इन्द्रियाणां सारभूतः विज्ञानात्मा परो मतः।
हृद्यन्तर्ज्योतिः पुरुषः शुद्धो **वेदान्तभास्करः**॥

यः इन्द्रियाणां सारभूतः स एव विज्ञानात्मा, स एव परमात्मा इति मतः। अयमेव हृद्यन्तर्ज्योतिः पुरुषः, परिशुद्धश्च॥

डिसेम्बर् २३

३५८. ध्यायतीव लेलायतीव

योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः....ध्यायतीव लेलायतीव। बृहदारण्यकोपनिषत् ४-३-७

यः प्राणेषु विज्ञानमयः, हृदि अन्तर्ज्योतिः पुरुषः, स एव आत्मा। स ध्यायति 'इव' लेलायति 'इव' च दृश्यते॥

'कोऽसौ आत्मा' इति जनकराजप्रश्नस्य उत्तरत्वेन याज्ञवल्क्यस्य वचनमिदम्। प्राणेषु विज्ञानमय एव आत्मा। सर्वाणि इन्द्रियाणि संव्याप्य, इन्द्रियाणां चैतन्याधायकः, इन्द्रियाणां प्रकाशकः, स्वयम् तु इन्द्रियविलक्षणः यः स एव आत्मा। स्वयंज्योतिः अयमात्मा। परंज्योतिरयमात्मा। अस्य आत्मनः अनुग्रहादेव सर्वाणीन्द्रियाणि जीवन्ति॥

आत्मन एव इन्द्रियाणि जीवन्ति। आत्मा तु हृद्यन्तः चैतन्य-स्वरूपः। अयमात्मा ब्रह्मैव। परमेव ब्रह्म। अयमात्मा **ध्यायति इव, लेलायति इव** च अवभासते। ध्यायति **'इव'**, न तु ध्यायति **'एव'**; लेलायति **'इव'**, न तु लेलायति **'एव'**। अयमात्मा जानाति इव, करोति इव च दृश्यते, न तु परमार्थतः आत्मनि क्रिया वा विक्रिया वा सम्भवति। आत्मनः महिमा खल्वेषः।

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुण्यपापरहिताय वेदान्तभास्कराय नमः॥

अज्ञानिनां विमूढानां जन्ममृत्युभयं सदा।
क्रिमिकीटादिजन्म स्यात् नूनं **वेदान्तभास्करः**॥

विमूढानाम् अज्ञानिनां सदा जन्ममृत्युभयम्। अज्ञानात् नूनं क्रिमिकीटादिजन्म स्यात्॥

डिसेम्बर् २४

३५९. मृत्युदेवतायाः 'जागरण'वचनम्

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥

काठकोपनिषत् २-२-७

केचित् देहिनः शरीरत्वाय मनुष्ययोनिं प्रपद्यन्ते। अन्ये देहिनः यथाकर्म यथाश्रुतं च स्थाणुम् अनुसयन्ति॥

अस्माकम् भारतीय-वैदिक-संस्कृतौ जन्मान्तरास्तित्वम् अभ्युपगम्यते। कर्मानुसारेण जन्म प्रपद्यन्ते जीवाः। केवलेन आत्मज्ञानमात्रेण जन्मान्तरप्राप्तिपरिहारो भवेत्, नान्यो मार्गः। पुण्यकर्मभिः उत्तमं जन्म, पापकर्मभिः नीचं जन्म, पुण्यपापमिश्रणात् मनुष्यजन्म च प्राप्यते। सर्वथा अज्ञानिनां पुनर्जन्म भवत्येव॥

अस्मिन् जन्मनि कृतपुण्यपापकर्मणां मनुष्याणां तत्फलत्वेन आगामिनि जन्मन्यपि मनुष्यजन्मैव प्राप्यते। तादृशाः मानवाः मनुष्ययोनिमेव प्रविशन्ति। ये तु अस्मिन् जन्मनि पाशवीं वृत्तिम् अनुसरन्तः राक्षसस्वभावाः पापकर्माणो भवन्ति, तादृशाः मानवाः आगामिनि जन्मनि पशुपक्षिक्रिमिकीटादियोनिं वा ओषधिवनस्पति-वृक्षादियोनिं वा अश्मगिरिपर्वतादियोनिं वा प्रविशन्ति। जाग्रत, जाग्रत! एवं हि मृत्युदेवतायाः धीर जागरणवचनम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं ब्रह्मभूताय वेदान्तभास्कराय नमः॥

ब्रह्मैवेदं जगत् सर्वं ब्रह्मभूतमिदं जगत्।
ब्रह्मैवायं विमुक्तोऽयं विद्वान् **वेदान्तभास्करः**॥

इदं जगत् सर्वं ब्रह्मैव, इदं जगत् ब्रह्मभूतम्। एवं विद्वान् ब्रह्मैव, अयं विमुक्त एव॥

डिसेम्बर् २५

३६०. सर्ववेदान्तानां सारमन्त्रोऽयम्

ब्रह्मैवेदम् अमृतं पुरस्तात्
ब्रह्म पश्चात् ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं
ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥

मुण्डकोपनिषत् २-२-१२

पुरस्तात् इदम् अमृतं ब्रह्मैव, पश्चात् ब्रह्म, दक्षिणतश्च ब्रह्मैव, उत्तरेण च ब्रह्म, अधश्च ब्रह्मैव प्रसृतम्, ऊर्ध्वं च ब्रह्मैव; इदं विश्वं वरिष्ठं ब्रह्मैव॥

समस्तस्यापि वेदान्तदर्शनस्य सारं सरळतया तथा सुन्दरतया उपदिशति अयं मन्त्रः। "इदं विश्वं सर्वमपि परिपूर्णं ब्रह्मैव"—इत्येतावानेव सर्वेषां वेदान्तानां सन्देशः। सर्वोपनिषदां सन्देशसारः सर्वः एतावानेव॥

अस्मत्पुरतः, पश्चाच्च दृश्यमानाः सर्वेऽपि पदार्थाः परब्रह्मैव। न केवलं पुरतः पश्चाच्च दृश्यमानानि वस्तूनि परब्रह्म इति, किन्तु पुरस्तात् पश्चाच्च इत्येदपि ब्रह्मैव इत्यर्थः। पुरतः, पश्चात्, दक्षिणतः, उत्तरतः, अधस्तात्, ऊर्ध्वम्, अन्तः, बहिः इति सर्वं ब्रह्मैव॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भेदरहितसुषुप्तिविदे वेदान्तभास्कराय नमः॥

सुषुप्ते जनको नैव जनको हि भविष्यति।
वेदा अवेदाः देवाश्च नैव **वेदान्तभास्करः**॥

जनकः सुषुप्ते नैव जनकः, वेदाः सुषुप्तौ नैव वेदाः, देवाश्च तत्र नैव देवाः॥

डिसेम्बर् २६

३६१. सुषुप्तावस्थायां द्वैताभावः

अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, वेदा अवेदाः।

बृहदारण्यकोपनिषत् ४-३-२२

अत्र सुषुप्तौ पिता अपिता भवति, माता अमाता भवति, लोकाः अलोका भवन्ति, देवा अदेवाः, वेदाश्च अवेदा भवन्ति॥

केवलं जाग्रत्स्वप्नयोरेव सर्वे द्वैतव्यवहारा भवन्ति। भेदसम्बन्धाः सर्वेऽपि जागरिते तथा स्वप्ने भवन्ति। पिता, पुत्रः, पतिः, पत्नी, वर्णाः, आश्रमाः, धर्माधर्मौ, वेदाः, देवताः, लोकाः, इत्येते सर्वेऽपि पदार्थाः केवले जागरिते सत्यत्वेनैव अवभासन्ते॥

सुषुप्तौ तु? एते सर्वेऽपि भेदव्यवहाराः तत्र नैव विद्यन्ते। जनकः सुषुप्तौ न जनको भवति। पुत्रः तत्र न पुत्रो भवति, भार्या तत्र न भार्या भवति, वेदाः न वेदास्तत्र, देवातास्तत्र न देवताः, शास्त्रं न शास्त्रम्, गुरुस्तत्र न गुरुः, शिष्योऽपि तत्र न शिष्यः। एते जनकादयः सर्वेऽपि भेदाः अविद्याकृता एव। उपाधिभिरेव भेदो दृश्येत। उपाध्यभावे भेदाभाव एव। तदा तत्र सर्वं निर्विशेषः आत्मा एक एव भवति॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं मुक्तिमार्गप्रदर्शकाय वेदान्तभास्कराय नमः॥

ब्रह्म यो वेत्ति चात्मानं सद्गुरोः कृपया बुधः।
मृत्युमत्येति चेदानीम् धीरो **वेदान्तभास्करः**॥

यो बुधः सद्गुरोः कृपया परं ब्रह्म आत्मत्वेन वेत्ति सः धीरः इदानीमेव मृत्युम् अत्येत्येव॥

डिसेम्बर् २७

३६२. अद्यापि 'इदं' सर्वेषां साध्यमेव

अन्योऽप्येवं यो विदध्यात्ममेव।

काठकोपनिषत् २-३-१८

इदानीमपि अन्योऽपि मनुष्यः यः कश्चित् नचिकेतोवत् आत्मानं जानाति चेत्, सोऽपि ब्रह्मप्राप्तः सन् पापविमुक्तो भवति॥

उपनिषदां सन्देशं तत्रत्यगुरुशिष्यसंवादं च शृण्वतां बहूनां जनानां मनसि एषः महान् प्रश्नः उद्भवति, यदुत ''अस्मादृशानां तादृशं श्रेष्ठं ब्रह्मज्ञानं वा तादृशो मोक्षो वा लभ्येत किम्? दुर्बलानामस्माकं तादृशी मुक्तिः प्राप्येत वा? इति॥

अस्य प्रश्नस्य प्रतिवचनं वदत्ययं काठकोपनिषन्मन्त्रः। ''ज्ञात्वा सर्वो मुक्तो भवति'' इति। नचिकेताः मृत्योः आत्मतत्त्वं विज्ञाय मुक्तोऽभवत्। तद्वदेव यः कश्चिदपि मुच्येत। आत्मज्ञानं वा मोक्षो वा न कस्यापि मानवविशेषस्य स्वाम्यम्। सर्वेषामपि स्वरूपं तत्। मधुरं खाद्यं भक्षितवतः सर्वस्य जिह्वायां माधुर्यं भवति। स्पृष्टवन्तं सर्वमपि अग्निः दहत्येव। एवमेव आत्मवित् सर्वोऽपि मुच्यते एव। स्वात्मानं विज्ञातुं सर्वस्यापि स्वातन्त्र्यमस्त्येव। **मोक्षो हि नाम सर्वस्यापि पुरुषस्य जन्मसिद्धं स्वाम्यं स्वभावश्च**॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं शुक्रमार्गातीताय वेदान्तभास्कराय नमः॥

ब्रह्मनिष्ठं ह्यकामा हि पूजयन्ति च सद्गुरुम्।
न विद्यते पुनर्जन्म तेषां **वेदान्तभास्करः**॥

अकामाः सन्तः ब्रह्मनिष्ठं ये पूजयन्ति, तेषां पुनर्जन्म नास्ति।

डिसेम्बर् २८

३६३. संसारगतितरणोपायोऽयम्

उपासते पुरुषं ये ह्यकामाः ते शुक्रमेतत् अतिवर्तन्ति धीराः।

मुण्डकोपनिषत् ३-२-१

ये मुमुक्षवः अकामाः सन्तः ब्रह्मज्ञानिनम् उपासते ते धीराः इमं शुक्रमार्गम् अतीत्य गच्छन्ति॥

अस्मिन् प्रपञ्चे भगवतः तथा सद्गुरूणाम् आराधकाः भक्ताः लक्षशः विद्यन्ते। ईदृशाः भक्ताः सकामाः निष्कामाश्च इति द्वेधा विभज्यन्ते। ब्रह्मज्ञानी परमेश्वरवदेव महान् परमपूज्यश्च!! न हि, न हि। ब्रह्मज्ञानी सद्गुरुः परमात्मनोऽपि श्रेष्ठ एव इत्युक्तेऽपि दोषाय न भवति। परब्रह्मस्वरूपो हि सद्गुरुर्नाम !

ब्रह्मज्ञानिभूतान् सद्गुरून् यदि मुमुक्षुभक्ताः श्रद्धाभक्तिपुरस्सराः सन्तः शुद्धमनसा उपासते, तर्हि इमं जन्ममरणसंसारशुक्रमार्गमेव अतिक्रामन्ति। शुक्रं नाम "**नृबीजं शरीरोपादानकारणम्**"—शरीरोत्पत्तिकारणं वीर्यम्। इदम् अतिवर्तन्ते, न पुनः योनिं प्रसर्पन्ति, न पुनः जायन्ते इत्यर्थः। ब्रह्मनिष्ठसद्गुरूपदेशश्रवणेन आत्मज्ञानं जायते, आत्मज्ञानेन अज्ञानं बाध्यते, अज्ञाने निवृत्ते सति जन्मान्तरप्राप्तिः नास्ति। तस्मात् अवश्यमेव मुमुक्षुसाधकैः ब्रह्मात्मज्ञानिनः ब्रह्मनिष्ठा गुरवः समुपास्याः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं भेदवर्जिताय वेदान्तभास्कराय नमः॥

सुषुप्तावात्मनो भिन्नं प्रमेयादि न विद्यते।
तस्मादन्यन्न जानाति तत्र **वेदान्तभास्करः**॥

आत्मनो भिन्नं प्रमेयादि वस्तु सुषुप्तौ न विद्यते। तस्मात् तत्र आत्मनोऽन्यत् न जानाति॥

डिसेम्बर् २९

३६४. तत्र न भिन्नं किञ्चन अस्ति

न तु तद्द्वितीयमस्ति ततोऽन्यत् विभक्तं यत् पश्येत्।

बृहदारण्यकोपनिषत् ४-३-२३

तत्र सुषुप्तौ आत्मनः भिन्नतया अन्यत् द्वितीयं किञ्चन नास्ति। येन, प्रमाणैः तद् दृश्येत॥

सुषुप्तौ आत्मा चिन्मात्रस्वरूप एव। आत्मा सदा दृक्स्वरूप एव। तर्हि किमर्थं तत्र न किञ्चिदपि जानाति आत्मा। दृक्स्वरूपस्य आत्मनः अज्ञानं न सम्भवेत् खलु? इति पृष्टे अयं मन्त्रः प्रतिवचनं ददाति॥

सुषुप्ते द्वैताग्रहणे नाज्ञानम् आत्मनः कारणम्। किन्तु आत्मविभिन्ना विषया एव तत्र न विद्यन्ते। निद्रायां प्रमाता वा प्रमाणं वा प्रमेया वा न हि विद्यन्ते। सर्वमप्येतत् तत्र आत्मैव आसीत्। आत्मनो भिन्नतया विज्ञेयाः पदार्थाः यदि तत्र अभविष्यन् तदा खलु तत्र प्रमाता तान् विषयान् जानीयात्? न तु आत्मभिन्नतया तत्र किञ्चिदप्यस्ति। सुषुप्तौ सर्वम् आत्मैव आसीत्। प्रमातृप्रमाण-प्रमेयाः सर्वेऽपि आत्मन्येव सम्पन्नाः। आत्मा तत्र अद्वितीयस्वरूपो भवति। तस्माद् हेतोः तत्र आत्मा न किञ्चिदपि जानाति इत्यर्थः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं नामरूपविमुक्ताय वेदान्तभास्कराय नमः॥

अविद्याकल्पितात् मुक्तः नामरूपाद्धि बन्धनात्।
ब्रह्मैव सन् ब्रह्माप्येति ज्ञानी **वेदान्तभास्करः**॥

ज्ञानी अविद्याकल्पितात् नामरूपात् बन्धनात् मुक्तः सन् ब्रह्मैव सन् ब्रह्म अप्येति॥

डिसेम्बर् ३०

३६५. नामरूपाभ्यां मुक्तिः

तथा विद्वान् नामरूपात् विमुक्तः परात् परं पुरुषमुपैति दिव्यम्।

मुण्डकोपनिषत् ३-२-८

तथैव ब्रह्मज्ञानी नामरूपबन्धनात् विमुक्तः सन् परादपि परतरं पुरुषम् उपैति॥

नामरूपे एव बन्धनम्। एते नामरूपे च अविद्याकल्पिते। नामरूपे वस्तुस्वरूपासम्बद्धे उपाधिदोषादेव दृश्येते। आत्मविद्योदये सति नामरूपे विलीयेते। इयमेव हि मुक्तिः॥

नामरूपविलयस्य सुन्दरं दृष्टान्तमेकं ददाति अयं मन्त्रः। स एव नदीसमुद्रदृष्टान्तः। भिन्नभिन्नेषु गिरिपर्वतेषु जाताः गङ्गायमुना-गोदावर्याद्याः नद्यः, समुद्रंगताः सत्यः आत्मनो भिन्नभिन्नानि नामानि रूपाणि च विहाय समुद्रः इत्येव कथ्यन्ते खलु? समुद्रं प्राप्य, समुद्रे विलीय, एकतां गताः गङ्गायमुनाद्याः सरितः न स्वतन्त्रतया भवेयुः। एवमेव आत्मज्ञानी आत्मज्ञानबलेन "अहं निरुपाधिकं ब्रह्मैवास्मि" इति विजानाति। अविद्याकल्पिते नामरूपे मिथ्याभूते पश्यति। अयं ब्रह्मात्मज्ञानी जीवन्नेव ब्रह्मैव सम्पन्नः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं पुनर्जन्मरहिताय वेदान्तभास्कराय नमः॥

मुमुक्षुर्मोक्षमाप्नोति पुनरावृत्तिवर्जितम्।
सुमनाश्च विवेकी च नूनं **वेदान्तभास्करः**॥

सुमनाश्च विवेकी च मुमुक्षुः पुनरावृत्तिवर्जितं मोक्षमाप्नोति।

डिसेम्बर् ३१

३६६. आत्मज्ञानोदये पुनर्जन्माभावः

स तु तत् पदमाप्नोति यस्माद्भूयो न जायते।

काठकोपनिषत् १-३-८

स विवेकी मुमुक्षुः पुनरावृत्तिरहितं वैष्णवं पदं, मोक्षमेव आप्नोति॥

मानवाय भगवता अनुगृहीता परमश्रेष्ठा सम्पत् नाम मानवजन्म, मानवशरीरम्। इदं मानवशरीरं हि उत्तमो रथः। अस्य रथस्य सहायेन मोक्षं प्राप्य मानवः कृतकृत्यो भवेत्। तस्मात् विवेकी मुमुक्षुः इन्द्रियनिग्रहसम्पन्नो भूत्वा आत्मज्ञानार्थं सद्गुरुकृपया अध्यात्मसाधनमार्गे प्रवर्तेत॥

पुण्यकर्माणि कृत्वा मरणानन्तरं यद्यपि उत्तमां गतिं प्राप्नोति मानवः, तथापि तस्मात् पुण्यलोकात् पुनरावर्तते एव। पितृलोकः, गन्धर्वलोकः, स्वर्गलोकः, ब्रह्मलोकः इति सर्वेऽपि लोकाः अनित्या एव। आत्मज्ञानी भवति चेत् सः मोक्षमश्नुते। अयं मोक्षः नैव कर्मफलवत् प्राप्यं फलम्। ब्रह्मस्वरूपमेव हि मोक्षः। ब्रह्मैव मोक्षधाम। ब्रह्मप्राप्तिर्नाम ब्रह्मस्वरूपेणैव अवस्थानम्। ब्रह्मज्ञानी ब्रह्मस्वरूप एव भवति। इयमेव जीवन्मुक्तिः। जीवन्मुक्तस्य पुनर्जन्म नास्ति। **ब्रह्मैव सम्पन्नोऽयं भवति**॥ ॥ ओं तत् सत्॥

॥ श्रीकृष्णार्पणमस्तु॥ ॥ ओं शान्तिः शान्तिः शान्तिः॥

सद्गुरुपरम्परास्तुतिः

नारायणं पद्मभुवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं गौडपदं महान्तम्
गोविन्दयोगीन्द्रमथास्य शिष्यम्।
श्रीशङ्कराचार्यमथास्य पद्म-
पादं च हस्तामलकं च शिष्यम्।
तं तोटकं वार्तिककारमन्यान्
अस्मद्गुरून् सन्ततमानतोऽस्मि॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम्।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादं शङ्करं लोकशङ्करम्॥

सूत्रभाष्यप्रणेतारौ वेदान्ताब्जप्रभाकरौ।
वन्दे परस्परात्मानौ बादरायणशङ्करौ॥

नारायणसमारम्भां शङ्कराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः।
व्याख्याताः सर्ववेदान्ताः तान्नित्यं प्रणतोऽस्म्यहम्॥

वन्दे तं सच्चिदानन्दं यतिवर्यं महामतिम्।
वेदवेदान्तसारज्ञं सद्गुरुं प्रणतोऽस्म्यहम्॥

सदाहं सम्प्रदायज्ञं संयमीन्द्रं सदाश्रयम्।
सद्गुरुं सच्चिदानन्दं सदाचारं समाश्रये॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

परिशिष्टम्

''वेदान्ताः'' नाम कोऽर्थः?

१. वेदानाम् अन्तः, वेदानाम् अन्तिमो भागः वेदान्तः।

२. वेदानाम् अन्तः, हृदयम्, तात्पर्यम्, लक्ष्यम्, वेदान्तः।

३. वेदस्य, ज्ञानस्य अन्तः। सकलज्ञानानां परिपाकः॥

४. वेदानाम् ज्ञानानाम् अन्तः। वेदान्तप्रतिपाद्ये ब्रह्मणि ज्ञाते सति अन्यत् ज्ञेयम् किञ्चित् नावशिष्यते इत्यर्थः॥

५. वेदानां शब्दराशिरूपाणामेव अन्तः नाशः। वेदा अवेदा एव भवन्ति। ब्रह्मज्ञाने सति वेदानां वेदत्वमेव बाधितं भवति॥

एवं च ''वेदान्तो'' नाम 'ब्रह्मज्ञान'मेव मुख्योऽर्थः। ईशकेनादि उपनिषद्ग्रंथास्तु गौणोऽर्थः॥

'उपनिषत्' शब्दस्य कोऽर्थः?

'**वेदान्ता**'नामेव '**उपनिषत्**' इति च नामान्तरम्। '**उपनिषत्**' इति '**ब्रह्मविद्या**' इत्यर्थः। 'उपनिषत्' इत्यस्य शब्दस्य निर्वचनं तु, उप = गुरुसन्निधाने; नि = निष्ठया, निश्चलतया; सत् = उपविश्य सम्पादनीया **आत्मविद्या** एव '**उपनिषत्**'॥

'**उपनिषत्**' शब्देन कथं 'ब्रह्मविद्या' व्यपदिश्यते? उप = ब्रह्मविद्यासमीपम्, नि = निष्ठया ये गच्छन्ति, तेषां ब्रह्मविद्या-समीपगामिनाम् सर्वविधसांसारिकदुःखावसादनात्, 'ब्रह्मविद्या उपनिषत्'। ब्रह्मविद्यापराणां गर्भवासादिसादनात् शैथिल्या-पादकत्वाच्च, परब्रह्मसामीप्यसादनात् गमनाच्च 'ब्रह्मविद्या' '**उपनिषत्**'। ग्रन्थाश्च गौणार्थे **उपनिषत्** शब्दभाजो भवन्ति॥

चतुर्दशोपनिषदां "शान्तिमन्त्राः"

१. शुक्लयजुर्वेदस्य—**ईशावास्योपनिषत्** तथा **बृहदारण्यकोपनिषत्।**

२. सामवेदस्य—**केनोपनिषत्** तथा **छान्दोग्योपनिषत्।**

३. कृष्णयजुर्वेदस्य—**काठकोपनिषत्, तैत्तिरीयोपनिषत्** तथा **श्वेताश्वतरोपनिषत्।**

४. अथर्ववेदस्य—**मुण्डकोपनिषत्, प्रश्नोपनिषत्, माण्डूक्य उपनिषत्, जाबालोपनिषत्** तथा **कैवल्योपनिषत्।**

५. ऋग्वेदस्य—**ऐतरेयोपनिषत्** तथा **कौषीतकि उपनिषत्।**

एवं चतुर्दश उपनिषदः त्रिभिरपि आचार्यैः श्रीशङ्कर श्रीरामानुजश्रीमध्वाचार्यैः प्रमाणत्वेन स्वीकृताः विराजन्ते। एतासाम् उपनिषदाम् अध्ययनस्य प्रारम्भे तथा अन्ते केषाञ्चित् शान्ति-मन्त्राणाम् अपि पठनं पारायणं च वैदिकसम्प्रदाये दृश्यते। अर्थानुसन्धानपूर्वकम् एतेषां शान्तिमन्त्राणा पारायणेन अन्तः बहिः, अस्माकम् इतरेषाम्, व्यष्टिरूपेण समष्टिरूपेण च सर्वत्रापि सर्वथापि शान्तिः भवत्येव। शान्तिर्नाम सुखम्, आनन्दः, मानसी तृप्तिः, हर्षः, मोदः, प्रमोदः इत्यर्थः। '**शान्ति**'मन्त्रपठनेन एतादृशं फलं भवत्येव। शान्तिमन्त्रपठनेन चित्तशुद्धिरूपं फलं च भवत्येव। विशेषतस्तु प्रातरुत्थाय **शान्ति**मन्त्रपारायणेन, उच्चैः पठनेन, सर्वमपि स्थानम्, सर्वोऽपि परिसरः मङ्गळतरो भवति। एतेषां **शान्ति**मन्त्राणा पारायणेन अस्माकं देहेन्द्रियमनोबुद्धिप्राणाः नूनमपि शुद्धा भवन्ति॥

प्रप्रथमतः सद्गुरुभ्यः एते **शान्तिमन्त्राः** अस्माभिः श्रोतव्याः,

तदनन्तरं च उच्चस्वरेण सुस्पष्टं अक्षरस्पष्टतया पठितव्याः एते **शान्तिमन्त्राः**। अर्थज्ञानपूर्वकं पठिताश्चेत्, अर्थानुसन्धानपूर्वकं उच्चरिताश्चेत्, अहो! शान्तिमन्त्राः अन्वर्थशान्तिमन्त्रा एव भवन्ति; शान्तिमेव, सन्तोषमेव जनयन्ति। पठित्वा एव शान्तिमन्त्राणाम् आनन्दास्वादः अनुभूतव्यः॥

शान्तिमन्त्राः, शान्तिमन्त्रार्थाः

१. शुक्लयजुर्वेदीययोः **ईशावास्यबृहदारण्यकोपनिषदोः**—

ओम्। पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णम् आदाय पूर्णमेव अवशिष्यते॥
॥ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—पूर्णम् अदः पूर्णम् इदम् पूर्णात् पूर्णम् उदच्यते, पूर्णस्य पूर्णम् आदाय पूर्णम् एव अवशिष्यते॥

अन्वयः—अदः पूर्णम्, इदं पूर्णम्, पूर्णात् पूर्णम् उदच्यते, पूर्णस्य पूर्णम् आदाय पूर्णमेव अवशिष्यते॥

अन्वयार्थः—अदः = तत्, पूर्णम् = परिपूर्णम्, इदम् = एतदपि, पूर्णं = परिपूर्णम्, पूर्णात् = परिपूर्णादेव ब्रह्मणः, पूर्णम् = परिपूर्णं तत्त्वम्, उदच्यते = उद्गच्छति, पूर्णस्य = परिपूर्णस्य, पूर्णं = परिपूर्णस्वरूपम्, आदाय = स्वीकृतं चेत्, पूर्णमेव = परिपूर्णमेव, अवशिष्यते = अवशिष्ट भवति इत्यर्थः॥

तात्पर्यार्थः—अस्मिन् मन्त्रे **पूर्ण**शब्दः सप्तकृत्वः पठितोऽस्ति। पूर्णं नाम परिपूर्णम् इत्यर्थः। आङ्ग्लभाषायाम् इदमेव Infinity इति कथ्येत। तद् परं ब्रह्म पूर्णम्, इदं क्रिमिकीटादि

पूर्णमेव। बृहत् पूर्णम्, अणु च पूर्णमेव। परिपूर्णाद् ब्रह्मण: परिपूर्णमेव ब्रह्म आगतम्। परिपूर्णस्य ब्रह्मण: परिपूर्णत्वात्। निरुपाधिकपरिपूर्णब्रह्मदृष्ट्या सर्वमिदम् अणुरेणुतृणकाष्ठादि परिपूर्णब्रह्मैव। नान्यत् किञ्चिदपि ब्रह्मभिन्नम् अस्ति इत्यभिप्राय:। If Infinity is added to Infinity the sum becomes Infinity. If Infinity is subtracted from Infinity the reminder is Infinity. If Infinity is multiplied by Infinity the product is Infinity. If Infinity is divided by Infinity the quotient becomes Infinity. सर्वमिद विश्वं परमार्थदृष्ट्या परिपूर्णमेव परमेव ब्रह्म इत्यर्थ:॥

२. सामवेदीययो: **केनोपनिषत् छान्दोग्योपनिषदो:—**

ओम्॥ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षु: श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मोपनिषदम्। माहं ब्रह्म निराकुर्याम्। मा मा ब्रह्म निराकरोत्। अनिराकरणमस्तु अनिराकरणं मेऽस्तु। तदात्मनि निरते य उपनिषत्सु धर्मा:, ते मयि सन्तु ते मयि सन्तु॥ ॥ ओं शान्ति: शान्ति: शान्ति:॥

पदच्छेद:—अप्यायन्तु मम अङ्गानि वाक् प्राण: चक्षु: श्रोत्रम् अथो बलम् इन्द्रियाणि च सर्वाणि। सर्वम् ब्रह्म औपनिषदम्। मा अह ब्रह्म निराकुर्याम्। मा मा ब्रह्म निराकरोत्। अनिराकरणम् अस्तु अनिराकरण मे अस्तु। तदात्मनि निरते ये उपनिषत्सु धर्मा: ते मयि सन्तु ते मयि सन्तु॥

अन्वयक्रम:—मम अङ्गानि आप्यायन्तु, वाक् प्राण: चक्षु: श्रोत्रम् अथो बलम्, सर्वाणि इन्द्रियाणि च आप्यायन्तु। सर्वम् औपनिषद ब्रह्मैव। अह ब्रह्म मा निराकुर्याम्। मा ब्रह्म मा

निराकरोत्। अनिराकरणम् अस्तु, मे अनिराकरणम् अस्तु। तदात्मनि निरते ये धर्माः उपनिषत्सु उपदिष्टाः ते मयि सन्तु, ते मयि सन्तु॥

अन्वयार्थः—मम अङ्गानि = मम देहावयवाः, आप्यायन्तु = मह्यम् सुखं शान्तिम् सन्तोषं च कुर्वन्तु। वाक् प्राणः चक्षुः श्रोत्रं बलं सर्वाणि इन्द्रियाणि च मां बलेन शक्त्या च वर्धयन्तु। इदं सर्वमपि जगत् विश्वम्, औपनिषदम् = उपनिषत्सु प्रतिपादितं, ब्रह्म = परमेव तत्त्वम्। अहं ब्रह्म मा निराकुर्याम् = न कदापि अहं साधकः जिज्ञासुः परमात्मानं निराकुर्याम्, न कदापि तिरस्कुर्याम्। मा = मामपि, ब्रह्म = परमात्मा, मा निराकरोत् = नैव निराकरोतु, मे = मम, अनिराकरणम् अस्तु = तस्मिन् परमात्मनि तिरस्कारः मास्तु, न कदापि तं परमात्मानं साधकः अहं निराकुर्याम्। तदात्मनि निरते = ब्रह्मनिष्ठे तत्त्वविदे तत्त्वनिरते, ये धर्माः = यानि लक्षणानि, उपनिषत्सु = वेदान्तेषु उपदिश्यन्ते, ते सर्वेऽपि विवेकवैराग्यशमदमादयो धर्माः। मयि = अध्यात्मसाधके जिज्ञासौ मुमुक्षौ मयि, सन्तु = भवन्तु इत्यर्थः॥

तात्पर्यार्थः—मम देहेन्द्रियमनोबुद्धिप्राणादयः सर्वेऽपि मां बलेन वर्धयन्तु। कार्यकरणानि मम आत्मज्ञानसंपादनाय समर्थानि भवन्तु इत्यर्थः। मम स्वरूपभूतं ब्रह्म अहं सर्वदा स्मरेयम्, न कदापि तद् ब्रह्म अहं तिरस्कुर्याम्, तिरस्करणानर्हत्वात् ब्रह्मणः। अहेयम् अनुपादेयं खलु परब्रह्मस्वरूपं नाम। ब्रह्मज्ञानिनां ब्रह्मनिष्ठानां यानि यानि लक्षणानि कामादिदोषराहित्यादीनि उपनिषत्सु समुपदिष्टानि सन्ति तानि सर्वाण्यपि मयि भवन्तु। अहं ब्रह्मबुभुत्सुः ब्रह्मज्ञानप्राप्तिसाधनसम्पन्नो भवेयम् इत्यर्थः॥

३. कृष्णयजुर्वेदीयानां **काठकोपनिषत् तैत्तिरीयोपनिषत् श्वेताश्वतरोपनिषदाम्**; काठके २-३-१९; तैत्तिरीये २-१

ओम्॥ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—सह नौ अवतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नौ अधीतम् अस्तु। मा विद्विषावहै॥

अन्वयक्रमः—नौ सह अवतु, नौ सह भुनक्तु। वीर्यं सह करवावहै। नौ अधीत तेजस्वि अस्तु। मा विद्विषावहै॥

अन्वयार्थः—नौ = गुरुशिष्यौ आवाम् उभावपि, सह = सममेव, अवतु = रक्षतु। सह = सममेव, नौ = अवाम्, भुनक्तु = स परमेश्वरः पालयतु, भोजयतु वा। वीर्यं = विद्याबलम्, सह = सममेव, करवावहै = करवाव। तेजस्विनौ = तेजस्विनोः आवयोः, अधीतं यत् तत् स्वधीतम् अस्तु। अथवा नौ = आवयोः अधीत स्वधीतम् = सुष्ठु अधीतम् यत्, तत् तेजस्वि = वर्चस्वि अस्तु इत्यर्थः। आवाम् गुरुशिष्यौ न कदापि परस्परं विद्विषावहै = आवां परस्परं विद्वेष नैव करवाव इत्यर्थः॥

तात्पर्यार्थः—सः सर्वज्ञः सर्वशक्तः उपनिषत्प्रकाशितः सर्वात्मभूतः परमेश्वरः नौ गुरुशिष्यौ उभावपि आरोग्यसम्पदा पालयतु, ब्रह्मविद्यास्वरूपप्रकाशनेन च आवां ब्रह्मज्ञानिनौ करोतु। किंच सः परमेश्वरः आवां शिष्याचार्यौ उभावपि ब्रह्मविद्याफल-प्रकाशनेन पालयतु। अथवा सहैव उभावपि आवा ब्रह्मविद्याफल-भूतम् आनन्द मोक्षम् भोजयतु। ब्रह्मविद्यानिमित्तं वीर्यं च आवाम् सहैव करवावहै, निर्वर्तयावहै। किं च तेजस्विनोः गुरुशिष्ययोः

आवयोः उभयोः यत् अधीतं तत् तेजस्वि भवतु; अर्थज्ञानयोग्यं भवतु, स्वानुभवगतं भवतु। आवयोः अधीतं वीर्यवदस्तु, ब्रह्मात्मज्ञानोत्पादकं भवतु इत्यर्थः। आवाम् उभावपि शिष्याचार्यौ अन्योन्यं प्रमादकृतान्यथाध्ययनाध्यापनदोषनिमित्तं द्वेषं मा करवावहै। विद्याग्रहणनिमित्तं शिष्यस्य विद्याग्राहणनिमित्तं वा गुरोः प्रमादकृतं द्वेषं नैव आवां करवावहै। इतरेतरं द्वेषम् आवाम् नैव आपद्यावहै। परस्परं सन्तोषेण आनन्देन केवलगुणग्रहणेन वेदान्ताध्ययनाध्यापनपरौ आवां वर्तावहै। ओं शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिक आधिभौतिक आधिदैविक विघ्नपरिहारार्थम् आदरार्थं च प्रार्थ्यते। सर्वदोषपरिहारार्थं च त्रिर्वचनम्॥

४. कृष्णयजुर्वेदीय **तैत्तरीयोपनिषदः**—

ओम्॥ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—शं नः मित्रः श वरुणः। शं नः भवतु अर्यमा। शं नः इन्द्रः बृहस्पतिः। श नः विष्णुः उरुक्रमः। नमः ब्रह्मणे। नमः ते वायो। त्वम् एव प्रत्यक्षं ब्रह्म असि। त्वम् एव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। अवतु माम्। अवतु वक्तारम्॥

अन्वयक्रमः—मित्रः नः शं करोतु, वरुणः नः शं करोतु।

अर्यमा नः शं करोतु। इन्द्रः तथा बृहस्पतिः नः शं करोतु। उरुक्रमः विष्णुः नः श करोतु। ब्रह्मणे नमः। हे वायो, ते नमः। त्वमेव प्रत्यक्ष ब्रह्म असि। त्वम् एव प्रत्यक्षं ब्रह्म इति अहं वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तद् ब्रह्म माम् अवतु। तद् ब्रह्म वक्तारम् अवतु। माम् अवतु। वक्तारम् अवतु॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

अन्वयार्थः—मित्रः = प्राणवृत्तेः अह्नश्च अभिमानी देवतात्मा मित्रः, नः = अस्माकम्। शं = सुखम् करोतु। वरुणः = अपानवृत्तेः रात्रेश्च अभिमानी देवतात्मा वरुणः, नः = अस्माकम्, शं = शान्तिम् करोतु। अर्यमा = चक्षुषि आदित्ये च अभिमानी देवतात्मा अर्यमा, नः = अस्माकं, शं = सुखम् करोतु। इन्द्रः = बलाभिमानी देवतात्मा इन्द्रः सुखं करोतु। तथा वाचः बुद्धेश्च अभिमानी देवतात्मा बृहस्पतिः सुख करोतु। उरुक्रमः = विस्तीर्ण-क्रमः, विष्णुः = पादयोः अभिमानी देवतात्मा व्यापनशीलः परमात्मा शं सुखं करोतु। ब्रह्मणे = प्राणवायुसूत्रात्मकाय हिरण्यगर्भरूपाय, नमः = प्रह्वीभावः भवतु। हे वायो = हे प्राण, ते = तुभ्यं नमः। त्वमेव = प्राण एव, प्रत्यक्षं = सन्निहित ब्रह्म असि। ''त्वमेव प्रत्यक्षं ब्रह्म'' इति अह वदिष्यामि। त्वमेव ऋतम् = यथाशास्त्रं यथाकर्तव्यम् अर्थम् वदिष्यामि। ''त्वमेव सत्यम्'' इत्यपि वदिष्यामि। तत् सर्वात्मक ब्रह्म माम् विद्यार्थिनम् अवतु। तद् ब्रह्म वक्तारम् आचार्यमपि अवतु पालयतु। माम् शिष्यम् अवतु सरक्षतु। वक्तारम् सद्गुरुमपि अवतु पालयतु॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

मम आध्यात्मिकादिदोषत्रयपरिहारोऽस्तु इत्यर्थः॥

तात्पर्यार्थः—प्राणाभिमानी अहरभिमानी च **मित्रदेवः** अस्माकं मङ्गळं करोतु। मित्रदेवतानुग्रहेण अस्माकं प्राणाः अहश्च सर्वदा शुभानि भवन्तु। **वरुणदेवः** अपानवृत्तिं रात्रिं च अस्माकं मङ्गळस्वरूपां करोतु। चक्षुरभिमानी आदित्याभिमानी च **अर्यमा** देवतात्मा अस्माकं सर्वदा मङ्गळम् आतनोतु। बलाभिमानी देवतात्मा **इन्द्रः** देवराट् अस्माकम् बलाभिवर्धनद्वारा इन्द्रिय-शक्तिसंवर्धनद्वारा अस्माकं मङ्गळम् आतनोतु। तथा वागभिमानी देवतात्मा **बृहस्पतिः** अस्मान् सत्यवचन धैर्यवचन सामर्थ्येन पालयतु। स एव च **बृहस्पतिः** बुद्धिसामर्थ्यम् उत्पाद्य अस्मान् सम्यक् पालयतु। उरुक्रमः विस्तीर्णक्रमः पादाभिमानी देवतात्मा सर्वव्यापकः **महाविष्णुः** अस्माकं सुखं करोतु। एवं सर्वेऽपि एते मित्र वरुण अर्यमा देवेन्द्र बृहस्पति विष्णु प्रभृतयः शक्तिमन्तः देवाः स्वस्वशक्तिसामर्थ्यप्रदानेन अस्मान् पालयन्तु इत्यर्थः॥

हे वायो, हे सूत्रात्मन्, हे अपरब्रह्मन्, तुभ्यं नमः। त्वमेव साक्षात् ब्रह्मासि। देहेन्द्रियमनोबुद्धिप्राणेभ्य अन्तरतमं ब्रह्मासि त्वम्। अतः अहं त्वामेव परं ब्रह्म उपासे। त्वमेव ऋतं शास्त्रीयकर्तव्यं कर्म इति वदिष्यामि। त्वमेव सत्यं च इति वदिष्यामि। तद् परं ब्रह्म मां ब्रह्मविद्यार्थिनं पालयतु, मम सद्गुरुं ब्रह्मविद्याचार्यं च रक्षतु। अवतु माम्, अवतु वक्तारम्॥

५. अथर्ववेदीयानां **मुण्डकोपनिषत् प्रश्नोपनिषत् माण्डूक्य उपनिषत् जाबालोपनिषत् कैवल्योपनिषदाम्**—

ओम्॥ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा

विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येम अक्षभिः यजत्राः। स्थिरैः अङ्गैः तुष्टुवासः तनूभिः। व्यशेम देवहितं यत् आयुः। स्वस्ति नः इन्द्रः वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नः तार्क्ष्यः अरिष्टनेमिः। स्वस्ति नः बृहस्पतिः दधातु॥

अन्वयक्रमः—हे देवाः कर्णेभिः वयं भद्रं शृणुयाम। यजत्राः सन्तः वयं अक्षभिः भद्रं पश्येम। स्थिरैः अङ्गैः तनूभिः वयं तुष्टुवांसः। यत् देवहितं आयुः तत् वयं व्यशेम। वृद्धश्रवाः इन्द्रः नः स्वस्ति करोतु। विश्ववेदाः पूषा नः स्वस्ति करोतु। अरिष्टनेमिः तार्क्ष्यः नः स्वस्ति करोतु। बृहस्पतिः नः स्वस्ति दधातु॥

अन्वयार्थः—भो देवाः = भो ज्ञानस्वरूपाः देवाः, कर्णेभिः = कर्णैः श्रोत्रैः, भद्रं = मङ्गळं वेदवेदान्तसन्देशं, शृणुयाम = वयं सदा शृण्वन्तः भवेम। भोः देवताः, वयं यजत्राः = यज्ञयागादिकर्मानुष्ठानतत्पराः सन्तः, अक्षभिः = अक्षिभिः, नेत्रैः, भद्रं = शिवं मङ्गळात्मकं विश्वं, पश्येम = वयं सदा पश्यन्तः स्याम। स्थिरैः = सुदृढैः नीरोगैः, अङ्गैः = अवयवैः, करचरणादिभिः इन्द्रियैः, सुदृढेन शरीरेण च, तनूभिः = तनुभिः सुदृढैः कार्यकरणैरित्यर्थः, युक्ताः सन्तः, तुष्टुवांसः = वयं युष्मान् परमेश्वरं च स्तवाम, स्तोत्रं करवाम। देवहितं = देवैः युष्माभिः अस्मत्कर्मानुगुण्येन अस्मभ्यं, हितं प्रतिपादितम् अनुगृहीतम्, यत् = यावत्, आयुः = वयोपरिमाणम् अस्ति, तत् वयं सन्तोषेण व्यशेम = नयेम यापयेम इत्यर्थः। वृद्धश्रवाः = वृद्धैः ज्ञानतपोवृद्धैः महर्षिभिः सस्तुतः तथा वेदेतिहासपुराणेषु प्रसिद्धः, इन्द्रः =

देवराजो देवेन्द्रः, नः = अस्माकं, स्वस्ति = मङ्गळं तनोतु करोतु। विश्ववेदाः = सर्वज्ञः, पूषा = पोषणात् पूषा रविः सूर्यदेवः, स्वस्ति = मङ्गळं करोतु। अरिष्टनेमिः = सर्वसङ्कटपरिहारकः, सर्वपीडापरिहारकः, तार्क्ष्यः = महाविष्णुवाहनभूतः गरुडो देवः, नः = अस्माकम्, स्वस्ति = मङ्गळम् तनोतु। बृहस्पतिः = देवगुरुः बुद्धिकारको देवः, नः = अस्माकं, स्वस्ति = मङ्गळं, दधातु = उत्पादयतु॥

तात्पर्यार्थः—भो देवाः वयं श्रोत्रेन्द्रियैः सदा वेदवेदान्त सन्देशान् शृण्वन्तः अस्माकं जीवनं सार्थकं नयेम। भो देवाः वयं नेत्रैः सर्वदा सर्वत्र मङ्गळमेव वस्तु पश्येम। आरोग्ययुक्तैः सुदृढैः शरीरेन्द्रियमनोबुद्धिभिः युक्ताः वयं सदा प्रकाशस्वरूपान् देवान् युष्मान् सच्चिदानन्दस्वरूपं परमात्मानं च स्तोत्रादिभिः प्रीणयेम। भोः देवाः युष्माभिः अस्मभ्यं यावदायुः दत्तमस्ति तत् सर्वमपि आनन्देन लोकोपकारेण तथा वेदान्तवाक्यार्थविचारेण च आत्मतत्त्वश्रवणमननिदिध्यासनेन च वयं नयेम। वसिष्ठादि-महर्षिभिः संसेवितः वेदपुराणेषु प्रतिपादितश्च इन्द्रः देवराट् नः सर्वदा मङ्गळमेव आतनोतु। सर्वज्ञः सर्वान्तर्यामी च पूषदेवतात्मा अस्माकं सदा शुभमेव करोतु। सर्वारिष्टनिवारकः सर्वपीडापरिहारकः गरुडदेवः अस्माकं सदा मङ्गळमेव करोतु। अस्मान् सर्वविधेभ्यः अरिष्टेभ्यः सः रक्षतु। देवगुरुः बुद्धिकारकः बृहस्पतिदेवोऽपि अस्माकं सदा शुभमेव करोतु। एवम् इन्द्र पूष गरुड बृहस्पति प्रभृतयः सर्वेऽपि देवाः अस्माक सर्वेषामपि सदा शुभमेव कुर्वन्तु। ईश्वरानुग्रहेण अस्माकम् आध्यात्मिक आधिभौतिक आधिदैविकाः सर्वेऽपि विघ्नाः परिहृताः भवन्तु॥ ॥ओं शान्तिः शान्तिः शान्तिः॥

६. ऋग्वेदीयाया: **ऐतरेयोपनिषद:**—

ओम्॥ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थ:। श्रुतं मे मा प्रहासी:। अनेनाधीतेन अहोरात्रान् सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। अवतु वक्तारम्॥

॥ ओं शान्ति: शान्ति: शान्ति:॥

पदच्छेद: वक्तारं वाक् मे मनसि प्रतिष्ठिता। मन: मे वाचि प्रतिष्ठितम्। आवि: आवी: मे एधि। वेदस्य मे आणीस्थ:। श्रुतं मे मा प्रहासी:। अनेन अधीतेन अहोरात्रान् सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। अवतु माम्। अवतु वक्तारम्। अवतु वक्तारम्॥

अन्वयक्रम:—मे वाक् मनसि प्रतिष्ठिता भवतु। मे मन: वाचि प्रतिष्ठितम् भवतु। हे आवि: ब्रह्मन्, मे आवी: एधि। हे वाक्, हे मन:, युवां मे वेदस्य (आत्मज्ञानस्य) आणीस्थ:। मे श्रुतं मा प्रहासी:। अनेन अधीतेन अहम् अहोरात्रान् सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् ब्रह्म माम् अवतु। तत् (ब्रह्म) वक्तारम् अवतु। माम् अवतु। वक्तारम् अवतु। वक्तारम् अवतु। ओं शान्ति: शान्ति: शान्ति:॥

अन्वयार्थ:—मे = मम, वाक् = वागिन्द्रियम् , मनसि = अन्त:करणे, प्रतिष्ठिता = स्थिता भवतु। मे = मम, मन: वाचि = वागिन्द्रिये, प्रतिष्ठितं भवतु। हे आवि: = हे प्रकाशस्वरूप परमात्मन्, मे = मह्यम्, आवी: = चैतन्यरूप: सन्, एधि = आविर्भव। हे वाक्, हे मन:, युवाम् उभावपि, मे = मह्यम्,

वेदस्य = आत्मज्ञानम्, आणीस्थः = आनयतम्। मे = मम, श्रुतं = सद्गुरुभ्यः श्रुतं, मा प्रहासीः = मा विस्मारय। अनेन अधीतेन = वेदान्ताध्ययनेन, अहोरात्रान् = सम्पूर्णं दिवसम्, अहम् सन्दधामि = सम्यक् नयानि। ऋतं = शास्त्रार्थं, वदिष्यामि = वदानि। सत्यं = यथार्थं वदानि। तद् = ब्रह्म, मां = शिष्यम्, अवतु। तद् = ब्रह्म, वक्तारम् = गुरुम् अवतु। अवतु = रक्षतु माम्। अवतु वक्तारं मद्गुरुम् इति अभ्यासः आदरार्थः॥

तात्पर्यार्थः—मनसि विद्यमानमेव विषयम् अहं वागिन्द्रियेणापि वदेयम्। वागुक्तमेव विषयं मनसि अहं चिन्तयेयम्। वाङ्मनसोः उभयोरपि समानवृत्तित्वं भवतु। हे परमात्मन्, हे प्रकाशात्मन्, त्वं मम परिशुद्धे मनसि आविर्भव, चिन्मात्रस्वरूपम् आत्मानं मह्यं प्रकाशय। त्वदनुग्रहादेव खलु मम त्वद्दर्शनं भवेत्, नान्यथा। हे वाङ्मनसी द्वे प्रधानेन्द्रिये, युवाम् उभावपि मह्यं वेदोपदिष्टम् आत्मज्ञानं सम्पादयतम्। वाङ्मनसोः शुद्धयोः सत्योरेव हि जिज्ञासोः मनसि आत्मज्ञानोदयो भवेत्। हे परमात्मन्, अहं सद्गुरोः सकाशात् यं वेदान्तसन्देशम् आत्मज्ञानविषयं श्रुतवानस्मि तं तथैव मयि गोपाय, न तु मत्तः तं सन्देशं विस्मारय। वेदान्ताध्ययनाध्यापनाभ्यामेव अहं सदा मम जीवनं नयेयम्। न तु अनात्मविषयध्यानेन। मदीयं जीवनं सर्वदाऽपि वेदान्तचिन्तनपूर्णं भवतु इत्यर्थः। अहं यथाशास्त्रमेव अर्थं वदानि। सत्यवचनमेव अहं सदा वदेयम्। वेदप्रकाशितं प्रत्यगात्मभूतं तद् ब्रह्म मां विद्यार्थिनम् अवतु। तथैव मम अध्यापकं मम सद्गुरुं च तद् ब्रह्म पालयतु। वक्तारम् आचार्यम् तद् ब्रह्म अवतु इति द्विरुक्तिः आदरार्था॥

७. कृष्णयजुर्वेदीय **तैत्तिरीयोपनिषदः** :—

ओम्॥ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—यः छन्दसाम् ऋषभः विश्वरूपः। छन्दोभ्यः अधि अमृतात् सम्बभूव। स मा इन्द्रः मेधया स्पृणोतु। अमृतस्य देव धारणः भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशः असि मेधया पिहितः। श्रुतं मे गोपाय॥ ॥ ओं शान्तिः शान्तिः शान्तिः॥

अन्वयक्रमः—यः (ओङ्कारः) छन्दसां ऋषभः, यः विश्वरूपः, यः अमृतात् छन्दोभ्यः अधि सम्बभूव, सः इन्द्रः मा मेधया स्पृणोतु। हे देव, अहम् अमृतस्य धारणः भूयासम्। मे शरीर विचर्षणं भवतु। मे जिह्वा मधुमत्तमा भवतु। अह कर्णाभ्यां भूरि विश्रुवम्। हे देव, ओङ्कार, त्वं ब्रह्मणः कोशः असि। त्वं मेधया पिहितः। मे श्रुतं गोपाय ॥ ॥ ओं शान्तिः शान्तिः शान्तिः॥

अन्वयार्थः—यः ओङ्कारः छन्दसां वेदानां ऋषभः श्रेष्ठः, विश्वरूपः सर्वव्यापकश्च अस्ति। यश्च ओङ्कारः अमृतेभ्यः छन्दोभ्यः वेदेभ्यः सारत्वेन सम्बभूव। तादृशः ईदृशश्च इन्द्रः सर्वसमर्थः ओङ्कारः मा मां मेधया प्रज्ञया स्पृणोतु वर्धयतु। हे ओङ्कारस्वरूपिन् परमात्मन्, अहम् अमृतस्य आत्मज्ञानस्य धारणः धर्ता भूयासम्, भवानि। मे मम शरीरं विचर्षणं विचक्षणं आत्मज्ञानयोग्यं भवतु।

मे मम जिह्वा मधुमत्तमा मधुरतमभाषिणी भवतु। अहं द्वाभ्यामपि कर्णाभ्यां भूरि अधिकं विश्रुवम् श्रोता भवेयम्। अधिकं वेदान्तसन्देशम् अहं शृणुयाम्। हे ओङ्कार, त्वं ब्रह्मणः परमात्मनः कोशः रक्षकः असि। त्वं मेधया लौकिकप्रज्ञया पिहितः आच्छादितः असि। मे मम श्रुतं, सद्गुरुभ्यः यत् श्रुतं तत् गोपाय मयि एव सर्वदा रक्ष॥

तात्पर्यार्थः—अत्र मन्त्रे ओङ्कारस्वरूपिणं परमात्मानं प्रार्थयते साधकः। सर्ववेदशास्त्रसारभूतः यः ओङ्कारः, यश्च ओङ्कारः विश्वरूपः सर्वात्मा अस्ति, सः सर्वजगत्कारणभूतः ईश्वरः मां विद्यार्थिनं प्रज्ञया वर्धयतु। ओङ्कारात्मा परमेश्वरः मह्य प्रज्ञां, श्रद्धां, विद्यां, बुद्धिं, मेधाम् आत्मज्ञानबलं च ददातु। हे ओङ्कारात्मन् परमेश्वर, त्वदनुग्रहेण अहम् अमृतस्य आत्मज्ञानस्य धारणो भूयासम्। ब्रह्मात्मज्ञानभाजनभूतो भूयासम्। मम शरीरेन्द्रिय मनःप्राणादिकलापश्च **आत्मज्ञानप्राप्तियोग्यो भवतु**। मम जिह्वा सर्वदा मधुरभाषिणी भवेत्। न कदापि अहं कठोरवाक् भवेयम्। द्वाभ्यामपि कर्णाभ्याम् अहं सर्वदा ब्रह्मविचारमेव शृणवानि। वेदान्त सन्देशानेव अहं सदा सर्वत्र शृणुयाम्। हे ओङ्कारस्वरूपिन् प्रणव, त्वं परब्रह्मणः कोशोऽसि। प्रणवोपासनद्वारा हि परब्रह्मणः दर्शनं भवति। अतः ओङ्काराश्रयेण तदन्तर्गतस्य तत्प्रतिपाद्यस्य परस्य ब्रह्मणः विज्ञान भवति इत्यर्थः। हे परमात्मन्, त्वं लौकिकप्रज्ञया अपिहितोऽसि। प्राकृताः शास्त्रीयसस्काररहिताः केवललौकिक-व्यवहारनिमग्नाः जनाः ओङ्कारमहिमानं न जानीयुः इत्यर्थः। हे ओङ्कारस्वरूपिन् परमेश्वर, सद्गुरुभ्यः यत् मया श्रुतं तत् मयि सम्यक् गोपाय, मननिदिध्यासनयोग्यं कुरु इत्यर्थः॥

८. कृष्णयजुर्वेदीय **तैत्तिरीयोपनिषदि** शीक्षावल्ल्या:—

ओम्। अहं वृक्षस्य रेरिवा। कीर्ति: पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणगँ् सवर्चसम्। सुमेधा अमृतोक्षित:। इति त्रिशङ्कोर्वेदानुवचनम्॥

॥ ओं शान्ति: शान्ति: शान्ति:॥

पदच्छेद:—अह वृक्षस्य रेरिवा। कीर्ति: पृष्ठं गिरे: इव। ऊर्ध्वपवित्र: वाजिनी इव स्वमृतम् अस्मि। द्रविणम् सवर्चसम्। सुमेधा: अमृतोक्षित:। इति त्रिशङ्को: वेदानुवचनम्॥

॥ ओं शान्ति: शान्ति: शान्ति:॥

अन्वयक्रम:—ससारवृक्षस्य अह रेरिवा। मम कीर्ति: गिरे पृष्ठम् इव। अहम् ऊर्ध्वपवित्र: वाजिनी इव स्वमृतम् अस्मि। अहं सवर्चस द्रविणम् अस्मि। अह सुमेधा: अमृतोक्षित: अस्मि। इति त्रिशङ्को: महर्षे: वेदानुवचनम्॥

अन्वयार्थ:—अह ससारवृक्षस्य रेरिवा प्रेरयिता। मम कीर्ति: गिरे: पृष्ठमिव व्यापृतास्ति। अहम् ऊर्ध्वपवित्र: श्रेष्ठ-ब्रह्मास्मि। अहम् वाजिनी इव सूर्य इव, स्वमृतम् अस्मि, अमृतं मङ्गळं पवित्रं ब्रह्मैवास्मि। अहमेव सवर्चस प्रकाशमान, द्रविणं धनमस्मि। अह सुमेधा: श्रेष्ठबुद्धिमान् अस्मि। अमृतोक्षित: अहम्। अमृताद् ब्रह्मण: उद्गतोऽस्मि। ब्रह्मस्वरूप एव अहमस्मि। इति एव त्रिशङ्को: महर्षे:, ब्रह्मनिष्ठस्य वेदानुवचनम् स्वात्मानन्दस्य उद्गार:॥

तात्पर्यार्थ:—अत्र मन्त्रे त्रिशङ्कुमहर्षे. स्वानुभवद्योतक: उद्गार: वर्तते। तद्यथा, अस्य ब्रह्मादिस्तम्बपर्यन्तस्य ससारवृक्षस्य

अहमेव प्रेरयितास्मि। सर्वात्मकस्य मम कीर्तिः हिमालयस्येव उन्नता अस्ति। मे यशः सर्वव्यापकं सर्वविदितं च इत्यर्थः। सूर्य इव अहं तेजस्वी अस्मि। चिन्मात्रब्रह्मनिष्ठत्वान्मम। अहमेव धनम्, अहमेव सर्वा सम्पत्, अहमेव प्रज्ञानघनः आत्मा। अहमेव अतिबुद्धिमान्, मेधाशक्तिसम्पन्नश्चास्मि। अहमेव अमृतात् ब्रह्मणः उद्गतोऽस्मि। अहम् अमृतं परमेव ब्रह्मास्मि इत्यर्थः। ब्रह्मनिष्ठस्य सर्वात्मभावमापन्नस्य त्रिशङ्कोः महर्षेः वचनमिदम्। ब्रह्मनिष्ठस्य यस्यकस्यापि, सर्वस्यापि ईदृशः अनुभवः उद्गारश्च समान एव॥

९. **ऋग्वेदीय**शान्तिमन्त्रः—

ओम्॥ भद्रं नो अपिवातय मनः॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—भद्रम्, नः, अपिवातय, मनः।

अन्वयः—नः मनः भद्रम् अपिवातय

तात्पर्यार्थः—हे परमात्मन्, नः अस्माकं मनः सदा अपिवातय मङ्गळं परिवर्तय आत्मज्ञानयोग्यं कुरु इत्यर्थः॥

१०. कृष्णयजुर्वेदीय**श्वेताश्वतरोपनिषदि** शान्तिमन्त्रः—

ओम्॥ यो ब्रह्माणं विदधाति पूर्वम्
यो वै वेदाग्ंश्च प्रहिणोति तस्मै।
तग्ं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

पदच्छेदः—यः ब्रह्माणम् विदधाति पूर्वम्, यः वै वेदान् च प्रहिणोति तस्मै, तम् ह देवम् आत्मबुद्धिप्रकाशम्, मुमुक्षुः वै शरणम् अहं प्रपद्ये॥

अन्वयक्रमः—यः परमात्मा ब्रह्माणम् पूर्वम् विदधाति, च यः तस्मै वेदान् प्रहिणोति, आत्मबुद्धिप्रकाशं तं देवम्, मुमुक्षुः अहं साधकः शरणं प्रपद्ये॥

अन्वयार्थः—यः परमात्मा पूर्वं सृष्टेः प्राक्, ब्रह्माणं विराट्पुरुषं विदधाति सृजति, यः परमात्मा तस्मै ब्रह्मणे वेदान् ऋग्वेदादीन् प्रहिणोति प्रेषयति, मम बुद्धिप्रकाशं तं देवं चिन्मात्रम्, मुमुक्षुः अहं शरणं प्रपद्ये, शरणं गच्छामि॥

तात्पर्यार्थः—चिन्मात्रस्वरूपः योऽसौ भगवान् सृष्टेः पूर्वं हिरण्यगर्भम् अपरं ब्रह्म सृष्ट्वा अनन्तरं तस्मै विराट्पुरुषाय सर्वज्ञकल्पान् वेदान् प्रेषयति अनुगृह्णाति, तम् आत्मबुद्धिप्रकाशं सर्वबुद्धिसाक्षिणं परमात्मानम् अहं मुमुक्षुः शरणं गच्छामि। ईश्वरानुग्रहादेव खलु मुमुक्षोः वेदान्तवाक्यार्थविचारे आसक्तिः प्रवृत्तिश्च भवेत्। तस्मात् सर्वैः मुमुक्षुभिः प्रप्रथमतः ईश्वररूपिसद्गुरु शरणैर्भाव्यम् इत्यर्थः॥

११. ब्रह्मविद्याचार्यपरम्परायै नमस्काराः

ओम्॥ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो महद्भ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि, ब्रह्मैवाहमस्मि॥

॥ ओं शान्तिः शान्तिः शान्तिः॥

॥ ओं वेदान्तभास्कराय नमः॥

विद्वद्भ्यः वेदमूर्तिभ्यः श्री के. जि. सुब्रायशर्मभ्यः
सङ्घसंस्थाभिः गुरुपीठैश्च प्रदत्ताः "गौरवप्रशस्तयः"

१. अध्यात्मविद्यानिलयः, अध्यात्मप्रकाश कार्यालयः,
होळेनरसीपुरम् "**अध्यात्मविद्याप्रवीणः**"—१९७८

२. वेदधर्मपरिपालन सभा (रि.), मल्लेश्वरम्, बेङ्गलूरु
"**वेदविद्याभूषणम्**"—१९८१

३. श्रीशङ्करसेवासमिति ट्रस्ट् (रि.) चामराजपेटे, बेङ्गलूरु
"**अद्वैतज्ञानसिन्धुः**"—१९९२

४. श्रीहम्पी विरूपाक्षविद्यारण्य महासंस्थानम्, हम्पी
"**विद्याविधिनिधिः**"—१९९२

५. वेदधर्मपरिपालन सभा (रि.) मल्लेश्वरम्, बेङ्गलूरु
"**वेदान्तवारिधिः**"—१९९४

६. बी. टि. यं. ब्राह्मण सभा, बी. टि. यं. द्वितीय विभागः,
बेङ्गलूरु "**वेदान्तभास्करः**"—१९९७

७. ऐ. टि. ऐ. ब्राह्मिन्स् वेल्फेर् असोसियेषन्, बेङ्गलूरु
"**वेदान्तसरस्वती**"—१९९८

८. परमार्थविचार सङ्घ ट्रस्ट् (रि.) विश्वेश्वरपुरम्, बेङ्गलूरु
"**वेदान्तसार्वभौमः**"—१९९८

९. के. जि. सुब्रायशर्मा सुवर्णवर्धन्ती अभिनन्दन समितिः,
बेङ्गलूरु "**वेदान्तराजहंसः**"—१९९८

१०. शाङ्करभाष्य अध्ययन सङ्घः, त्यागराजनगरम्, बेङ्गलूरु
''**वेदान्तकामधेनुः**—१९९८

११. सुवर्णमहोत्सव 'अभिनन्दन ग्रन्थ' समितिः, बेङ्गलूरु
''**विवेकभास्करः**''—१९९८

१२. श्रीहम्पी विरूपाक्षविद्यारण्य महासंस्थानम्, हम्पी
''**वेदान्तकेसरी**''—१९९८

१३. ब्रह्मसूत्रशाङ्करभाष्य मङ्गळोत्सव समितिः, बेङ्गलूरु
''**वेदान्तचिन्तामणिः**''—१९९८

१४. वेदाध्ययनकेन्द्रम्, जे. पि, नगरम्, बेङ्गलूरु
''**वेदश्रीः**''—१९९९

१५. श्रीवाल्मीकि गमक पाठशाला, मैसूरु
''**अद्वैतवेदान्तकेसरी**''—२००१

१६. श्रीशङ्करसेवासमितिः, शारदाम्बा नगरम्, बेङ्गलूरु
''**अद्वैत ज्ञानतेजाः**''—२००१

१७. गणपति सच्चिदानन्द श्रीदत्तावधूत पीठम्, दत्तनगरम्, मैसूरु
''**शास्त्रनिधिः**''—२००२

१८. हैद्राबाद् कर्णाटक ब्राह्मण महासभा, गुल्बर्गा
''**वेदान्तसागरः**''—२००२

१९. भगवद्गीता सेवा समिती, ताळिकोटि, बिजापुरम्
''**वेदान्तरत्नम्**''—२००२

२०. श्रीचन्द्रमौळीश्वरस्वामिदेवालयः, क्यात्सन्द्र, तुमकूरु जिल्ला "**अद्वैतसारतिलकः**"—२००३

२१. विशाखाश्रीशारदापीठम्, चिनमुषिडिवाड, विशाखपट्टणम्, आन्ध्रप्रदेशः "**वेदान्तचक्रवर्ती**"—२००४

२२. रागीगुड्डु श्रीप्रसन्न आञ्जनेयस्वामि भक्तमण्डलि ट्रस्ट्, बेङ्गलूरु "**वेदान्तप्रभाकरः**"—२००४

२३. श्रीकामाक्षी शारदाम्बा महासन्निधानं, श्रीघनपुरी संस्थानम्, श्री कोदण्डाश्रममठः, हेब्बूरु, तुमकूरुजिल्ला "**अद्वैतवेदान्तवारिधिः**"—२००४

२४. श्रीशङ्करजयन्ती महोत्सव सेवासमितिः बेङ्गलूरु "**अद्वैतवेदान्तचूडामणिः**"—२००५

२५. बी. हेच्. ई. एल्, ब्राह्मणर क्षेमाभिवृद्धि मत्तु सांस्कृतिक सङ्घ (रि.), बेङ्गलूरु "**अद्वैतवेदतिलकः**"—२००५

२६. परमार्थ विचारसङ्घ ट्रस्ट् (रि.) मत्तु श्री कन्यकापरमेश्वरी देवस्थान ट्रस्ट् (रि.), बेङ्गलूरु "**अद्वैतवेदान्तविचक्षणः**"—२००५

२७. जगद्गुरु श्रीमन्मध्वाचार्य मूल महासंस्थानं, श्री राघवेन्द्रस्वामि मठः, मन्त्रालयः H. H. 1008 Sri Sri Sushameendra Teertha Swamiji's 80th Vardhanthi Celebrations National Committee, at Sri Tirupathi Tirumalai, Sri Sreenivasa Sannidhanam,

Aasthaana Mantapam, Tirupathi. In the august presence of Justice Sri M. Rama Jois, Hon. Chairman; Sri P. G. R. Sindhya, Hon. Executive President; Sri Vishweshwara Bhatt, Chief Co-ordinator; Sri M. S. Prakash, Hon. Secretary General; Dr. M. Balamuralikrishna, Dr. K. J. Jesudas, Dr. R. K. Srikantan and other Honourable Members and Chief guests.

''श्रीश्री सुशमीन्द्रतीर्थस्वामीजि **ज्ञानपुरस्कारः**''—२००५

२८. कर्नाटक सर्वकारः बेङ्गलूरु
सुवर्ण कर्नाटक ''**राज्योत्सव प्रशस्ति**'' २००५ पुरस्कारः

२९. श्रीआदिशङ्कराचार्य श्रीशारदा लक्ष्मीनरसिंहपीठम्,
'श्रीमठम्', हरिहरपुरम्-५७७१२०. चिक्कमगलूरु जिल्ला
''वेदान्तसारतिलकः'' २००६

३०. श्रीत्यागराजगानसभा रि. मत्तु श्रीमूकाम्बिका ताळवाद्य सङ्गीत कलाशाला, राजाजिनगरम्, बेङ्गलूरु
''वेदागमविद्यासागरः'' २००६

श्री सुब्रायशर्मणां वैदुष्यं समाजसेवां च वीक्ष्य अनेकाभिः सङ्घसस्थाभिः, महाजनैः, नैकैः गुरुपीठैश्च एतेभ्यः अनेकाः प्रशस्तयः प्रदत्ताः सन्ति। इमे सर्वेऽपि उपाधयः श्रीशर्मभ्यः अन्वर्थाः सन्तः शोभन्ते। न कथञ्चिदपि तु श्री शर्मणाम् ऋणम् अपाकर्तुं शक्यते इत्यहं मन्ये॥

प्रोफेसर् एस्. के. रामचन्द्रराव्

॥ ओं शान्तिः शान्तिः शान्तिः॥

कर्णाटकभाषायां रचितस्य ''वेदान्तसंवत्सरा''ख्यस्य ग्रन्थस्य विषये विदुषाम् 'अभिप्रायसारसङ्ग्रहः'। (संस्कृतभाषानुवादः)

वेदान्तसंवत्सराख्यो ग्रन्थोऽयम् अस्माकं समयम् अत्युत्तमरीत्या सम्यक् यापयितुम् अत्यंतं सहायकारी भवति॥

दिनाङ्कः २२-७-२००४ स्वामी हर्षानन्दपुरी
अध्यक्षः, रामकृष्णमठः, बेङ्गलूरु

* * *

श्लोकसाहित्यरूपेण अवतारितोऽयं **वेदान्तसंवत्सराख्यो** ग्रन्थः उपनिषद्वाक्यपुष्पमालारूपः। अत्रत्याः औपनिषदाः सन्देशाः अज्ञाननिद्राप्रसुप्तान् सकलानपि मानवान् नूनम् उत्थापयन्ति॥

दिनाङ्कः २२-७-२००४ श्रीश्रीरङ्गप्रियश्रीपादश्रीः

* * *

परमसन्मान्यैः निरन्तरं स्वाध्यायप्रवचननिमग्नैः परमसज्जनैः विद्याविनयसंपन्नैः अध्यात्मविद्याप्रवीणैः आचार्यवर्यैः ब्रह्मज्ञानिभूतैः वेदब्रह्मश्री के. जि. **सुब्रायशर्मभिः** भक्तिपूर्वकं रचितस्य **वेदान्तसंवत्सराख्यस्य** ग्रन्थरत्नस्य लब्धं स्वागतं तु अद्भुतमेव। इदंप्रथममेतत्। ''**तथाविधं प्रेम पतिश्च तादृशः**'' इति हि काळिदासेन उक्तमस्ति? तथा च गुरुभक्तेः महिमानं वा गुर्वनुग्रहं वा कृत्स्नतया को वा जानीयात्? **श्री सुब्रायशर्मणां सद्गुरुसेवातपःफलमिदम् 'वेदान्तसंवत्सरः'॥**

दिनाङ्कः २१-७-२००४ डा॥ एन्. एस्. अनन्तरङ्गाचार्यः

* * *

''आ सुप्तेः आ मृतेः कालं नयेद् वेदान्तचिन्तया'' इति सूक्तिम् अनुतिष्ठद्भिः गुरुभक्तैः **सुब्रायशर्मभिः** रचितोऽयं ग्रन्थः **वेदान्तसंवत्सराख्यः**। सर्वैरपि मानवैः अवश्यमेव अध्येतव्यमिदं ग्रन्थरत्नम्। अध्येतॄन् कृतार्थानेव करोत्ययं ग्रन्थः॥

दिनाङ्कः २२-७-२००४ डा॥ यं. के. भारतीरमणाचार्यः

सर्वथा सेव्यमानो वै ग्रन्थो ''वेदान्तवत्सरः''।
शुभं तनोतु सर्वेषां जिज्ञासूनां मुदावहः॥

अनुसन्धानयोग्यैः उपनिषद्वचनैः शोभते **श्रीकोशोऽयम्**। मनःशान्त्यै सुधासारोऽयम्। लोकस्य महोपकार कर्तुं, श्री सुब्रायशर्मभिः सदा वेदन्तोपन्यासैरेव जीवद्भिः रचितमिदं ग्रन्थरत्नं प्रकाशते इति सर्वथा प्रशंसनीयमेवैतत्। **आत्मज्ञानापेक्षिणां करस्थदीपोऽयम् ग्रन्थः 'वेदान्तसंवत्सरः'॥**

दिनाङ्कः २३-७-२००४ विद्वान् शेषाचलशर्मा

''आ सुप्तेः आ मृतेः कालं नयेद् वेदान्तचिन्तया'' इति वाक्यमनुसृत्य प्रतिदिन पञ्च वेदान्तप्रवचनानि कुर्वद्भिः **सुब्रायशर्मभिः** रचितोऽयं ग्रन्थः **वेदान्तसंवत्सराख्यः**। **'गुरोः अनुगुणः शिष्यः, शिष्यस्यानुगुणो गुरुः'** इतीदं वचः **श्रीसुब्रायशर्मसु** सार्थक भवति इत्येतत् **वेदान्तसंवत्सर** ग्रन्थपाठकानां सुवेद्यं भवति। **सद्गुरुकृपाशीर्वादः श्री शर्मसु सम्यक् फलति।** सद्गुरुभक्तपुङ्गवैः **वेदब्रह्मश्री के. जि. सुब्रायशर्मभिः** रचितमिदं ग्रन्थरत्नम् उपनिषदां तात्पर्यं दर्शयति। स्वगुरूणाम् अवशिष्टं कार्यं **श्री शर्माणः** ग्रन्थलेखनद्वारा निर्वर्तितवन्तः इत्यत्र संशयो नास्ति॥

दिनाङ्कः २६-७-२००४ विद्वान् एन्. रङ्गनाथशर्मा

वेदान्तसंवत्सराख्यस्य ग्रन्थस्य रचयितारः **श्रीसुब्रायशर्माणः श्री श्री सच्चिदानन्देन्द्रसरस्वतीमहास्वामिनां साक्षात् परमशिष्याः**, षोडशसंवत्सरपर्यन्तं (1959 to 1975) कृतसद्गुरुचरणसेवाः। तत्त्वजिज्ञासुभ्यः प्रत्यहं मननीयैः अनर्घ्यवेदान्तसन्देशैः परिपूर्णोऽयं ग्रन्थः। चत्वारिंशत् संवत्सरेभ्यः (from 1965 till now) एतद्दिनपर्यन्तं प्रतिदिनं पञ्चाधिकवेदान्तप्रवचनपरायणैः सद्गुरुभक्तैः **श्री सुब्रायशर्मभिः** रचितमिदं कृतिरत्नम्॥

दिनाङ्कः २३-७-२००४ विद्वान् मत्तूरु सु. अश्वत्थनारायणावधानी

* * *

"**कर्नाटक शङ्कराचार्याः**" इत्येव नाम्ना जगद्विख्यातानां **श्री श्री सच्चिदानन्देन्द्रसरस्वतीमहास्वामिनां** साक्षात् शिष्यभूतैः, **षोडशसंवत्सरपर्यन्तं** (१९५९-१९७५) सद्गुरुसेवापरायणैः लब्धसद्गुरुप्रसादैः **वेदब्रह्मश्रीभिः के. जि. सुब्रायशर्मभिः** रचितोऽयं ग्रन्थः सद्गुरुकृपया एव मुद्रणात् पूर्वमेव द्वादशसहस्रसङ्ख्याकाः प्रतयः वाचकैः आरक्षीकृताः इति महदाश्चर्यमेवैतत्।

दिनाङ्कः २९-८-२००४ प्रोफेसर् एस्. के. रामचन्द्रराव्

* * *

लब्धजन्मान्तरसंस्कारैः उत्तममुमुक्षुभिः अयं ग्रन्थः श्रद्धया अधीयते चेत् ते रामकृष्णपरमहंससदृशाः भगवान्रमणमहर्षि समाश्च नूनं भवेयुः।

दिनाङ्कः २-१०-२००४ विद्वान् मत्तूरु मार्कण्डेयावधानी

* * *

श्री सुब्रायशर्मणां पञ्चत्रिंशत्संवत्सरपर्यन्तं कृतवेदान्त प्रवचनश्रमाणां तपःफलमिदं कृतिरत्नम्। उपनिषन्महासागरात् उद्धृतानि महामन्त्ररत्नानि अस्मिन् ग्रन्थे सुग्रथितानि भवन्ति॥

दिनाङ्कः २४-९-२००४ विद्वान् अनन्तशर्मा भुवनगिरिः

* * *

विद्वत्पूर्णोऽयं ग्रन्थः। उपनिषद्वाक्यैः परिपूर्णोऽयं ग्रन्थः। यतीना, वानप्रस्थानां, गृहिणा, स्त्रीणां, विद्यार्थिना, प्रवचनकाराणां, साधकाना, दुःखिनां, वृद्धाना च—सर्वेषाम् अपि अत्यन्तम् प्रयोजनाय भवति॥

दिनाङ्कः १०-१०-२००४ हरिकृष्ण पुनरूरु, अध्यक्षः
बेङ्गलूरु-१८ कन्नडसाहित्यपरिषत्तु

* * *

सद्गुरुकृपया दिगन्तसुप्रसिद्धसत्कीर्तयः सद्गुरुभक्ताः **सुब्रायशर्माणः** अनितरसाधारणम् असाध्यं कर्म "**वेदान्त-संवत्सर**" ग्रन्थरचनद्वारा कृतवन्तः। '**शर्मा विग्रहवान् विनयः**'

दिनाङ्कः ९-१०-२००४ विद्वान् एन्. वि. अनन्तरामय्यः

* * *

वेदान्तसंवत्सराख्यः ग्रन्थोऽयं अन्वर्थः। जिज्ञासूना परम-पुरुषार्थसाधनभूत परमात्मज्ञान सुलभतया दर्शयत्ययं ग्रन्थः। सर्वमपि समञ्जसम् आकर्षक च॥

दिनाङ्कः ११-१०-२००४ लक्ष्मीनारायण ऐताळ्

* * *

Truly, Sri K. G. Subraya Sharma has assumed the magnificent role of a **spiritual emissary of Sri Sri Satchidanandendra Saraswathi Swamiji of revered memory just as Swami Vivekananda was of Sri Ramakrishna Paramahamsa.**

With a simple but attractive get up and contents which are highly profound and sublime, the book **"Vedaanta Samvatsara"** by Shri K. G. Subraya Sharma induced me to scan and scrutinize more than 380 tenets culled out from fourteen Upanishads. In fact if the reader sincerely follows the directions given by the erudite and experienced scholar and imbibes the lofty spiritual teachings, he is bound to undergo a complete transformation to have a new beneficial perspective and outlook on life. The author's judicious selection of the Upanishadic Mantras pregnant with esoteric concepts and his simple, lucid, inimitable style of elucidating even the most terse verse will not fail to create a yearning desire to study the **Prasthana Traya Bhashya** of Adi Shankara at the holy feet of a Sadguru who is both a "Shrotriya" and "Brahmanishta" like Sri Subraya Sharma.

I was highly elated and felt 'honoured'. I had the pleasure, nay, the fortune, of knowing Shri Sharma right from the time he stayed at the Thyagarajanagar Karyalaya with Shri Shri Swamiji, of revered memory as soon as the building was ready for occupation in early 70's. I have watched with all admiration his meteoric rise in the spiritual world soon after his Guru gave up his mortal coil in 1975. **It is no exaggeration when I say that**

he single-handedly enhanced the reputation of Adhyatma Prakasha Karyalaya as a leading seat of pristine pure Advaita Vedanta of Adi Shankara. He has trekked in the footsteps of his Guru and has successfully carried forward the task of a revival of the hoary, ancient tradition.

I can vividly visualize memorable milestones of his spiritual achievements. For nearly four decades Sri Sharma has been giving discourses at more than half a dozen centres daily spread all over the metropolis of Bangalore and in nearby places. His physical stamina and mental will power are simply stupendous and unrivalled. His innovative genius prods and prompts helped him to come out with ever new novel devices in his relentless efforts to propagate Vedanta. He has authored many beautiful treatises, which have become very popular. **His brain-child and internationally famous quarterly, 'Shankara Bhaskara', has over 20,000 subscribers spread all over India and many Western countries.** The present venture—**'Vedanta Samvatsara'**—is a book of which more than 10,000 copies are already sold out before publication.

May his Guru's benign blessings and Paramaatman's divine grace grant him a long, prosperous life and induce him to achieve greater objectives in the years to come!

Date: 18-9-2004
Vyasagiri, Kerala

D. B. Gangolli
An ardent follower of Shri Shri Swamiji

* * *

अज्ञानमलपरिहाराय उपयुक्तोऽयं ग्रन्थ: **वेदान्त-संवत्सराख्य:**। तत्त्वज्ञानस्य, साधनानां च स्वरूपं दर्शयतीदं कृतिरत्नम्।

दिनाङ्क: २४-९-२००४ टि. आर्. लक्ष्मीनरसिंहय्य:

* * *

I received your book **"Vedanta Samvatsara".** I am glad to know your book also contains an appreciation letter from Swami Harshananda.

Our country needs the spread of Vedantic ideas all over to-day. That is what Swami Vivekananda did and asked us to do, and you are doing the same thing. As the book is in the people's language, Kannada, the people of Karnataka will be benefitted very much.

Date: 9-9-2004 Swami Ranganathananda
Ramakrishna Math President
Belur Math, West Bengal

* * *

देवरातमहर्षिवत् वेदान्तभास्करसाधकै: **श्रीसुब्रायशर्मभि:** रचितमिदम् अभूतपूर्वम् अद्भुतं च ग्रन्थरत्नम् "**वेदान्त संवत्सराख्यम्**"। श्री श्रीधरसद्गुरुवत्, शृङ्गेरी श्री चन्द्रशेखर भारतीसद्गुरुवत्, श्री काञ्चीमहाचार्यवत्, विवेकानन्दस्वामिवत् अस्माकं पुरत: अद्य विराजमानै: **श्री शर्मभि:** धर्मोद्धाराय, वेदान्तसन्देशप्रसाराय च अयं ग्रन्थ: रचितोऽस्ति॥

दिनाङ्क: १७-९-०४ केळदि गुण्डाजोयिस्

* * *

रामायण भगवद्गीता श्रीविष्णुसहस्रनामादिवत् अयं **वेदान्त संवत्सराभिधो** ग्रन्थः साधकानां चिन्तनशीलानां च आत्मज्ञान-बोधकः नित्यपारायणग्रन्थः। आधुनिकजनानां मनोधर्ममनुसृत्य सनातनवेदान्तसन्देशान् उपदिशत्ययं ग्रन्थः। **श्रीसुब्रायशर्मणां** श्लोकरचनसरणिः, तात्पर्यावबोधश्च रसपूर्णः। **प्रशस्तिपात्र-भूतोऽयम् अद्भुतग्रन्थः॥**

दिनाङ्कः १८-९-२००४ प्रोफेसर् जि. अश्वत्थनारायण

* * *

The book "**Vedanta Samvatsara**" is a marvellous work. I glanced through the contents and was inspired by the selection and presentation of Vedantic thoughts. They have been given very good titles which summarise the thought for the day.

May Bhagavan Sri Ramakrishna, Holy Mother Sri Sharada Devi and Swami Vivekananda shower their choicest blessings on this author.

Date: 3-9-2004 Swami Purushottamananda
Belgaum Ramakrishna Mission Ashram

* * *

ಈ ಮುನ್ನ **'ಶಾಂಕರ ಸಂವತ್ಸರ'**,
ತದನಂತರ **'ವೇದಾಂತ ಸಂವತ್ಸರ'**; ದಿನದಿನವೂ ಕ್ಷಣಕ್ಷಣವೂ
ತವಕೃತಿಯಿಂದ, ಶಿವಬದುಕಾಗಿ ಪರಿತಪಿಸುವ
ಜನ ಸಾಮಾನ್ಯನ ಬಾಳು ಪುಣ್ಯ....ಪುಣ್ಯ....ಪುಣ್ಯ॥

ಕೈವಲ್ಯವನ್ನು ಕೈಗೇ ಎಟುಕಿಸಿದ ಶರ್ಮಾಜಿ, ತಾವು ಗಣ್ಯ...
ತಾವು ಧನ್ಯ....ಧನ್ಯ....ತಾವು ಮಾನ್ಯ

ತಾ॥ ೨೦-೯-೨೦೦೪ ಹಿರೇಮಗಳೂರು ಕಣ್ಣನ್

आस्तिकबन्धूनां विदुषां सनातनधर्मावलम्बिनां च अत्यन्तम् उपयुक्तोऽयं ग्रन्थः। वेदान्ताध्ययनशीलिनां मार्गदर्शकश्च।

दिनाङ्कः ९-९-२००४ यडतोरे श्री योगानन्देश्वरसरस्वती मठः

* * *

अत्यन्तोत्तमरीत्या अत्यन्तप्रयोजनकारितया च मुद्रितोऽयं ग्रन्थः **वेदान्तसंवत्सराख्यः**।

दिनाङ्कः ३०-९-२००४ धर्मस्थल डि. वीरेन्द्रहेग्गडे

* * *

We are in deep appreciation of your laudable efforts for promotion of the study of Vedanta through writing books like **"Vedanta Samvatsara"** etc.

Date: 6-9-2004 Sri Chitrapur Mutt Swamiji

* * *

वेदान्तसंवत्सराख्यः अयं ग्रन्थः जनाकर्षकः साधकानां बहूपयोगी च दृश्यते। जनप्रियश्चास्ति॥

दिनाङ्कः ९-९-२००४ श्रीरामकृष्णाश्रमः, मैसूरु

* * *

'न रत्नमन्विष्यति मृग्यते हि तत्' इति महाकवि काळिदासस्य वचनम्। एतद्वचनानुसारेण अनेकगौरवप्रशस्तिमण्यः स्वयमेव **वेदब्रह्मश्री सुब्रायशर्मणः** अन्विष्य समागताः। वेदान्ते कृतभूरिश्रमैः श्री शर्मभिः रचितोऽयं ग्रन्थः **वेदान्तसंवत्सराख्यः** कालचक्रमपि वेदान्तमयं कृतवानस्ति। वेदान्तसौभाग्यमेवैतत्॥

दिनाङ्कः १८-१०-२००४ विद्वान् शेषाचलशर्मा

उपनिषन्मन्त्राणां सुवृष्टिरेवास्त्यत्र। सुन्दरश्लोकैः विवरणैश्च परिपूर्णोऽयं ग्रन्थः। रक्षाकवचं, मुद्रणविन्यासश्च चित्ताकर्षकः चेतोहारी चास्ति। All the 385 articles in this book are short and sweet.

दिनाङ्कः ३१-८-२००४ वे॥ एं. एस्. चन्द्रमौळि अवधानी

* * *

हस्तौ प्रक्षाल्य स्प्रष्टव्यमिदं ग्रन्थरत्नम्। गम्भीरसरळैः शास्त्रीयैः लेखनैः परिपूर्णोऽयं ग्रन्थः। भगवत्याः सरस्वत्याः प्रेरणया रचितोऽयं ग्रन्थः। सद्गुरुसेवाफलमिदं पुस्तकरत्नम्॥

दिनाङ्कः ३-९-२००४ हेच्. एस्. लक्ष्मीनरसिंहमूर्तिः, होळेनरसीपुरम्

* * *

वेदान्तसंवत्सराख्यमिदं कृतिरत्नं सर्वासाम् उपनिषदां सारं दर्शयति, **आध्यात्मिकप्रपञ्चे एव चिरस्मरणीयपात्रभूतमेतत्।** आध्यात्मिकमार्गे प्रवृत्तानां लौकिकानामपि वेदान्तामृतसिञ्चनं करोति अयं ग्रन्थः अद्भुतः अभूतपूर्वश्च॥

दिनाङ्कः १२-९-२००४ डि. एन्. शशिशेखरः

* * *

गगनं गगनाकारं, सागरं सागरोपमम्।
रामरावणयोर्युद्धं रामरावणयोरिव॥

इति सुप्रसिद्धं वचः। एवमेव **वेदान्तसंवत्सरो ग्रन्थः वेदान्तसंवत्सरोपमः**। अनितरसाधारणमिदं ग्रन्थरत्नम्। सर्वमानवानां जीवने सार्थक्यावहमिदम् अध्यात्मकृतिरत्नम्॥

दिनाङ्कः २४-९-२००४ विद्वान् आर्. वेङ्कटेश्

रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति इति वाक्यस्य अयं **वेदान्तसंवत्सराख्यो** ग्रन्थ एव दृष्टान्तः। जनानां वेदान्तेषु विशेषासक्तिमुत्पादयति अयं ग्रन्थः॥

दिनाङ्कः १७-१०-२००४ हेच्. आर्. चन्द्रशेखरः

* * *

अभूतपूर्वकृतिरत्नमिदं '**वेदान्तसंवत्सराख्यम्**, न भूतो न भविष्यति। अयं ग्रन्थः अखिले कर्नाटकराज्ये वेदान्तक्रान्तिमेव करोति। **''आ सुप्तेः आ मृतेः कालं नयेद् वेदान्तचिन्तया'' इति वाक्यं अन्वर्थम् सार्थकं कुर्वद्भिः श्री सुब्रायशर्मभिः रचितोऽयं ग्रन्थः मुमुक्षुलोकप्रयोजनाय भवति। लेखकस्य जनप्रियतायाः सत्कीर्तेश्च ज्वलन्तं साक्ष्यमिदं यत् ग्रन्थोऽयं द्वादशसहस्रप्रतिभिः मुद्रितः इति, अस्य ग्रन्थस्य मुद्रणात् पूर्वमेव दशसहस्रं प्रतयः विक्रीता इति च परमाश्चर्यावहमेव॥**

दिनाङ्कः १७-९-२००४ स्वामी पुरुषोत्तमानन्द, बेळगाम्

* * *

सद्गुरुभक्ताः वेदमूर्तयः के. जि. सुब्रायशर्माणः **स्वनामधन्याः, शाङ्करतत्त्वप्रसारमूर्धन्याः**, सज्जनतायाम् अनन्याः। **स्वगुरव एव श्रीशर्मणां सर्वस्वम्। शाङ्करसंवत्सरः वेदान्तसंवत्सरः, प्रबोधचिन्तामणिः** इति सुविख्यातानां ग्रन्थानां लेखकत्वेन च श्री शर्माणः सुप्रसिद्धाः विचारप्रबुद्धाश्च॥

दिनाङ्कः २१-५-२००५ शतावधानी डा॥ रा. गणेशः

॥ ओं शान्तिः शान्तिः शान्तिः॥

भारताम्बायाः सुपुत्रत्वेन
परमशिवस्य अंशत्वेन अवतीर्य
''प्रस्थानत्रयग्रन्था''नां भाष्याणि लिखित्वा
वेदान्तदर्शनभाष्यकारत्वेन सुप्रसिद्धेभ्यः
वेदान्ततत्त्वजिज्ञासूनां कामधेनुत्वेन
मुमुक्षुजनानां कल्पवृक्षत्वेन
अध्यात्मसाधकानां चिन्तामणित्वेन
अध्यात्मप्रपञ्चे वेदान्तभास्करत्वेन च
विराजमानेभ्यः अन्वर्थजगद्गुरुभ्यः
श्रीश्रीशङ्करभगवत्पूज्यपादाचार्येभ्यः
लेखकस्य के. जि. सुब्रायशर्मणः
भक्तिपूर्वकाः नमस्काराः समुल्लसन्ताम्

मूल्यम्: रूप्यकाणि २००/-

ABOUT THE AUTHOR

Vidwan K. G. Subraya Sharma, the author, has truly been blessed with the grace of his beloved Guru, **Sri Sri Satchidanandendra Saraswathi Swamiji** of revered memory. I fondly remember the many occasions we have conversed together in Sanskrit discussing the teachings and works of Sri Shankara Bhagavatpaadaachaarya.

I have always been impressed with the ease with which Sri Sharmaji can explain the concepts of Advaita with such simplicity and clarity.

It is with great pleasure that we present to the public the Sanskrit edition of **Vedanta Samvatsara.** I would encourage all teachers of Sanskrit to seriously consider using this book as a **Reader** for their students. This book of Sri K. G. Subraya Sharma, a renowned popular and profound Sanskrit scholar and a genuine Vedantin, affirms that **Sanskrit is as alive and vibrant as ever.**

Date: 5-6-2006
Hampshire, England

Subhanu Saxena
subhanu@hotmail.com

Sri Nithyananda Prakashana, Bangalore-50. ✆ 2652 6027 / 5767 0191